श्रीआत्मानन्द-ग्रन्थरत्नमाला-त्रिंशं रत्नम् (३०)

चन्द्रकुलाम्बरनिशाकरश्रीशान्तिसूरिसङ्कलितं स्वोपज्ञवृत्तिसमेतं

धर्मरत्नप्रकरणम् ।

न्यायाम्भोनिधिजैनाचार्यश्रीमद्विजयानन्दसूरीशशिष्यप्रवर्तकश्रीमत्कान्तिविजय-
मुनिपुङ्गवशिष्याणुमुनिश्रीचतुरविजयेन संशोधितम् ।

न्यायाम्भोनिधिजैनाचार्यश्रीमद्विजयानन्दसूरीशप्रशिष्यश्रीमद्हंसविजयमुनिपुङ्गवोपदिष्ट-अणहिल्लपुर-
पत्तनवास्तव्य-ओसवालज्ञातीय-श्रेष्ठिक्षेमचन्द्र-तनूज-उत्तमचन्द्र-द्रव्यसाहाय्येन
प्रकाशयित्री-भावनगरस्था-श्रीआत्मानन्दसभा ।

इदं पुस्तकं मुम्बय्यां वल्लभदास-त्रिभुवनदास गांधी सेक्रेटरी जैन आत्मानन्दसभा भावनगर इत्यनेन
निर्णयसागरमुद्रालये कोलभाटवीथ्यां २३, तमे गृहे रामचन्द्र येसू शेडगेद्वारा मुद्रयित्वा प्रकाशितम् ।

वीरसंवत् २४४०. आत्मसंवत् १९. विक्रमसंवत् १९७०.

Printed by Ramchandra Yesu Shedge at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay, and
Published by Vallabhadas Tribhuvandas Gandhi, Secretary, Jaina Atmananda Sabha, Bhavanagar.

॥ अर्हम् ॥

॥ धर्मरत्नप्रकरणप्रस्तावना ॥

इह हि प्रसिद्धसिद्धार्थपार्थिवपृथुतरकुलकमलबन्धुना निखिलब्रह्माण्डभाण्डोदरसंभविसमग्रप्राणिगणामेयानन्दमहानन्दसुखसंपत्संपादनागण्यकारुण्यसुधासिन्धुना त्रिजगद्बन्धुना केवलज्ञानापूर्वतपनप्रतापतिरस्कृताखिलमोहान्धकारेण देवाधिदेवेन श्रीमन्महावीरदेवेन. जैनशासनोन्नत्यसाधारणकारणं त्रिभुवनोदरवर्तिसमग्रपदार्थसार्थस्वरूपनिरूपणप्रवणं नयनिक्षेपातिगहनमतिसूक्ष्ममतिकसंप्राप्यपदार्थपरमार्थं शिवपुरपथपथिकानां परोपकाराय प्ररूपितं विशुद्धसिद्धान्तम् । तस्माज्जिनागमात्समुद्धृत्यास्मिन् करालकलिकाले कालानुभावेनानवरतहीयमानबुद्धिबलानां जिनागमानवगाहकमतिकानां संक्षिप्तरुचीनामैदंयुगीनभव्याङ्गिनां यथावस्थितवस्तुतत्त्वावगमाय साम्प्रतकालीनविशुद्धविशुद्धतरज्ञानाप्रतिमदीप्रदीपप्रकाशप्रणाशितमिथ्यात्वतिमिरस्तोमैः सूरिसार्वभौमैः परोपकारभूरिभिः पूर्वसूरिभिः सूक्ष्मविचारसारगर्भितान्यनेकानि प्रकरणरत्नानि रचितानि वरीवृत्त्यन्ते, तथेदमपि प्रकरणम् ।

अस्य सान्वर्थाभिधेयस्यातिगम्भीरार्थसार्थस्य सर्वदर्शिदर्शनमार्गदर्शकदीप्रदीपकल्पानल्पागमानुसारित्वेन प्रमाणभूतस्य सवृत्तिकस्य धर्मरत्नप्रकरणस्य के चारुचारित्राचारसमाचरणचतुरचेतश्चारित्रिचक्राञ्चितचरणकमला मुनिनेतारः प्रणेतारः ? इति विचारे जायमाने—

"तेसिं इमो भावत्थो, नियमइविभवाणुसारओ भणिओ । सपराणुग्गहहेउं, समासओ संतिसूरिहिं ॥ १४३ ॥"

इत्येतत्प्रस्तुतप्रकरणोपसंहारगाथायाम् "संतिसूरिहिं" इत्यन्तिमवाक्यावलोकनेन शान्तिसूरिभिरेतत्प्रकरणं कृतमिति स्फुटमेव प्रती-

यते । तथास्य वृत्तिरपि कैः कृता ' इत्येतद्विषयस्य निर्णयोऽपि वृत्तिप्रान्तप्रचरितप्रशस्त्याम्—

"प्रकरणमिदं गम्भीरार्थं महाश्रुतसागरा—दुपकृतिकृते सश्लोकानां समुद्धृतमादरात् ।
न जडमतिभिर्बोद्धुं शक्यं यतो विवृतिं विना, तदिति सुगमा स्वल्पा वृत्तिर्मया परिचिन्तिता ॥ १ ॥"

इत्याद्यपद्यावलोकनेन श्रीशान्तिसूरिभिरेवैषा वृत्तिर्विरचितेति स्फुटमेव निश्चीयते । तथा प्रशस्त्याः पष्ठश्लोकप्रान्ते × एतच्चिह्नं कृत्व पत्रान्ते लिखितस्य—

"चन्द्रकुलाम्बरविधुभिः, परोपकारैकरसिकचेतोभिः । श्रीशान्तिसूरिभिरियं, बुधप्रिया विरचिता वृत्तिः ॥"

इत्येतस्य पद्यस्य निर्वर्णनेनापि श्रीशान्तिसूरय एवास्या वृत्तेः कर्तार इति स्फुटमेवावबुध्यते । यद्यप्येतत्पद्यं संवत् १२७१ वर्षे लिखितपुस्तके चिह्नं कृत्वा पत्रान्ते लिखितमस्ति तथापि प्रशस्त्याः पष्ठश्लोकेन सह न संबध्यते तेन प्रक्षिप्तप्रायमेतत्पद्यमिति संभाव्यते, परं लिपिसारूप्यनिरूपणेन तत्काल एव लिखितत्वादवच्छिन्नपरंपरानो ज्ञातपूर्विणा केनापि शिष्यप्रशिष्यादिना वा प्रक्षिप्तमिति प्रतिभाति, अतोऽस्या वृत्तेः श्रीशान्तिसूरिकृतत्वं न विरोधावहम् । तेन स्वोपज्ञवृत्तिकं धर्मरत्नप्रकरणमिति श्रद्दधतेऽस्माकं चेतः ।

अस्य धर्मरत्नप्रकरणस्योपरि संप्राप्ततपागच्छबिरुदश्रीमज्जगच्चन्द्रसूरिसूत्रामशिष्यावतंसैर्विहितानेकप्रकरणचरित्रग्रन्थसमुद्भूतात्यद्भुतकीर्त्तिकौमुदीधवलिताखिलदिक्कैः श्रीमद्देवेन्द्रसूरीन्द्रैर्विरचिता प्रसिद्धिं प्राप्ताऽपराऽपि बृहद्वृत्तिर्वरीवृत्यते । परं सा चतुर्दशशताब्द्यारम्भे रचितत्वात् श्रीशान्तिसूरितोऽर्वाचीनेति बृहद्वृत्तिप्रशस्तिगतेन—

"प्रथमां प्रतिमप्रतिमं, बिभ्राणो गुरुजनेषु भक्तिभरम् । विद्वान्विद्यानन्दः, सानन्दमना लिलेखास्याः ॥ ९ ॥"

एतेन पद्येन प्रथमा प्रतिः पण्डितविद्यानन्दमुनिवरेण लिखितेति स्फुटमेवावगम्यते। विबुधविद्यानन्दमुनिप्रव्रज्याग्रहणकालस्तु बृहत्तपागच्छाधीशश्रीमन्मुनिसुन्दरसूरिविरचितगुर्वावलीगतेन—

"विद्यानन्दाभिधः पाणि–खविश्वाब्दे १३०२ स दीक्षितः। क्रमाद्विद्याम्बुधिर्जज्ञे, गणिसंपत्पदं मुनिः॥ ५६॥"

एतेन पद्येन श्रीमद्विद्यानन्दमुनिवरस्य वैक्रमीयत्रयोदशशतद्व्युत्तरे प्रव्रज्याग्रहणकालस्य सिद्धत्वात् प्रव्रज्याग्रहणादनु प्रथमादर्शस्य लिखितत्वेन चास्या बृहद्वृत्त्याश्चतुर्दशशताब्द्यारम्भे निर्माणकालनिरूपणं न विरोधास्पदतामाबिभ्रते।

यद्यप्यवगतानवगीतगुरुतरागमसारैः प्रकरणकारैरस्मिन्प्रकरणे स्वकीयगुरुगच्छसमयादिकं निबद्धं क्वापि साक्षान्नो दृश्यते तथाऽप्यस्य प्रस्तुतप्रकरणस्यैकत्रिंशत्तमपत्रान्तर्गतारोग्यद्विजचरित्रस्यावसाने—

"विशेषतः पृथ्वीचन्द्रचरितादवसेयम्"

इत्युक्तत्वात्तथा परमसंवेगरङ्गजनकत्वेन पवित्रे पृथ्वीचन्द्रचरित्रे धर्मरत्नप्रकरणवृत्तिप्रदर्शितारोग्यद्विजचरित्रस्य विद्यमानत्वात्तस्य श्रीशान्तिसूरिकृतत्वाच्च यदि पृथ्वीचन्द्रचरित्रधर्मरत्नप्रकरणयोरेककर्तृत्वं जायते तदा श्रीशान्तिसूरिविरचितस्यार्द्धाष्टमसहस्रमितस्य प्राकृतपृथ्वीचन्द्रचरित्रस्य प्रान्तप्रचरितप्रशस्तप्रशस्तौ—

"आसी कुंदिंदुसुद्धे विउलससिकुले चारुचारित्तपत्तं, सूरी सेयंबराणं वरतिलयसमो सव्वदेवाभिहाणो।
नाणासीसप्पसाहापयडियमहिमो कप्परुक्खो व्व गच्छो, जाओ जंत्तो पवित्तो गुणसुरसफलो सुप्पसिद्धो जयम्मि॥ १॥
तेसिं चासी सुयजलनिही खंतदंतो पसंतो, सीसो वीसोसियगुणगणो नेमिचंदो मुणिंदो।

जो विक्खाओ पुहइवलए मुग्गचारी विहारी, मन्ने नो से मिहिरससिणो तेयकंतीहि तुल्ला ॥ २ ॥
तेसिं च सीसो पयईजडप्पा, अदिट्ठपुव्विल्लविमिट्ठसत्थो । परोवयारेक्करसाविय़ज्झो, जाओ निसग्गेण कइत्तकोडी ॥ ३ ॥
जो सव्वदेवमुणिपुंगवदिक्खएहि, साहित्तकम्मएसु सुसिक्खिएहिं ।
संपाविओ वरपयं सिरिचंदसूरि- पुज्जेहि पक्खमुवगम्म गुणेसु भूरि ॥ ४ ॥
संवेगंवुनिवाणं, एयं सिरिसंतिसूरिणा तेण । वज्जरियं वरचरियं. मुनिचंदविणेयवयणाओ ॥ ५ ॥

तथैतन्मुनिपतिनिर्मितसक्षिप्तपृथिवीचन्द्रचरित्रस्य प्रान्तेऽपि—

"इय पुहइचंदमहरिसि–चरियं संवेगदिव्वरसभग्गियं । मदमइहियं कहियं, फुडक्खरं थेवगंथेणं ॥"

"श्रीमर्वदेवमूरिशिष्यश्रीनेमिचन्द्रमूरिशिष्यश्रीशान्तिमूरिकृतं चरित्रम्"

इति विस्तृताविस्तृतपृथिवीचन्द्रचरित्रयोः प्रशस्तिद्वयगतोल्लेखनिर्वर्णनेन श्रीमत्‌शान्तिमूरयो विपुलचन्द्रकुलाम्बराम्बरमणिश्वेताम्बराग्रणि- श्रीमत्सर्वदेवसूरिशिष्यश्रीमन्नेमिचन्द्रसूरीणां शिष्या भवेयुः, अत एतेषां श्रीमन्नेमिचन्द्रसूरिपुरन्दरशिष्यत्वेन बृहद्गच्छ एव भवेत् । यद्यपि पूर्वोक्तगुर्वावलीकारैस्तु श्रीयशोभद्रनेमिचन्द्रमूर्योः पट्टधराः श्रीमुनिचन्द्रमूरय एव प्रोक्ता न शान्तिसूरयः, इत्येतद्गुर्वावलीगतेन—

"गुरुबन्धुविनयचन्द्रा–ध्यापकशिष्यं स नेमिचन्द्रगुरु । यं गणनाथमकार्षीत्, स जयति मुनिचन्द्रसूरिगुरुः ॥ १ ॥

एतेन पद्येन स्फुटतयावगम्यते । परं श्रीशान्तिसूरिभिः पूर्वोक्तस्वकृतपृथिवीचन्द्रचरित्रप्रशस्तौ तु स्वस्य प्रतीक्ष्यपादानां श्रीनेमिचन्द्र- सूरिसूराणां साक्षादन्तेवासित्वं प्रकाशितमस्ति, अतः प्रकटमेव प्रतिभाति विरोधापत्तिः । परमेतद्विषये एतत्संभवेत्—श्रीमन्नेमिचन्द्रसूरिभिः सत्यपि

स्वशिष्ये श्रीशान्तिसूरौ श्रीमज्जैनशासनप्रभावकासाधारणगुणगणालङ्कृतत्वेन किमपि कारणान्तरेण वा स्वगुरुबन्धुशिष्यश्रीमुनिचन्द्रेभ्यो गणनायकपदं विश्राणितं भवेत्, तथैव गुर्वावलीकारैरपि मुख्यपट्टधरत्वाभावेन श्रीशान्तिसूरयः श्रीमन्नेमिचन्द्रसूरिशिष्यतया न प्रतिपादिता भवेयुः। इत्येवं वितर्किते गुर्वावलीपृथिवीचन्द्रचरित्रप्रशस्त्योर्विसंवादाभावान्न विरोधापत्तिः। अतः श्रद्दधते चास्माकं चेतो यदेते सूरीन्द्राः श्रीमन्नेमिचन्द्रसूरीणामेव शिष्या इति, परं याथातथ्यप्रमाणोपलम्भाभावेन न सम्यग्निर्णयं कर्तुं शक्यते।

एते प्रशस्तप्रतिभाप्रभावप्रपञ्चितप्रौढप्रकरणप्रासादाः कविकोटीकोटीराः कदेदं महीमण्डलमलङ्कृतवन्तः ? इति जिज्ञासायां जातायां पूर्वोक्तयुक्त्या धर्मरत्नप्रकरणवृत्त्योरेककर्तृत्वे सिद्धे प्रकृतप्रकरणस्यास्य षट्षष्टितमे पत्रे ऽयुत्तरैकशततमगाथाव्याख्याने घृतादिस्नानस्य दृढीकुर्वद्भिराचार्यैः प्रामाणिकाचार्यप्रमाणोपदर्शनायोल्लेखितस्य—

"प्रामाणिकसैद्धान्तिकमस्तकरत्नेन श्रीजिनेश्वराचार्येण कथानककोशशास्त्रे विशेषेण स्थापितः, तच्छिष्येणाभयदेवसूरिणापि पञ्चाशकवृत्तौ"

इत्येतस्य पाठस्य निर्वर्णनेन पञ्चाशकवृत्तिनिर्माणकालादन्वेतत्प्रकरणवृत्तिर्विरचितेति स्फुटतयाऽवसीयते। पञ्चाशकवृत्तिप्रणयनकालस्त्वेतत्प्रशस्तप्रशस्तौ—

"चतुरधिकविंशतियुते, वर्षसहस्रे शते ११२४ च सिद्धेयम्। धवलक्कपुरे वसतौ, धनपत्योर्बकुलनन्दिकयोः॥"

इत्येतदनवद्यपद्यस्य परिभावनेन विक्रमार्कीयद्वादशशताब्दीय एव। यदि पूर्वोक्तयुक्त्या पृथिवीचन्द्रधर्मरत्नप्रकरणयोरेककर्तृत्वं मन्यते तदा पूर्वोक्तयोर्द्वयोरपि पृथिवीचन्द्रचरित्रयोः प्रशस्तिप्रान्तप्राप्तैनैकसादृश्येन—

"इगतीसाहियसोलस–सएहि १६३१ वासाण निव्वुए वीरे। कत्तियचरमतिहीए, कत्तियरिक्खे परिसमत्तं॥"

इत्यनेन प्राकृतपद्येन श्रीमद्वीरनिर्वाणादेकत्रिंशदधिकषोडशशतवर्षातिक्रमेऽर्थाद्विक्रमनृपादेकषष्ट्यधिकैकादशशतवर्षातिक्रमे पृथिवीचन्द्रचरित्रयो रचितत्वेन धर्मरत्नप्रकरणवृत्त्योः प्रणेतॄणां श्रीशान्तिसूरीणां विद्यमानता विक्रमार्कीयद्वादशशताब्द्यामेव संभवेदिति प्रत्येत्यस्मदन्तःकरणम् । अत्र तत्त्वं तु तद्विदो वेद्यमिति ।

अस्मिन्प्रकरणे प्रकरणकारैर्मुख्यतया त्रीणि वाच्यानि विवेचितानि वरीवृत्यन्ते । तेषु प्रथमे सर्वधर्मस्थानानां साधारणभूमिकारूपैकविंशतिगुणस्वरूपनिरूपणम्, द्वितीये भावश्रावकलक्षणस्वरूपप्ररूपणम्, तृतीये भावसाधुलक्षणस्वरूपाविर्भावनं कृतमस्ति । अस्य सप्रपञ्चेन विषयविवेचनं तु प्रथक् संपादितमस्ति । तस्मात्तदर्थिना तदवलोकने परिश्रमपरेण भाव्यम् ।

अस्य सवृत्तिकस्य धर्मरत्नप्रकरणस्य संशोधनसमये त्रीणि पुस्तकानि समासादितानि । तेष्वाद्यमणहिल्लपुरपत्तनस्थतपागच्छीयपुस्तकभाण्डागारसत्कं, पवित्रतालपत्रोपरि लिखितं, ग्रन्थसमाप्तौ—"संवत् १२७१ वैशाषसुदि ८ गुरौ वारे श्रीमतिदेवसिरिपूनमतिआत्मश्रेयोऽर्थे पुस्तिका कारिता ॥ १ " इत्येतादृशोल्लेखेनाङ्कितं एकसप्तत्यधिकैकशतपत्रात्मकं नातिशुद्धतम जीर्णप्रायं श्रेष्ठिहालाभाइतनूजलेहेरचन्द्रद्वारा संप्राप्तम् । द्वितीयं पुनराद्यतालपत्रपुस्तकाल्लिपिकृतपुस्तकोपरितो लिखितं द्विचत्वारिंशत्पत्रात्मकं नूतनं नातिशुद्धं प्रतनपुस्तकोद्धृतिकरणप्रयतमानमानसानामस्मद्गुरूणां प्रवर्तकश्रीमत्कान्तिविजयमुनीनां सकाशात्समुपलब्धम् । तृतीयं तु द्वितीयपुस्तकोपरितो लिखितं एकपञ्चाशत्पत्रात्मकं संवत् १९६७ प्रमितवर्षे लिखितं नातिशुद्धं उपाध्याश्रीमद्वीरविजयमुनिपुङ्गवसत्कं प्रज्ञांशश्रीमद्दानविजयमुनिद्वारा प्राप्तम् । एतत्पुस्तकत्रयेण संशोधनविषये साहाय्यमुपलभमानोऽहं पुस्तकप्रेषकाणाममीषां महाशयानां परोपकारं स्मृतिगोचरतां नयामि ।

एतत्प्रकरणरत्नं न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीश्वराग्रशिष्योपाध्यायश्रीमल्लक्ष्मीविजयमुनिललामशिष्यश्रीमद्धंसविजयमुनिपुङ्गवोपदे-

शेन गुर्जरविषयान्तर्गताणहिल्लपुरपत्तनवास्तव्य–ओशवालज्ञातीय–**क्षेमचन्द्रश्रेष्ठिनः** सर्वज्ञोक्तधर्मपरायणेन सुपुत्रेण–**उत्तमचन्द्रेण**–एकादशीव्रतोद्यापनार्थं स्वश्रेयोनिमित्तं चैतत्सवृत्तिप्रकरणमुद्रणोपयोगिपरिपूर्णद्रव्यसाहाय्यं दत्तम् ।

एतत्पूर्वोक्तपुस्तकत्रितयीनिरीक्षणेन महता प्रयासेन च संशोधितेऽप्यस्मिन्प्रकरणे विशिष्टेतरमतिकानामस्माकं प्रमाददोषेण दृष्टिदोषेणाक्षरयोजकदोषेण वा कथंचिद्यत्राशुद्धं कृतं जातं वा भवेत्तत्र संशोधनीयं विपश्चिदपश्चिमैः सूचनीयं च कृपया यदशुद्धं विज्ञायते तद्, येन द्वितीयसंस्करणे संस्क्रियेतेति प्रार्थयते—

व्योमर्ष्यङ्केलाब्दे, श्रावणकृष्णाष्टमीतिथौ शुक्रे ।
चतुरविजयेन पत्तन–नगरे प्रस्तावना दृब्धा ॥ १ ॥

प्रवर्तकश्रीमत्कान्तिविजयचरणाम्भोजचञ्चरीकः
चतुरविजयो मुनिः ।

॥ धर्मरत्नप्रकरणविषयानुक्रमः ॥

॥ अर्हम् ॥

॥ न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीश्वरपादपद्मेभ्यो नमः ॥

विपुलचन्द्रकुलाम्बरनिशाकरश्रीशान्तिसूरिसङ्कलितं स्वोपज्ञवृत्तिसहितं

धर्मरत्नप्रकरणम् ।

सिद्धं सर्वज्ञमानम्य वक्ष्ये संक्षेपतः स्फुटाम् । विवृत्तिं धर्मरत्नस्य मन्दबुद्धिप्रबुद्धये ॥ १ ॥

इह हि हेयोपादेयादिपदार्थपरिज्ञानशालिना विज्ञातासारसंसारापारपारावारपतितजन्तुसन्तानानवरतदुःखसन्तापेन जन्मजरामरणरोगशोकादिदुःखदौर्गत्यातिपीडितेन भव्यजन्तुना स्वर्गापवर्गादिसुखश्रीसंपादनावन्ध्यनिबन्धनं जिनधर्ममहारत्नमुपादातुमुचितम् । तदुपादानोपायश्च गुरूपदेशमन्तरेण नावबुध्यते । न चानुपायप्रवृत्तानामभीष्टसिद्धिः । इत्यतः कारुण्यपुण्यचेतस्तया धर्मार्थिनां धर्मोपादानपालनोपदेशं दातुकामः प्रकरणकारः शिष्टमार्गानुगामितया पूर्वं तावदिष्टदेवतानमस्कारादिप्रतिपादनाय गाथामाह—

नमिऊण सयलगुणरयणकुलहरं विमलकेवलं वीरं । धम्मरयणत्थिआणं जणाण वियरेमि उवएसं ॥१॥

इह पूर्वार्द्धेनेष्टदेवतानमस्कारद्वारेण विघ्नविनायकोपशान्तये मङ्गलमुक्तमुत्तरार्द्धेन चाभिधेयमिति । संबन्धप्रयोजने च सामर्थ्यगम्ये । तथा हि—संबन्धस्तावदुपायोपेयलक्षणः, साध्यसाधनलक्षणो वा । तत्र प्रकरणमुपायः साधनं वा । सा-

ध्यमुपेयं वा, प्रकरणार्थपरिज्ञानमिति । प्रयोजनं पुनः द्विविधम्, कर्त्तुः श्रोतुश्च । पुनरनन्तरपरम्परभेदादेकैकं द्विधा । तत्रानन्तरं कर्त्तुः सत्त्वानुग्रहः, श्रोतुः प्रकरणार्थपरिज्ञानम् । परम्परमुभयोरप्यपवर्गप्राप्तिरिति । सांप्रतं व्याख्या विधीयते । तत्र चायं विधिः—"संहिता च पदं चैव पदार्थ पदविग्रहः । चालना प्रत्यवस्थानं व्याख्या तन्त्रस्य षड्विधा ॥१॥" तत्रास्खलितादिगुणोपेतसूत्रोच्चारणं संहिता, सा च व्यक्तैव । पदानि संस्कृतभाषया । नत्वा सकलगुणरत्नकुलगृहं विमलकेवलं वीरं धर्मरत्नार्थिनां जनानां वितरामि उपदेशमिति । पदार्थस्तु 'नत्वा' प्रणम्य सकलानि समस्तानि यानि रत्नानि तेषां कुलगृहमुत्पत्तिस्थानम् । यो भगवान् वीरस्तम् । इह यद्यपि गुणा वस्तुधर्माः शुभाशुभस्वरूपा अप्यभिधीयन्ते; तथापि शुभा एव प्रत्येतव्याः, इतरेषां रत्नत्वानुपपत्तेः । तथा हि—"जातौ जातौ यदुत्कृष्टं रत्नं निगद्यते हि तत् । इत्येवं सुधियः प्राहुर्निर्विसंवादमुत्तमाः ॥ १ ॥" विमलं ज्ञानावारककर्माणुसंपर्कविकलम्, केवलं केवलज्ञानं यस्य तम् । कर्मविदारणात्तपसा विराजनाद्वर्यवीर्ययुक्तत्वाच्च जगति यो वीर इति ख्यातस्तम् । यतोऽवाचि—"विदारयति यत्कर्म तपसा च विराजते । तपोवीर्येण युक्तश्च तस्माद्वीर इति स्मृतः ॥ १ ॥" तथा दुर्गतौ पततः प्राणिनो धारयतीति धर्मः । उक्तं च—"पततो दुर्गतौ यस्मात्सम्यगाचरितो भवात् । प्राणिनो धारयत्येष तस्माद्धर्म इति स्मृतः ॥ १ ॥" स एवाशेषानर्थविघातहेतुत्वात् कल्याणकलापकरणत्वाच्च रत्नम्, तदर्थयन्ति मृगयन्ते ये ते धर्मरत्नार्थिनस्तेभ्यः 'जनेभ्यः' लोकेभ्यो 'वितरामि' प्रयच्छामि । उपदिश्यत इत्युपदेशो हितप्रवृत्तिहेतुवचनप्रपञ्चस्तमिति । वीरं वर्त्तमानतीर्थाधिनाथं नत्वा धर्मार्थिजनेभ्य उपदेशं वितरामीति पदघटना । भावार्थः पुनरयम्—नत्वेति पूर्वकालाभिधायिनाऽऽक्षिप्तोत्तरकालक्रियेण

स्याद्वादशार्दूलनादसंवादिना पदेनैकान्तनित्यक्षणिकवस्तुवादिमृगयोर्मुखबन्धो व्यधायि । तस्मान्नैकान्तनित्यः क्षणिको वा कर्त्ता क्रियाद्वयं कर्तुमीशो भवति, क्रियाभेदे कर्तृभेदात् । ततो द्वितीयक्रियाक्षणे कर्तुरनित्यत्वाभावप्रसङ्गाभ्यां द्वयोरप्यपाकृतिरिति । तथा सकलगुणरत्नकुलगृहमित्यनेन भगवतः समस्तसुरासुरमनुजनायकेषु प्राधान्यमभ्यधायि । तेषां कस्यापि केनापि गुणेन विकलतया सकलशब्दप्रवृत्तेरयोगात् । तथा विमलकेवलमित्यनेन भगवतो ज्ञानातिशयसंपन्नतया तथ्यार्थवादित्वमुक्तम् । तदन्तरेण सूक्ष्मबादरमूर्त्तामूर्त्तादिभावानां याथातथ्येन वक्तुमशक्यत्वात् । तथा धर्मरत्नार्थिभ्य इत्यनेन श्रवणाधिकारिणामर्थित्वमेव मुख्यं लिङ्गमित्यवाचि । तथा चाहुर्वृद्धाः—'तत्थहिगारी अत्थी समत्थओ जो न सुत्तपडिकुट्ठो। अत्थी तु जो विणीओ समुवट्ठिओ पुच्छमाणो य ॥ १ ॥' जनानामित्यनेन बहुवचनान्तेनैतदुदितम् । नैकमेवेश्वरादिकमाश्रित्योपदेशदाने प्रवर्त्तितव्यमपि तु सामान्येन सर्वसाधारणतया जिनागमानुसारेण। स चायम्—"जहा पुन्नस्स कत्थई तहा तुच्छस्स कत्थई । जहा तुच्छस्स कत्थई तहा पुन्नस्स कत्थई ॥ १ ॥" वितराम्युपदेशमितीहैतदाकूतम्—न प्रज्ञागर्वेण, न पराभिभवेच्छया, नापि कस्यचिदुपार्जनाय प्रवर्त्तते । किं तर्हि ? कथं नु नामामी प्राणिनः सद्धर्ममार्गमासाद्य साद्यपर्यवसितं शिवशर्माऽवाप्स्यतीत्यनुग्रहबुद्ध्या परेषामात्मनश्च । यतोऽभाणि पूर्वाचार्यैः—"शुद्धमार्गोपदेशेन यः सत्त्वानामनुग्रहम् । करोति नितरां तेन कृतः स्वस्याप्यसौ महान्॥ १ ॥" किं च—"न भवति धर्मः श्रोतुः सर्वस्यैकान्ततोऽहितश्रवणात्। ब्रुवतोऽनुग्रहबुद्ध्या वक्तुस्त्वेकान्ततो भवति ॥ २ ॥" इत्युक्तः सभावार्थः पदार्थः । पदविग्रहस्तु समासादिकपदेषु प्रदर्शित एवेति न पृथगुच्यते । अथ चालना—ननु सकलगुणरत्नकुलगृहमित्युक्ते विमल-

केवलमित्यपार्थकम्, केवलज्ञानस्यापि गुणत्वात्; सकलशब्दस्य च सर्वसङ्ग्रहार्थत्वादित्यत्रोच्यते—सर्वगुणेषु प्राधान्योपदर्शनार्थमस्य पृथगुपन्यासः सत्यस्मिन्नवश्यं परमपदप्राप्तेर्दृश्यते चायं न्यायो लोकेऽपि यथा—'ब्राह्मणा आयाताः वशिष्ठोऽप्यायातः' इत्यादौ। इति गाथार्थः ॥ १ ॥

अथ यथाप्रतिज्ञातं विभणिषुः प्रस्तावनामाह—

भवजलहिम्मि अपारे दुलहं मणुयत्तणंपि जंतूणं। तत्थवि अणत्थहरणं दुलहं सद्धम्मवररयणं ॥ २ ॥

भवन्त्यस्मिन्नारकतिर्यङ्नरामररूपेण प्राणिन इति भवः संसारः, स एव जन्मजरामरणजलधारणाज्जलधिः, तस्मिन्ननादिनिधनतया "अपारे" पर्यन्तविकले बम्भ्रम्यमाणानामिति शेषः। 'दुर्लभं' दुरापं 'मनुजत्वमपि' मनुष्यभावोऽपि दूरे तावद्देशकुलारोग्यादिसामग्रीत्यपेरर्थः। यतोऽवाचि भगवता श्रीवर्द्धमानस्वामिनाऽष्टापदादागतं गौतममहामुनिं प्रति—"दुलहे खलु माणुसे भवे चिरकालेणवि सव्वपाणिणं। गाढा य विवागकम्मुणो समयं गोयम! मा पमायए ॥" 'जन्तूनां' प्राणिनां 'तस्मिन्' मनुजत्वे सत्यपि 'अनर्थहरणम्' इति नार्थ्यन्ते न काम्यन्ते ये दारिद्र्यक्षुद्रोपद्रवादयोऽपायास्ते ह्रियन्ते येन तदनर्थहरणम्। 'दुर्लभं' दुरापं वर्त्तते किं तत्? इत्याह—सं्श्चासौ धर्मश्च सद्धर्मः सम्यग्दर्शनादिरूपः। स एव वरं प्रधानं रत्नमिवाशेषापायनाशित्वात्तदिति। उक्तं च—"मानुष्यकर्मभूम्यार्यदेशकुलकल्पतायुरुपलब्धौ। श्रद्धा कथकश्रवणेषु सत्स्वपि [1]सुदुर्लभा बोधिः १।" इति गाथार्थः ॥ २ ॥

१ 'सुदुर्लभो' इत्यपि ॥

अमुमेवार्थं दृष्टान्तविशिष्टं स्पष्टतरमाह—

जह चिंतामणिरयणं सुलहं न हु होइ तुच्छविहवाणं। गुणविभववज्जियाणं जियाण तह धम्मरयणंपि ॥३॥

'यथा' इति दृष्टान्तोपन्यासार्थः। येन प्रकारेण 'चिन्तामणिरत्नं' प्रतीतं 'सुलभं' सुप्रापं 'न हु' नैव 'भवति' स्यात् 'तुच्छविभवानां' अल्पधनानां, तन्मूल्योचितविभवाभावादिति भावः। गुणा वक्ष्यमाणस्वरूपाः, तेषां विशेषेण भवनं सत्ता गुणविभवः। अथवा गुणा एव विभवो भूतिर्गुणविभवः, तेन वर्जितानां रहितानां 'जियाणं' इति प्राकृतशैल्या ह्रस्वं, तवकारलोपौ (?)। 'जीवानां' पञ्चेन्द्रियप्राणिनाम्[1]। उक्तं च—"प्राणाः द्वित्रिचतुः प्रोक्ता भूतानि तरवः स्मृताः। जीवाः पञ्चेन्द्रियाः प्रोक्ताः शेषाः सत्त्वा इतीरिताः॥ १॥" अपिशब्दस्य वक्ष्यमाणस्येह संबन्धादेवं भावना कार्या—विकलेन्द्रियाणां तावद्धर्मप्राप्तिर्नास्त्येव पञ्चेन्द्रियाणामपि योग्यताहेतुगुणसामग्रीविकलानाम्। 'तथा' तेन प्रकारेण 'धर्मरत्नम्' सुलभं न भवतीति प्रकृतेन संबन्धः। इति गाथार्थः॥ ३॥

कति गुणसंपन्नः पुनस्तत्प्राप्तियोग्यः? इति प्रश्नमाशङ्क्याह—

इगवीसगुणसमेओ जोगो[2] एयस्स जिणमए भणिओ। तदुवज्जणंमि पढमं ता जइयव्वं जओ भणियं ॥४॥

एकविंशतिभिर्गुणैर्वक्ष्यमाणैः समेतो युक्तः, वाचनान्तरेण समृद्धः संपूर्णः समिद्धो वा दीप्यमानो 'योग्यः' उचितः। 'एतस्य' प्रस्तुतधर्मरत्नस्य 'जिनमते' अर्हच्छासने 'भणितः' प्रतिपादितस्तदभिज्ञैरिति गम्यते। ततः किम्? इत्याह—'त-

---

१ 'पञ्चेन्द्रियाणां प्राणिनाम्' इत्यसमस्तं क्वचित्। २ 'जुग्गो' इत्यपि॥

दुवज्जणंमि' इति तेषां गुणानामुपार्जने विढपने 'प्रथमं' आदौ 'तस्मात्' ततो हेतोः 'यतितव्यं' उद्यन्तव्यमिदमिहाकूतम्—यथा प्रासादार्थिनः शल्योद्धारपीठबन्धादावाद्रियन्ते तदविनाभावित्वाद्विशिष्टप्रासादस्य । तथा धर्मार्थिभिरेते गुणाः सम्यगुपार्जनीयाः, तदधीनत्वाद्विशिष्टधर्मसिद्धिरिति । 'यतो' यस्मात् 'भणितं' अभिहितं पूर्वाचार्यैरित्यध्याहारः ॥ इति गाथार्थः ॥४॥

भणितमेवाह—

धम्मरयणस्स *जोगो [1]अक्खुद्दो [2]रूववं [3]पयइसोमो । [4]लोगप्पिओ [5]अकूरो [6]भीरू [7]असढो [8]सुदक्खिन्नो ॥ ५ ॥

[9]लज्जालुओ [10]दयालू [11]मज्झत्थोसोमदिट्ठि [12]गुणरागी । [13]सकह [14]सुपक्खजुत्तो [15]सुदीहदरिसी [16]विसेसन्नू ॥ ६ ॥

[17]वुड्ढाणुगो [18]विणीओ [19]कयन्नुओ [20]परहियत्थकारी य । तह चेव [21]लद्धलक्खो इगवीसगुणेहिं संपन्नो ॥७॥

अस्य गाथात्रितयस्य पूर्वसूरिप्रणीतस्यार्थः—धर्माणां मध्ये यो रत्नमिव वर्त्तते स धर्मरत्नं जिनप्रणीतो देशविरतिसर्वविरतिरूपः समाचारः, तस्य 'योग्यः' उचितो भवतीत्यध्याहारः । 'एकविंशतिभिर्गुणैः संपन्नः' इति, इत्युत्तरेण योगः । तानेव गुणान् गुणगुणिनोः कथञ्चिदभेद इति दर्शनाय गुणिप्रतिपादनद्वारेणाह—'अक्षुद्रो' भणिष्यमाणस्वरूपः ॥ १ ॥ तथा 'रूपवान्' प्रशस्तरूपोपेतः । वतोः प्रशंसा[1]वाचित्वात् । रूपमात्राभिधाने इन्नेव दृश्यते । यथा 'रूपिणः पुद्गलाः प्रोक्ताः' इति ॥ २ ॥ तथा प्रकृत्या स्वभावेन सौम्यः सुन्दरस्वभावः, प्रशान्तचित्तत्वात् ॥ ३ ॥ 'लोकप्रियः' सदाचारचारित्वात् ॥ ४ ॥ 'अक्रूरः' परदोषेक्षणादिक्रूरत्वाभावात् ॥ ५ ॥ 'भीरुः' ऐहिकपारत्रिकापायेभ्यः, त्रसनशीलत्वात् ॥६॥

---

* 'जोग्गो' 'जुग्गो' इत्यपि । १ ''प्रशस्तवाचित्वात्'' इत्यपि ॥

'अशठः' सद्भावसारानुष्ठानत्वात् ॥ ७ ॥ 'सुदाक्षिण्यः' अभ्यर्थनासारत्वात् ॥ ८ ॥ 'लज्जालुः' पापप्रवृत्तौ शङ्कित्वात् ॥ ९ ॥ 'दयालुः' कारुणिकचित्तत्वात् ॥ १० ॥ 'मज्झत्थोसोमदिट्ठि' इति एकमेवेदं पदं, प्राकृतत्वाद्विभक्तेर्लुक् । ततश्च मध्यस्था रागद्वेषविकला सौम्या वाऽक्रूरा दृष्टिर्दर्शनं यस्य स 'मध्यस्थसौम्यदृष्टिः' यथावस्थितवस्तुतत्त्वदर्शित्वात् ॥ ११ ॥ 'गुणरागी' गुणेषु बहुमानवान्, [1]लघुकर्मत्वात् ॥१२॥ 'सत्कथः' न दुश्चारिचर्याकर्णनकथनरुचिः, सदाचारचारित्वात् ॥१३॥ सुपक्षः शोभनपरिजनः तेन युक्तोऽन्वितो [2]धर्माविरोधिबन्धुपरिवारः, इति भावः ॥ १४ ॥ 'सुदीर्घदर्शी' सुपर्यालोचितपरिणामसुन्दरकार्यकारी, बुद्धिसंपन्नत्वात् ॥१५॥ 'विशेषज्ञः' सारेतरादिवस्तुवेदी न रागद्वेषमूढत्वपूर्वव्युद्ग्राहितत्ववशात् प्रतिपन्नकुग्राहैकतानमानस इति ॥१६॥ 'वृद्धानुगः' परिणतमतिपुरुषच्छन्दोऽनुवर्त्ती ॥१७॥ 'विनीतः' गुरुजने गौरवकृत् ॥ १८ ॥ 'कृतज्ञः' स्तोकमप्युपकारमैहिकं पारत्रिकं वा न विस्मरति ॥ १९ ॥ तथा परेषामन्येषां हितानर्थान् प्रयोजनानि कर्तुं शीलं यस्य स 'परहितार्थकारी' प्रत्युपकारानपेक्ष इति भावः । सुदाक्षिण्यादस्य को विशेषः ? इति चेदुच्यते, सुदाक्षिण्योऽभ्यर्थित एव परोपकारं करोति, अयं पुनः स्वत एव परहितरतिरिति ॥२०॥ 'तह चेव' इति तथाशब्दः प्रकारार्थः । चः समुच्चये । एवोऽवधारणे । ततश्च यथैते विंशतिस्तथैव तेनैव प्रकारेण लब्धलक्ष्यश्च धर्माधिकारीति पदयोगः। पदार्थस्तु लब्ध इव प्राप्त इव लक्ष्यो लक्षणीयो धर्मानुष्ठानव्यवहारो येन स 'लब्धलक्ष्यः' सुशिक्षणीयत्वात् ॥ २१ ॥ एभिरेकविंशतिभिर्गुणैः संपन्नो धर्मरत्नयोग्य इति योजितमेव । इति द्वारगाथात्रितयाक्षरार्थः ॥ ५ ॥ ६ ॥ ७ ॥

१ "न कुकर्मत्वात्" इत्यपि । २ "धर्माविबन्धक-" इत्यपि ॥

भावार्थं पुन प्रकरणकारः स्वयमेवाह—

खुद्दोत्ति अगंभीरो उत्ताणमई न साहए धम्मं । सपरोवयारसत्तो अक्खुद्दो तेण इह जोग्गो ॥ ८ ॥

इह यद्यपि क्षुद्रशब्दोऽनेकार्थः । तद्यथा—"क्षुद्रस्तुच्छः, क्षुद्रः क्रूरः, क्षुद्रो दरिद्रः, क्षुद्रो लघुः" इत्यादि । तथाऽपीह क्षुद्र इत्यगंभीर उच्यते तुच्छ इति कृत्वा । स पुनः 'उत्तानमतिः' अनिपुणबुद्धिरिति हेतोः 'न साधयति' नाराधयति 'धर्मं' प्रतीतं, तस्य सूक्ष्ममतिसाध्यत्वात् । उक्तं च—"सूक्ष्मबुद्ध्या सदा ज्ञेयो धर्मो धर्मार्थिभिर्नरैः । अन्यथा धर्मबुद्ध्यैव तद्विघातः प्रसज्यते ॥ १ ॥ गृहित्वा ग्लानभैषज्यप्रदानाभिग्रहं यथा । तदप्राप्तौ तदन्तेऽस्य शोकं समुपगच्छतः ॥ २ ॥ गृहीतोऽभिग्रहः श्रेष्ठो ग्लानो जातो न च क्वचित् । अहो ! मेऽधन्यता कष्टं न सिद्धमभिवाञ्छितम् ॥ ३ ॥ एवमेतत् समादानं ग्लानभावाभिसन्धिमत् । साधूनां तत्त्वतो यत्तदुष्टं ज्ञेयं महात्मभिः ॥ ४ ॥" तद्विपरीतः पुनः स्वपरयोरुपकारकरणे शक्तः समर्थो भवतीति शेषः । 'अक्षुद्रः' सूक्ष्मदर्शी सुपर्यालोचितकारी 'तेन' प्रकारेण[1] 'इह' धर्मग्रहणे 'योग्यः' अधिकारी स्यात् । इति गाथार्थः ॥ ८ ॥ एत्थ उदाहरणम्—

चेइविसयालंकारभूयाए सोत्तिमइपुरीए पगईए पावभीरू सरलसच्छहियओ वेयवेअत्त[2]तत्तकुसलो खीरकयंबो नाम माहणो होत्था । तस्स य समीवे पवयओ नाम पुत्तो, नारयनामो ठाणंतरागओ, धम्मपुत्तो रायसुयओ य वसू नाम, एए तिन्नि महामइणो अन्नेवि तहाविहाणेण भट्टचट्टाइणो पढंति । कयाइ तस्स गेहे गोयरमडंतो साहुसंघाडगो पविट्ठो । ते ॥ ४

१ "प्रकारणेन" इत्यपि । २ "वेयवेयन्त–" इत्यपि ॥

तिन्निवि च्छत्ते पेच्छिऊणमेगेण साइसएण वीयसाहुस्स सिट्ठं । एएसिं तिण्हं दारयाणं दो अहोगामिणो एगो उड्ढगामी भविस्सइ । सुयमेयं कडंतरिएण खीरकयंबेण चिंतियं च—एए महाभागा वीयरागमग्गाणुगामिणो नन्नहा जंपंति । संभवइ य रायपुत्तस्साहोगामित्तं । इयरेसिं पुण कोहम्मकम्मकारी संभावियइ ता परिच्छामि ताव दोन्नि एए । तओ तहजुत्तमणुचिट्ठिस्सं । पठ्यते च स्मृतिषु—"भर्त्तुर्भार्याकृतं पापं शिष्यपापं गुरोर्भवेत् । राज्ञि राष्ट्रकृतं पापं [1]राजपापं पुरोहिते ॥१॥" एवं चिंतिऊण कसिणचउद्दसिनिसाए कित्तिमच्छगलगो लक्खारसपडिहत्थो समप्पिओ नारयस्स, भणियं च—एस मए मंतेहिं मूढचेयणो विहिओ तहावि जत्थ न कोइ पासइ तत्थ गंतूण एयं हणाहि, न य अन्नस्स साहियवं, जओ एत्थ एस कप्पोत्ति । नारओवि अलंघणीयवयणो गुरुत्ति भावितो पत्तो एगं सुन्नरच्छं । किमेत्थ कोइ पेच्छइत्ति निउणं निरूवियं तेण दिट्ठमुवरिं तारामंडलं, अरे! दीसामि एत्थत्ति संभंतो पविट्ठो जक्खमंदिरं । एत्थवि जक्खो पासइत्ति गओ सुन्नगेहं । तत्थवि पंच लोगपाला दिव्वनाणिणो य निहालिंति । नवि एए कत्थइ न पेच्छंति । ता नूणं न हंतव्वो एसोत्ति गुरुआएसो कारणिओ य गुरू न एरिसं करेइत्ति निच्छिऊण पहट्ठमुहपंकओ गओ गुरुसमीवं । निवेइयं नियचरियं । तओ उवज्झाएण चिंतियं । एस ताव सुहुमबुद्धी न दोगइं [2]पेउणेइ । ता किं मम पुत्तो कुगइं गमिस्सइ ? अहवा तंपि परिच्छामित्ति निच्छिऊण तेणेव विहिणा पेसिओ पव्वयओ । गओ सुन्नरच्छाए । एत्थ न कोइ पासइत्ति तं वावाइऊण समागओ गिहं । जणणिं हत्थपायसोयं मग्गइ । उवज्झाएण [3]वुत्तं किं रे! एयंति ? । तेण पडिवुत्तं पउरो से रुहिरसंचओ

१ "राज्ञः पापं" इत्यपि । २ "पाउणेइ" इत्यपि । ३ "वुत्तो" इत्यपि ॥

आसि तेण मे अंगं विलित्तंति। उवज्झाएण भणियं कहिं तुमे वावाइओ? कहं वा न केण य दिट्ठोसि?। तेण भणियं सुन्नरच्छाए अंधयार[2]बहुलयाए[1] निस्संचरंताओ लोगस्स न केण य दिट्ठोम्हि। उवज्झाएण वुत्तं कहं न दिट्ठोसि उवरिं नक्खत्तेहिं, पंचहिं लोगपालेहिं, दिव्वनाणीहिं, अप्पणो य पंचहिं इंदिएहिं?। तेण भणियं न अम्हे एत्तियं बुज्झामो, तो[3] खाइं कीस पेसिओम्हि?। तओ उवज्झाओ अहो! निरणुकंपो एस न पावकम्मे पवत्तमाणो संकइ, ता नूणं नरयगामी भविस्सइ। अह कहं पुणाहमेयाओ पावोवलेवाओ मुच्चिस्संति चिंतावरो कह कह किच्छेणवि गमिऊण रयणिं पहायसमए ते चेव मुणिणो गवेसंतो पत्तो उज्जाणं। तत्थ मुणिणो दट्ठूण वंदिऊण पुच्छिउं पवत्तो। भयवं! गिहकुडुंबे जइ किंपि माणुसं दुन्नए पवत्तई, ता घरसामी वज्झइ वा न वा?। साहूहिं भन्नइ जइ कोइ तणपूलं जलणपलित्तं करेण धरेइ ता किं डज्झइ वा न वा?। विप्पेण भणियं डज्झइ। एवं गिहनाहोवि बज्झइत्ति। [3]एवं मुणिवयणमायन्निऊण वुत्तं विप्पेण भयवं! कहं पुण सो मुच्चइ?। साहुणा भणियं डज्झमाणपूलगपरिच्चाई पुरिसो जहा न डज्झइ, एवं पावगारिणं [4]मणुसं मुयंतो गिहनाहोवि मुच्चइ। [5]एवमायन्निऊण संवेगभाविओ तेसिमेव मुणीण समीवे पव्वइओ खीरकयंबो सुगइसाहगो य संवुत्तो। तओ भग्गा लेहसाला। गओ सट्ठाणं नारओ। गहियमुवज्झायपयं पव्वएण। पत्तो रायपयं वसू। पाविओ पसिद्धिं। नवरं पारद्धिलंपडोत्ति दिणे दिणे पारद्धिं करेइ। तेण कयाइ वणंतरे सुविसत्थं मयजूहमवलोइऊण एगागिणा निहुयपयसंचारं मुक्को तं पइ सिलीमुहो। सोवि कहंवि पच्चप्फिडिऊण गओ खंडाखंडिं। तओ सुविम्हिएण पलोयंतेण करफासेण

१ "बहुलाए" इत्यपि। २ "भास्वर" इत्यपि। "एवं" ३ क्वचिन्नास्ति। ४ 'माणुसं' इत्यपि। ५ 'एय'– इत्यपि॥

लक्खिया नहयलनिविसेसवन्ना फलिहसिला। तओ रयणीए पच्छन्नमाणिऊण ट्ठाविया अत्थाणमंडवे। निवेसियं तदुवरि सिंहासणं। जाओ जणप्पवाओ राइणो सच्चवाइत्तेण सिंहासणमागासे चिट्ठइत्ति विन्नायवुत्तंतो कोउगेण समागओ नारओ। बहुमन्निओ पव्वएण जणणीए राइणा य। नेहवसेण तत्थेव सुहमच्छिउं पवत्तो। अन्यदा पर्वतकेन छात्रेभ्यः "अजैर्यष्टव्यम्" इति वेदवाक्यं व्याचचक्षे। तद्यथा—अजैश्छगलकैर्यष्टव्यं यागक्रिया विधातव्येति। ततो नारदेनोचे—'भ्रातः! नैवं व्याख्यायते, यतो धर्माय यागक्रिया विधीयमाना न छगलकैर्विधातुमुचिता' इति। इतर उवाच—'कथय तर्हि कथं व्याख्यायते?।'नारदोऽवोचत्—'उपाध्यायेनाजाः सप्तवार्षिका व्रीहयोऽल्पबीजत्वादत्र व्याख्यातास्तदुक्तमेवास्माकं प्रमाणम्' इति। तओ पव्वओ उत्ताणमइत्तेण तमसंभरंतो छत्ताण मज्झे लहुगो भविस्सामित्ति महाभिमाणओ भणिउमाढत्तो। अरे! ममाओवि तुमं पंडिओसि? उवज्झाएण तुह तत्तमाइक्खियं?। किंच जो एत्थ अलियवाइ तस्स जीहाच्छेओ दंडो। एत्थ सच्चवाइ राया पमाणं। नारएण भणियमेवं होउ। विन्नायवुत्तंताए भणिओ जणणीए पव्वओ य। पुत्त! नेहवसेण नारओ तुह समीवमागओ ता तेण समं न कलहिज्जइ। सो भणइ अंब! न कलहेमि किं तु छत्तमंडलीए[1] मज्झे एसो मम वक्खाणं दुसेइ। केरिसंति साहिओ संबन्धो। जणणीए भणियं वच्छ! मम समक्खं चेव तुह जणएणावि एवं वक्खायं ता को दोसो नारयस्स?। इयरो आह अंब! जइ एवं ता गया मे जीहा, जओ रायाऽपि सच्चवाइत्ति एवं चेव भणिही। तओ सा पुत्तनेहमोहिया पुव्वपडिवन्नवरं पत्थिउं पत्ता रायसमीवं। तेणावि

---

१ "छत्तमंडलीमज्झे" इत्यपि॥

अब्भुट्ठिऊण पणामपुव्वं पुच्छियमागमणपओयणं । तीएवि वुत्तमेगंते । पुत्त ! जइ सरसि पुव्वपडिवन्नं वरं जाएमि । तओ सुट्ठु सरामि अंब ! करेहि मे रिणमोक्खं, वरेहि जं भे रोयइत्ति निवेण वुत्ते साहिऊण वइयरं जंपियमिमीए । [1]सव्वहा रक्खेहि भाउणो जीहंति । तओ एवंति पवुत्ते राइणा गया एसा सट्ठाणं । धीरविओ पव्वयओ । दुइयदिणे सहरिसा चाऊवन्न-पहाणपरिवुडा पत्ता रायसहं । कहिऊण वइयरं भणिओ राया पहाणलोगेण । देव ! तुमं छट्ठो लोगपालो सच्चवाइत्त-गुणेण गयणंगणगओ चिट्ठसि । गुरुभाया दोण्हंपि एएसिं ता जमलजलणओ व तुल्लचित्तो ता जहट्ठियमेयं पयं पन्नवेहि । किंच— "अग्निस्तम्भं विधत्ते तुलयति हि धटे शुद्धिमेत्यम्बुपाने रक्षःसिंहाहिभूतप्रबलरिपुकृतं साध्वसं संरुणद्धि । मान्यः स्यात् सर्वलोके भवति सुगतिभाक् प्रेत्य सौभाग्ययुक्तः कल्याणं सत्यवादी किमिति न लभते ? तद्विभो ! ब्रूहि सत्यम् ॥१॥" एवं भणिएवि राइणा भवियव्वयावसेणं भणियं । जमेस ओज्झायपुत्तो कहेइ तं चेय सच्चंति भणियाणंतरमेव कुवियाए भ-वणदेवयाए ओमंथिऊण ससिलासीहासणोच्छूढो धरणीए वसू गओ य नरयपुढवीए । अहो ! कूडसक्खेज्जमणेण राया का-रिओत्ति खिंसिओ पव्वयओ लोएण निद्धाडिओ नयरीओ । सच्चवाइत्ति पूयओ नारओ । पत्तो नियट्ठाणं । कहाणगसेसं गंथंतराओ नेयं । एत्थ नारएण सुहुमबुद्धिणा छगलो न वहिओ । इतरेण खुद्दबुद्धिणा वहिओ । अओ चेव नारओ सपरोवयारी संवुत्तो । इयरो पुण सपराणत्थहेउत्ति उवणओ ॥

अथ रूपवन्तं स्वरूपतः फलतश्च निरूपयन्नाह—

---

[1] "सव्वाहारक्खेहि" "सव्वाहार रक्खेहि" इत्यपि ॥

संपुन्नंगोवंगो पंचिंदियसुंदरो सुसंघयणो । होइ पभावणहेऊ खमो य तह रूववं धम्मे ॥ ९ ॥

संपूर्णान्यन्यूनान्यङ्गानि शिरःप्रभृतीन्युपाङ्गानि चाङ्गुल्यादीनि यस्य स 'संपूर्णाङ्गोपाङ्गः'। उक्तं च—"सीसमुरोयरपिट्ठी दो बाहू ऊरुगा य अट्ठंगा । अंगुलिमाइउवंगा अंगोवंगाणि सेसाणि ॥ १ ॥" स पुनरव्यङ्गिताङ्ग इति हृदयम् । तथा 'पञ्चेन्द्रियसुन्दरः' प्राकृतत्वाद्विशेषणस्य परनिपातः । काणकेकरबधिरमूकत्वादिविकल इत्यर्थः । 'सुसंघयणो' इति शोभनं संहननं शरीरसामर्थ्यं यस्य । न पुनराद्यमेव संहननान्तरेऽपि धर्मप्राप्तेः । "सवेसुवि संठाणेसु लहइ एमेव सबसंघयणे" इति वचनात् । स सुसंहननस्तपःसंयमानुष्ठानसामर्थ्योपेत इति भावः । एवंविधस्य धर्मप्रतिपत्तौ फलमाह—'भवति' संपद्यते 'प्रभावनाहेतुः' तीर्थोन्नतिकारणं, वैरस्वामिवत् । तथा हि—"रूवाइसयसमग्गो वइररिसी जत्थ जत्थ संचरइ । पावइ तहिं तहिं चिय जिणधम्मो उन्नइं परमं ॥ १ ॥ जम्मंतरकयसुकया रागेण मुणिंमि वइरसामिम्मि । पत्ता गिहवइधूया चरणं हरणं दुहसयाणं ॥ २ ॥" आगमेऽप्युक्तम्—"धम्मोदएण रूवं करेंति रूवंसिणोवि जइ धम्मं । गब्भवओ य सुरूवो पसंसिमो तेण रूवंति ॥ १ ॥" ननु नन्दिषेणहरिकेशबलादीनां कुरूपाणामपि धर्मसिद्धिः श्रूयते, अतः कथं रूपवानेव धर्मेऽधिक्रियते ? इति, सत्यम्, इह द्विधा रूपं सामान्यं अतिशायि च । सामान्यं संपूर्णाङ्गत्वादि, तन्नन्दीषेणादीनामासीदेवेति न विरोधः । प्रायिकं चैतच्छेषगुणसद्भावे कुरूपत्वस्य गुणान्तराभावस्य चादुष्टत्वादत एव वक्ष्यति—"पायद्धगुणविहीणा एएसिं मज्झिमा वरा नेया" इत्यादि । अतिशायिरूपं पुनर्यद्यपि तीर्थङ्करादीनामेव संभवति, तथाऽपि येन प्राणी क्वचिद्देशे काले वयसि वा वर्त्तमानो रूपवानयमिति प्रत्ययं जनानां जनयति तदेवेहाधिकृतं मन्तव्य-

म् । तदन्वितो हि धार्मिकः सदाचारप्रवृत्त्या भव्यजन्तूनां धर्मे गौरवमुत्पादयन् प्रभावयति धर्ममिति कृत्वा भवति प्रभावनाहेतुरित्युक्तम् । तथा 'क्षमः' समर्थः, चकारो भवति क्रियानुकर्षणार्थः । तथाशब्दः समुच्चये । न केवलप्रभावनाहेतुः, क्षमश्च भवति रूपवान् 'धर्मे' धर्मविषये । सुसंहननत्वफलमिदम् । इति गाथार्थः ॥ ९ ॥ अत्रोदाहरणम्—

विज्जावियसव्वजणा रूवाइगुणेहि चंदणा अज्जा । भेत्तूण कम्मगंठिं वीरस्स पवत्तिणी जाया ॥ १ ॥

सुप्रतीतं चैतदिति न लिख्यते ॥ अथ तृतीयं गुणमधिकृत्याह—

पयईसोमसहावो न पावकम्मे पवत्तइ पायं । हवइ सुहसेवणिज्जो पसमनिमित्तं परेसिंपि ॥ १० ॥

'प्रकृत्या' अकृत्रिमभावेन, 'सौम्यस्वभावः' अभीषणाकृतिर्विश्वसनीयरूप इत्यर्थः । 'न' नैव, पापे कर्मण्याक्रोशवधादौ हिंसाचौर्यादौ वा 'प्रवर्त्तते' व्याप्रियते 'प्रायः' बाहुल्येनानिर्वाहादिकारणमृते । अत एव भवति 'सुखसेवनीयः' अक्लेशाराध्यः, 'प्रशमनिमित्तम्' उपशमकारणं च । अपिशब्दस्य समुच्चयार्थस्येह योगात् 'परेषाम्' अन्येषामनीदृशानामङ्गर्षिवदिति ॥ श्रूयते चागमे—

किल चम्पायां पुरि कौशिकार्यनाम्न उपाध्यायस्याङ्गर्षिरुद्रकाभिधानौ छात्रावभूताम् । तयोराद्यः सौम्यमूर्त्तिः, प्रियंवदः, सज्ज्यायचारी, विनीतविनयो न कस्यापि वञ्चको विशेषतः उपाध्यायस्य । द्वितीयः पुनः विपरीतशीलस्तमुपाध्यायेन श्लाघ्यमानमसहमानो मनस्तापमापन्नस्तच्छिद्रालोकनव्याकुलमनास्तस्थौ । तावन्यदोपाध्यायेन प्रातरेवेन्धनानयनाय नियुक्तौ । ततोऽङ्गर्षिरुपाध्यायाज्ञां सबहुमानमादायारण्यमभ्यगात् । इतरस्तु दीर्घसूत्रितया द्यूतदेवकुलिकोत्प्रेक्षणेक्षण

क्षणिकमना मध्यंदिनं यावत् स्थित्वा स्मृताध्यापकनिर्देशश्चलितोऽटवीं प्रति । ददर्श च गृहीतोरुदारुभारमायान्तमङ्गर्षिम् । ततो भीतभीतस्त्वरितं गच्छन्नेकत्र विजने नद्यवतारे पन्थकाभिधानपुत्राय भक्तं दत्त्वा निवृत्तां बृहत्काष्ठभारावनम्रविग्रहां ज्योतिर्यशोऽभिधानां वृद्धयोषितमालोक्य विस्मृतधर्मसंज्ञस्तां निहत्य गृहीततत्काष्ठभारः प्रतिनिवृत्त्य द्रुततरगत्या मार्गान्तरेणोपाध्यायमुपसृत्योक्तवान् । उपाध्यायोपाध्याय ! शृणु वल्लभतरच्छात्रस्य चेष्टितम् । स हि त्वदाज्ञां तृणायाप्यमन्यमानः क्वचित् क्रीडाव्याकुलः स्थित्वा चिराह्नं यावत् संप्रत्येवाटवीमटिटीषुरन्तरा वराकीं पन्थकवत्सपालमातरं दारुभाराक्रान्तामालोक्य कृकाटिकामोटनेन मारयित्वा च गृहीततत्काष्ठभार एष आगच्छति । प्राप्तश्चात्रान्तरेऽङ्गर्षिः । ततोऽतिकुपितेनोपाध्यायेन रे पाप ! तत्र गन्तव्यं यत्र मम दृष्टेरगोचर इत्यादिकठोरवचनमुच्चारयता निर्द्धाटितः स्वमन्दिरात् । स च प्रकृतिसौम्यतयाऽध्यापकं प्रत्यमत्सरी निर्गत्य नगरान्नातिदूरवृक्षच्छायोपविष्टश्चिन्तयामास । अहो ! मृगाङ्कमण्डलादङ्गारवर्षणमिवासंभावनीयमेतदजनि । यदयमुपाध्यायः प्रियंवदचूडामणिर्मां प्रत्येवं ज्वलज्वलनज्वालायमाना वाचोऽमुचत् । ततो नूनं भवितव्यमत्र महता ममापराधेन, इत्यात्मानमालोचयति । न च किञ्चिदात्मदुष्कृतमुपलेभे, तथाऽप्यहो ! धिग् मां गुरुजनोद्वेगकारिणमधन्यम् । धन्यास्ते ये सर्वसत्त्वानां प्रीतिमुत्पादयन्तीत्यादिविशुद्धविशुद्धतराध्यवसायहेतून् परिभावयन् समुत्पन्नजातिस्मरणः पूर्वभवाभ्यस्तभावनाभावनतः केवलज्ञानश्रियमाससाद सोऽङ्गर्षिर्महात्मेति । ततस्तन्माहात्म्यरञ्जितैः सन्निहितामरैर्विहितोऽस्य महामहिमा । महता शब्देन चोद्घुष्टं नगरे । भो भो लोकाः !

---

१ 'परान्नं' इत्यपि ॥

महापातकिना रुद्रकेणात्मना वत्सपालजननीं निपात्याङ्गर्षिमहर्षेरभ्याख्यानमदायि, ततो नासौ द्रष्टुमालापयितुं वा योग्यः। इत्यादि श्रुत्वा पश्चात्तापानलदन्दह्यमान उपाध्यायो नागरकलोकेन सहागत्य महर्षिं मर्षयाञ्चकार। श्रुत्वा च धर्मं प्रतिबुद्धश्च। रुद्रकोऽपि लोकेन निन्द्यमानोऽवाप्ततीव्रानुतापः परं संवेगमागत्य केवलश्रियमवापेति ॥

तदेवं प्रकृतिसौम्यः प्राणी प्रायेणात्मपरयोरुपकाराय संपद्यते, अतोऽङ्गर्षिवद्धर्माधिकारी स्यादिति॥ १० ॥

अथ चतुर्थं गुणमधिकृत्याह—

इहपरलोयविरुद्धं न सेवए दाणविणयसीलड्ढो। लोअप्पिओ जणाणं जणेइ धम्मंमि बहुमाणं ॥११॥

इहलोकविरुद्धं परलोकविरुद्धं च न सेवते लोकप्रिय इति योगः। तत्रेहलोकविरुद्धं परनिन्दादि। यतोऽवाचि—"सवस्स चेव निंदा विसेसओ तह य गुणसमिद्धाणं। उजुधम्मकरणहसणं रीढा जणपूयणिज्जाणं ॥ १ ॥ बहुजणविरुद्धसंगो देसादायारलंघणं तह य। उवणभोगो य तहा दाणाइविपयडमन्ने उ ॥ २ ॥ साहुवसणंमि तोसो सयसामत्थंमि अपडियारो य। एमाइयाणि एत्थं लोगविरुद्धाणि नेयाणि ॥ ३ ॥" परलोकविरुद्धं खरकर्मादि। तद्यथा—"खरकर्मित्वं राज्यं सीरपतित्वं च शुल्कपालत्वम्। विरतिं विनाऽपि सुकृती करोति नैवंप्रकारमयम् ॥ १ ॥" उभयलोकविरुद्धं द्यूतादि। तथा हि—"द्यूतं च मांसं च सुरा च वेश्या पापर्द्धि चौर्यं परदारसेवा। एतानि सप्त व्यसनानि लोके पापाधिके पुंसि सदा भवन्ति ॥ १ ॥ इहैव निन्द्यते शिष्टैर्व्यसनासक्तमानसः। मृतस्तु दुर्गतिं याति गतत्राणो नराधमः ॥ २ ॥" अयमभिप्रायः—एतानि कर्माणि लोकवैमुख्यकारणानि परिहरन्नेव शिष्टजनप्रियो भवति। धर्मस्यापि स एवाधिकारीति।

तथा दानं त्यागो विनय उचितप्रतिपत्तिः, शीलं सदाचारपरता, एभिराढ्यः परिपूर्णो यः स लोकप्रियो भवति । उक्तं च–"दानेन सत्त्वानि वशीभवन्ति दानेन वैराण्यपि यान्ति नाशम् । परोऽपि बन्धुत्वमुपैति दानात्तस्माद्धि दानं सततं प्रदेयम् ॥ १ ॥ जेण न किञ्चिवि कज्जं तस्सवि घरमागयस्स जे सुयणा । नूणं पहट्ठवयणा नियसीसं आसणं दिंति ॥ २॥ परिसुद्धसमायारो पावइ कित्तिं जसं च इह लोए । सव्वजणवल्लहोवि य सुहगइभागी य परलोए ॥ ३ ॥" एतस्य धर्मप्रतिपत्तौ फलमाह–एवंविधो लोकप्रियो 'जनानाम्' असम्यग्दृशामपि 'जनयति' उत्पादयति 'धर्मे' यथावस्थितमुक्तिमार्गे 'बहुमानम्' आन्तरप्रीतिं धर्मप्रतिपत्तिहेतुं बोधिबीजभूतं वा । सुजातवत् । कोऽयं सुजातः ? इति चेदुच्यते—

चम्पायां पुरि मित्रप्रभे राजनि राज्यमनुपालयति सकलश्रेष्ठिश्रेष्ठो धनमित्रनामा श्रेष्ठी बभूव । भार्या चास्य समानरूपगुणा धनश्रीः । तयोश्च जिनधर्माराधनसारं त्रिवर्गसाधनसुखमनुभवतोर्बहोः कालात् जन्मान्तरोपार्जितसुकृतसञ्चयः पुत्रः समुदपादि । तस्य च वर्द्धनकेऽनेकनागरकनार्यः शिरस्यक्षतनिक्षेपं कुर्वाणाः पुत्रक! सुजातो भूया इत्याशिषं प्रददुः । ततः पित्रा 'सुजातः' इत्यभिधानमदायि । अथासौ सितपक्षे शशाङ्क इव कृतसकलकलासंग्रहो यौवनश्रियाऽध्यासितः, समानवयोभिरनेकैर्नागरककुमारकैः परिवेष्टितो यथाभिमतं विजहार । कदाचिद्वीतरागमन्दिरेषु विचित्रस्नात्रसपर्यावर्यवादित्रगीतनृत्यादिविनोदमचीकरत् । कदाचिदाचार्यादिसन्निधौ शुद्धतत्त्वावबोधकारिणीं धर्मकथामाकर्णयत् । कदाचिद्धेतूपपत्तिसारं सारधर्माचारे विचारमाचरत् । कदाचिन्मनोरथातीतदानानन्दितेन दीनानाथकदम्बकेन क्रियमाणं जिन-

१ "वशेभवन्ति" इत्यपि ॥

शासनवर्णवादमशृणोत् । ततश्च तेनैवंकुर्वता भूरिभव्यलोको जिनमुनिशुश्रूषापरो व्यधीयत। अन्यदा धर्मघोषमन्त्रिभार्यायाः पियङ्गुनामिकायाश्चेट्यस्तं मित्रमण्डलेन सह विलसन्तमालोकयन्त्यो हृतहृदयाश्चिरं स्थित्वा गृहमागताः। तां बाढमाक्रोशन्तीमेवमूचुः । स्वामिनि ! दृष्टमद्यास्माभिरपूर्वं किञ्चिदाश्चर्यं, तेन व्यामोहिताभिर्विस्मृतप्रयोजनाभिर्न लक्षितो वेलातिक्रमः, अतः क्षमस्वैकमपराधमिति । ततश्च सविशेषं पृच्छन्त्यास्तस्यास्ताभिः कथितम् । अस्तीह धनमित्रश्रेष्ठिसुतः सुजातः। तस्य ललितानि वचनानामगोचराणि विलोकितान्येव सुखमुत्पादयन्ति। किं वा जीवितेन, यदि तस्य स्मितसुन्दरं वदनारविंदं न विलोक्यते। ततः सा प्रियङ्गुस्तद्दर्शनकुतूहलिनी स ममाभ्यर्णमार्गे गच्छन् दर्शनीय इति ताः किंकरीरादिदेश । दृष्ट्वा चान्यदा तं बाढमावर्जितहृदया शेषान्तःपुरिकाणां पुरतः कृतसुजातनेपथ्या नेत्रवक्त्रकरचरणादिक्रियामनुकर्त्तुमारब्धा । दृष्टा च शनैरागतेन कटकव्यवहितेन मन्त्रिणा सुजात सुजातेत्यालापश्रवणाच्च विचिन्तितमनेन । अहो ! विनष्टमन्तःपुरम् । महाधूर्त्तश्चायं सुजातो गृहमागतोऽवाप्यते । न चाप्राप्तस्य दण्डो विधीयमानः परिणतौ सुखयति, राजादिजनवल्लभत्वादस्य । इत्यादि पर्यालोच्य कूटलेखं लिलेख । तद्ग्राहकं चाज्ञातपुरुषं शिक्षयित्वा राजान्तिकं निनाय, राज्ञश्च लेखं दर्शयांचकार । तत्र च किल लिखितमिदम्—'भोः सुजात ! त्वयोक्तं दशरात्रमध्ये मित्रप्रभं बद्ध्वा तवार्पयिष्यामि तत्किमद्यापि प्रमाद्यसि ? किलानिवारितप्रचारो भवान् राजमन्दिरः' । इत्यादि लेखार्थमवधार्य राजा कुपितोऽपि न सुजाते संभवतीदमित्यभिधाय मन्त्रिणं विससर्ज चिन्तितवांश्च । यद्यप्ययमेवंविधस्तथाऽपि न प्रकटं दण्ड्यते । यतो न

१ 'सा तेन गृहागतेन' इत्यपि ॥

कोऽप्यस्यापराधं श्रद्धत्ते । विरज्यते च लोको मयीत्युपायान्तरमत्रधार्य राज्यकार्यचिन्तनव्याजेन देशपर्यन्तवर्त्तिनीमरक्षुरीं नगरीं सुजातं प्रेषयामास । तन्नायकस्य चन्द्रध्वजसामन्तस्य लेखं च ददौ । 'किलायं वणिक् प्रच्छन्नं व्यापादनीयः' इति । चन्द्रध्वजोऽपि सुजातरूपमालोक्य चिन्तितवान् नैवंविधमूर्त्तिनानेन विरुद्धमासेव्यते । तत्किमिदं राज्ञाऽऽदिष्टमिति । भवतु वा किञ्चिन्नाहमेनं द्रुह्यामीत्येकान्ते गत्वा सुजातस्य लेखं दर्शयति स्म, अवादीच्च । यद्यप्येष राजादेशस्तथाऽपि नाहमेवं करोमि, किं तु त्वया मदनुकम्पया प्रच्छन्नमासितव्यमित्यभिधायि । परिणायितः चन्द्रयशोभिधानां किञ्चित्त्वग्दोषरोगभाजं निजभगिनीम् । सोऽपि संसारासारतां भावयंस्तथैव तस्थौ । साऽपि राजपुत्री तत्समीपप्रतिपन्नश्रावकधर्मा तेनैव रोगेणाभिभूता समाधिना विमुक्तकाया सुरलोकं जगाम । ततः सुजातं परमोपकारिणं प्रणिपत्यैवमवादीत् । वद स्वामिन् ! किमिदानीं भवतः संपादयामि ? सुजातः प्राह—यद्यपेतकलङ्कः पितरौ पश्यामि ततः प्रव्रजामीति मे मनोरथस्त्वमापूरयेति । ततो देवश्चम्पाया उपरि महतीं शिलामाधाय नभसि स्थितो राजानमुवाच—यद्भवता कुमन्त्रिलिखितकूटलेखविप्रलब्धेनाकृतापराधो धर्मपुरुषशिरोमणिः सुजातो विनाशितस्तस्य दुर्नयस्य फलमिदानीमनुभूयताम् । एष नयाम्यद्य भवन्तं सपुत्रकलत्रनगरनागरकं यममन्दिरमिति । ततो राजा पश्चात्तापानलदह्यमानमानसः स्वामिन् ! मा मैवमकारुणिको भूः, समादिश कालोचितमित्यभिधाय प्रणतिपूर्वं देवं प्रसादितवान् । सोऽवोचत्—इदानीमपि तं गुरुगौरवपूर्वकं यदि चम्पायां प्रवेशयसि ततोऽस्ति भवतां मोक्षो नान्यथेति । राजा प्रत्याह—महाप्रसादो महाप्रसादः क पुनरिदानीं स प्राप्यते ? देवेनोक्तम्—इहैवोद्याने मया नीतस्तिष्ठति । ततः प्रमोदभरनिर्भरेण राज्ञा महाविभूत्या प्रवे-

शितः । प्रमोदितौ पितरौ । जातो जनानां महानन्दः । प्रभावितो जिनधर्मः । सुजातोऽपि जातवैराग्यप्रकर्षो राजानमनुज्ञाप्य सह पितृभ्यामन्यैश्च भविकलोकैः प्रव्रजितः । सुगतिं स प्राप्तवान् ॥

एवं लोकप्रियो जनानां धर्मबहुमानं जनयति। अन्यैरप्युक्तम्—"युक्तं जनप्रियत्वं शुद्धं तद्धर्मसिद्धिफलदमलम् । धर्मप्रशंसनादेर्बीजाधानादिभावेन ॥ १ ॥" इति गाथार्थः ॥ ११ ॥

अथ पञ्चमो गुणोऽक्रूरस्तं क्रूरस्वरूपप्रतिपादनद्वारेणाह—

कूरो किलिट्ठभावो सम्मं धम्मं न साहिउं तरइ। इय सो न एत्थ जोगो जोगो पुण होइ अक्रूरो॥ १२॥

'क्रूरः क्लिष्टभावः' क्रोधादिदूषितपरिणामः 'सम्यग्' अकलङ्कं धर्मं 'न' नैव 'साधयितुं' आराधयितुं 'तरइ' इति शक्नोति । स हि परच्छिद्रावलोकनलम्पटः कलुषमनाः स्वानुष्ठानं कुर्वन्नपि न फलभाग् भवतीति । उक्तं च—"पत्तंपि धम्मरयणं कूरो हारेइ कोहमोहंधो । जह कूलवालनामो समणाभासो गुरुपओसी ॥ १ ॥ तवसुत्तविणयपूया न सङ्किलिट्ठस्स हुंति ताणंति । खमगागमि विणयरया कुंनलदेवी उदाहरणा ॥ २ ॥" 'इति' अस्माद्धेतोरसौ नैवात्र शुद्धधर्मयोग्य उचितः । षष्ठीसप्तम्योरर्थं प्रत्यभेदादस्येति दृश्यम्। योग्यः 'पुनः' एवकारार्थः । ततो योग्योऽक्रूर एवेति योगः। यतः—"नो परलोगो न जिणा न धम्ममो[1] गंडपीलसीलं तु। नत्थट्ठमिया[2]वि तहा एमाइ न मन्नई एसो ॥ १ ॥" लघुकर्मत्वात्। इति गाथार्थः ॥ १२ ॥ ॥ १० ॥

अथ षष्ठगुणस्वरूपमाह—

---

१ 'धमो नो' इत्यपि । २ 'तत्थट्ठि—' इत्यपि ॥

इहपरलोगावाए संभावेंतो न वट्टई पावे । बीहइ अयसकलंका तो खलु धम्मारिहो भीरू ॥ १३ ॥

'इहलोकापायान्' राजनिग्रहादीन्, 'परलोकापायान्' नरकगतिगमनादीन्, 'संभावयन्' मनसा सङ्कल्पयन्, 'न वर्त्तते' न प्रवर्त्तते 'पापे' हिंसाऽनृतादौ । तथा 'बिभेति' उत्रसति 'अयशःकलङ्कात्' कुलमालिन्यहेतोः, अतोऽपि कारणात् पापे न प्रवर्त्तत इति योगः । ततः 'खलुः' अवधारणे धर्मार्हः एव पापभीरूर्भवतीति । अयमिह भावार्थः—यः पापकर्मचिकीर्षाभावे युक्तायुक्तमालोचयति, स धर्मोचित इति। उक्तं च—"अणुरायरहसपरिपिल्लियंमि चलियंमि इंदियग्गामे । ते धन्ना जाणमई जुत्ताजुत्तं वियारेइ ॥ १ ॥ स हि किल—"वहमारणअब्भक्खाणदाणपरधणविलोयणाईणं । सव्वजहन्नो उदओ दसगुणिओ एक्कसिकयाणं ॥ १ ॥ " इत्यादिपापफलानि श्रुत्वा सुतरां दुर्गतिहेतून् परित्यजति सुलसवत् ॥ १३ ॥

तथा हि तच्चरितमिदम्—

रायगिहे नगरे कालसूयरिओ नाम सूणाजीवी अहेसि। सो य किर अभव्वो दिणे दिणे पंच पंच महिससए वावाइयवं । तओ सत्तमपुढवीओवि अब्भहियं पावमज्जियंति । गहिओ चरमकाले महारोगायंकेण । धाउविवज्जया पंचवि इंदियत्थे विवरीए वेएइ । सुरहिसिसिरं विलेवणमसुइउसिणं कद्दमंति मन्नइ । एवं भोयणपाणतूलिमाइसु विभासा । तस्स सुलसो पुत्तो सव्वायरेण पडियारं करावेइ । जाहे सो रइं न लहइ, ताहे सुलसो अभयकुमारं मित्तं पुच्छइ । सो भणइ—भद्द ! जीवघायाओ इमेण घोरं पावकम्ममुवज्जियं, तमिह लोए चेवोइन्नं । तो ठवेहि एयं कंटकसेज्जाए । विलिंपेहि असुइणा ।

---

१ 'पाप' इति न क्वचित् । २ व्यापादितवान् ॥

पेज्जहि खारतोरविगंधिनीराई, जेण रई पाउणत्ति। सुलसेणावि तहाकएण पत्तपरिओसो कंचि कालं जीविऊण कालगओ गओ सत्तमपुढविं सोयरिओ। ठविओ सयणेहिं सुलसो तस्स पए भणियो य कुणसु जणयववसायं। सोवि जणयाणुभूयं संभरमाणो न तरामि पावफलाणि सोढुंति जंपंतो नेच्छइ। इयरे भणंति—पावं विभागे काऊण गिण्हिस्सामो। तओ तेसिं बोहणत्थं सुलसेण ताडिओ तिण्हकुहाडेण निद्दयं नियपाओ। आरसंतेण य भणिया बंधवाः, भो भो विभायह दुक्खं, गिण्हह थोवं थोवं, जेण मे सुहं भवइ। तेहिं भणियं—वच्छ! सुट्ठु गिण्हामो जइ अम्हासु संकमइ, किं तु नत्थि उवाओ जेणन्नसंतियं दुक्खमन्नम्मि संकमइ। तो किं भणह तुह पावं विभइस्सामोत्ति तेण वुत्ता लद्धनिच्छिया ठिया तुण्हिक्का सयणा। इयरोवि अभयकुमारेण भगवओ समीवे सावगधम्मं गाहिओ। पालिऊण य तं विहिणा पाविओ देवलोगंति॥१३॥

अथ सप्तमगुणं स्वरूपतः फलतश्चाह—

असढो परं न वंचइ वीससणिज्जो पसंसणिज्जो य। उज्जमइ भावसारं उचिओ धम्मस्स तेणेसो॥१४॥

शठो मायावी, तद्विपरीतः 'अशठः' 'परं' अन्यं 'न वञ्चति' नाभिसन्धत्ते। अत एव 'विश्वसनीयः' प्रत्ययस्थानं भवति। इतरः पुनरवञ्चन्नपि न विश्वासकारणम्। यदुक्तम्—"मायाशीलः पुरुषो यद्यपि न करोति किञ्चिदपराधम्। सर्प इवाविश्वास्यो भवति तथा ह्यात्मदोषहतः॥ १॥" तथा 'प्रशंसनीयः' श्लाघनीयश्च स्यादशठः, इति प्रक्रमः। यतोऽवाचि— ॥ ११ ॥
"यथा चित्तं तथा वाचो यथा वाचस्तथा क्रिया। धन्यास्ते त्रितये येषां विसंवादो न विद्यते॥ १॥" तथा 'उद्यच्छति' प्रयतते धर्मानुष्ठान इति गम्यते। 'भावसारं' सद्भावसुन्दरम्, न पुनः पररञ्जनाय कूटक्षपकवत्। उक्तं च—"जोवि य

पाडेऊणं मायामोसेहिं खाइमुद्धजणं । निग्गाममज्झवासी सो सोयइ कवडखमउव ॥ १ ॥" 'उचितः' पात्रं 'धर्मस्य' उक्तान्वर्थस्य 'तेन' हेतुना 'एषः' अशठः । स्वार्थप्रवृत्तित्वात्तथाविधश्चातिदुर्लभः । यतोऽवाचि—"भूयांसो भूरिलोकस्य चमत्कारकरा नराः । रञ्जयन्ति स्वचित्तं ये भूतले ते तु पञ्चषाः ॥ १ ॥" इति गाथार्थः ॥ १४ ॥

अथाष्टमगुणगणान् व्यावर्णयन्नाह—

उवयरइ सुदक्खिन्नो परेसिमुज्झिय सकज्जवावारो । तो होइ गज्झवक्को णुवत्तणीओ य सव्वस्स ॥ १५ ॥

'उपकरोति' उपकाराय प्रवर्त्तते, अभ्यर्थितसारतया । 'सुदाक्षिण्यः' शोभनदाक्षिण्यवान् । कोऽर्थः ? यदिहपरलोकोपकारिप्रयोजनं तस्मिन्नेव दाक्षिण्यवान्, न पुनः पापहेताविति । सुशब्देन दाक्षिण्यं विशेषितम् । 'परेषां' अन्येषाम् । कथम् ? इत्याह—'उज्झितस्वकार्यव्यापारः' परित्यक्तात्मप्रयोजनप्रवृत्तिः, 'ततः' कारणात् भवति 'ग्राह्यवाक्यः' अनुलङ्घनीयादेशः । तथा 'अनुवर्त्तनीयश्च' अभीष्टचेष्टितश्च 'सर्वस्य' धार्मिकलोकस्येति हृदयम् । स हि दाक्षिण्यगुणेनाकामोऽपि धर्ममासेवते । क्षुल्लककुमारवत्—

किर सागेए नयरे पुंडरीओ नाम राया । कंडरीओ से भाया जुवराया य । तस्स य रूवोहामिव सुरंगणा जसभद्दा भारिया । सा कयाइ कयसिंगारा निज्झाइया नरनाहेण । कुसमसरवेयणाविहुरियहियएण पत्थिया य दो तिन्नि वाराओ नेच्छइ भणइ य । कहं भाउणोवि न लज्जसि ? तओ न एयंमि जीवंते एसा ममं इच्छइत्ति छिड्डं लहिऊण घाइओणेण कंडरीओ । तओ विन्नायपरमत्था नत्थि एयस्स अकरणिज्जंति सीलभंगभीया पलाणा जसभद्दा । कहाणयविसेसेण पत्ता सावत्थिं । दट्ठूण

वियारभूमिनियंताओ साहुणीओ लग्गा पिट्ठओ पत्ता तदुवस्सयं। पडिया पाएसु कित्तिमइमयहरियाए। धम्मलाभपुव्वं आसासिया तीए। एईएवि रुयंतीए नियवुत्तंतं निवेइऊण मग्गिया पव्वज्जा। उचियत्ति पव्वाविया विहिणा। पाविलिया पव्वज्जा। नवरं पच्छन्नो गब्भो मं न पव्वावेहित्ति मयहरिगाए पुव्विं न सिट्ठो सो पइदिणं पवड्ढिओ। पुच्छियाए य साहियो सब्भावो। मयहरियाएवि सिट्ठं सेज्जायरीए। तीएवि माइपिइभूयाए पच्छन्नं पडिजागरियाए जाओ से दारओ सलक्खणोत्ति परिवालिओ अट्ठवासो। तओ पव्वाविओ अजियसेणसूरिणा। कयं से नामं खुड्डुगकुमारोत्ति। परिवालियदुवालसवाससामन्नपरियाओ कयाइ वसंतसमए दट्ठूण तरुणवग्गं विविहकोलाहिं कीलंतं पडिभग्गो संजमाओ। तओ अट्टवसट्टेण साहिओ सब्भावो संघाडइल्लस्स। तेणावि अणुसासिओ जाहे न बुज्झइ, ताहे निवेइयं जणणीए। तीएवि बहुविहमणुसासिऊण जाहे न बुज्झइ, तओ वुत्तो पुत्त? दुवालसवासाणि सइच्छाए तए सामन्नमणुचिन्नमियाणिं महवयणेय तत्तियं पालेसु। तओ दक्खिन्नसारयाए ठिओ तत्तियं कालं। तयंते पुच्छिया जणणी भणइ—मम जणणिभूयं पवत्तिणिं पुच्छाहि। पुच्छियाए तीएवि असुहस्स कालहरणंति काऊण पडिच्छाविओ दुवालसवासाणि। एवं आयरिएण उवज्झाएणावि धारिओवि जाहे न चिट्ठइ ताहे अहो! दारुणो कम्मपरिणामोत्ति भावयंतेहिं तेहिं सव्वेहिं उवेहिओ। नवरं पुत्तसिणेहमोहियाए जणणीए चिररक्खियं मुद्दारयणं कंबलरयणं च समप्पिऊण भणिओ, सागेए तुह चुलपिया पुंडरीओ राया, ॥ १२ ॥
तस्स एयाइं दंसेज्जासि जेण परिन्नायमुद्दारयणो तुह रज्जभायं देइत्ति पडिवज्जिऊण गहियवेसो चेव पत्तो सागेयं। आवा-

१ 'भणियं' इत्यपि ॥

सिओ रायभवणेगदेसे । तक्कालं च रायभवणंगणे पवत्तं महापेच्छणयं । मिलिओ पहाणलोगो । अहंपि चिरकालाओ अज्ज पेच्छणयदंसणसुहमणुहवामित्ति काउं पत्तो खुड्डगकुमारोवि । जायमारूढरंगभरं महापेच्छणयं जाव य किंचि सावसेसा जामिणी न य पारिओसियं पडइत्ति आलस्सेण निद्दाइया नट्टिया । तओ मा रंगभंगो होउत्ति तीए बोहणत्थ-मुग्गीयं मयहरिगाए—"सुट्ठु गाइअं सुट्ठु वाइअं सुट्ठु नच्चियं सामसुंदरि ! । अणुपालियदीहराइयाओ सुमिणंते मा पमायए"। तं च सोऊण पडिबुद्धेण पक्खित्तं कंबलरयणं चेलएण, जुवराएण जसभद्देण कुंडलं, सिरिकंताए सत्थवाहीए हारो, जयसं-धिमंतिणा कंकणं,कन्नपालमहामिंठेण रयणंकुसो। पंचवि एयाणि लक्खमोल्लाणि निवडिएसु रायाइपसाएसु जाओ नट्टियाए महालाभो । पभाए पुट्ठो रन्ना चेलगो कीस तुमं तुट्ठोसि । तेणावि साहिओ स वुत्तंतो जाव रज्जत्थी समागओम्हि । दंसियं मुद्दारयणं । रन्ना भणियं ता गिण्हाहि हियइच्छियं मंडलं । चेलएण भणियं—अलं रज्जेण, सुविणयमेत्तंमि जीवि-यम्मि संजममेवाणुपालिस्सामित्ति। जसभद्देण सिट्ठं अहंपि, वुड्ढो राया ता रज्जं गिण्हामित्ति चिंततो एयाए विबोहिओम्हि। सिरिकंताए वुत्तं अहं चिरपवसियस्स सत्थवायस्स ता पुरिसंतरमन्निसामित्ति वियप्पंतीएयाए विबोहियम्हि । मंतिणावि निवेइयमहमन्नेण राइणा पलोभिओ किं नियसामियं घाएमि न वत्ति ? चिंताउलो एयाए संबोहिओम्हि । कन्नपालेणवि कहियं—अहममुगेण वेरिनरिंदेण बहुदव्वं दाऊण पट्टहत्थिं मग्गिओ माराविओ वा किं कायवमूढो एयाए वेयाविओ-म्हित्ति । तओ राइणा अच्छलं तुम्हाणं सव्वेसिं करेह हियइच्छियाइंति वुत्तेहिं सुदेसणासवणपडिबुद्धेहिं गहिया सव्वेहिं खुड्डगकुमारसमीवे पवज्जा । तेहिं सहिओ समागओ गुरुसमीवं खुड्डगकुमारो ।कुलाणुरूवमेयंति पसंसिओ गुरुहिं । जाओ

सकज्जसाहगोत्ति । एवमेएण संजमो दक्खिन्नगुणेण चिरमणुपालिओ परिणामसुहावहो य संवुत्तोत्ति॥ १५ ॥

अथ नवमं गुणमाश्रित्याह—

लज्जालुओ अकज्जं वज्जइ दूरेण जेण तणुयंपि । आयरइ सयायारं न मुयइ अंगीकयं कहवि ॥ १६ ॥

'लज्जालुओ' इति प्राकृतशैल्या लज्जावान् 'अकार्यं' कुत्सितकृत्यं, नञः कुत्सार्थत्वात् 'वर्जयति' परिहरति 'दूरेण' विप्रकर्षेण 'येन' हेतुना तेन धर्माधिकारीति प्रकृतेन योगः । 'तनुकमपि' स्तोकमपि । उक्तं च—"अवि गिरिवरगरुयदुरंतदुक्खभारेण जंति पंचत्तं । न उणो कुणंति कम्मं सप्पुरिसा जं न कायव्वं ॥ १ ॥" 'आचरति' अनुतिष्ठति 'सदाचारं' शोभनव्यवहारं, तस्यालज्जाहेतुत्वात् । तथा 'न' नैव 'मुञ्चति, उज्झति 'अङ्गीकृतं' आरब्धं धर्ममिति गम्यते । 'कथमपि' स्नेहबलाभियोगादिनापि प्रकारेणेति लज्जाहेतुत्वादारब्धपरित्यागस्य । तथा चाह—"दूरे ता अन्नजणो अंगे च्चिय जाइं पंचभूयाइं । तेसिं चिय लज्जिज्जइ पारद्धं परिहरंतेहिं ॥ १ ॥" प्रायः सुकुलोत्पन्न एवंविधो भवति । इति गाथार्थः॥१६॥

इहोदाहरणम्—

एगंमि नयरे चंडरुद्दो नामायरिओ विहरइ । सो य किर मंजलणसीलो पए पए साहूणं रुसइत्ति कोहोदयभीरू भिन्नोवस्सए ज्झाणकोट्ठोवगओ चिट्ठइ । अन्नया एगो सेट्ठिपुत्तो नवपरिणीयनेवच्छो केलिकिलवयंसपरिगओ तमुज्जाणमागओ । तओ परिहासवंदणेण वंदिऊण साहुणो वुत्ता तंमित्तेहिं । भयवं ! एस अम्ह वयंसो कुरूवकन्नयालाभाओ वेरग्गिओ तुम्ह समीवे पव्वइउमागओ । तओ केलिकिला एएत्ति न दिंति साहुणो तेसिमुत्तरं । जाहे दोच्चंपि तच्चंपि कोलाहलेन

सज्झायविग्घं करिंति ताहे माहूहिं भणिया—जइ एवं गच्छह इह नाइदूरे अम्ह गुरू पव्वावेही । गंतूण गुरुसमीवे तहेव भणिउमारद्धा । तओ ज्झाणवाघायकुविएण भणियं सूरिणा जइ मच्चमेयं ता सिग्घमागच्छ हसंतो समागओ दारओ। खेलमल्लयभूईए लुंचिउं पवत्ता सूरिणो । ताहे ते वयंसा ससज्झसा मा मा भयवं ! एवं करेहि, परिहासो एस अम्हेहिं कओत्ति जाव जंपंति ताव लहुहत्थयाए दरलुंचिओ एस चिंतिउं पवत्तो । लज्जिज्ज इदाणिं दरदिक्खिएहिं परिभमंतेहिं ता संपयं पारद्धनिव्वाहणमेव सेयं । जओ—"अलसायंतेणवि सज्जणेण जे अक्खरा समुल्लविया । ते पत्थरटंकुक्कीरिय व्व न हु अन्नहा होंति ॥ १ ॥" एवं भाविऊण भणियं—भयवं ! मा एएसिं सुणेहि । अहं तुमं च एत्थ पमाणंति । परियाणियपरिणामेन पव्वाविओ गुरुणा । उवालंभभीया पलाणा इयरे । चेलओवि पहट्ठमुहपंकओ वंदिऊण गुरुं भणिउमारद्धो । दमगभावं मोयाविऊण ठाविओहं भदंतेहिं चक्कवट्टिपए । किं तु पभाए पभूयसयणा मं इओ वाविस्संति, ता करेह पसायं रयणीए देसंतरगमणेण । आयरिएहिं भणियं—अहं रत्तीए न पेच्छामि ता पेहेहि मग्गं जेण सुहेण वच्चामो । आगओ सोहिऊण खुड्डगो । पत्थिया दोवि । अन्नायनिसाचरो गुरू पए पए पक्खलंतो, एरिसो मग्गो सोहिओत्ति भणंतो सीसं सीसे दंडेण ताडेइ । तेणावि एस महप्पा मए संतावे पाडिओत्ति संविग्गेणारोविओ पिट्ठीए । तहावि अंधयारदोसेण परिक्खलंतं तमायरिया पुणो पुणो ताडेंति भणंति य । अरे दुट्ठसेह ! एरिसो मग्गो विसोहिओ । सोवि अहो ! मे अहन्नया जमेस महप्पा एरिसवसणमुवणीओ । पभाए विस्सामणाइणा तहाजइस्सं, जहा संतावविरहिओ सुहभायणं भविस्सइत्ति

१ "चिर–" इत्यपि ॥

भाविंतो सुज्झाणं पाविऊणापुव्वकरणखवगसेढिकमेण केवली संवुत्तो । सुहं सुहेण य गंतुं पवत्तो । ताहे आयरिया विम्हि-या उवसंतकोवा य पुच्छंति । अज्जो ! कीस संपयं न खलसि ? । तेण भन्नइ, जेण सुट्ठु पेच्छामि वत्तिणीं । सूरीहिं भणियं, चक्खुणा नाणेण वा ? । सो बेइ नाणेणं । केरिसेण छाउमत्थिएण केवलिएण वा ? । भयवं ! केवलिएणंति तव्वयणमाय-न्निऊणाउट्टा सूरिणो केवली आसाइओत्ति अप्पाणं निंदिउं पवत्ता । एत्थंतरे पहाया रयणी, दिट्ठा य केसुलुंचएण कोमले तस्स मत्थए रुहिरारुणा दंडपहारवणा । आयरिएहिं विचिंतियं च । धिरत्थु मे पंडिच्चस्स, धिरत्थु मे वयपरिणामस्स, धिरत्थु मे दीहरसमणभावस्स, जेण मए एस कोहपिसाओ न वसीकओ । पेच्छ एएणाज्जदिणदिक्खिएणावि विढत्तपरमो-वसमेण सकज्जमाराहियंति । एवं महावेरग्गमग्गलग्गा सूरिणोवि केवलमुप्पाडिऊण कमेण पाविया नेव्वुइपुरंति । एवं लज्जालुणा चंडरुद्दसूरिसीसेण सामन्नमासाइयमाराहियं चेति ॥

अथ दशमं दयालुत्वगुणमाह—

मूलं धम्मस्स दया तयणुगयं सव्वमेवणुट्ठाणं । सिद्धं जिणिंदसमए मग्गिज्जइ तेणिह दयालू ॥ १७ ॥

'मूलं' आद्यकारणं 'धर्मस्य' उक्तनिरुक्तस्य 'दया' प्राणिरक्षा । यतोऽस्या एव रक्षार्थं शेषव्रतानि । तथा चाऽवाचि— "अहिंसैषा मता मुख्या स्वर्गमोक्षप्रसाधिनी । अस्याः संरक्षणार्थं च न्याय्यं सत्यादिपालनम् ॥ १ ॥" तथा—"नर्ते मृदं यथा कुम्भो नर्ते बीजं यथाङ्कुरः । निर्मालिन्यस्तथा धर्मो नर्ते स्याज्जीवरक्षणम् ॥ १ ॥" 'तदनुगतं' तत्सहभावि 'सर्व-मेव' विहाराहारतपोवैयावृत्त्यादिसदनुष्ठानं 'सिद्धं' प्रतीतं 'जिनेन्द्रसमये' पारगतागमे । उक्तं च—"न सा दीक्षा न सा

भिक्षा न तज्ज्ञानं न तत्तपः । न तद्दानं न तद्ध्यानं दया यत्र न विद्यते ॥ १ ॥ " 'मृग्यते' अन्विष्यते 'तेन' कारणेन 'इह' धर्माधिकारप्रस्तावे 'दयालुः' दयाशीलः । इदमत्र तात्पर्यम्—यः स्वत एव दयालुः स सुखेनेर्यासमितिप्रत्युपेक्षणादौ प्रवर्त्तते, अतो धर्मयोग्यो भवति धर्मरुचिवत् । श्रूयते ह्यागमे—

कश्चित् कुलपुत्रकः परलोकभीरुर्गृहवासमारम्भबहुलमवधार्य तापसानां मध्ये प्रव्रजितः । तानपि कन्दमूलोत्पाटनाद्यारम्भप्रवृत्तानवलोक्य सविषादो जज्ञे । यतस्तेऽपि किल चतुर्दश्यादितिथिष्वनाकुट्टिमाघोषयन्ति स्वकीयाश्रमे । ततो न कोऽपि तस्मिन् दिने पुष्पफलकन्दानयनाय वनं प्रति गच्छति । सोऽपि धर्मरुचिस्तदेकं दिनं बहुमन्यमानोऽहो ! सुन्दरं भवति, यदि सर्वदेयमनाकुट्टिरुदघुष्यतेति चिन्तयन्नासाञ्चक्रे । कदाचिदासन्नमार्गे साधू व्रजन्तावालोक्य भद्रकतया तावपृच्छत् भो तपोधनौ ! किमरण्यं प्रति प्रस्थितौ युवाम्? किं भवतां धर्मेऽद्यानाकुट्टिर्न विधीयते? । तमृजुशीलमालोक्य साधू प्रत्यूचतुः । तापसकुमार ! अस्माकं धर्मे सर्वदाऽनाकुट्टिरेव । यतो वयं न कदाचनापि सचेतनां पृथ्वीमुपमर्दयामः । न सचेतनं वारि व्यापारयामः । नाप्यनेकसत्त्वव्यापत्तिहेतुवैश्वानरमुद्दीपयामः । न चापि तृणलताप्रवालपुष्पफलकन्दादिवनस्पतीन् संघट्टयामः, उत्पाटयामो, भुग्महे वा । अतोऽस्माकं धर्मे सर्वदाऽनाकुट्टिरेवेति । श्रुत्वेदं दयाशीलतया ताभ्यामेव सह गत्वा गुरोरात्मानं निवेद्य प्रव्रजितः सुप्रव्रजितश्च बभूव धर्मरुचिरिति ॥ १७ ॥

इदानीमेकादशं गुणमाह—

---

१ "कुट्य" इत्यपि ॥

मज्झत्थसोमदिट्ठी धम्मवियारं जहट्ठियं मुणइ । कुणइ गुणसंपओगं दोसे दूरं परिच्चयइ ॥ १८ ॥

मध्यस्था क्वचिद्दर्शने पक्षपातविकला सौम्या च प्रद्वेषाभावाद्दृष्टिर्दर्शनं यस्य स 'मध्यस्थसौम्यदृष्टिः' सर्वत्रारक्तद्विष्ट इत्यर्थः । 'धर्मविचारं' नानापाषण्डमण्डलीमण्डपोपनिहितधर्मपण्यस्वरूपं 'यथावस्थितं' सगुणनिर्गुणाल्पबहुगुणतया व्यवस्थितं कनकपरीक्षानिपुणविशिष्टकनकार्थिपुरुषवत् 'मुणति' बुद्ध्यते, अत एव 'करोति' विदधाति 'गुणसंप्रयोगं' गुणैः ज्ञानादिभिः सह संबन्धं 'दोषान्' गुणप्रतिपक्षभूतान् 'दूरं' इति दूरेण 'परित्यजति' परिहरति सोमवसुब्राह्मणवत्—

तेण किर दुब्भिक्खे कुडुंबं निवाहिउं सुद्दपरिग्गहो गहिओ । न य तं जीवियंति वेरग्गगओ सुद्धिनिमित्तं पत्थिओ पाडलिपुत्तं । अंतरा य बंभणसुन्हमप्पं तप्पाइयं बंभणनिवारियग्गिदाहं दट्ठूण मरणंपि अविहिणा न सुंदरंति भावेंतो पत्तो एगं सन्निवेसं । पविट्ठो एगस्स अवत्तलिंगिणो मढियाए । सोत्ति चरियाकालो वट्टइ । अतिही य तुमंति चिट्ठ मढीयाए वोत्तूण पविट्ठो गामं । खणंतरे विज्जलगहियभत्तो पत्तो य । भुत्तं पज्जत्तं दुवेहिंपि । पत्थावे पुच्छिओ सोमवसुणा केरिसो तुम्ह धम्मो ? किं वा एत्थ तत्तंति ? । तेण भणियं, भद्द ! एगस्स गुरुणो अम्हे दो सीसा आसि । अचिरदिक्खियाणमम्हाण परोक्खीभूओ गुरू । उवइट्ठं च तेण अम्हाणं 'सुहं सोयव्वं, मिट्ठं भुंजेयव्वं, लोयप्पिओ अप्पा कायव्वो' । न य एयस्स अत्थो कहिओ । तओ अहं सबुद्धीए इह गामे चिट्ठामि । मंतोमहाईहिं लोगस्सुवगारं करेमि । अओ चेव लोयप्पिओ भोयणं च मिट्ठं पावेमि । एसा य मज्झ सेज्जा तओहं सुहं सुवामि । एत्तियं तत्तं मए नायं । परमत्थं पुण गुरुणो जाणंति । तओ चिंतियं सोमवसुणा सोहणो गुरूवएसो, न पुण एस परमत्थो । भणियं च कहिं पुण ते गुरु-

भाया । सिद्वमियरेण अमुगत्थगामे चिट्ठति । दुइयदिवसे तत्थेव गओ सोमवसू, मिलिओ तस्स । तेणावि कयमुचियं भणियं च भोयणावसरे एहि मए सद्धिं चलिया दोवि । पविसंतो गामे भणिओ एगेण अवत्तलिंगीएहिं मम गेहे पालिं खेडसु । तेण भणिअं एस पाहुणगो । एही तओ एसोवि, तुमंपि एहत्ति भणंतेण तेण नीया दोवि गिहं । कयं चलणसोयाइयं । भुत्ता दोवि सवकामगुणियमाहारं । गया सट्ठाणं । पुच्छिओ बंभणेण सो समायारं । तेणावि कहियपुववुत्तं । तेण भणियं महमेगंतरियं भुंजामि तओ मिट्ठं होइ । ज्झाणज्झयणपरिसंतो जत्थ व तत्थ व सुहं सुत्तामि । नीरीहचित्तोत्ति पिओ सवलोयस्स । एवं गुरुवयणमाराहेमि । तओ सोमवसू सोहणतरो एस, किं तु गंभीरो गुरूवएसो न नज्जइ सब्भावोत्ति भावेंतो पत्तो पाडलिपुत्तं । तत्थ किर पसिद्धो तिलोयणनामो पंडिओत्ति गओ तस्स गेहं । पविसंतो अणवसरोत्ति पडिच्छाविओ दोवारिएण । ताव य गहियकुसुमदंतवणो समागओ पुप्फवडुगो । सो पुण मग्गिज्जंतोवि दंतवणमदाऊण पविट्ठो अब्भंतरं । खणंतरे निग्गंतूण सवस्स दाउमारद्धो । किमेस पुविंमदिंतो ? किमियाणिं देइत्ति पुच्छिए[1] सोमवसुणा सिट्ठं दोवारिएणं । पढमं पहुणो दिन्ने गोरवं होइ इयरहा अवन्ना । तदुवरियं सेसाणं सेसा चेव भवइ । एत्थंतरे तेदासन्नगिहे[2] दो पुरिसा आयमणं मग्गंति । दिन्नमेगस्स एगाए तरुणीए तं चेलुगाए[3], बीयस्स दीहदंडएण उलंकएण । तत्थवि पुट्ठेण कारणं सिट्ठं दोवारिएण । पढमो एयाए भत्ता, बीओ परपुरिसो, अओ एयस्स एवं चेव दाउमुचियंति । अहो ! नीइमत्तो परिवारोवि पंडियस्सत्ति चिंतिरस्स[4] भट्टस्स समागया गहिरतूररवा, पूरियदियंतरा, पढंतभूरिभट्टचट्टा, सिबिया-

१ 'पुच्छिओ'' इत्यपि । २ 'तदासन्नि' इत्यपि । ३ 'वालुगाए' इत्यपि । ४ ''चिंतितस्स'' इत्यपि ॥

रूढा, दुवारासन्नमेगा तरुणी । पुच्छियं सोमवसुणा, का एसा ? किमेवमागच्छइत्ति । तेण भणियं एसा पंडियधूया, राउले पायपूरणेण पत्तसंमाणा सगिहमागच्छइ । कहंति सुण राइणा पाओलंबिओ—"तेन शुद्धेन शुद्ध्यति" तओ इमीए पूरिओ अ[1]—"यत्सर्वव्यापकं चित्तं मलिनं दोषरेणुभिः । सद्विवेकाम्बुसंपर्कात्तेन शुद्धेन शुद्ध्यति ॥ १ ॥" ताव य पविट्ठा गिहमेसा । समाइच्छिया जणएण, परियणेण य । अहो ! परियणोवि इमस्स पंडिओत्ति विम्हिओ लद्धावसरो गओ सभागयस्स पंडियस्स पासं । कयाभित्तायणो पत्तस्संमाणो निविट्ठो उचियासणे । एत्थंतरे गुरुजाया मए सुविणे भुत्ता ता करेहि मे विसोहिंति विन्नत्तो केण य बडुएणं तिलोयणो । तत्तलोहनारिअवरुंडणाओ ते सुद्धित्ति वुत्ते अब्भुवगयं बडुगेण । कया अग्गिवन्ना लोहनारी । तमालिंगतो सो गहिओ पुव्वनिउत्तपुरिसेहिं । सुद्धो सुद्धोत्ति पडिया ताला । ताव सोमवसुणावि सवुत्तंतनिवेयणपुव्वमग्गियं पच्छित्तं । परिभाविऊण गहियाणेण दो मट्टियागोलगा उल्लो सुक्को य । पक्खित्ता कुडे उल्लो विलग्गो तत्थ न इयरो । तओ भणिओ सोमवसू, भद्द ! सुक्कगोलगसमो तुममओ सुद्धो चेव । पुणो भणियं सोमवसुणा वयगहणं काउमिच्छामि, केरिसस्स गुरुणो समीवे करेमि ? । भणियं पंडिएण, जो 'सुहं सोयव्वं, मिट्ठं भुंजियव्वं, लोयप्पिओ अप्पा कायव्वो' त्ति एएसिं तिण्हं पयाणमत्थं बुज्झइ, पालेइ य, निप्पिहो य सव्वहा, तस्स समीवे पव्वयाहि । सोमवसुणा भणियं, को पुण एएसिं पयाणमत्थो ?। पंडिएण भणियं, जो रागदोसविरहिओ परिचत्तारंभपरिग्गहो सुहज्झाणोवगओ सुयइ सो सुहं सुवइ । जो महुयरवित्तीए अकयमकारियं मुहालद्धं सव्वपाणिपीडापरिहारेणारत्तदुट्ठो

[1] क्वचित् "अ" नास्ति ॥

भुंजइ सो परिणामसुंदरंति मिट्ठं भुंजइ । जो मंतमूलोसहाइयउवयारमकरिंतो परलोयाणुट्ठाणसारयाए सबलोयाण वल्लहो होइ सो लोयप्पिओत्ति वुच्चइ । निरीहो जो भत्ताणुरत्तलोयाओ न धणधन्नहिरन्नसुवन्नाइ समीहइत्ति । एवमववहारियभावत्थो चलिओ गुरुमन्निसिउं माहणो । मिलिओ एगत्थ उज्जाणे सुघोसगुरुणं । वंदिऊण पुच्छिओ पुवभणियपयाणमत्थं । साहिओ जहुत्तो गुरूहिं । निरीहत्तजाणणत्थं चिट्ठिओ तत्थेव रत्तिं । दिट्ठमावस्सयाइकिच्चं साहूणं । जाव सज्झायं काऊण पसुत्ता साहुणो । आयरिया य वेसमणोववायमज्झयणं परियट्टिउं पवत्ता । तप्पभावेण य समागओ वेसमणसुरो । ट्ठिओ निसुणंतो । परिसमत्ते तंमि अहो ! सुसज्झाइयं सुसज्झाइयं भणंतो पडिओ गुरुचलणेसु । विन्नविउं पवत्तो, भयवं ! तुट्ठोहं तुह्माणं, वरेह वरं, हिरन्नं वा, सुवन्नं वा, दुपयं वा, चउप्पयं वा जं भे रोयइ तं सवं संपाएमि । आयरिएहिं भणियं धम्मलाभो ते भवउ न केणावि किंचणे पओयणंति । ताहे अहो ! भे सुलद्धं जम्म जीवियंति जंपंतो उज्जोइयदिसामंडलो वंदिऊण गुरुं गओ सट्ठाणं सुरवरो । सोमवसूवि अहो ! निरीहत्तंति परितुट्ठमणो साहियसब्भावो पवाविओ गुरूहिं । जाओ संजमाराहगो । एयारिसो मज्झत्थो धम्मारिहोत्ति ॥ १८ ॥

अथ द्वादशं गुणरागिणं स्वरूपफलोपदर्शनद्वारेणाह—

गुणरागी गुणवंते बहु मन्नइ निग्गुणे उवेहेइ । गुणसंगहे पवत्तइ संपत्तगुणं न मयलेइ ॥ १९ ॥

गुणेषु धार्मिकलोकभाविषु रज्यत्येवंशीलो 'गुणरागी' । 'गुणवन्तः' गुरुगुणभाजो यतिश्रावकादीन् 'बहु मन्यते' मनःप्रीतिभाजनं करोति । अहो ! धन्या एते, सुलब्धमेतेषां नरजन्मेत्यादि । तर्हि निर्गुणान्निन्दतीत्यापन्नम् । यथा देवदत्तो

दक्षिणेन चक्षुषा पश्यतीत्युक्ते वामेन न पश्यतीत्यवसीयते । तथा चाहुरेके—"शत्रोरपि गुणा ग्राह्या दोषा वाच्या गुरोरपि" इति चेन्नैतदेवं धार्मिकोचितमित्याह—'निर्गुणानुपेक्षते' असंक्लिष्टचित्ततया तेषामपि निन्दां न करोति । यतः स एवमालोचयति—"सन्तोऽप्यसन्तोऽपि परस्य दोषा नोक्ताः श्रुता वा गुणमावहन्ति । वैराणि वक्तुः परिवर्द्धयन्ति श्रोतुश्च तन्वन्ति परां कुबुद्धिम् ॥ १ ॥" तथा—"कालंमि अणाईए अणाइदोसेहि वासिए जीवे । जं पावियइ गुणोवि हु तं मन्नेहं महच्छरियं ॥१॥ भूरिगुणा विरल[1] च्चिय एक्कगुणो बहुजणो न सव्वत्थ । निद्दोसाणवि भद्दं पसंसिमो थेवदोसेवि ॥२॥" इत्यादि संसारस्वरूपमालोचयन्नसौ निर्गुणानपि न निन्दति, किं तूपेक्षते मध्यस्थभावेनास्त इत्यर्थः । तथा गुणानां संग्रहे समुपादाने 'प्रवर्त्तते' यतते । संप्राप्तमङ्गीकृतं गुणं सम्यग्दर्शनविरत्यादिकं 'न मलिनयति' न सातिचारं करोति । गुणरागित्वस्य फलमेतत् । अन्यथा गुणरागित्वमेव न स्यात् । इति गाथार्थः ॥ १९ ॥

उदाहरणं चात्र धनसार्थवाहवङ्कचूडौ । तथा हि—

वासातवसुसियंगे सज्झायज्झाणवावडे मुणिणो । दट्ठुं गुणाणुराया आउट्टो सत्थवाहो सो ॥ १ ॥

गुरुभत्तिनिब्भरमणो दाणं दाऊण पत्तसंमत्तो । जाओ कमेण धन्नो कल्लाणपरंपराभागी ॥ २ ॥

तहा—

जाओ गुणाणुराओ पुव्वमसंतोवि वंकचूलस्स । पेच्छंतयस्स अणवरयमेव मुणिणो गुणाउत्ते ॥ १ ॥

---

[1] "विरला च्चिय" इत्यपि ॥

तत्तो बहुमाणाओ नियमग्गहणं च पालणं थिरया । पडिवन्नगुणा न हि तेण खंडिया पाणचाएवि ॥ २ ॥

उदाहरणद्वयमपि प्रतीतमिति न लिख्यते ।

अथ त्रयोदशधर्माधिकारिगुणस्यावसरः, स च सत्कथ इति विपर्यये दोषदर्शनद्वारेण तमाह—

नासइ विवेगरयणं असुहकहासंगकलुसियमणस्स । धम्मो विवेगसारोत्ति सक्कहो होज्ज धम्मत्थी ॥२०॥

'नश्यति' अपैति 'विवेकरत्नं' विवेकः सदसद्वस्तुपरिज्ञानं, स एव रत्नमज्ञानध्वान्तान्तकारित्वात् । अशुभकथाः स्त्र्यादिकथाः सप्त । तथा चागमः—"सत्त विगहाओ पन्नत्ताओ तंजहा—इत्थिकहा, भत्तकहा, देसकहा, रायकहा, मिउकालुणिया, दंसणभेयणी, चरित्तभेयणी" । तत्राद्याश्चतस्रः प्रसिद्धा एव, तथाऽपि किञ्चिदुद्दिश्यते । तत्र स्त्रीकथा—"सा तन्वी सुभगा मनोहररुचिः कान्तेक्षणा भोगिनी, तस्या हारिनितम्बबिम्बमथवा विप्रेक्षितं सुभ्रुवः । धिक् तामुष्ट्रगतिं मलीमसतनुं काकस्वरां दुर्भगामित्थं स्त्रीजनवर्णनिन्दनकथा दूरेऽस्तु धर्मार्थिनाम् ॥१॥" भक्तकथा—"अहो ! क्षीरस्यान्नं मधुरमधुगावाज्यखण्डान्वितं चेद्रसः श्रेष्ठो दध्नो मुखसुखकरं व्यञ्जनेभ्यः किमन्यत् । न पक्वान्नादन्यद्रमयति मनः स्वादुतांबूलमेकं परित्याज्या प्राज्ञैरशनविषया सर्वदैवेति वार्त्ता ॥ २ ॥" देशकथा—"रम्यो मालवकः सुधान्यकनकः कांच्यास्तु किं वर्ण्यता, दुर्गा गूर्जरभूमिरुद्भटभटा लाटाः किराटोपमाः । कश्मीरे वरमुष्यतां सुखनिधौ स्वर्गोपमाः कुन्तलाः, वर्ज्या दुर्जनसङ्गवच्छुभधिया देशी कथैवंविधा ॥ ३ ॥" राजकथा—"राजायं रिपुवारदारणमहः क्षेमंकरश्चौरहा, युद्धं भीममभूत्तयोः प्रतिकृतं साध्वस्य तेनाधुना । दुष्टोऽयं म्रियतां करोतु सुचिरं राज्यं ममाप्यायुषा, भूयो

बन्धनिबन्धनं बुधजनै राज्ञां कथा हीयताम् ॥ ४ ॥ " तथा 'मिउकालुणिया' इति श्रोतृहृदयमार्दवजननान्मृद्वी, सा चासौ कारुणिकी च कारुण्यवती मृदुकारुणिकी । पुत्रादिवियोगदुःखदुःखितमात्रादिकृतकारुण्यरसगर्भा प्रलापप्रधानेत्यर्थः । तद्यथा—"हा पुत्त ! हा पुत्त ! हा वच्छ ! हा वच्छ ! मुक्कामि कहमणाहाहं । एवं कलुणपलावा जलंतजलणेज्ज सा पडिया" ॥ 'दर्शनभेदिनी' ज्ञानाद्यतिशयतः कुतीर्थिकप्रशंसादिरूपा । तद्यथा—"सूक्ष्मयुक्तिशतोपेतं, सूक्ष्मबुद्धिकरं परम् । सूक्ष्मार्थदर्शिभिर्दृष्टं, श्रोतव्यं बौद्धशासनम् ॥ १ ॥ " इत्यादि । एवं हि श्रोतृणां तदनुरागात् सम्यग्दर्शनभेदः स्यादिति । 'चारित्रभेदिनी' न संभवन्तीदानीं महाव्रतानि, प्रमादबहुलत्वादतिचारप्रचुरत्वादतिचारशोधकाचार्यतत्कारकसाधुसाध्वीनामभावात् । ज्ञानदर्शनाभ्यां तीर्थं प्रवर्त्तत इति ज्ञानदर्शनकृत्येष्वेवादरो विधेय इति । भणितं च—"सोही न अत्थि नवि दिंतकरिंता नवि य केइ दीसंति । तित्थं च नाणदंसणनिज्जवगा चेव वोच्छिन्ना ॥ ११ ॥ " इत्यादि । अनया हि प्रतिपन्नचारित्रस्यापि तद्वैमुख्यमुपजायते, किं पुनस्तदभिमुखस्येति चारित्रभेदिनी । इत्येतासु सङ्गोऽत्याशक्तिः, तेन कलुषितं मनोऽन्तःकरणं यस्य स तथा तस्येतीदमत्र तात्पर्यम्—विकथाप्रवृत्तो हि प्राणी प्रायो रागद्वेषवान् भवति, तद्वशाच्च न युक्तायुक्तं विवेचयति स्वार्थहानिमपि न लक्षयतीति । 'धर्मः' पुनः 'विवेकसारः' एव हिताहितावबोधप्रधान एव भवति, सावधारणत्वाद्वाक्यस्येति । धार्मिको ह्येवमालोचयति—"यावत्परगुणदोषपरिकीर्त्तने व्यावृत्तं मनो भवति । तावद्वरं विशुद्धे ध्यानं व्यग्रं मनः कर्त्तुम् ॥ १ ॥" 'इति' अस्माद्धेतोः सत्यशोभनास्तीर्थकरगणधरमहर्षिचरितगोचराः कथा वचनव्यापारा यस्य स 'सत्कथो' 'भूयात्' भवेत् 'धर्मार्थी' धर्मचरणाभिलाषुको येन धर्मरत्नार्हः स्यात् । इति गाथार्थः ॥ २० ॥

अथ सुपक्षयुक्तश्चतुर्दशगुणवानुच्यते—

अणुकूल धम्मसीलो सुसमायारो य परियणो जस्स। एस सुपक्खो धम्मं निरंतरायं तरइ काउं ॥२१॥

इह पक्षः परिग्रहः परिकर इत्यनर्थान्तरम्। 'पक्षः परिग्रहेऽप्युक्तः' इति वचनात्। शोभनः पक्षो यस्य स सुपक्षः। तमेव विशेषेणाह—'अनुकूलः' धर्माविघ्नकारी 'धर्मशीलः' धार्मिकः 'सुसमाचारः' सदाचारचारी 'परिजनः' प्रतीतो यस्य एष सुपक्षोऽभिधीयते, स च धर्मं 'निरन्तरायं' निष्प्रत्यूहं 'तरइ' इति शक्नोति 'कर्तुं' अनुष्ठातुमिति। इह भावार्थः—अनुकूलो धर्मप्रयोजनानि कुर्वतः प्रोत्साहकः साहाय्यकर्त्ता च स्यात्। धर्मशीलो धर्मप्रयोजनेष्वभ्यर्थितो नाभियोगं मन्यते, अपि त्वनुग्रहमिति। सुसमाचारः राजविरुद्धादिकृत्यपरिहारी धर्मलाघवहेतुर्न भवेत्। अत एवंविधः सुपक्षो धर्माधिकारी स्यादिति ॥

इहाणणुकूलपरियणे उदाहरणं—

पुंडवद्धणे नयरे दिवायरो इब्भो अहेसि। तस्स य जोइमईकुच्छिसंभवो पभाकरो पुत्तो। बुद्धभत्ताणि सव्वाणि। अन्नया वाणिज्जकज्जेण गओ पभाकरो हत्थिणपुरं। तत्थ य जिणदासो सेट्ठी। तस्स भारिया पउमसिरी धूया य ओरालसरीरा जिणमई नाम। सुसावगाणि सव्वाणि। तेसिं भंडसालाए भंडं निक्खित्तं पभाकरेण। जिणमईरूवे बाढमज्झोववन्नेण जाइओ जिणदासो। सो भणइ सावगस्स दाहामि, न तुम्हारिसमिच्छादिट्ठिस्स। नत्थि उवायंतरंति सो कवडेण सावगत्तं सिक्खेइ। धम्मं सुणेइ। चेइए वंदइ। साहुणो घयगुलवत्थाइएहिं पडिलाभेइ। सुणमाणस्स उ भावओ परिणओ धम्मो। मंदरागो य जाओ, दारिगाए उवरिं। साहूण सब्भावं कहिऊण गहियाणुव्वओ सावओ जाओ। विन्नायपरम-

त्थेण दिन्ना से जिणदासेण जिणमई । तं गहाय गओ पुंडवद्धणमेसो । तओ जिणमइं सासूनणंदाओ भणंति । बुद्धस्स पाएसु पडाहि, भिक्खू वंदाहि, सा नेच्छइ । तओ ताहिं खिंसिज्जइ । ताहे पभागरो जुयगगेहे ठाइ । इच्छाए साहुवग्गं पडिलाभेइ । अन्नया मायापिईहिं भणिओ पुत्त ! भिक्खुणो निमंतेहि, सो नेच्छइ । तहा विग्गहं काऊण पट्ठविओ । गयस्स भिच्छुएहिं विज्जाहिं मंतिऊण फलं हत्थे दिन्नं । ताहे वाणमंतरीए अहिट्ठिओ घरं गओ भारियं भणइ । भिच्छूण भत्तं देमो । सा नेच्छइ । तो सयमेव काउमारद्धो । साविगा गंतूण सूरीणं कहेइ । तेहिं जोगपडिभेओ दिन्नो । तेण पीयमेत्तेण । वाणमंतरी नट्ठा । साभाविओ जाओ किमेस आरंभोत्ति पुच्छइ । तीए भणियं तुमए चेव भिक्खूणं भत्तमारद्धं । सो भणइ साहू मोत्तूणान्नस्स न देमि । कहमम्मापिउहिं मणा न वंचिओम्हि । तओ तं फासुयभत्तं साहूणं दिन्नंति ॥

एवमणणुकूले परियणे अंतरायं संभवइ । तेण भन्नइ—अणुकूलधम्मसीलाइविसिट्ठपरियणो धम्मारिहोत्ति ॥ २१ ॥

इदानीं पञ्चदशं दीर्घदर्शि (त्व) गुणमाह—

आढवइ दीहदंसी सयलं परिणामसुंदरं कज्जं । बहुलाभमप्पकेसं सलाहणिज्जं बहुजणाणं ॥ २२ ॥

'आरभते'[1] प्रतिजानीते दीर्घपरिणामसुन्दरं, कार्यमिति गम्यते, क्रियाविशेषणं वा । द्रष्टुमवलोकयितुं शीलमस्येति 'दीर्घदर्शी' 'सकलं' समस्तं 'परिणामसुन्दरं' आयतिसुखावहं 'कार्यं' कृत्यम् । तथा 'बहुलाभं' प्रचुराभीष्टसिद्धिकं 'अल्पक्लेशं' स्तोकायासं 'श्लाघनीयं' प्रशंसनीयं 'बहुजनानां' स्वजनपरिजनानां, शिष्टानामिति भावः । स किल पारिणामिक्या

---

१ "आरभइ" इत्यपि ॥

बुद्ध्या सुन्दरपरिणाममैहिकमपि कार्यं करोति । धनश्रेष्ठिवत्ततो धर्मस्यापि स एवाधिकारीति । यत उक्तम्—"बुद्धिजुओ आलोचइ धम्मट्ठाणं उवाहि परिसुद्धं । जोगत्तमप्पणो च्चिय अणुबंधं चेव जत्तेण ॥ १ ॥" को पुणो धणसेट्ठित्ति—

रायगिहे नयरे महाधणो धणो सेट्ठी होत्था । तस्स य पयइभद्दाए सुभद्दाए गेहणीए चउरो पुत्ता । धणपालो, धणदेवो, धणगोवो, धणरक्खिओ य । सव्वेवि ते सुंदेरमंदिरं कलाकुसला सोजन्नपुन्ना य । घरिणीओ तेसिं पहाणकुलुब्भवाओ कमेणं सिरी, लच्छी, धणा, धन्ना य । ते जणयपसाएण निच्चं सुहिया विहरंति । अन्नया सेट्ठी परिणयवओ परलोगहियं काउकामो चिंतेइ—एए पुत्ता मए एत्तियं कालं सुहिणो कया, संपयं पुण जइ सुन्हा काइ गिहकज्जाइं चिंतेइ, तो मइ पव्वइएवि सुत्थिया हवंति । का पुण एयासिं गिहचिंताए उचियत्ति हुं नायं, जा पुन्नाहिया । सा कहं नायव्वा ? बुद्धीए । जओ लोयवाओ—'बुद्धी कम्माणुसारिणी होइ' एमाइ चिंतिऊण सेट्ठिणा पारद्धा तेसिं बुद्धीए परिच्छा । पवत्तिओ गिहे ऊसवो । निमंतिओ तासिमप्पणो सयणवग्गो, भोयाविओ सगोरवं । भुत्तुत्तरे य सुहनिविट्ठो चित्तसालिगाए । संमाणिओ कुसुमविलेवणतंबोलाइणा । तस्समक्खं च धणेणाहूया सुण्हाओ, पंच पंच सालिकणे दाऊण भणियाओ य । एए सम्मं पालेयव्वा । जया य मग्गामि तया मम समप्पियव्वत्ति । तओ विसज्जिओ सयणवग्गो । किमेत्थ तत्तंति ? सवियक्को गओ सट्ठाणं । तत्थ जेट्ठसुण्हाए एते पंचवि उज्झिया, जया जाइस्सइ तया जओ तओ अप्पिसामित्ति कट्टु । बीयाए एयं चेव चिंतियं । नवरं छोलिऊण मुहे पक्खित्ता । तइयाए सुद्धवत्थे बंधिऊणाभरणकरंडिगाए ठविया, तिसंज्झं पडियारिया य । चउत्थीए पुण समप्पिया कुलहरे, पत्ते पाउसे ववियां, उक्खया य, पडिउक्खया य

कया । तेसिं पढमवरिसे जाओ कुलओ। बीए वरसे आढगं । तइयवरिसे खारी । चउत्थे कुंभा । पंचमए कुंभसहस्साणि । पुणोवि सयणसमवायपुव्वं मग्गिया जेट्ठसुण्हा । तीएवि किच्छेण सरिऊण समप्पिआ कुओवि पंच कणा । सव्वहसावियाए अन्ने एएत्ति साहिओ सब्भावो । बीयाएवि एवं चेव । नवरं ते मए छोलिऊण भुत्तत्ति । तइयाए गंठिबद्धा चेव समप्पिया, किर मए एवं चेव रक्खियत्ति । चउत्थीए कुंचियाओ समप्पिऊण भणियं, मम जणयगिहेसु चिट्ठंति, सगडाइपेसणेण आणावेउ ताओत्ति । सेट्ठिणा भणियं, पुत्ति ! कीस तए एवं कयं ? । तीए भणियं ताएण समाइट्ठं पालेयव्वा एए, ते एवं चेव सम्मं पालिया भवंति । तओ सेट्ठिणा नियाहिप्पायं साहिऊण भणिया तब्बंधुणो, किमेत्थ उचियत्ति ? । तेहिं भणियं तुब्भे चेव बुद्धिनिउणा पमाणं । सेट्ठिणा वुत्तं जेट्ठा उज्झणसीला, ता जं किंचि मज्झगिहे छारछगणकयवराइ उज्झियव्वं तत्थ एयाए अहिगारो । जं किंचि रंधणकंडणसोहणाइ, तंमि बीयाए निओगो । तइया भंडागारसामिणी । चउत्थी सव्वाहिगारिणी । एयाए आएसेण सेसाहिं हिंडियव्वं । एवं चेव एयाओ सुहभाइणीओ भविस्संतित्ति जायमणुमयमेयं सव्वेसिं । तप्पभिइ तासिं नामपसिद्धी जाया; उज्झिया, भोगवई, रक्खिया, रोहिणीति । जायं च सेट्ठिघरं सुत्थं । तओ सलाहिओ सेट्ठी लोएण । तेणावि कयं हियइच्छियं परलोगहियंति । एरिसो दीहदंसी धम्मारिहोत्ति ॥ २२ ॥

इदानीं विशेषज्ञमभिधातुमाह—

वत्थूणं गुणदोसे लक्खेइ अपक्खवायभावेण । पाएण विसेसन्नू उत्तमधम्मारिहो तेण ॥ २३ ॥

'वस्तूनां' द्रव्याणां सचेतनाचेतनानां धर्माधर्महेतूनां वा गुणान् दोषांश्च 'लक्षयति' जानाति 'अपक्षपातभावेन'

माध्यस्थ्यसुस्थचेतस्तया पक्षपातयुक्तो हि दोषानपि गुणान्, गुणानपि दोषान् व्यवस्यति समर्थयति चेति । उक्तं च— "आग्रही बत निनीषति युक्तिं तत्र यत्र मतिरस्य निविष्टा । पक्षपातरहितस्य तु युक्तिर्यत्र तत्र मतिरेति निवेशम् ॥ १ ॥" अतः 'प्रायेण' बाहुल्येन 'विशेषज्ञः' सारेतरवेदी 'उत्तमधर्मार्हः' प्रधानधर्मोचितो भवतीति शेषः । 'तेन' कारणेन सुन्दरीनन्दवत् । उक्तं च—"एयाउ इमं लठ्ठं इमाओ एयंति जो विसेसन्नू । सो पावइ सामन्नं सुंदरिनंदेण एत्थुवमा ॥ १ ॥" इति गाथार्थः ॥ २३ ॥

सांप्रतं सप्तदशगुणमाह—

बुड्ढो परिणयबुद्धी पावायारे पवत्तई नेय । बुड्ढाणुगोवि एवं संसग्गिकया गुणा जेण ॥ २४ ॥

'वृद्धः' प्रवयाः 'परिणतबुद्धिः' परिपक्वमतिः परिणामसुन्दरमतिरित्यर्थः । 'पापाचारे' अशुभकर्मणि प्रवर्त्तते नैव, स हि किल यथावस्थितं वस्तुतत्त्वमवबुध्यते । अत्रोदारणम्—एगस्स रन्नो दुविहा मंतिणो तरुणा, बुड्ढा य । तरुणा भणंति एए बुड्ढा मइभंसपत्ता न सम्मं मंतित्ति । ता अलमेएहिं अम्हे चेव पहाणा । अन्नया तेसिं परिच्छानिमित्तं राया भणइ, भो सचिवा ! जो मम सीसे पण्हिपहारं दलयइ, तस्स को दंडो कीरइ ? । तरुणेहिं भणियं, किमेत्थ जाणियव्वं । तस्स सरीरं तिलं तिलं कप्पिज्जइ, सुहुयहुयासणे वा छुब्भइ । तओ रन्ना बुड्ढा पुच्छिया । तेहिं एगंते गंतूण मंतियं आसंघयप्पहाणा महादेवी चेव एवं करेइ, ता तीए पूया चेव कीरइ । एयमेयत्थं वत्तव्वंति निच्छिऊण भणियं, जं माणुसमेरिसं महासाहस-

१ "असंघयए प्पहाणा" इत्यपि ॥

मायरइ, तस्स सरीरं ससीसवायं कंचणरयणालंकारेहिं अलंकिज्जइ। तुट्ठेण भणियं रन्ना, साहु विन्नायंति, सच्चदंसिणोत्ति रन्ना ते चेव पमाणं कयत्ति॥ यतो वृद्धा नाहितहेतुषु प्रवर्त्तन्ते। ततो वृद्धाननुगच्छति यस्तन्मतानुवृत्तिपरतया स 'वृद्धानुगः' सोऽप्येवमेव पापे न प्रवर्त्तेत इति भावः। केन हेतुना? इत्याह—'संसर्गकृताः' साङ्गत्यजनिता गुणाः 'येन' कारणेन प्राणिनां स्युः। अत एवोक्तम्—"उत्तमजणसंसग्गी सीलदरिद्दंपि कुणइ सीलड्ढं। जह मेरुगिरिविलग्गं तणंपि कणयत्तणमुवेइ॥ १॥" इति गाथार्थः॥ २४॥

अथाष्टादशं विनयगुणमधिकृत्याह—

विणओ सव्वगुणाणं मूलं सन्नाणदंसणाईणं। मोक्खस्स य ते मूलं तेण विणीओ इह पसत्थो॥२५॥

विनीयते अपनीयते विलीयते वाष्टप्रकारं कर्म येन, स 'विनयः' इति सामयिकी निरुक्तिः। उक्तं च—"जम्हा विणयइ कम्मं अट्ठविहं चाउरंतमोक्खाए। तम्हा उ वयंति विऊ विणओत्ति विलीणसंसारा॥ १॥" स विनयः सर्वगुणानां मूलं वर्त्तते। यतः सूत्रम्—"विणओ सासणे मूलं विणीओ संजओ भवे। विणयाओ विप्पमुक्कस्स कओ धम्मो कओ तवो॥ १॥" कतमानाम्? इत्याह—सज्ज्ञानदर्शनादीनाम्। उक्तं च—"विणया नाणं नाणा उ दंसणं दंसणाहि चरणं तु। चरणाहिंतो मोक्खो मोक्खे सोक्खं अणाबाहं॥ १॥" ततः किम्? इत्याह—'चकारस्य' पुनःशब्दार्थस्यैव योगः। 'ते' पुनर्गुणा मोक्षस्य मूलं 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' (त० १। १।) इति वचनात्। 'तेन' हेतुना विनीतः

इह धर्माधिकारे 'प्रशस्तः' श्लाघितः । किल यः प्रकृत्यैव विनीतः स तद्गुणादेव धर्ममवाप्नोत्याराधयति च । पुष्पसालसुतफलसालवत् । इति गाथार्थः ॥ २५ ॥

तथाहि—

मगहमंडलमंडणभूओ धणधन्नसमिद्धो सालिग्गामो नाम गामो । तत्थ पुप्फसालगाहावइस्स फलसालो नाम पुत्तो अहेसि । पयइभद्दओ पयइविणीओ परलोगभीरू य । तेण धम्मसत्थपाढयाओ सुयं । जो उत्तमेसु विणयं पउंजइ सो जम्मंतरे उत्तमुत्तमो होइ । तओ सो ममेस जणओ उत्तमोत्ति सव्वायरेण तस्स विणए पवत्तो । अन्नया दिट्ठो जणओ गामसामिस्स विणयं पउंजंतो । तओ एत्तोवि इमो उत्तमोत्ति जणयमापुच्छिऊण पवत्तो गामसामिमोलग्गिउं । कयाइ तेण सद्धिं गओ रायगिहं । तत्थ गामाहिवं महंतयस्स पणामाइकुणमाणमालोइऊण इमाओवि एस पहाणोत्ति पओलग्गिओ महंतयं । तंपि सेणियस्स विणयपरायणमवलोइऊण सेणियमोलग्गिउमारद्धो । अन्नया तत्थ भगवं वद्धमाणसामी समोसढो । सेणिओ सबलवाहणो वंदिउं निग्गओ । तओ फलसालो भगवंतं समोसरणलच्छीए समाइच्छियं नियच्छंतो पविम्हिओ । नूणमेस सव्वुत्तमो जो एवं नरिंदाविंददाणविंदेहिं वंदिज्जइ ता अलमन्नेहिं । एयस्स चेव विणयं करेमि । तओ अवसरं पाविऊण खग्गखेडगकरो चलणेसु निवडिऊण विन्नविउं पवत्तो । भयवं ! अणुजाणह, अहं भे ओलग्गामि । भगवया भणियं, भद्द ! नाहं खग्गफलगहत्थेहिं ओलग्गिज्जामि, किं तु रओहरणमुहपोत्तियापाणीहिं, जहा एए अन्ने

---

१ 'वद्धमाण–' इत्यपि ॥

ओलग्गंति । तेण भणियं, जहा तुब्भे आणवेह तहेवोलग्गामि । तओ जोगोत्ति भगवया पव्वाविओ, सुगइं च पाविओत्ति। एवं विणीओ धम्मारिहो होइत्ति ॥

अथैकोनविंशस्य कृतज्ञतागुणस्यावसरस्तत्र परेण कृतमुपकारमविस्मृत्या जानातीति कृतज्ञः प्रतीत एव । अतस्तं फलद्वारेणाह—

बहु मन्नइ धम्म गुरुं परमुवयारित्ति तत्तबुद्धीए । तत्तो गुणाण वुड्ढी गुणारिहो तेणिह कयन्नू ॥ २६ ॥

'बहु मन्यते' सगौरवं पश्यति 'धर्मगुरुं' धर्मदातारमाचार्यादिकम्, 'परमोपकारी' ममायम्, उद्धृतोऽहमनेनाकारणवत्सलेन भगवताऽतिघोरसंसारकूपकुहरे निपतन्, 'इति' एवंप्रकारतया 'तत्त्वबुद्ध्या' परमार्थसारमत्या स हि भावयत्येवमागमवाक्यम्—"तिण्हं दुप्पडियारं समणाउसो । तं जहा—अम्मापिउणं भट्टिस्स धम्मारियस्स ।" इत्यादि । 'ततः' तस्मात् कृतज्ञताभावजनितगुरुबहुमानाद् 'गुणानां' क्षान्त्यादीनां ज्ञानादीनां वा 'वृद्धिः' भवतीति गम्यते । तथा हि—स गुरोरुपकारितां परिभावयन्निर्भर्त्सितो न कुप्यति, नापि मानमालम्बते, नापि विनयहानिं विधत्ते, नापि वञ्चनापरिणाममास्कन्दति । अत एव सुप्रसन्नाद्गुरोः सकाशात् ज्ञानादिगुणानाप्नोति । क्रमेण गुरुपदमपि लभते । 'गुणार्हः' धर्मप्रतिपत्तियोग्यः । 'तेन' हेतुना 'इह' धर्माधिकारिविचारे 'कृतज्ञः' उक्तस्वरूप इत्यत्र भीमो दृष्टान्तः ॥

स चायम्—

तगराए नयरीए रइसारो राया समणोवासओ । तस्स य पुत्तो भीमो नामा । सो संगहियकलाकलावो नाणाकीलाहिं

कीलंतो भणिओ रन्ना, पुत्त ! कहमद्धसिक्खिओवि रमिउमिच्छसि ? । तेण भणियं, ताय ! कहमहमद्धसिक्खिओऽम्हि । ताहे पढियं रन्ना, बावत्तरीकलापंडियावि पुरिसा अपंडिया चेव; सव्वकलाण पहाणं जे धम्मकलं न याणंति । भीमेण चिंतियं ताओ सच्चमुल्लवइ, जमद्धसिक्खिओहं । जओ नामंपि न मे सुअपुव्वं धम्मकलाए ता तायं चेव पुच्छामि । तओ पुच्छिओ, ताय ! कहिं सा लब्भइ ? रन्ना भणियं, साहूणं समीवे । तो खाइं नेहि मं तत्थत्ति वुत्ते नीओ सो राइणा साहु-समीवे । तेहिं धम्मो कहिओ । अभिरुइओ कुमारस्स । तप्पभिइं च सिक्खिओ चिइवंदणाइं । गहियाइं अणुव्वयाइं । जाओ परमसावओ । चक्कवट्टिरज्जलाभाओवि अब्भहियं परितुट्ठो जिणधम्मसंपत्तीए । चिंतिउं पवत्तो, अहो ! पुत्तव-च्छलया तायस्स समुद्धरिओहं जेण रुद्दाओ भवसमुद्दाओ । पडिबोहिओम्हि पलित्तगिहपसुत्तो । सव्वहा परमोवयारिणो इमस्स न विप्पियलेसोवि मए कायव्वो । जइयव्वं च पियं संपाइउंति गहियाभिग्गहो सावगधम्ममणुपालिउं पवत्तो । अन्नया रन्ना रायवाडियं वच्चंतेण दिट्ठा पासाओवरि कीलमाणी एगा सेट्ठिकन्नया । रूवाइसयरंजिएण मग्गाविया । न य दिन्ना सेट्ठिणा भणियं च । जइ इमीए सुओ होही, न सो रज्जं पाविही । जओ अत्थि रन्नो भीमकुमारो रज्जारिहोत्ति । तओ तमलभमाणो राया बाढमरइमणुपविट्ठो । सुयमिणं भीमेणं । तओ मए धरमाणे तायस्स इच्छाभंगोत्ति ससंभमेण गंतूण भणिओ सेट्ठी, देहि धूयं देवस्स । नियमो मे रज्जकरणे । सेट्ठिणा भणियं, तुह पुत्ता होहिंति, ते मम नत्तुयं परिभ-विस्संति । जइ एवं न परिणिस्सामि चेवाहं । कुणसु विसत्थो रायसासणंति कुमारेण वुत्ते तुट्ठेण दिन्ना सेट्ठिणा दारिगा । परिणाविओ राया । जाया सा चेव महादेवी । कमेण पसूया सव्वलक्खणोववेयं दारयं । सोवि परिवड्ढिओ कालेण । राया

जाओ। भीमोवि बंभचेरधारी सम्मं समणोवासगधम्ममणुपालेइ। कयाइ दढवओत्ति पसंसिओ सक्केण। तयणु असद्दहंतो एगो देवो गणियारूवं काऊण तज्जणणीरूवेण य गंतूण भणिओ। भो कुमार! उत्तमकुलसंभूओसि, धम्मिओसि, दयालुओसि, अब्भत्थियसारोसि तं एसा वराई मम धूया तुह रूवालोयणसमुच्छलियमयणानलजालालिपलित्तगत्ता कालधम्ममुवगच्छइ। जीवइ य तुह ससिणेहदिट्ठिदाणेण। ता करेहि तीए जीवावणेण महंतं पुन्नसंचयंति। कुमारेण वुत्तं भद्दे! न कयाइ विसं भुत्तं जीवावेइ। न सन्निवायस्स दुद्धं पच्छं। ता तीए धम्मोसहं देहि। नाहं वयभंगमंगीकरेमि। एयं चेव कारुण्णं जं परो पावे न पवत्तिज्जइ। एमाइकोमलालावेहिं पडिसिद्धा कुट्टणी। ताहे निप्पकंपोत्ति पसंसिओ भीमो देवेण। कमेण जाओ परलोगाराहगोत्ति। एरिसो कयन्नू सुत्तभणियगुणभायणं भवइत्ति ॥ २६ ॥

अथ विंशतितमगुणी परहितार्थकारी, तत्स्वरूपं नामत एव सुगमम्। अतस्तस्य धर्मप्राप्तौ फलमाह—

परहियनिरओ धन्नो सम्मं विन्नायधम्मसब्भावो। अन्नेवि ठवइ मग्गे निरीहचित्तो महासत्तो ॥२७॥

यो हि प्रकृत्यैव परेषां हितकरणे निरन्तरं रतो भवति स 'धन्यो' धर्मधनार्हत्वात् 'सम्यग्विज्ञातधर्मसद्भावः' यथावद्बुद्धधर्मतत्त्वो गीतार्थीभूत इति यावत्। अनेनागीतार्थस्य परहितमपि चिकीर्षतस्तदसंभवमाह। तथा चागमः—"किं एत्तो कट्ठयरं जं सम्ममनायसमयसब्भावो। अन्नं कुदेसणाए कट्ठतरागंमि पाडेइ ॥ १ ॥" 'अन्यानपि' मन्दमतीन् 'स्थापयति' स्थिरीकरोति 'मार्गे' शुद्धधर्मे किंविशिष्टः सन्?, इत्याह—'निरीहचित्तो' निःस्पृहमनाः सस्पृहः शुद्धमार्गोपदेष्टापि न प्रशस्यः। उक्तं च—"परं लोकाधिकं धाम तपः श्रुतमिति द्वयम्। तदेवार्थित्वनिर्लुप्तसारं तृणलवायते ॥ १ ॥"

किमित्येवंविधः ? इत्याह—'महासत्त्वः' इति कृत्वा, यतः सत्त्ववतामेवामी गुणाः संभवन्ति—"परोपकारैकरतिर्निरीहता विनीतता सत्यमतुच्छचित्तता। विद्याविनोदोऽनुदिनं न दीनता गुणा इमे सत्त्ववतां भवन्ति।१।" इति गाथार्थः॥ २७॥

इहोदाहरणम्—

विजयवद्धणे नयरे विसालसिट्ठिपुत्तो विजओ नाम होत्था। तेण उवज्झायसमीवे निसुयं, पुरिसेण खमापहाणेण परहियरएण य होयव्वं। जमेत्तो इहलोयपरलोएसु कल्लाणमासाइज्जइ। गहियं तेण तत्तबुद्धीए। अन्नया नवपरिणीयभज्जाणयणकज्जेण गओ ससुरकुलं। आगच्छंतस्स य भज्जाए चिंतियं हद्धी निग्घिणाहं जा जणणिजणए मोत्तूण परगिहं वच्चामि। को पुण उवाओ ? जेण एत्तोवि छुट्टेज्जामि। तओ अंतरालपत्ताए नाइदूरे जुन्नकूवं दट्ठूण भणिओ भत्ता। दढं तन्हा इयर्णिह मरामि, जइ मे उदगं न देसि। तओ विजओ एहि इओ कूवाओ जलं पाएमित्ति भणंतो चलिओ कूवाभिमुहं। गया पिट्ठओ इयरीवि। विसत्थं कूवालोयणपरं पेल्लिऊण तं झत्ति पलाणा गया गामं। सउणकारणाउ न तेण नीयम्हित्ति साहियं जणयाणं। इयरोवि पडंतो झत्ति विलग्गो कूवतडुब्भवतरुखंधे। तयाधारेण य ओइन्नो कूवाओ। कीस तीए वराईए पेल्लिओम्हित्ति चिंततेण नायं नियगिहे दु (उ) कंठियाए। भणियं च उवज्झाएण खमापहाणेण होयव्वं ता अलं तं पइ कोवेणंति अप्पाणं संठाविऊण गओ गेहं। पुच्छिओ जणणीए किन्नागया सुण्हा ? तेण भणियं, आगच्छंती अवसउणकारणाओ मए मुक्का। तप्पभिइं च पेसिज्जंतोवि सो तत्थ न वच्चइ चिंतइ य, किं तीए वराईए दुक्खुप्पायणेण। अन्नया मित्तेहिं बाढमुवहसिओ गओ तत्थ। सगोरवं च केइ दिणे अच्छिऊण गहिऊण य तं समागओ

गेहं। कालेण य जाओ परोपरं सिणेहो। उवरएसु जणएसु ताणि चेव घरसामित्तं पत्ताणि। अन्नया चिंतियं विजएण, अहो! अवितहमुवज्झाएण मुवइट्ठं। दिट्ठो खमागुणो। इयाणिं परहियरओ भवामि। तओ दीणाईण दाणे पवत्तो। दट्ठूण य केइ विवयमाणे पियवयणेहिं उवसामेइ भणइ य। सयणस्स संतियं विप्पियं दिट्ठंपि हियए धारियव्वं। जओ 'जं पियाओ अजंपियं वरं, परस्सवि पुच्छियाओ अपुच्छियं वरं, सुयाओ असुअं वरं'। एवं सयणभावो सुहावहो होइ। अन्नया जिट्ठपुत्तेण पुच्छियं, ताय! किमेवं सव्वलोयस्स उवइसिज्जइ?। विजएण भणियं वच्छ! अणुहवसिद्धं ममेयं, तेण सव्वलोयस्स उवएसं देमि। पुणो पुत्तेण पुट्ठं, कहं भवओ अणुहवसिद्धमेयंति कहेहि, कोउगं मे वट्टइ। विजएण वुत्तं सिट्ठमेव मए। 'पुच्छियाओ अपुच्छियं वरं, सुयाओ असुयं वरं' तो अलं निबंधेण। तओ पुत्तो दढयरवड्ढियकोउहल्लो पुणो पुणो झिंखइ। अइणिच्छएण[1] भणियं पिउणा। किलाहं तुह जणणीए पुरा जुन्नागडे खित्तो, न य मए तस्सावि तं सिट्ठं, तं च परिणामसुंदरं जायं। तएवि न एयमन्नस्स साहियव्वंति। अन्नया सुएण हसिऊण पुच्छिया जणणी, अम्मो! किं सच्चमेयं? तुमए ताओ जुन्नकूवे पेल्लिओ। पुत्त! कहं जाणासित्ति मायाए वुत्ते तेण भणियं। मम ताएण चेव सिट्ठं। तओ नायं भत्तुणा मइयं पेल्लणंति लज्जिया धसत्ति हिययफुट्टणेण गया पंचत्तमेसा। सोऊण हाहारवं समागओ सेट्ठी। विन्नायवुत्तंतो विसन्नो बाढं। ममेस दोसोत्ति झूरिऊण सुइरं सुद्धिमिच्छंतेण दिट्ठा कहिंवि साहुणो, मग्गिया सुद्धिं। तेहिं भणिओ पव्वयाहि। सो भणइ, कहं निद्धणेहिं परहियमायरिज्जइ? कहं वा परहियविहाणाओ अन्नं कल्लाण-

1 "अइच्छणिएण" इत्यपि ॥

कारणं ? । साहूहिं भणियं, भद्द ! धम्मोवएसाओ अभयदाणाओ वा अन्नं परहियमेव नत्थि । यत उक्तम्—“नोपकारो जगत्यत्र तादृशः कोऽपि विद्यते । यादृशी दुःखविच्छेदाद्देहिनां धर्मदेशना ॥ १ ॥” तथा—“जीवितार्थे नरेन्द्रोऽपि पूर्णां यच्छति मेदिनीम् । प्राणिरक्षासमं दानमतो लोके न विद्यते ॥ १ ॥” “जो सहस्सं सहस्साणं मासे मासे गवं दए । तओवि संजमो सेओ अदिंतस्सवि किंचणं ॥ १ ॥” एवं सोऊण पडिबुद्धो पव्वइओ विजओ । जाओ सपरोवयारसाहगोत्ति । एवं परहियत्थकारी धम्मारिहोत्ति ॥

इदानीमेकविंशतितमो लब्धलक्ष्यगुणः फलतोऽभिधीयते—

लक्खेइ लद्धलक्खो सुहेण सयलंपि धम्मकरणिज्जं। दक्खो सुसासणिज्जो तुरियं च सुसिक्खिओ होइ॥२८॥

‘लक्षयति’ जानाति प्रतनुज्ञानावरणत्वाल्लब्धमिव लब्धं लक्ष्यं शिक्षणीयानुष्ठानं येन स ‘लब्धलक्ष्यः’ ‘सुखेन’ अक्लेशेनात्मनः शिक्षयितुश्च निर्वेदमनुत्पादयन्नित्यर्थः । ‘सकलं’ समस्तमपि ‘धर्मकरणीयं’ वन्दनप्रत्युपेक्षणादिकम् । अयमभिप्रायः—पूर्वभवाभ्यस्तमिव सकलं झटित्येवाऽधिगच्छति । तथा चाह—“प्रतिजन्म यदभ्यस्तं जीवैः कर्म शुभाशुभम् । तेनैवाभ्यासयोगेन तदेवाभ्यस्यते सुखम् ॥ १ ॥” अत एव ‘दक्षो’ द्राक्कारी ‘सुशासनीयः’ सुखशिक्षणीयः ‘त्वरितं’ स्तोककालेन चकारस्योपरियोगात् ‘सुशिक्षितः’ शिक्षापारगामी च (‘भवति’) स्यात् । आर्यरक्षितवत्—

स हि दशपुरनगरे सोमदेवद्विजन्मनो रुद्रसोमायाश्च पुत्रः । कुतोऽपि पाटलिपुत्रादेश्चतुर्दशविद्यास्थानपारगो भूत्वा स्वं

---

१ ‘प्राण-’ इत्यपि ॥

पुरमाजगाम। कृताभिगमो राज्ञा नागरकैश्च स्वगृहं चाविशत्। स्थितो बहिः शालायाम् सर्वस्वजनैरभिनन्दितो, न तु मात्रा। ततश्चोत्कण्ठितो मातुरभिवन्दनाय गृहान्तरविशत्। कृतवान् मातुः पादवन्दनम्। तयाऽपि दत्ताशिषा संभाषितो मध्यस्थवृत्त्या नात्युत्कटप्रमोदया। ततोऽसौ विज्ञाततदाकूतस्तां पप्रच्छ, मातः! मदागमनेन जनः परजनोऽपि परं प्रमोदमाससाद, न पुनर्भवती, किमत्र कारणम्?। माऽवोचत्, पुत्र! कथमिव मम प्रमोदो भवति? दुर्गतिगमननिबन्धनानि कुशास्त्राणि पठित्वाऽऽगते। यदि परं दृष्टिवादमधीत्य मां प्रमोदयसि। ततः किमन्यजनेनानन्दितेन, यज्जनन्यै रोचते तदेवाध्येतुमुचितमित्यवधार्य मातरमपृच्छत्, क्व पुनरम्ब! दृष्टिवादः संपद्यते?। तयोचे, पुत्र! तवैवेक्षुयन्त्रागारे तोशलिपुत्राचार्याणां पार्श्वे लभ्यते। यद्येवं तुष्यतुतरामम्बा, प्रातरेव पूरयामि मनोरथान्, इत्यभिधाय दृष्टिवादपदस्यार्थमनुस्मरन्नतिक्रान्तप्रायायां रजन्यां जननीमापृच्छ्य प्रस्थितोऽसौ सूरीन् प्रति। प्रणतश्चान्तरा पूर्वदिवसाप्राप्तेनेक्षुयष्टिकलापसमर्पणपूर्वकस्वमित्रेण। प्रधानशकुनोऽयमित्यानन्दितेन गणिता इक्षुयष्टयः। नवपरिपूर्णा दशम्याश्चार्द्धमालोक्य चिन्तितमनेन। तत्र दृष्टिवादे कियन्तोऽप्यधिकारा न ज्ञायते, मया नव पूर्णा अध्येतव्याः, दशमश्चार्द्धमिति संचिन्त्य मातुर्धृतिसंपादनाय भणितो वयस्यः। एता मम मातुः समर्पणीया वक्तव्यं च यत्र प्रयोजने तव पुत्रः प्रस्थितस्तत्राहमेव प्रथममभिमुखोऽभवमिति। गत्वा च कथिते तेन मात्राऽपि तदेव फलमबोधि। रक्षितोऽपि प्राप्तः साधूपाश्रयसमीपमज्ञाततद्वन्दनादिव्यवहारो ग्राम्य इव कथं प्रविशामि? इत्यालोचयन् श्रावकमेकं प्रविशन्तं ददर्श, प्रविष्टश्च तदनुमार्गेण। नैषेधिकीर्याप्रतिक्रमणवन्दनप्रत्याख्यानसाधुवन्दनादि सर्वमक्षुण्णं तेन सह विधायोपविष्टो गुरुसमीपे।

ज्येष्ठश्रावकावन्दनाल्लक्षितो गुरुभिरभिनवश्रावकोऽयमिति । पृष्टश्च देवानुप्रिय! कुतस्ते धर्मप्राप्तिरभूत्? । रक्षितः प्राह, इतो वृद्धश्रावकात् । कदा? संप्रत्येव । अत्रान्तरे साधुभिरूचे, भगवन्! शय्यातरीसुतोऽयं रक्षितकुमारः, यस्यातीतवासरे राज्ञा प्रवेशोत्सवो व्यधीयत । ततोऽहो! लब्धलक्षितास्येति विस्मितैः स्निग्धमधुरया दृशा विलोक्य भणितोऽसौ सूरिभिः । सौम्य! सर्वजनवल्लभस्य भवतः किमस्माभिरातिथ्यं विधीयताम्? । ततः प्राञ्जलिपुटः प्रत्याह बटुः, भगवन्! दृष्टिवादप्रदानेन प्रसादः क्रियताम् । सूरिराह, साधु साधु शोभनो मनोरथो भवतो योग्यश्चासि बाढं दृष्टिवादस्य । किं तु नासौ गृहस्थेभ्यो वितीर्यते । यतयोऽप्यधीताद्यैकादशाङ्गास्तत्पाठाधिकारिणो भवन्ति । स प्राह, यथा चारु भवति तथैव पठामि, प्रदीयतां दीक्षाऽपि । गुरुराह, यद्येवमापृच्छेतां राजस्वजनवर्गौ । तेनोचे, न मम राजादिभिः कार्यम्, मातृमनोरथसंपादनमेव चिकीर्षामीति निवेदितजननीजल्पोऽनल्पमतिविभवः संग्रहीतुमुचितोऽयमिति परिभाव्य प्रव्राजितोऽसौ सूरिणा । स्वजनादिभयाच्च विहृताः सर्वेऽप्यन्यत्र । कथानकशेषमावश्यकादवगच्छेत् ॥

इह पुनर्दृष्टमात्रानुष्ठानग्राही लब्धलक्ष्यो रक्षितवद्धर्माधिकारी स्यादित्यावेदितम् । इति गाथार्थः ॥ २८ ॥

अथ प्रस्तुतोपसंहारद्वारेण प्रकरणार्थनिगमनायाह—

एए इगवीसगुणा सुयाणुसारेण किंचि वक्खाया । अरिहंति धम्मरयणं घेत्तुं एएहि संपन्ना ॥ २९ ॥

'एते' पूर्वोक्तस्वरूपाः, एकविंशतिसंख्यागुणाः 'श्रुतानुसारेण' प्रकरणान्तरोपलम्भद्वारेण 'किञ्चित्' असामस्त्येन, तेषां प्रकरणान्तरेषु विचित्रव्याख्याश्रवणात्सामस्त्येन कथयितुमशक्यत्वात् 'व्याख्याताः' स्वरूपतः फलतश्च प्ररूपिताः । कि-

मर्थम् ? इत्याह—यतः 'अर्हन्ति' योग्यतासारं धर्मरत्नं ग्रहीतुं न पुनर्व्यसन्तनृपवद्राजलीलामिति भावः । कः ? इत्याह—'एभिः' अनन्तरोक्तैर्गुणैः 'संपन्नाः' संगताः संपूर्णा वा । इति गाथार्थः ॥ २९ ॥

आह किमेकान्तेनैतावद्गुणसंपन्ना एव धर्माधिकारिणः, उतापवादोऽप्यस्ति ? इत्युच्यते—

पायद्धगुणविहीणा एएसिं मज्झिमा वरा नेया । एत्तो परेण हीणा दरिद्दपाया मुणेयव्वा ॥ ३० ॥

इहाधिकारिणस्त्रिधा विचिंत्या उत्तममध्यमजघन्यभावेन । तत्रोत्तमाः संपूर्णगुणा एव । पादश्चतुर्थांशोऽर्द्धं प्रतीतमेव । गुणशब्दस्य प्रत्येकमभिसंबन्धात् । पादप्रमाणैरर्द्धप्रमाणैश्च गुणैर्ये हीनाः, 'एतेषाम्' उक्तगुणानां मध्यात्ते यथाक्रमं मध्यमा वरा ज्ञेयाः । चतुर्थांशहीना मध्यमाः, अर्द्धेन हीना जघन्या इति भावः । तेभ्योऽपि हीनतरेषु का वार्त्ता ? इत्याह—'एत्तो परेण' इति एभ्योऽपि परेणार्द्धादप्यधिकैः 'हीनाः' रहिताः 'दरिद्रप्रायाः' अकिंचनजनकल्पाः 'मुणितव्याः' वेदितव्याः । यथा हि दरिद्रा उदरभरणचिन्ताव्याकुलतया न रत्नक्रयमनोरथमपि कुर्वन्ति । तथैतेऽपि न धर्माभिलाषमपि विदधति । इति गाथार्थः ॥ ३० ॥

एवं च स्थिते यद्विधेयं तदाह—

धम्मरयणत्थिणा तो पढमं एयज्जणंमि जइयव्वं । जं सुद्धभूमिगाए रेहइ चित्तं पवित्तंपि ॥ ३१ ॥

धर्मरत्नमुक्तस्वरूपं, तदर्थिना तल्लिप्सुना, 'ततः' तस्मात्कारणात् 'प्रथमं' आदौ एषां गुणानां अर्जने विढपने 'यतितव्यं' तदुपार्जनं प्रति यत्नो विधेयः, तदविनाभावित्वाद्धर्मप्राप्तेः । अत्रैव हेतुमाह—'यस्मात्' कारणात् 'शुद्धभूमिकायां'

अकलङ्काधारे 'रेहइ' इति शोभते 'चित्रं' चित्रकर्म 'पवित्रमपि' प्रशस्तमपि लिखितं सत् । इति गाथार्थः ॥ २१ ॥

इहाप्यबुधजनविबोधनायागमप्रसिद्धमुदाहरणं वर्णयन्त्याचार्याः—

सागेयपुरे महाबलो नाम राया दूयमापुच्छइ । किं मम रायंतरभावि रायलीलोचियं वत्थु नत्थि ?। दूएण भणियं, सबमत्थि देवस्स एगं चित्तसहं मोत्तुं । तीएवि किर नयणमणोहारिविचित्तचित्तावलोयणेण रायाणो चंकमणलीलमायरंति। एयमायन्निऊण रन्ना संजायकोउगेण समाइट्ठो मंती । तेण य कारिया तुरियमेव दीहरविसाला महासहा । समाहूया नयरपहाणा विमलपहासनामाणो दुवे य चित्तयरा । समप्पिया तेसिमद्धद्धभाएण अंतरा चिलिमिलं दाऊण भणिया य । न तुब्भेहिं अन्नोन्नं कम्मं अवलोयणीयं, नियनियबुद्धीए चित्तियव्वं, न य वेठी मंनियव्वा, जहाविन्नाणं भे पसाओ कज्जिहित्ति (?) । तओ ते अहमहमिगाए कम्मं पकया जाव वइक्कंता छमासा तात्र य ऊसुगेण पुच्छियं रन्ना। विमलेण भणियं, निम्माओ मदीयभागो । विरूविओ रन्ना अइसयसुंदरोत्ति कओ से महापसाओ । तओ पुच्छिओ पभासो, सो भणइ, नाहमज्जवि चित्तारंभं करेमि, जओ भूमिगाकम्ममेव मम निम्मायंति । केरिसं पुण तं भूमिकम्मंति विम्हिएण राइणावणीया परियच्छी, जाव दिट्ठं तत्थ विसेसरम्मं चित्तकम्मं । तओ सकोवमिव भणिओ पभासो, भो ! किमम्हेवि विप्पयारेसि ?। तेण भणियं, न सामी विप्पयारीयइ, पडिबिंबसंकमो एसोत्ति भणंतेण दाविया जवणिगा । विम्हिएण भणियं रन्ना, किमेरिसी भूमी कीरइ ?। पभासेण वुत्तं, देव ! इमीए चित्तं थिरयरं भवइ, वन्नयाण कंती विउणा वित्थइ,

१ "कज्जिओहित्ति" "कज्जिम्हित्ति" इत्यपि पाठौ दृश्येते ॥

रूवयाणं च भावुलाभो होइ। तओ तुट्ठेण राइणा कओ से विउणो पसाओ। भणियं च एयमेवं चेव चिट्ठउ । संचारिमचित्ताचित्तसहत्ति अउवा मे पसिद्धी होउत्ति। एस एत्थ उवणओ—जहा चित्तं काऊण कमेण तेण भूमी सुट्ठु परिकम्मिया। एवं धम्मचित्तत्थिणावि एएहिं गुणेहिं आया परिकम्मियव्वोत्ति॥

आह धर्मो द्विधा, श्रावकधर्मो यतिधर्मश्च। श्रावकोऽप्यविरतो विरतश्च। तत्राद्यस्यान्यत्र—"तत्थहिगारी अत्थी समत्थओ जो न सुत्तपडिकुट्ठो। अत्थी उ जो विणीओ समुवठिओ पुच्छमाणो य ॥ १ ॥" इत्यादिनाधिकारी निरूपितः। द्वितीयस्यापि[1]—"संपत्तदंसणाई पइदियहं जइजणा सुणेइत्ति। सामायारिं परमं जो खलु तं सावयं बिंति ॥ १ ॥" तथा—"परलोगहियं सम्मं जो जिणवयणं सुणेइ उवउत्तो। अइतिव्वकम्मविगमा सुक्कोसो सावगो एत्थ ॥ १ ॥" इत्यादिभिरसाधारणैः श्रावकशब्दप्रवृत्तिहेतुभिः सूत्रैरर्थत एवंविधाः श्रावकधर्माधिकारिण उक्ताः। तथा यतिधर्माधिकारिणोऽप्यन्यत्रान्यथैवोक्ताः। तद्यथा—"पव्वज्जाए अरिहा आरियदेसंमि जे समुप्पन्ना। जाइकुले हि विसिट्ठा तह खीणप्पायकम्ममला ॥ १ ॥ तत्तो य विमलबुद्धी दुलहं मणुयत्तणं भवसमुद्दे। जम्मो मरणनिमित्तं चवलाओ संपयाओ अ ॥ २ ॥ विसया य दुक्खहेऊ संजोगे नियमओ विओगोत्ति। पइसमयमेव मरणं एत्थ[2] विवागो य अइरोद्दो ॥ ३ ॥ एवं पयईए च्चिय अवगयसंसारनिग्गुणसहावा। तत्तो य तव्विरत्ता पयणुकसायऽप्पहासा य ॥ ४ ॥ सुकयन्नुया विणीया रायाईणमविरुद्धकारी य। कल्लाणंगा सद्धा थिरा तहा समुवसंपन्ना ॥ ५ ॥" तदेभिरेकविंशतिभिर्गुणैः कतमस्य धर्मस्याधिकारित्व-

---

१ विरतश्रावकस्य तु। २ 'अइविवागो हवइ रुद्दो' इत्यपि ॥

मुक्तम्? इत्यत्रोच्यते—एतानि सर्वाण्यपि शास्त्रान्तरीयाणि लक्षणानि प्रायेण तत्तद्गुणस्थानकस्याङ्गभूतानि वर्त्तन्ते, चित्रस्य वर्णकशुद्धिविचित्रवर्णतारेखाशुद्धिनानाभावप्रतीतवत्। प्रकृतगुणाः पुनः सर्वधर्मस्थानानां साधारणभूमिकेव चित्रप्रकाराणामिति सूक्ष्मबुद्ध्या परिभावनीयम्। वक्ष्यति च—"दुविहंपि धम्मरयणं तरइ नरो घेत्तुमविगलं सो उ। जस्सेगवीसगुणरयणसंपया सुत्थिया अत्थि ॥ १ ॥" अत एवाह—

सइ एयंमि गुणोहे संजायइ भावसावयत्तंपि। तस्स पुण लक्खणाइं एयाइं भणंति सुहगुरुणो ॥३२॥

'सति' विद्यमाने 'एतस्मिन्' अन्तरोक्ते 'गुणौघे' जघन्यमध्यमोत्कृष्टरूपे 'संजायते' संभवति 'भावश्रावकत्वमपि' दूरे तावद्भावयतित्वमित्यपेरर्थः। आह किमन्यदपि श्रावकत्वमस्ति? येनैवमुच्यते भावश्रावकत्वमिति, सत्यम्, इह जिनागमे सर्वेऽपि भावाश्चतुर्विधा एव, 'नामस्थापनाद्रव्यभावैस्तन्न्यासः' (त० १। ५।) इति वचनात्। तथा हि— नामश्रावकः सचेतनाचेतनस्य पदार्थस्य यच्छ्रावक इति नाम क्रियते। स्थापनाश्रावकश्चित्रपुस्तकर्मादिगतः। द्रव्यश्रावको ज्ञशरीरभव्यशरीरव्यतिरिक्तो देवगुरुतत्त्वादिश्रद्धानविकलः, तथाविधजीविकाहेतोः श्रावकाकारधारकः। भावश्रावकस्तु—"श्रद्धालुतां श्राति शृणोति शासनं दानं वपेदाशु वृणोति दर्शनम्। कृन्तत्यपुण्यानि करोति संयमं तं श्रावकं प्राहुरमी विचक्षणाः ॥ १ ॥" इत्यादिश्रावकशब्दार्थधारी यथाविधिश्रावकोचितव्यापारपरायणो वक्ष्यमाणः, स चेहाधिकृतः। शेषत्रयस्य यथाकथंचिदेव भावादिति। नन्वागमेऽन्यथा श्रावकभेदाः श्रूयन्ते। यदाह स्थानाङ्गम्—"चउव्विहा सावगा

---

१ "सर्वधर्माणाम्" इत्यपि ॥ २ अन्यत्र "धनम्" इति। २ 'समणोवासगा' इत्यपि ॥

पन्नत्ता । तं जहा— अम्मापिइसमाणे १, भाइसमाणे २, मित्तसमाणे ३, सवत्तिसमाणे ४ । अहवा चउव्विहा सावगा पन्नत्ता । तं जहा—आयंसमाणे १, पडागसमाणे २, खाणुसमाणे ३, खरंटसमाणे ४ । एते च साधूनाश्रित्य द्रष्टव्याः । ते चामीषां चतुर्णां मध्ये कस्मिन्नवतरन्ति ? इति उच्यते,—व्यवहारनयमतेन भावश्रावका एवैते, तथाव्यवह्रियमाणत्वात् । निश्चयतस्तु खरण्टसपत्नीसमानौ मिथ्यादृष्टिप्रायौ द्रव्यश्रावकौ । शेषास्तु भावश्रावकाः । तथा हि तेषां स्वरूपमेवमागमे व्याख्यायते—"चिंतइ जइकज्जाइं न दिट्ठखलिओवि होइ निन्नेहो । एगंतवच्छलो जइजणस्स जणणीसमो सड्ढो ॥ १ ॥ हियए ससिणेहो च्चिय मुणीण मंदायरो विणयकम्मे । भाइसमो साहूणं पराभवे होइ सुसहाओ ॥ २ ॥ मित्तसमाणो माणा ईसिं रूसइ अपुच्छिओ कज्जे । मन्नंतो अप्पाणं मुणीण सयणाउ अब्भहियं ॥ ३ ॥ थद्धो छिद्दप्पेही पमायखलियाणि निच्चमुच्चरइ । सड्ढो सवत्तिकप्पो साहुजणं तणसमं गणइ ॥ ४ ॥" तथा द्वितीयचतुष्के—"गुरुभणिओ सुत्तत्थो बिंबिज्जइ अवितहो मणे जस्स । सो आयंससमाणो सुसावओ वन्निओ समए ॥ १ ॥ पवणेण पडागा इव भामिज्जइ जो जणेण मूढेण । अविणिच्छियगुरुवयणो सो होइ पडाइयातुल्लो ॥ २ ॥ पडिवन्नमसग्गाहं न मुयइ गीयत्थसमणुसिट्ठोवि । थाणुसमाणो एसो अपओसी मुणिजणे णवरं ॥ ३ ॥ उम्मग्गदेसओ निन्हवोसि मूढोसि मंदधम्मोसि । इय संमंपि कहंतं खरंटए सो खरंटसमो ॥ ४ ॥ जह सिढिलमसुइदव्वं छुप्पंतं पिहु नरं खरंटेइ । एवमणुसासगं पिहु दूसिंतो भन्नइ खरंटो ॥ ५ ॥ निच्छयओ मिच्छती खरंटतुल्लो सवत्तितुल्लोऽवि । ववहारओ उ सड्ढा जयंति जं जिणगिहाईसु ॥ ६ ॥" इत्यलमतिप्रसङ्गेन । 'तस्य' पुनर्भावश्रावकस्य 'लक्षणानि' चिह्नानि 'एतानि' वक्ष्यमाणानि 'भणंति' अभिद-

धति 'शुभगुरवः' संविग्नसूरयः । इति गाथार्थः ॥ ३२ ॥

तान्येव लिङ्गान्याह—

कयवयकम्मो[1] तह सीलवं[2] च गुणवं[3] च उज्जुववहारी[4]। गुरुसुस्सूसो[5] पवयणकुसलो[6] खलु सावगो भावे ॥३३॥

कृतमनुष्ठितं व्रतविषयं कर्म कृत्यं भणिष्यमाणं येन स 'कृतव्रतकर्मा'१।'तथा शीलवान्' अपि व्याख्यास्यमानस्वरूपः२। 'गुणवान्' विवक्षितगुणोपेतः३। चकारः समुच्चये भिन्नक्रमश्च। ततः 'ऋजुव्यवहारी च' शरलमनाश्च ४।'गुरुशुश्रूषः' गुरुसेवाकारी५। 'प्रवचनकुशलः' जिनमततत्त्ववित्६।'खलुः' अवधारणे। एवंविध एव श्रावको भवति।'भावे'भावविषये भावश्रावकः। इति गाथाक्षरार्थः ॥ ३३ ॥

भावार्थं स्वत एव बिभणिषुः 'यथोद्देशं निर्देशः, इति न्यायात् कृतव्रतकर्माणमादावाह—

तत्थायन्नण[1]जाणण[2]गिण्हण[3]पडिसेवणेसु उज्जुत्तो। कयवयकम्मो चउहा भावत्थो तस्सिमो होइ ॥ ३४ ॥

'तत्र' तेषु षट्सु लिङ्गेषु मध्ये कृतव्रतकर्मा चतुर्धा भवतीति संबन्धः। आकर्णनं श्रवणं१, ज्ञानमवबोधो२, ग्रहणं प्रतिपत्तिः३, प्रतिसेवनं सम्यक्पालनम्४। सर्वेषामपि द्वन्द्वः, तेषु व्रतानामिति प्रक्रमात् गम्यते।'उद्युक्तः'उद्यमवान् 'भावार्थः' ऐदंपर्यन्तस्य चतुर्विधस्याप्ययमासन्नभणिष्यमाणो 'भवति' इति व्यक्तम्। इति गाथार्थः ॥ ३४ ॥

भावार्थमेवाह—

विणयबहुमाणसारं गीयत्थाओ करेइ वयसवणं। भंगयभेयइयारे वयाण सम्मं वियाणाइ ॥ ३५ ॥

विनयोऽभ्युत्थानादिः । उक्तं च—"अब्भुट्ठाणंजलीकरणं तहेवासणदायणं । गुरुभत्तिभावसुस्सूसा विणओ सो वियाहिओ ॥ १ ॥" बहुमानो मानसः प्रीतिविशेषः । तदुक्तम्—"भावेण अणुदिनं चिय एस गुरू पंडिओ महप्पा य । इय माणसपरिणामो बहुमाणो माणणिज्जेसु ॥ १ ॥" ताभ्यां सारं प्रशस्तं यथा भवत्येवं व्रतश्रवणं करोतीति योगः । इह चत्वारो भङ्गाः—कश्चिद्धूर्तो विनयसारं वन्दनादिदानतः शृणोति परिज्ञानार्थी, न पुनर्व्याख्यातरि बहुमानवान् भवति, कर्मगुरुत्वात् १। अन्यस्तु बहुमानवान् भवति न विनयं प्रयुङ्क्ते, शक्तिविकलत्वात्, स च ग्लानादिः २। अन्यस्तु प्रत्यासन्नकल्याणो द्वाभ्यां समेतः शृणोति ३। कश्चिद्दुरुतरकर्मा द्वितयमपि परिहरति शृणोति च, न च तस्मै गुरोरप्यागमानुसारिप्रवृत्तेः कथयितुं युक्तम् ४। यत एवमागमः—"चत्तारि अवायणिज्जा पन्नत्ता । तंजहा—अविणीए १, विगयपडिबद्धे २, अविओसियपाहुडे ३, पबलकोवमाई ४ ।" तहा—"ओहेणवि उवएसो आएसेणं विभागसो देओ । नाणाइवुड्ढिजणओ महुरगिराए विणीयस्स ॥ १ ॥" जओ—"अविणीयमाणवेंतो[1] किलिस्सई भासई मुसं तह य । घंटालोहं नाउं को कडकरणे पवत्तेज्जा ॥ १ ॥" अतो विनयबहुमानसारं व्रतश्रवणं करोतीति प्रकृतम् । कुतः सकाशात् ? इत्याह—गीतार्थात् । तत्र—"गीयं भन्नइ सुत्तं अत्थो तस्सेव होइ वक्खाणं । गीएण य अत्थेण य संजुत्तो होइ गीयत्थो ॥ १ ॥" तस्मादन्यस्यान्यथाऽपि प्ररूपणासंभवेन विपरीतबोधहेतुत्वादिकं व्रतकर्म १ । भङ्गकभेदातिचारान् 'व्रतानाम्' अनुव्रतादीनां सम्यग् विजानाति । तत्र भङ्गकाः—"दुविहं तिविहेण पढमो दुविहं दुविहेण बीयओ होइ । दुविहं एगविहेणं एग-

१ अन्यत्र "मालवंतो" इत्यस्ति ॥

विहं चेव तिविहेणं ॥ १ ॥ एगविहं दुविहेणं एकेकविहेण छट्ठओ होइ । उत्तरगुणसत्तमओ अविरओ चेव अट्ठमओ॥२॥" एते प्रत्येकं षट् षड् भवन्ति । द्विकसंयोगादिप्रकारेण चानेकधा । यत आह—"पंचण्हणुव्वयाणं एक्कगदुगतिगचउक्क-पणएहिं । पंचग दस दस पण एक्कगो य संजोगनायव्व ॥ १ ॥ तत्थेक्कगसंजोगे पंचण्हवयाण तीसइं भंगा । दुगसंजोगाण दसण्ह तिन्नि सट्ठा सया होंति ॥ २ ॥ तिगजोगाण दसण्हं भंगसया एगवीसइं सट्ठा । पणचउसंजोगाणं चउसट्ठिसयाणि असिआणि ॥ ३ ॥ सत्तत्तरीसयाइं छसत्तराइं च पंचसंजोगे । उत्तरगुणअविरयमेलियाण जाणाहि सव्वग्गं ॥ ४ ॥ सोलस चेव सहस्सा अट्ठसया चेव होंति अट्ठहिया । एसो उ सावगाणं वयगहणविही समासेण ॥ ५ ॥" एवमेकैकव्रतस्य नवभङ्गककल्पनया तथैकविंशतिकल्पनयैकोनपञ्चाशत्कल्पनया च विचार्यमाणा अनेकधा श्रावकव्रतभङ्गका भवन्ति । ते चावहितैरक्षादिसंचारणयाऽवगन्तव्याः । तन्मात्रिका चेयम्—"तिन्नि तिया तिन्नि दुया तिन्नेक्केक्का य हुंति जोगेसु । तिदुएगं तिदुएगं तिदुएगं चेव करणाइं ॥ १ ॥" स्थापनाङ्काः— ३ ३ ३ २ २ २ १ १ १ / ३ २ १ ३ २ १ ३ २ १ एते तावन्नव भङ्गाः । उक्तं च—"न कुणइ न कारवेई करंतमन्नंपि नाणुजाणाइ । मणवइका एगेक्को एवं सेसेवि जाणेज्जा ॥ १ ॥" एते एवानुमतिप्रत्याख्यानवदादित्रिकविकल्पाः पूर्वोक्ताः षड् भवन्ति । एतेषामेवानुमतिपरिहारेणैकविंशतिः—"तत्थ पढमपए एक्को भंगो, बीए तिन्नि, तइए तिन्नि, चउत्थे दो, पंचमछट्ठेसु छ छ भंगा लब्भंति सव्वेवि एक्कविंसा ।" तथैकोनपञ्चाशदेवं भवन्ति—"पढमेगो तिन्नि तिया दो नवगा तिन्नि तह य दो नवगा । अउणापन्नं भंगा सव्वे ते हुंति नायव्वा ॥१॥" एवमनेकधा व्रतभङ्गान् जानाति । तथा भेदान् सूक्ष्मबादरसंकल्पजारम्भजसापराधनिरपराधा-

दिरूपान् जानाति । तथाऽतिचारान् बधबन्धछविच्छेदादीन् जानाति । व्रतानामनुव्रतादीनां सम्यक् सुविचारितान् विशेषेण जानातीति द्वितीयव्रतकर्म २ ॥ ३५ ॥

अथ तृतीयमाह —

गिण्हइ गुरूण मूले इत्तरमियरं व कालमह ताइं । आसेवइ थिरभावो आयंकुवसग्गसंगेवि ॥ ३६ ॥

'गृह्णाति, प्रतिपद्यते 'गुरूणां' आचार्यादीनां 'मूले' समीपे । यतोऽभाणि—"उवउत्तो गुरुमूले संविग्गो इत्तरं व इयरं वा । अणुदिहयमणुसरंतो पालेइ विसुद्धपरिणामो ॥ १ ॥" आह स श्रावको देशविरतिपरिणामे सति व्रतानि प्रतिपद्यतेऽसति वा ? किं चातो यद्याद्यः पक्षः किं गुरुसमीपगमनेन ? साध्यस्य सिद्धत्वात् प्रतिपद्यापि व्रतानि देशविरतिपरिणाम एव साध्यः, स चास्य स्वत एव सिद्ध इति गुरोरप्येवं परिश्रमयोगान्तरायदोषपरिहारादिति । द्वितीयश्चेत्, तर्हि द्वयोरपि मृषावादप्रसङ्गात् परिणामाभावे पालनस्याप्यसंभवात् । तदेतत्सकलं परोपन्यस्तमचारु, उभयथाऽपि गुणोपलब्धेः । तथा हि—सत्यपि देशविरतिपरिणामे गुरुसमीपप्रतिपत्तौ तन्माहात्म्यान्मया सद्गुणस्य गुरोराज्ञाऽऽराधनीयेति प्रतिज्ञानिश्चयाद्व्रतेषु दृढता जायते, जिनाज्ञा चाराधिता भवतीति । उक्तं च—"गुरुसक्खिओ हु धम्मो संपुन्नविही-कया इय विसेसो । तित्थयराणं आणा साहुसमीवंमि वोसिरओ ॥ १ ॥" गुरुदेशनाश्रवणोद्भूतकुशलतराध्यवसायात्कर्मणामधिकतरः क्षयोपशमः स्यात् । तस्माच्चाल्पं व्रतं प्रतिपित्सोरपि बहुतमव्रतप्रतिपत्तिरुपजायते । इत्यादयोऽनेके गुणा गुरोरन्तिके व्रतानि गृह्णतः संभवन्ति । तथाऽसन्नपि विरतिभावो गुरूपदेशश्रवणान्निश्चयसारपालनातो वाऽवश्यंभावी

सरलहृदयस्येति द्वयोरपि गुरुशिष्ययोर्मृषावादाभाव एव गुणलाभात् । शठाय पुनर्न देयान्येव गुरुणा व्रतानि । छद्मस्थतया पुनरलक्षितसाध्यस्य शठस्यापि दाने गुरोः शुद्धपरिणामत्वाददोष एव । न चैतत् स्वमनीषिकयोच्यते । यत आह—"संतम्मिवि परिणामे गुरुमूलपवज्जणंमि एस गुणो । दढया आणाकरणं कम्मक्खओवसमवुड्ढी अ ॥ १ ॥ इय अहिए फलभावे न होइ उभयपलिमंथदोसोवि । तयभावम्मिवि दोण्हवि न मुसावाओवि गुणभावा ॥ २ ॥ तग्गहणओ च्चिय तओ जायइ कालेण असढभावस्स । इयरस्स न देयं चिय सुद्धो छलिओवि जइ असढो ॥ ३ ॥" कृतं विस्तरेण । अत्र पुनरपि कश्चिदाह—विस्तरभीरुमपि भदन्तं किंचित् प्रस्तावादायातं पृच्छामि । संप्रति दुष्षमादोषाद्गुणवन्तो गुरवो नोपलभ्यन्ते, ततः स्थापनाचार्यसमीपे श्रावको व्रतं प्रतिपद्यतां वा मा वा ? गुरुराह—सौम्य ! कथं नाम गुरवो नोपलभ्यन्ते ? दूरदेशवर्त्तित्वादत्यन्तासंभवाद्वा ? यदि दूरदेशवर्त्तित्वात्तदा तदर्थिनस्तत्रैव गन्तुमुचितं धर्मार्थित्वस्यान्यथानुपपत्तेः । अथात्यन्तासंभवोऽनुपलम्भहेतुः । सोऽतितरामनुचितो वक्तुं सूत्रविरोधात् । उक्तं च—"न विणा तित्थं नियंठेहिं नातित्था य नियंठया । छक्कायसंजमो जाव ताव अणुसज्जणं दोण्हं ॥ १ ॥" द्वयोः सामायिकच्छेदोपस्थापनीययोर्बकुशकुशीलयोर्वा । अथागमविरोधभयान्नो अत्यन्ताभावमभ्युपगच्छन्ति भवन्तः । किं तु सन्तोऽपि क्वापि वयं नोपलभामह इति भवतां मतमित्यपि महाधृष्टवष्टोत्तरम् (?) यतः शतशः पञ्चमहाव्रतधारिणः, पञ्चसमितिप्रधानाः, त्रिगुप्तिपालनपराः, कालोचितयतनावन्तः, सततं सिद्धान्तामृतपानलालसाः, कुग्राहाग्रहविनिर्मुक्तमानसाः समुपलभ्यन्त एव महा-

१ 'संजमो' इत्यपि । २ 'अणुसज्जणा' इत्यपि ॥

मुनयः । तत्कथं नोपलभ्यन्ते मध्यस्थधार्मिकैः ? इति सतोऽप्यनुपलम्भो महत् दृष्टेर्दूषणम् । सति च तस्मिन् किं व्रत-ग्रहणेन ? इति । तथा गुरुमूले प्रतिपन्नमूलगुणस्य साधोरिव श्रावकस्यापि तद्विरहे स्थापनागुरुरुपदिष्टः । तथा चाह—"गुरु-विरहम्मि य ठवणा भणिया समयंमि पुव्वसूरीहिं । आउट्टिदप्पविरओ अपमाओ चेव कप्पम्मि ॥ १ ॥" न चैकान्ते-नासंयुक्तस्यासतो वा विरहसंभव इति, तस्माद् व्यवहारनयमाश्रित्योच्यते, कालोचितक्रियावतो गीतार्थस्य निःस्पृहमतेः सर्वसत्त्ववत्सलस्य गुरोरन्तिके गृही महाव्रतानामिवाणुव्रतानां ग्रहणं करोति न स्थापनागुरोरिति स्थितम् । तत्पुनः 'इत्वरं' चातुर्मासादिप्रमितं 'इतरं' यावत्कथिकं वा कालं यावत् 'अथ' परिज्ञानादनन्तरं 'तानि' इति प्रस्तुतव्रतानि, इति तृतीयं व्रतकर्म ३ । 'आसेवते' सम्यक् परिपालयति 'स्थिरभावः' निष्प्रकम्पमनाः । आतङ्को रोगः, उपसर्गो दिव्याद्युपद्रवः, तयोः सङ्गेऽपि संपर्केऽपि सति । तत्रातङ्कसङ्गे आरोग्यद्विजवत्, उपसर्गसङ्गे कामदेवश्रावकवत् । इति गाथार्थः ॥ ३६ ॥

आरोग्यद्विजचरितमिदम्—

उज्जेणीए नयरीए देवगुत्तस्स माहणस्स नंदाए भारियाए पुत्तो अहेसि । सो पुण कुओवि पुव्वदुक्कयाओ रोगेहिं न मुंचइत्ति अकयनामो रोगो चेव जणे पसिद्धो । अन्नया ईसरनामोऽणगारो भिक्खंतो तेसिं गिहमणुपत्तो । तओ माहणेण दारयं पाएसु पाडिऊण विन्नत्तो । भयवं ! तुब्भे सव्वं जाणह ता कारुन्नमवलंबिय कहेहि एयस्स रोगोवसमोवायं । सा-हुणा भणियं, न सेमुयाणंतेहिं कहा कीरइ । तओ तेहिं मज्झण्हसमए उज्जाणं गंतूण वंदिओ पुच्छिओ य । साहुणा भ-

१ दृष्टिदूषणे । २ भिक्षाभ्रमद्भिः ॥

ण्णइ—"पावाउ होइ दुक्खं तं पुण धम्मेण नासई नियमा । जलणपलित्तं गेहं विज्झाइ जओ जलोहेण ॥ १ ॥ धम्मेण सुचिन्नेणं सिग्घं नासंति सयलदुक्खाइं । एयारिसाइं नियमा न य हुंति पुणो परभवेवि ॥ २ ॥" एवं पबंधदेसणाए पडिबुद्धा दोवि समणोवासगा जाया । विसेसओ बडुगो दढधम्मयाए भावणासारं रोगमहियासेइ, सावज्जं तिगिच्छंपि न कारवेइ । अन्नया दढधम्मोत्ति पसंसिओ देविंदेण । तमसद्दहंता वेज्जरूवेण समागया दुवे देवा भणिउं पवत्ता । अम्हे एयं बडुयं पउणेमो, जइ अम्हेहिं भणियं किरियं करेइ । सयणेहिं भणियं, केरिसी सा किरिया? पुव्वण्हे महुअवलेहो, पच्छिमण्हे जुन्नासवपाणं, भोयणं निसाए, समक्खणं कूरं, जलयराइतिविहमंसमोसहेहिं सद्धिं भोत्तव्वंति । पडिभणियं बडुएण, एएसिमेगंपि न करेमि, वयभंगभयाओ । विज्जेहिं भणियं, 'सरीरं धम्मसाहणं' जेण वा तेण वा पओगेण तं पउणिज्जइ, वयभंगोवि पच्छित्ताणुचरणेण सुज्झइ चेव, इच्चाइविचित्तजुत्तीहिं भणिओ सयणेहिं रन्नावि । जाहे न पडिवज्जइ ताहे तुट्ठेहिं पयडीहोऊण पसंसिओ देवेहिं, नीरोगसरीरो कओ । आणंदिओ सयणवग्गो, सेसलोगो य । अहो! धम्ममाहप्पंति पडिबुद्धाणेगे पाणिणो । तप्पभिइं च आरोगदिओ से नामं जायं । संखेवओ भणियमारोग्गदियचरियं । विशेषतः पृथ्वीचन्द्रचरितादवसेयम् ॥

एवमातङ्कसङ्गेऽपि स्थिरचित्तः श्रावकः स्यादिति ४ । तथा कामदेवचरितं प्रसिद्धमेवेति न भण्यते ॥

उक्तः कृतव्रतकर्म १ । अथ शीलवन्तमभिधित्सुराह—

आयय[१]णं खु निसेवइ वज्जइ परगेहपवि[२]सणमकज्जे । निच्चमणु[३]ब्भडवेसो न भणइ सवियार[४]वयणाइं ॥३७॥

परिहरइ बालकीलं साहइ कज्जाइँ महुरनीईए । इय छव्विहसीलजुओ विन्नेओ सीलवंतोत्थ ॥ ३८ ॥

'आयतनं' धार्मिकजनमीलनस्थानम् । उक्तं च—"जत्थ साहम्मिया बहवे सीलवंता बहुस्सुया । चरित्तायारसंपन्ना आययणं तं वियाणाहि ॥ १ ॥" 'खुः' अवधारणे, प्रतिपक्षप्रतिषेधार्थः । ततश्चायतनमेव निषेवते भावश्रावको, नानायतनमिति योगः । "न भिल्लपल्लीषु न चौरसंश्रये न पार्वतीयेषु जनेषु संवसेत् । न हिंस्रदुष्टाशयलोकसन्निधौ कुसङ्गतिः साधुजनस्य निन्दिता ॥ १ ॥" तथा—"दंसणनिब्भेयणिया चरित्तनिब्भेयणी य अणवरयं । जत्थ पयट्टइ विगहा तमणाययणं महापावं ॥ १ ॥" प्रथमशीलम् १ । तथा वर्जयति 'परगृहप्रवेशनं' अन्येषां मन्दिरेषु गमनं 'अकार्ये' कार्याभावे सति, नष्टविनष्टादावाशङ्कासंभवात् । एत्थ सामायारी-"सावगो जइवि चियत्तंतेउरपरघरपवेसो वन्निज्जइ तहावि तेण एगागिणा पुरिसरहिए परगिहे न पविसियव्वं । कज्जेवि परिणयवओ सहाओ घेतव्वो" इति द्वितीयं शीलम् २ । तथा 'नित्यं' सदा 'अनुद्भटवेषः' अनुल्बणनेपथ्यो भवति भावश्रावको न विड्गप्रायनेपथ्यः । तथा हि—"लंखस्स व परिहाणं गसइ व अंगं तहंगिया गाढा । सिरवेढो ढमरेणं वेसो एसो सिडंगाणं ॥ १ ॥ सिहिणाण मग्गदेसो उग्घाडो नाहिमंडलं तह य । पासा य अद्धपिहिया कंचुयओ एस वेसाणं ॥ २ ॥" इहैव तदाकूतम्—पुरुषाणां स्त्रीणां च नानादेशेषु नानारूपाणि नेपथ्यानि भवन्ति, ततो यद्यत्रानिन्दितं शिष्टाभीष्टं च, तच्छ्रावकश्राविकाभिर्नेपथ्यं विधेयमिति । अन्ने भणंति—"कुलदेसाण विरुद्धो वेसो रन्नोवि कुणइ नो सोहं । वणियाण विसेसेणं विसेसओ ताण इत्थीणं ॥ १ ॥ संतलयं परिहाणं झलं व चोलाइयं च मज्झिमयं । सुसिलिट्ठमुत्तरीयं धम्मं लच्छिं जसं कुणइ ॥ २ ॥ परिहाणमणुब्भडचलणकोडिमज्जायमणु-

सरंतं तु परिहाणमक्कमंतो कंचुयओ होइ सुसिलिट्ठो ॥ ३ ॥" इत्याद्येतदपि सङ्गतमेव, किं तु क्वचिदेव देशे कुले वा घटते। श्रावकास्तु नानादेशेषु कुलेषु च संभवन्ति, तस्माद्देशकुलाविरुद्धो वेषोऽनुद्भट इति व्याख्यानं व्यापकमिह सङ्गतम्। इति तृतीयं शीलम् ३। तथा 'न भणति' न ब्रूते सविकाराणि रागद्वेषविकारोत्पत्तिहेतुभूतानि वचनानि, वाचस्तत्परीहास्यादिभिः परिवादशीलतया, मुखरतया वा। तत्र रागोत्पादकानि शृङ्गारसाराणि। यथा—"राज्ये सारं वसुधा वसुंधरायां पुरं पुरे सौधं। सौधे तल्पं तल्पे वराङ्गनामङ्गसर्वस्वम् ॥ १ ॥ दधिशीताम्बुताम्बूलपुण्यपण्याङ्गनाजनैः। असारोऽप्येष संसारः सारवानिव लक्ष्यते ॥ २ ॥" तथा—"प्रियादर्शनमेवास्तु किमन्यैर्दर्शनान्तरैः। प्राप्यते यत्र निर्वाणं सरागेणापि चेतसा ॥ १ ॥" द्वेषोदयकारणानि—"रे दासीसुय! माईय माया ते छिंछइ जणपसिद्धा। खरफरुसवयणतविओ मरेज्ज मारेज्ज वा कोइ ॥ १ ॥ एसो चोरो जारो निही य लद्धो इमेण निब्भंतो। एसो रायविरोही मंसक्खाई इमो अहवा ॥ २ ॥ पाविट्ठा रायाणो दसवेससमत्ति जं सुई भणियं। रायगुरू सुरपाई दासीए पई गुरू कहणु ॥ ३ ॥ एमाईवयणाइं फरुसाइ परस्स अप्पणो चेव। उवघायकुलक्खयकारणाइं विगियाइं सव्वाइं ॥ ४ ॥" तथा धर्मविरुद्धान्यपि न ब्रूते भावश्रावकः। तद्यथा—"हत्थागया इमे कामा कालिया जे अणागया। को जाणइ परे? लोए अत्थि वा नत्थि वा पुणो ॥ १ ॥ चतुर्थं शीलम् ४ ॥ ३७ ॥ तथा 'परिहरति' नासेवते 'बालक्रीडां' बालिशजनविनोदव्यापाराम्। उक्तं च—"चउरंगसारिपट्टियवट्टाई लावयाइजुद्धाई। पम्होत्तरजमगाई पहेलियाईहिं नो रमइ ॥ १ ॥" इति पञ्चमशीलम् ५। तथा 'साधयति' निष्पादयति 'कार्याणि' प्रयोजनानि 'मधुरनीत्या' सामपूर्वकम्। सौम्य! सुन्दर! एवं कुरु, एवं क्रियते,

इत्थं कृतं सुकृतं स्यात्, इति शिक्षादानेन परिजनं कर्मकरादिलोकं मधुरगिरा प्रवर्त्तयति । यतः—"प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः । तस्मात्तदेव वक्तव्यं किं वचनेऽपि दरिद्रता ॥ १ ॥ अशिक्षितात्मवर्गेण म्लानिं याति यतः प्रभुः। अतः शिक्षाः प्रदातव्या प्रत्यहं मृदुभाषया ॥ २ ॥" तथा—"स्वाधीने माधुर्ये मधुराक्षरसंभवेषु वाक्येषु । किं नाम सत्त्ववन्तः पुरुषाः परुषाणि भाषन्ते ॥ १ ॥" अन्यैरप्युक्तम्—"क्षमी यत्कुरुते कार्यं न तत्कोपवशंगतः । कार्यस्य साधिनी प्रज्ञा सा च क्रुद्धस्य नश्यति ॥ १ ॥" इति । मतान्तरे दुराराध्यताभिधानमेतत् षष्ठं शीलम् ६ । भावश्रावकस्य शीलान्तरव्युदासेन शीलवन्तमुपसंहरन्ति । इत्युपदर्शितषड्विधशीलयुक्तो विज्ञेयः, शीलवान् 'अत्र' श्रावकविचारे । इति गाथाद्वयार्थः॥३८॥

एतदेव शीलं गुणदोषोपदर्शनद्वारेण भावयन्नाह—

आययणसेवणाओ दोसा झिज्जंति वड्ढइ गुणोहो । परगिहगमणंपि कलंकपंकमूलं सुसीलाणं ॥ ३९ ॥
सहइ पसंतो धम्मी उब्भडवेसो न सुंदरो तस्स । सवियारजंपियाइं नूणमुईरंति रागग्गिं ॥ ४० ॥
बालिसजणकीलावि हु लिंगं मोहस्सणत्थदंडाओ । फरुसवयणाभिओगो न संगओ सुद्धधम्माणं ॥४१॥

आयतनमुक्तस्वरूपं, तस्य सेवनादुपासनात् 'दोषाः' मिथ्यात्वादयो 'हीयन्ते' हानिमुपयान्ति । 'वर्धते' वृद्धिमुपैति 'गुणौघः' ज्ञानादिगुणकलापः । तथा हि—"सन्तप्तेऽयसि[1] संस्थितस्य पयसो नामापि नो दृश्यते मुक्ताकारतया तदेव नलिनीपत्रस्थितं व्यज्यते । स्वातौ सागरशुक्तिमध्यपतितं तज्जायते मौक्तिकं प्रायेणाधममध्यमोत्तमगुणः संवासतो जा-

---

१ 'सन्तप्तायसि' इत्यपि ॥

यते ॥ १ ॥" 'परगृहगमनं' पूर्वोक्तं, अपिशब्द उपरि योक्ष्यते। 'कलङ्कपङ्कमूलं' अभ्याख्यानप्राप्तिहेतुः 'सुशीलानामपि' साधूनामपीति भावः। तथा ह्यागमे भिक्षार्थमपि गतस्य साधोरुपवेशनं निषिद्धम्। यतोऽवाचि—"गोयरग्गपविट्ठस्स निसेज्जा जस्स कप्पइ। इमेरिसमणायारं आवज्जइ अबोहियं ॥ १ विवत्ती बंभचेरस्स पाणाणं च वहे वहो। वणीमगपडिग्घाओ पडिकोहो अगारिणं ॥ २ ॥ अगुत्ती बंभचेरस्स इत्थिओ वावि संकणा। कुसीलवड्ढणं ठाणं दूरओ परिवज्जए ॥ ३ ॥" श्रावकस्तु सुतरां शङ्कास्थानं स्यात्। अवश्येन्द्रियत्वाद्व्रतहानिं चाप्नुयात्। उक्तं च—"सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेन्द्रियाणां तावल्लज्जां विधत्ते विनयमपि समालम्बते तावदेव। भ्रूचापाकृष्टमुक्ताः श्रवणपथयुषो नीलपक्ष्माण एते यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥ १ ॥" तथा 'सहइ' इति शोभते 'प्रशान्तः' प्रशान्तवेषो 'धर्मी' इति धर्मवान् धार्मिकः श्रावको यतिर्वा, अतः कारणात् 'उद्भटवेषः' रागान्धजघन्यजननेपथ्यो 'न सुन्दरो' नैव शोभाकारी 'तस्य' धार्मिकस्य स हि तेन सुतरामुपहासस्थानं स्यात्। 'नाकामी मण्डनप्रियः' इति लोकोक्तेर्विशेषतो योषिद्विधवा च। भणितं च केनापि—"लन्होच्छी सद्दालं जुत्तं मायाविसहं करइ न वुत्तउ। पसरह जाइवियालह आवइ एह नारि महु मणह न भावइ ॥ १ ॥" तथा 'सविकारजल्पितानि' सशृङ्गारभणितानि 'नूनं' निश्चितं 'उदीरयन्ति' उद्दीपयन्ति रागाग्निम्। अत एवोक्तम्—"जं सुणमाणस्स कहं सुट्ठुयरं जलइ माणसे मयणो। समणेण सावएणवि न सा कहा होइ कायव्वा ॥ १ ॥" उपलक्षणं चैतत्—द्वेषानलमप्युदीरयन्ति कानिचित्। यदाह—"मम्मं कम्मं जम्मं तिन्निवि एयाइं मा हु पयडेज्जा। मा मम्मकम्मविद्धो मरेज्ज मारेज्ज वा कोइ ॥ १ ॥" तथा 'बालिशजनक्रीडाऽपि' वर्णितस्वरूपा 'हुः' अलङ्कारे।

'लिङ्गं' चिह्नं 'मोहस्य' अज्ञानस्य 'अनर्थदण्डत्वात्' निष्फलपापारम्भप्रवृत्तेः । तथा परुषवचनेन 'रे दरिद्र ! दासीपुत्र !' इत्यादिनाऽभियोग आज्ञादानं 'न सङ्गतो' नोचितः 'शुद्धधर्माणां' प्रतिपन्नजिनपतिमतानां धर्महानिर्धर्मलाघवहेतुत्वात् । तत्र धर्महानिः—"फरुसवयणेण दिणतवं अहिक्खिवंतोवि हणइ मासतवं । वरिसतवं सवमाणो हणइ हणंतोऽवि सामन्नं ॥ १ ॥" इत्याद्याप्तवचनात् । धर्मलाघवं पुनरहो ! महाधार्मिकाः, परपीडापरिहारिणः, सविवेकाश्च श्रावका यदेवं ज्वलदङ्गारोत्कराकारगिरो निगिरन्तीत्यादिलोकोपहासात् । तथा—"अप्रियमुक्ताः पुरुषाः प्रवदन्ते द्विगुणमप्रियं यस्मात् । तस्मान्न वाच्यमप्रियमप्रियं वा श्रोतुकामेन ॥ १ ॥" तथा—"विरज्यते परीवारो नित्यं कर्कशभाषिणः । परिग्रहे विरक्ते च प्रभुत्वं हीयते नृणाम् ॥ १ ॥" इत्याद्यैहिकानर्थाश्च परुषभाषिणां संभवन्ति । सर्वथा न शोभते जैनानां कषायानलोद्दीपनम् । उक्तं च—" जइ जलइ जलउ लोए कुसत्थपवणाहओ कसायग्गी । तं चोज्जं जं जिणवयणसलिलसित्तोवि पज्जलइ ॥१॥" अत एव भगवता महावीरेण महाशतकमहाश्रावकः सत्येऽपि परुषे जल्पिते प्रायश्चित्तं ग्राहितः॥३९॥४०॥४१॥

तत्संविधानकं चेदम्—

रायगिहे नयरे महासयगो गाहावई होत्था । तस्स अट्ठ हिरन्नकोडीओ निहीपउत्ताओ, अट्ठ वुड्ढिपउत्ताओ, अट्ठ वित्थरपउत्ताओ, अट्ठ वया दसगोसाहस्सिया । रेवइपमुहाओ तेरस भज्जाओ । रेवईए कोलघरियाओ अट्ठ हिरन्नकोडीओ निहाणपउत्तओ, अट्ठ वुड्ढिपउत्ताओ, वित्थरपउत्ताओवि अट्ठ, दस दस गोसाहस्सिया अट्ठ वया । सेसियाणं तिसुवि ठाणेसु एगेगा हिरन्नकोडी, एगेगो वओ दसगोसाहस्सिओ । एवं से अट्टे दित्ते अपरिभूए बहूणं सेट्ठिसत्थवाहपमुहाणं सय-

णपरियणस्स मेढिभूए विहरइ। अन्नया भयवं महावीरे गामाणुगामं विहरमाणे तत्थ समणुपत्ते गुणसिलए उज्जाणे समोसढे रइयं देवेहिं समोसरणं। निग्गओ वंदणवडियाए सेणिओ राया नागरजणो महासयगो य। वंदिऊणोवविट्ठाण सव्वेसिं पारद्धा भगवया धम्मकहा। तंजहा—असारो संसारो जम्मजरामरणरोगसोगाइमहासत्तुसंतावपउरो। दुलहो जाइकुलरूवारोग्ग-संगओ मणुयभावो। अणिच्चं जीवियं पइवइ। अविन्नायागमणो मच्चुमहारक्खसो। सव्वहा समत्थाणत्थसत्थवारणनिवारणमहा-मइंदे धम्मे चेव ओज्जमो काउमुचिओ सयन्नविन्नाणाणत्ति। एवमाइअमयनिस्संदसुदरं जिणिंददेसणं सोऊण पडिबुद्धा बहवे पाणिणो, गहिओचिओचियधम्मा य गया नियनियट्ठाणेसु। महासयगोवि समत्तपवित्तचित्तो पंचाणुव्वयमूलं सत्तसिक्खावयसोहियं सावयधम्ममुवसंपज्जिऊण महानिहाणलाभाओवि अब्भहियपरिओसो पणमिऊण परमेसरं पत्तो नियमंदिरं। पइदिणवड्ढमाणपरिणामो पालिउं पवत्तो सावगधम्मं। इओ य सा रेवई गुरुकम्मयाए तस्संसग्गीए न नाम पडिबुद्धा। अवि य अहियवरं विसयलोला मज्जमंसरसगिद्धा य जाया। तओ अन्नया उग्घोसिए [1]अमाघाए तीए मंस-मलभमाणीए भणियाऽभिओगपुरिसा। मम गोउलाओ दुवे कल्होडगे वहिऊण मंसमाणेह। तेहिवि तहेव कए पइदिणं दो दो कल्होडगे विणासाविउमारद्धा। अन्नया विसयगिद्धिविद्धिओ ताओ दुवालसवि सवत्तिओ विसप्पओगेण सत्थपओगणे य केणावि अविन्नाया [2]विणिवाएइ। तासिं संतियं हिरण्णसुवन्नाइ पडिगाहित्ता तुट्ठचित्ता विहरइ। सोवि महासयगो चोद्द-सण्हं वासाणं पज्जंते जेट्ठसुयं कुडुंबे ट्ठवित्ता पोसहसालमणुपविसइ, उवासगपडिमाओ पडिवज्जइ। तमन्नया सा रेवई मज्ज-

१ 'अमारीए' इत्यपि। २ 'विणिघाएइ' इत्यपि॥

मंसरसमत्ता उवसग्गिउं पवत्ता । भणइ पाणवल्लह ! किमेइणा कट्ठाणुट्ठाणेण, एयं तुह सरीरं सोमालं सुहलालियं च, ता भुंजाहि ताव पुवज्जियधम्मफलं । मा अवहीरेहि भावाणुरत्तं किंकरीभावपत्तं ममं वराइणित्ति । तहवि अहियासिया तेण निच्चलचित्तेण उवसग्गा । फासियाओ एगारसवि उवासगपडिमाओ । पत्थावं जाणिऊण पडिवन्नमणसणं । तओ सुहभावणाभावणपरस्स कम्मखओवसमेण समुप्पण्णमोहिनाणं महासयगस्स । तेण य सो पुवओ लवणसमुद्दे जोयणसहस्सं जाणइ पासइ । एवं दाहिणेण पच्छिमेण य । उत्तरेण चुलहिमवंतं वासहरपवयं । अहे रयणप्पहाए लोलुयं नरयं जाणइ पासइ । अन्नया सा मज्जणुपाणमत्ता पावा रेवईवि पुणो उवसग्गिउं पवत्ता । तओ किमेसा एरिसित्ति सवियक्केण पउत्तो महासयगेण ओही। नायं च तीए निसेसं चरियं। लक्खियं च नरयगइगामित्तं। तओ भणिया रेवई,पावे ! केत्तियमज्जवि पावमुवज्जेसि। गच्छसि तुमं सत्तरत्तंते अलसयवाहिपीडिया मरिऊण लोलुयनरयंमित्ति। तं च सोऊणावगयमया मरणभयाभिभूया कुविओ बाढमज्ज महासयगोत्ति अट्टवसट्टा गया एसा समंदिरं । तंमि दिणे भगवं महावीरो तत्थेव विहरइ । तओ गोयमसामिं समाइसइ, गच्छ गोयमा ! महासयगं सावगं भणाहि । न खलु कप्पइ समणोवासगाणं सच्चंपि परपीडाकरं भासं भासित्तए, विसेसओ ते उत्तमगुणट्ठाणट्ठियस्स कयभत्तपच्चक्खाणस्स। ता तुमं तस्स दुब्भासियस्स पायच्छित्तं पडिवज्जाहित्ति। तहत्ति पडिवज्जिऊण गोयमसामिणा भणिओ भगवंताएसं महासयगो । सोवि संवेगभरनिब्भरमणो भगवंतं वंदिऊण सम्ममालोएइ निंदइ गरहइ, भगवओ गोयमस्स समीवे पायच्छित्तं पडिवज्जिऊण कयसरीरपरिच्चाओ सोहम्मे कप्पे अरुणाभे विमाणे चउपलिओवमट्ठिईओ देवो समुप्पन्नो । संखेवओ भणियं महासयगचरियं । विसेसओ उवासगदसंगाओ नायव्वंति ॥

उक्तं द्वितीयं भावश्रावकलक्षणम् २। अधुना तृतीयमभिधित्सुः संबन्धगाथामाह—

जइवि गुणा बहुरूवा तहवि हु पंचहि गुणेहि गुणवंतो। इह मुणिवरेहि भणिओ सरूवमेसिं निसामेहि ॥

'यदि' इत्यभ्युपगमे। अभ्युपगतं मयेदम्। गुणाः 'बहुरूपाः' बहुप्रकारा अक्षुद्रत्वादय औदार्यादयोऽन्येऽपि प्रियंवदत्तादयः। तथाऽपि पञ्चभिर्गुणैर्गुणवान् 'इह' श्रावकविचारे 'मुनिवरैः' गीतार्थगुरुभिः 'भणितः' उक्तः। 'स्वरूपं' स्वतत्त्वं 'एषां' गुणानां 'निशामय' आकर्णय, इति शिष्यप्रोत्साहनाय क्रियापदम्। प्रमादी शिष्यः प्रोत्साह्य श्रावणीय इति ज्ञापनार्थम्। इति गाथार्थः ॥ ४२ ॥

स्वरूपमेवाह—

सज्झाए करणंमि य विणयम्मि य निच्चमेव उज्जुत्तो। सव्वत्थणभिनिवेसो वहइ रुइं सुट्ठु जिणवयणे ॥४३॥

शोभनमध्ययनं स्वेनात्मना वाऽध्यायः स्वध्यायः स्वाध्यायो वा,तस्मिन्नित्यमुद्युक्त इति योगः १। तथा 'करणे' अनुष्ठाने २, 'विनये' गुर्वाद्यभ्युत्थानादिरूपे 'नित्यं' सदैव 'उद्युक्तः' प्रयत्नवान् भवतीति प्रत्येकमभिसंबन्धात्। इति गुणत्रयम् ३। तथा 'सर्वत्र' सर्वप्रयोजनेष्वैहिकामुष्मिकेषु, न विद्यतेऽभिनिवेशः कदाग्रहो यस्य सः 'अनभिनिवेशः' प्रज्ञापनीयो भवतीति चतुर्थो गुणः ४। तथा 'वहति' धारयति 'रुचिं' इच्छां श्रद्धानं वा 'सुट्ठु' बाढं 'जिनवचने' पारगतगदिते ५। इति गाथार्थः ॥ ४३ ॥

इत्थं गणनयोपदर्श्य गुणान् भावार्थकथनतः प्रदर्शयन्नाह—

पढणाईसज्झायं वेरग्गनिबंधणं कुणइ विहिणा । तवनियमवंदणाईकरणंमि य निच्चमुज्जमइ ॥ ४४ ॥
अब्भुट्ठाणाईयं विणयं नियमा पउंजइ गुणीणं । अणभिनिवेसो गीयत्थभासियं नन्नहा मुणइ ॥ ४५ ॥
सवणकरणेसु इच्छा होइ रुई सद्दहाणसंजुत्ता । एईए विणा कत्तो सुद्धी सम्मत्तरयणस्स ॥ ४६ ॥

पठनमपूर्वश्रुतग्रहणम्, आदिशब्दात् प्रच्छनापरावर्त्तनाऽनुप्रेक्षाधर्मकथा गृह्यन्ते, पञ्चप्रकारमपि स्वाध्यायं करोति । किंविशिष्टम् ? 'वैराग्यनिबन्धनं' विरागताकारणम्, 'विधिना' विनयबहुमानप्रधानम् । तत्र पठनविनयः—"पर्यस्तिकामवष्टम्भं तथा पादप्रसारणम् । विकथां प्रबलं हास्यं वर्जयेद्गुरुसन्निधौ ॥ १ ॥" पठन्निति भावः । पृच्छाविनयः—"आसणगओ न पुच्छेज्जा नेव सेज्जागओत्ति य । आगम्मक्कुडुओ संतो पुच्छेज्जा पंजलिपुडो ॥ १ ॥" परावर्त्तनविधिरयम्—"फासुयथंडिलइरियं पडिकंतो अहव गहियसामइओ । चेलंचलपिहियमुहो सपयच्छेयं गुणइ सड्ढो ॥ १ ॥" अनुप्रेक्षा भावना तद्विधिः—"चारित्तसंपउत्तो सुकयसुयपरिग्गहो निराबाहं । भवविलया य पसत्थं भावेज्जा भावणाजालं ॥१॥" धर्मकथाविधिः—"सुद्धं धम्मुवएसं गुरुप्पसाएण सम्ममवबुद्धं । सपरोवयारजणगं जोगस्स कहेज्ज धम्मत्थी ॥ १ ॥" तपोनियमवन्दनादीनां करणे समाचरणे, चकारात्कारणानुमोदनयोश्च, 'नित्यं' प्रतिदिनं 'उद्यच्छति' प्रयतते । तत्र तपोनशनादि द्वादशधा । तदुक्तम्—"अनशनमूनोदरता वृत्तेः संक्षेपणं रसत्यागः । कायक्लेशः संलीनतेति बाह्यं तपः षोढा ॥ १ ॥ प्रायश्चित्तध्याने वैयावृत्त्यविनयावथोत्सर्गः । स्वाध्याय इति तपः षट्प्रकारमाभ्यन्तरं भवति ॥ २ ॥" नियमा यतिविश्रामणोत्तरपारणककृतलोचसाधुघृतदानादिविषयाः । उक्तं च—"पहसंतगिलाणस्स य आगमगहणे य लोयकडसाहू । उत्तर-

पारणगम्मि य दाणं सुबहुप्फलं होइ ॥ १ ॥" वन्दना चैत्यगुरुविषया, आदिशब्दात्पूजनादिपरिग्रहः, तेषां करणे नित्य-मुद्यच्छति गुणद्वयस्य भावने । इत्याद्यगाथार्थः ॥४४॥ तथा अभिमुखमुत्थानमभ्युत्थानं, तदादिर्यस्य सोऽभ्युत्थानादिः, आदिशब्दः स्वागतानेकभेदसंग्रहार्थः । ते च विनयसमाध्यध्ययनादवगन्तव्याः । तमित्थंभूतं विनयं 'नियमात्' निश्चयेन 'प्रयुङ्क्ते' विदधाति 'गुणिनां' आचार्यादीनां, विनयमूलत्वाद्गुणपरंपरायाः । आह च—"विनयफलं शुश्रूषा गुरुशुश्रूषा-फलं श्रुतज्ञानम् । ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः ॥ १ ॥ संवरफलं तपोबलमथ तपसो निर्जराफलं दृष्टम् । तस्मात्क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ॥ २ ॥ योगनिरोधाद्भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः । तस्मात्कल्याणानां सर्वेषां भाजनं विनयः ॥ ३ ॥" इति तृतीयगुणफलम् । 'अनभिनिवेशः' अभिनिवेशरहितो 'गीतार्थभाषितं' श्रुताधिको-पदिष्टं 'नान्यथा' असद्भावरूपतया 'मुणति' प्रतिपद्यते, मोहोद्रेकाभावेन कदाग्रहाभावात् । उक्तं च—"न मोहोद्रेकता-भावे स्वाग्रहो जायते क्वचित् । गुणवत्पारतन्त्र्यं हि तदनुत्कर्षसाधनम् ॥ १ ॥" इति चतुर्थगुणैदंपर्यम् । इति द्वितीय-गाथार्थः ॥ ४५ ॥ तथा श्रवणमाकर्णनं, करणमनुष्ठानं, तयोः 'इच्छा' तीव्राभिलाषो भवति रुचिः 'श्रद्धानसंयुक्ता' प्रती-तिसंगतेति पञ्चमो गुणः । अस्या एव प्राधान्यख्यापनायाह—'अनया' द्विस्वरूपया रुच्या 'विना' अभावेन 'कुतः शुद्धिः' न कुतोऽपीत्याकूतम् । 'सम्यक्त्वरत्नस्य' प्रतीतस्य शुश्रूषाधर्मरागरूपत्वात् । तयोश्च सम्यक्त्वसहभाविलिङ्गतया प्रसिद्ध-त्वात् । उक्तं च—"सुस्सूस धम्मराओ गुरुदेवाणं जहासमाहीए । वेयावच्चे नियमो सम्मद्दिट्ठिस्स लिंगाइं ॥ १ ॥" इति

१ "तु बहुप्फलं" इत्यपि । २ "–वमन्तव्याः" इत्यपि । ३ "मोहोद्रिक्तता" इत्यपि ॥

पञ्चमगुणभावना । अन्ये तु पञ्चगुणानित्थमभिदधति—"सुत्तरुई अत्थरुई करणरुई चेवऽणभिनिवेसरुई । गुणवंते पञ्च-मिया अणिट्ठिओच्छाहया होइ ॥ १ ॥" अत्रापि सूत्ररुचिः पठनादिस्वाध्यायप्रवृत्तिः । अर्थरुचिश्चाभ्युत्थानादिविनयं गुणिनां प्रयुङ्क्ते । करणानभिनिवेशौ तुल्यावेव । अनिष्ठितोत्साहता पुनरिच्छावृद्धिरेवेति न विरोधः शङ्कनीय इति ॥ ४६ ॥

ननु किमिच्छामात्रेणापि फलप्राप्तिरिष्यते सद्भावसारेणेष्यत एव ? इति ब्रूमः । तथा हि—

एगंमि सन्निवेसे एगस्स कुलपुत्तस्स य दो पुत्ता, जसो सुजसो य । दोवि जोव्वणत्था कयाइ धम्मदेवसूरिसमीवे धम्मं सोऊण पडिबुद्धा पव्वइउमुवट्ठिया पियरो आपुच्छंति । नेहमोहियाणि ताणि न य विसज्जंति । बहुं च भन्नमाणेहिं तेहिं भणियं एगो पव्वयउ, एगो पुणम्हं बुड्ढभावे[1] परिवालगो भवतु । तओ जेट्ठेण भणिओ कणिट्ठो, तुमं चिट्ठ, अहं पव्वयामि । [2]तओ सो भणइ, अहं चेव पव्वयामि । तओ जसेण वरमेसोवि ताव निव्वहरउ । अहं पुण दुप्पडियाराणि जणयाणि कहम-वमन्नेमित्ति चिंतिऊण विसज्जिओ सुजसो पव्वइओ विहिणा । विसुद्धपरिणामो नाणचरित्ताराहणसारो विहरइ । इयरोवि जणएहिं अणिच्छंतोवि कारिओ तहवि य (ह) कुलकन्नयाए पाणिग्गहणं । पवत्तो किसिकम्माइववसाए । गिहवावारपवत्तोवि वयगहणेक्कचित्तो कालं गमेइ । उवरएसुवि जणएसु दक्खिन्नसारयाए पइदिणं भज्जमापुच्छइ । सावि दीणाणणा रुयइ चेव न उण विसज्जइ । तओ सो तीए पडिबोहणोवायमलहंतो दुक्खं चिट्ठइ । इओ य सुजससाहू विविहतवोकम्मतणु-इयसरीरो ओहिणोवलद्धजेट्ठभाइपडिबोहावसरो समागओ तस्स गिहं । पच्चभिन्नाओ भाउज्जायाए, सबहुमाणं वंदिओ य ।

१ 'बुड्ढवये' इत्यपि । २ "तओ" इति क्वचित् नास्ति ॥

ठिओ तीए दंसिए उचिओवस्सए। कहिं घरसामिओत्ति पुट्ठाए सिट्ठं तीए, कम्मं काउं छेत्तं गओत्ति। भोयणावसरे पडिलाभिओ तीए साहू उचिएण भत्तपाणेण। भुत्तो विहिणा। नागओ जसोत्ति भत्तं गहाय पत्थिया पडिनियत्ता य रुयंती। पुच्छिया एसा सुजसेण, किमद्धिइं करेसि ?। सा भणइ, स ते भाया एगभत्तेहिं चिट्ठइ, छुहिओ वट्टइ, अंतरा य अपारा गिरिनई वहइ, तेण भत्तं नेउं न तरामित्ति अद्धिइकारणं महंतं ममंति। साहुणा भणियं, गच्छ नइं भणाहि; मम देवरस्स बारसवरिसाणि पव्वइयस्स जइ तेण दिवसंपि न भुत्तं ता मे मग्गं देहि महानइत्ति वुत्ते सा नई ते मग्गं दाहित्ति। एवं वुत्ताए तीए चिंतियं मम पच्चक्खमेव भुत्तं अणेण, कहं न भुत्तं नाम ?। अहवा न जुत्तं गुरुवयणविकोवणं, जमेस भणइ तं चेव करेमित्ति संपहारिऊण गया एसा। तहेव भणिए दिन्नो मग्गो नईए। कहमागयासि ? पुच्छिया भत्तुणा। तीएवि साहिओ सुजसागमणाइवुत्तंतो। भुत्तुत्तरे विसज्जिया जसेण भणइ कहं वच्चामि?, अज्जवि अपारा चेव नई। जसेण वुत्तं संपयमेवं भणिज्जासि 'जइ भत्तुणाहमेकासिंपि न भुत्तम्हि ता महानइ ! मे मग्गं पयच्छाहि' सुट्ठुयरं विम्हया तहेव भणिए लद्धमग्गा सुहेण पत्ता सगिहं। वंदिऊण पुच्छिओ साहू, भयवं ! को एत्थ परमत्थोत्ति। मुणी भणइ, भद्दे ! जइ रसगिद्धीए भुज्जइ तओ भुत्तं भवइ। जं पुण संजमजत्ताहेउं फासुयमेसणिज्जं तं भुत्तं न गणिज्जइ। अओ चेवागमे भणियं—"अणवज्जाहाराणं साहूणं निच्चमेव उववासोत्ति।" एवं तुह पइणोवि बंभचेरमणोरहसहियस्स तुहाणुरोहेण कयभोगस्स अभोगो चेव। एयमायन्निऊण संविग्गाए चिंतियं तीए, अहो ! एस जसओ महाणुभावदक्खिन्नमहोयही संसारविरत्तमणोवि चिरं मए धम्मचरणाओ खालिओ। समज्जियं महंतं धम्मंतराइयं। ता संपयं जुत्तमेएण चेव समं

समणत्तमणुचरिउं । एयं चेव नेहस्स फलंति भाविंतीए संपत्तो जसोवि, साहुं वंदिऊण निसन्नो नाइदूरे । कया साहुणा दोण्हंपि सुद्धदेसणा । पडिबुद्धाणि पवइयाणि । कालेण पत्ताणि सुरलोगंति । एवमेस जसो इच्छामेत्तेणावि चरणविसएण पावारंभेण न लित्तोत्ति ॥

उक्तं तृतीयं भावश्रावकलक्षणम् । अधुना चतुर्थमाह—

उजुववहारो चउहा जहत्थभणणं अवंचिगा किरिया । हुंतावायपगासण मेत्तीभावो य सब्भावा ॥ ४७ ॥

ऋजु प्रगुणं व्यवहरणं 'ऋजुव्यवहारः' भावश्रावकगुणः 'चतुर्धा' चतुष्प्रकारो भवति । तद्यथा—'यथार्थभणनं' अविसंवादिवचनं धर्मव्यवहारे क्रयविक्रयव्यवहारे साक्षिव्यवहारे राजव्यवहारादौ वा । अस्य भावार्थः—"परचित्तणुवत्तीए धम्ममधम्मं अधम्ममवि धम्मं । न भणंति भावसड्ढा भणंति सच्चं च महुरं च ॥ १ ॥ कयविक्कयसट्टीसुवि ऊणब्भहियं कहिंति न हु अग्घं । सक्खित्तेवि निउत्ता न अन्नहा वाइणो हुंति ॥ २ ॥ रायसभावगयावि हु जणं न दूसंति अलियभणिएहिं । धम्मोवहासजणगं वयणं वज्जंति धम्मरया ॥ ३ ॥" तथा 'अवञ्चिका' पराव्यसनहेतुः 'क्रिया' शरीरव्यापारो द्वितीयमृजुव्यवहारलक्षणम् । उक्तं च—"तप्पडिरूवगविहिणा तुलापलाईहि ऊणमहियं वा । दिंतो लिंतोवि परं न वंचए सुद्धधम्मत्थी ॥ १ ॥" तथा 'हुंति' इति प्राकृतशैल्या । भाविनो येऽपायास्तेषां प्रकाशनं ज्ञापनं करोति, भद्र ! मा कृथाः पापानि चौर्यादीनि, इह परत्र चानर्थकारिणीत्याश्रितं शिक्षयति । न पुनरन्यायप्रवृत्तमप्युपेक्षत इति भावः । अन्ये

१ अन्यत्र "रायसभाइगयावि" इत्यस्ति ॥

तु—'हुंतोवायपगासण' इति पठन्ति । तत्र 'हुंतो' इति सद्भूत उपायो यो धर्मार्थविषये तस्य प्रकाशनं पृष्टोऽपृष्टो वा करोतीति तृतीयमृजुव्यवहारस्वरूपम् । तत्र धर्मोपायो दानशीलतपोभावनारूपः । अर्थोपायो नीतिचारितोद्धारकात्यवहरणादिरूपः । कामोपायः पुनरनर्थफलत्वान्न प्रकाशयत्येव । मोक्षस्तु फलभूत इत्येतदपि पाठान्तरं मार्गानुपातित्वात्सङ्गतमेवेति । तथा मित्रस्य भावः कर्म वा मैत्री, तस्या भावो भवनं सत्ता सद्भावान्निष्कपटतया कृत्रिममैत्रीं न करोतीति भावः । कपटमैत्र्योः छायातपयोरिव विरोधात् । उक्तं च—"शाठ्येन मित्रं कलुषेण धर्मं परोपतापेन समृद्धिभावम् । सुखेन विद्यां परुषेण नारीं वाञ्छन्ति ये व्यक्तमपण्डितास्ते ॥ १ ॥" इति चतुर्थमृजुव्यवहारस्वरूपम् ॥ ४७ ॥

अस्यैव विपर्यये दोषदर्शनपूर्वकं विधेयतामाह—

अन्नहभणणाईसुं अबोहिबीयं परस्स नियमेण । तत्तो भवपरिवुड्ढी ता होज्जा उज्जुववहारी ॥ ४८ ॥

अन्यथाभणनमयथार्थजल्पनम्, आदिशब्दाद्वञ्चकक्रियादोषोपेक्षणासद्भावमैत्रीपरिग्रहस्तेषु सत्सु श्रावकस्येति भावः । अबोधेर्धर्माप्राप्तेर्बीजं मूलकारणं 'परस्य' मिथ्यादृष्टेः 'नियमेन' निश्चयेन भवतीति शेषः । तथा हि—श्रावकमेतेषु प्रवर्त्तमानमालोक्य वक्तारः संभवन्ति—"धिगस्तु जैनं शासनम्, यत्र श्रावकस्य शिष्टजननिन्दितेऽलीकभाषणादौ कुकर्मणि निवृत्तिर्नोपदिश्यते" इति निन्दाकरणादमी प्राणिनो जन्मशतेष्वपि बोधिं न प्राप्नुवन्तीति 'अबोधिबीजं' इदमुच्यते, 'ततः' चाबोधिबीजाद् 'भवपरिवृद्धिः' भवति, तन्निन्दाकारिणं तन्निमित्तभूतस्य श्रावकस्यापि । यतोऽवाचि—"यः शासनस्योपघातेऽनाभोगेनापि वर्त्तते । स तन्मिथ्यात्वहेतुत्वादन्येषां प्राणिनामिति ॥ १ ॥ बध्नात्यपि तदेवालं परं संसारकार-

णम् । विपाकदारुणं घोरं सर्वानर्थविवर्द्धनम् ॥ २ ॥" 'ततः' तस्मात्कारणात् 'भूयात्' भवेत् 'ऋजुव्यवहारी' प्रगुणव्यवहारवान् प्रकृतो भावश्रावक इति ॥ ४८ ॥

दृष्टान्तश्चेह धर्मनन्दः । तत्रायं संप्रदायः—

नासिक्के नयरे नंदाभिहाणा दुवे वणिया परिवसिंसु । तेसिमेगो भावगो सुद्धववहारी, तस्स लोगे धम्मनंदोत्ति नामं पसिद्धं । इयरो पुण लोभदोसेण कूडतुलाईहिं ववहरइ. तेण लोभनंदोत्ति पसिद्धो । अन्नया तत्थ रायतलायं खणंतेहिं ओड्डेहिं निहाणं पावियं । तत्थ य केवला सुवन्नकुसा चिट्ठंति । ते य सव्वओ कद्दमेण लित्तत्ति, तेहिं लोहकुसा चेव कप्पिया । नीया दो धम्मनंदहट्टे भणियं च, सेट्ठि ! एयाणं लोहकुसाणं तेलाइयं देहि । अइभाराओ सुवन्नमेयंति विन्नायं सेट्ठिणा । अहिगरणभयाओ न साहियं, तेसिं भणियं च न मम एएहिं पओयणंति । तओ ते गया लोभनंदावणे । तं चेव भणिऊण समप्पिया कुसा लोहनंदस्स । तेणावि परिन्नाया चिंतियं च । सुंदरमेयं जं सुवन्नं लोहमोल्लेण लब्भइ, ता देमि एएहिं दुगुणं मोल्लं जेण अन्नेवि आणिंति । तं चेव काऊण भणिया ते । मम लोहेण पओयणत्ति जइ संति अन्नेवि एयमोल्लेण आनेयव्वा । तओ ते दिणे दिणे दो दो आणिंति । जाव गहिया सेट्ठिणा णंगे । नवरमइगुढचित्तयाए पुत्ताणंपि परमत्थं न साहेइ । तओ ते अहिए दिज्जमाणे लहत्थोसित्ति खिंसंति, तहावि सब्भावं नाइक्खइ, हट्टं च खणमवि न मुंचइ । ॥ ३९ ॥
अन्नया पच्चासन्नगामे मित्तेण विवाहे निमंतिओ अणिच्छंतोवि बला निज्जंतो पुत्तं भणइ, ते कुसे मा पडिसेहेज्जासि । न य सब्भावं कहेइ । गए तम्मि समागयाणमोड्डाण पुत्तो लोहमोल्लं देइ । तेवि सेट्ठिभणियं देहित्ति पुणो पुणो झिंखंति ।

ताहे ववहारवावडयाए सकोवेण तेण पक्खित्ता ते तेसिं संमुहं। पासाणपडिघाएण पणट्ठो तेसिं गोबरो। पयडीभूयं सुवन्नं। दिट्ठं दंडवासिएहिं। नीया ओड्डा रायसमीवं। पुच्छिएहिं कहिओ रन्नो सब्भावो। भणिया रन्ना, कस्स कस्स दिन्नत्ति। तेहिं वुत्तं धम्मनंदस्स दरिसिया न तेण गहिया। अओ एयस्स चेव एत्तियमित्ता दिन्नत्ति। तओ महाचोरोत्ति कुविएण राइणा समाणत्तेहिं दंडवासिएहिं गहियाणि सयलमाणुसाणि। उक्कड्डियं घरसारं। एत्थंतरे पुत्तो कुसे न गिण्हिस्सइत्ति अवसेरीए मित्तमपुच्छिय तुरियमागओ लोहनंदो। दिट्ठगिहवइयरो महापच्छायावानलसंतत्तो रुट्ठो नियपायाणं, किर एएहिं अहं गामंतरं पाविओत्ति। तओ कुहाडेण दोवि पाए ताडिऊण पाविओ पंचत्तमेसो। धम्मनंदोवि पुच्छिओ पत्थिवेण, कीस तए कुसा न गहिया?। सो भणइ, जओ गहिएहिं दोण्हं वयाणं भंगो भवइ, चोरिक्कविरईए परिग्गहपरिमाणस्स य। न य एएसिं सब्भावो सिट्ठो अहिगरणभयाओत्ति। अहो! सच्चं धम्मनंदोसित्ति भणंतेण पूइऊण विसज्जिओ रन्ना। एरिसो उजुववहारी भावसावओ इहपरलोए कल्लाणभायणं होइत्ति॥

उक्तं चतुर्थं भावश्रावकलक्षणम्। अधुना पञ्चममाह—

सेवाए[1] कारणेण[2] य संपायण[3]भावओ[4] गुरुजणस्स। सुस्सूसणं कुणंतो गुरुसुस्सूसो हवइ चउहा॥४९॥

'सेवया' पर्युपासनेन १ 'कारणेन' अन्यजनप्रवर्त्तनेन २ 'संपादनं' गुरोरौषधादीनां प्रदानं ३ 'भावः' चेतोबहुमानः ४ तावाश्रित्य संपादनभावतः 'गुरुजनस्य' आराध्यवर्गस्य। इह यद्यपि गुरवो मातापित्रादयोऽपि भवन्ति, तथाऽपि धर्मप्रस्तावादिहाचार्यादय एव प्रस्तुता इति तान्येवोद्दिश्य गुरुशुश्रूषो व्याख्येयः। गुरुलक्षणं चेदम्—"धर्मज्ञो धर्मकर्त्ता च

सदा धर्मप्रवर्त्तकः । सत्त्वेभ्यो धर्मशास्त्राणां देशको गुरुरुच्यते ॥ १ ॥" तथा—"पडिरूवो तेयस्सी जुगप्पहाणागमो महुरवक्को । गंभीरो धीमंतो उवएसपरो य आयरिओ॥ १ ॥ अपरिस्सावी सोमो संगहसीलो अभिग्गहमईओ । अविकत्थणो[1] अचवलो पसन्नहियओ गुरू होइ ॥ २ ॥" तथा—"संविग्गो १ मज्झत्थो २ संतो ३ मउओ ४ रिऊ ५ सुसंतुट्ठो ६ । गीयत्थो ७ कडजोगी ८ भावन्नू ९ लद्धिसंपन्नो १० ॥ १ ॥ देसणिओ ११ आदेओ १२ मइमं १३ विन्नाणिओ १४ निरुय १५ वाई १६ । नेमित्ती १७ ओयंसी १८ उवयारी १९ धारणाबलिओ २० ॥ २ ॥ बहुदिट्ठो २१ नयनिउणो २२ पियंवओ २३ सुस्सरो २४ तवे निरओ २५ । सुसरीरो २६ सुप्पइभो २७ चाई २८ आणंदओ २९ चोक्खो ३० ॥ ३ ॥ गंभीरो ३१ अणुयत्ती ३२ पडिवन्नयपालगो ३३ थिरो ३४ धीरो ३५ । उचियन्नू ३६ सूरीणं छत्तीसगुणा सुयक्खाया[2] ॥ ४ ॥" इत्याद्यागमवर्णितगुणो गुरुजनग्रहणं बहुत्वप्रतिपत्त्यर्थम् । ये केचिदेवंविधास्ते सर्वेऽपि गुरुजन इति भावः । तस्य 'शुश्रूषणं' पर्युपासनं कुर्वन् गुरुशुश्रूषो भवति, स च 'चतुर्धा' चतुष्प्रकारः । इति गाथाक्षरार्थः ॥ ४९ ॥

भावार्थं सूत्रकार एवाह—

सेवंति[3] कालंमि गुरुं अकुणंतो ज्झाणजोगवाघायं । सय वन्नवायकरणा अन्नेवि पवत्तई तत्थ ॥ ५० ॥

'सेवते' पर्युपास्ते, 'काले' प्रतिक्रमश्रवणादिहेतौ 'गुरुं' उक्तस्वरूपम् । कथम् ? ' अकुर्वन्' ध्यानं धर्मध्यानादि, योगाः प्रत्युपेक्षणाभोजनादयः, तेषां व्याघातमन्तरायम् । यतः साधूनामयमागमोपदेशः—"जोगे जोगे जिणसासणंमि दुक्ख-

१ "अविकंथणो" इत्यपि । २ 'समक्खाया' इत्यपि । ३ "सेवइ" इत्यपि ॥

क्खया पउज्जंते । अन्नोन्नमबाहाए असवत्तो होइ कायव्वो ॥ १ ॥" इत्येषा शुश्रूषा १ । तथा 'सदा वर्णवादकरणात्' नित्यं सद्भूतगुणोत्कीर्त्तनेन 'अन्यानपि' प्रमादवतः 'प्रवर्त्तयति' प्रेरयति 'तत्र' तस्यां सेवायाम् । तद्यथा—"माणुस्समुत्तमो धम्मो गुरू नाणाइसंजुओ । सामग्गी दुलहा एसा जाणाहि हियमप्पणो ॥ १ ॥ एयारिसो महप्पा धन्नाणं दिट्ठिगोयरमुवेइ । एयस्स सयलसुहयं पियंति वयणामयं धन्ना ॥ २ ॥ एयस्स महामुणिणो उवएसरसायणं अकाऊणं । होही पच्छायावो चत्ते पत्ते निहाणे व ॥ ३ ॥" इत्यादि । इति द्वितीयः शुश्रूषाविधिः २ ॥ ५० ॥

अथ तृतीयचतुर्थावाह—

ओसहभेसज्जाई सओ य परओ य संपणामेइ । सइ बहुमन्नेइ गुरुं भावं चणुवत्तए[1] तस्स ॥ ५१ ॥

औषधानि केवलद्रव्यरूपाणि बहिरुपयोगीनि वा, भैषज्यानि संयोगिकान्यन्तर्भोग्यानि वा, आदिशब्दादन्यान्यपि संयमोपकारकाणि वस्तूनि 'स्वतः' स्वयंदानेन 'परतः' अन्यजनदापनेन च सम्यक् 'प्रणामयति' संपादयति गुरुभ्य इति प्रकृतत्वात् । उक्तं च—"अन्नं पानमथौषधं बहुविधं धर्मध्वजः कम्बलं वस्त्रं पात्रमुपाश्रयश्च विविधो दण्डादिधर्मोपधिः । शस्तं पुस्तकपीठकादि घटते धर्माय यच्चापरं देयं दानविचक्षणैस्तदखिलं मोक्षार्थिने भिक्षवे ॥ १ ॥" तथा—"जो देइ ओसहाइं मुणीण मणवयणकायगुत्ताणं । सो सुद्धभावविभवो भवे भवे होइ नीरोगो ॥ १ ॥" इति संपादने तृतीयः शुश्रूषाविधिः ३ । तथा सदा 'बहु मन्यते' मनःप्रीतिसारं श्लाघते 'गुरुं' उक्तस्वरूपं, 'भावं' चेतोवृत्तिं 'चानुवर्त्तते' तदनु-

[1] 'अणुवत्तए' इत्यपि ॥

कूलं व्यवहरति, 'तस्य' गुरोः संबन्धिनम् । न तदसंमतमाचरतीति तत्त्वम् । उक्तं च—"सरुषि नतिस्तुतिवचनं तदभिमते प्रेम तद्द्विषि द्वेषः । दानमुपकारकीर्त्तनममन्त्रमूलं वशीकरणम् ॥ १ ॥" अन्यत्राप्युक्तम्—"मिण गोणमंगुलीहिं गणेहि वा दंतचक्कलाइं से । इच्छंति भाणिऊणं कज्जं तु तमेव जाणंति ॥ १ ॥" इत्थंभावं गुरोरनुवर्त्तते । इति चतुर्थः शुश्रूषाविकल्पः ४ इति ॥ ५१ ॥

अत्र निदर्शनम्—

कोसंबीए नयरीए सुहत्थिसूरिणो कयाइ विहारकप्पेण विहरिंसु । तत्थ य तया महादुब्भिक्खं वट्टइ, अओ भिक्खयरा भिक्खं न लहंति । लहंति य पज्जत्तं ईसरगिहेसु साहुणो । अन्नया एगो चक्कयरो ईसरगिहेसु सबायरेण पडिलाभिज्जंते दट्ठूण तेसिं नियत्ताणमग्गओ गंतूण पायवडिओ पत्थिउं पवत्तो । महापुन्नवंता तुब्भे सबं सबत्थ लभह, ता देहि मे दीणस्स किंचिमेत्तं । साहूहिं पडिवुत्तं, अम्ह दाउं न कप्पइ, गुरुणो चेव जाणंति । तओ सो तेहिं चेव सद्धिं गओ गुरुसमीवं तहेव मग्गिया । इओ गुरूहिं भणिओ, भद्द ! जइ पवयाहि ता जमिच्छसि तं देमो, गिहत्थाणं न दिज्जइत्ति । पडिवन्ने तेण गुणदंसणाओ पवाविओ । भोयाविओ निद्धमहुराइं जहिच्छं । परितुट्ठो एसो । अहो ! सुंदरो धम्मो । उत्तमचरिया सबसत्तवच्छला कारुणिया महाणुभावा य गुरुणो, जे मम निब्भग्गसिरोमणिणोवि एवमुवयरंति । एवं सुहपरिणामो अवत्तसामाइयसंजमो मज्झरत्तसमए विसूइयादोसेण पाविओ पंचत्तं । तओ कत्थ उववन्नोत्ति । अत्थि पाडलिपुत्ते चंदगुत्तपुत्तस्स बिंदुसारस्स पुत्तो असोगसिरिराया । तस्स पाणप्पिओ कुणालो नाम नंदणो । नेहाइसएण बालो चेव ठाविओ

पिउणा जुवरज्जे। दिन्ना कुमारभुत्तीए उज्जेणी। पइदिणं च पिया निउत्तपुरिस्सेहिं पउत्तिमाणावेइ, पसाए य पेसेइ। अन्नया कलाग्गहणस्स जोगोत्ति लिहिओ रन्ना महंतयाण लेहो—'अधीयतां कुमारः' इत्यादि। न उव्वाइत्ति अकाइयं चेव तं मोत्तूण सरीरकज्जे उट्ठिओ राया। एत्थंतरे कुमारमाइमवत्तीए किमेत्थ लिहियं(ति) कोउगेण वाइओ लेहो। तओ मच्छरदोसेण नहसुत्तीए नयणकज्जलेणायारस्स उवरिं बिंदुं दाऊण झत्ति गया अन्नओ एसा। रन्नावि अवाइओ चेव काइओ लेहो पेसिओ कुमारस्स। तेणावि वाइऊण भणिया महंतया, करेह रायाएसं, अंधीकरेह मं तुरियंति। तेहिं भणियं, नेवं देवाएसो संभवइ तो सुपुच्छियं करेमो। तओ कहमखंडियमासणं मोरियवंसप्पसूयस्स तायस्स पायडमेय-माणत्तियमन्नहा करेमित्ति भणंतेण कुणालेण वारिज्जंतेणावि तत्तसलागाए अंजिऊण विणासियाणि लोयणाणि। सुयम्मि य एयवइयरे ममेस दोसोत्ति गहिओ महापच्छायावेण जणओ। कालेण रज्जाणुचिओत्ति कओ पिउणा गामसामी। सुहेण तत्थ चिट्ठइ। अइसओ एयस्स गीयकलाए तं चेव अब्भसमाणो कालं गमेइ। अन्नया सो पुव्वभणियदमगो तस्स भारियाए कुच्छिंसि उववन्नो। पसत्थसुमिणदंसणाओ कलिओ कुणालेण पहाणपुत्तलाभो। चिंतियं च जइ ताओ तूसइ ता कयाइ मम पुत्तो राया होज्जा। अओ तायाराहणे पयत्तं करेमि(त्ति) निच्छिऊण उवायं, जायासहिओ गओ पाडलि-पुत्तं। गंधव्वकलाए जणमावज्जिउं पवत्तो। तओ तेण निरवज्जविज्जावज्जेण गंधव्वियाण गव्वपव्वए मुसुमूरंतो पत्तो परं पसिद्धिं। अओ सद्दो गंधव्विओत्ति निसुयं रन्ना कोउगेण वाहराविओ अ। सिट्ठं च केणावि, देव ! सव्वसमयसुंदरं से गीयं, किं तु नयण रहिओ न देवस्स दंसणोचिओत्ति। तहावि परियच्छिपच्छाइओ गायउत्ति वेंतेण सद्दाविओ रन्ना।

आगओ य गाइउं पवत्तो । हयहिएण य भणिओ राइणा, भो ! साहु गीयं, जाएहि कंचि वरं। तवेलं च वद्धाविओ किंकरेण कुणालो, पसूया ते जाया देवकुमारागारं दारयंति । एत्थंतरे परियाणियावसरेण गीयं कुणालेण—"चंदगुत्तपपुत्तो उ बिंदुसारस्स नत्तुओ । असोगसिरिणो पुत्तो अंधो जायइ कागिणीं ॥ १ ॥" अरे ! कुणालो एसोत्ति उक्कंठिएण जवणियमुसारिऊण आलिंगिओ रन्ना । निवेसिओ उच्छंगे । भणिओ य, वच्छ ! किमेयमइतुच्छं पत्थेसि ? । ताहे मंतिणा वुत्तं, देव ! तुम्ह वंसे कागिणीसद्देण रज्जं भन्नइ, ता कहमेयं तुच्छं पत्थयंति । रन्ना वुत्तं, पुत्त ! न तुमं रज्जोचिओसि । किमत्थि पुत्तो रज्जारिहो ? जेणेवं पत्थेसि । कुणालेण भन्नइ, संपइ जाओ अत्थित्ति । राइणा भणियं, जइ एवं दिन्नं मए तस्स रज्जं । तओ वत्ते दसाहे संपाइयसंपइनामधेयस्स तस्स कओ रायाहिसेओ रन्ना । समप्पिऊण मंतिपमुहाण तं पारद्धमप्पणा परलोगहियंति । तओ पुव्वज्जियपुन्नमाहप्पेण पवड्ढमाणो सरीरसंपयाए रज्जसिरीए य पत्तो रूवलायन्नसंपुन्नं तारुन्नं । अन्नया तेण पासायगएण दिट्ठो जिणरहेण समं घरंगणागओ रायमग्गगओ चउविहसमणसंघपडिगओ चंदो व गहगणसंगओ कमलायरमज्झगओ व हंसो विहारकमागओ भयवं अज्जसुहत्थी। कत्थ पुण ममेस सपुव्वोत्ति सवियक्केण समुप्पन्ने जाइसरणे पच्चभिन्नाओ य। तओ अप्पमाणपमोयपूरिज्जमाणमाणसो सव्वसामग्गीए गओ गुरुसमीवं नरीसरो । पणओ पणयपहाणं पायपउमे। पुणो पुणो [1]भालत्थलेण पाए फुसिऊण हरिसजलप्पुयच्छो पुच्छिउं पवत्तो, भयवं !सामाइयसंजमस्स किं फलं ? । गुरूहिं भणियं अवत्तस्स नरिंदाइरिद्धी वत्तस्स मोक्खो सग्गो वा । तओ संजायपच्चएण पणमिऊण पुणो भणियं

१ "भालयलेण" इत्यपि ॥

पत्थिवेण, किं भगवंतो ममं पच्चभिजाणंति न वा ?। उवओगं दाऊण भणियं गुरुणा, सुट्ठु पच्चभिजाणामो । तुमं कोसंबीए दिवसमेगं मम सीसो आसि, संपइ संपइराया वट्टसि । अहो ! भगवओ नाणाइसिओत्ति तुट्ठेण कयकरंजलिणा पुणो भणियं, तो खाइं समाइसह, जमियाणिं करेमि । गुरूहिं भणियं, समणधम्मं सावगधम्मं वा पडिवज्ज । परिभाविऊण पडिवन्नाणुवयगुणवओ राया सावगो जाओ । तप्पभिइं च बहुमाणसारं गुरुणो पज्जुवासेइ । तदुवएसेण कारावेइ चेइयाइं, नियरज्जे पवत्तेइ रहजत्ताओ, पडिबोहेइ सामंते, पवत्तेइ तेवि चेइयभवणाइकारवणे, करेइ साहूण दाणाइवच्छलं, पावेइ परमुन्नइं साहम्मियलोयं । किं बहुणा अणारियदेसेसुवि उवसामिओ तेण लोगो, जहा तेसुवि साहूणं सुविहारो संवुत्तो । अन्नया अन्नपरिवट्टुले काले न मम पिंडो साहूणमुवयरइ, तहावि केणइ उवाएण उवगरावेमित्ति चिंतिऊण दीणाइदाणनिमित्तं कारियाओ दाणसालाओ, भणिया य ते निउत्तपुरिसा । जमेत्थ दिंताणमुवरइ तं मए तुम्हाण चेव दिन्नं, किं तु तुब्भे तं साहूण देज्जाहि, तस्स मोल्लमहं भे दाहामि । अन्नेवि मंडयलड्डुयप्पयगुलसत्तुयाइविक्कयकारिणो तेवि एवं चेव भणिया । तओ सव्वेवि ते दिंति साहूण मग्गियममग्गियं वा जहिच्छं । एवमुवज्जियपउरपुन्नपब्भारो चेईहरमंडियमहीमंडलं काऊण कयसावगधम्माराहणो समाहिणा कालं काऊण पत्तो सुरलोयं संपइमहाराओत्ति । एयारिसो गुरुसुस्सूसो भावसावगो होइत्ति ॥

उक्तं पञ्चमं भावश्रावकलक्षणम् । अधुना षष्ठमाह—

सुत्ते[1] अत्थे[2] य तहा उस्सग्ग[3]ववाय[4]भाव[5]ववहारे[6] । जो कुसलत्तं पत्तो पवयणकुसलो तओ छट्ठो ॥५२॥

इह प्रकृष्टं वचनं प्रवचनमागमः स च सूत्रादिभेदात् षोढा । अतस्तदुपाधिकं कौशलमपि षोढा, तत्संबन्धात्कुशलोऽपि षोढैवेत्याह—'सूत्रे' सूत्रविषये यः कुशलत्वं प्राप्त इति प्रत्येकं योजनीयम् । तथा 'अर्थे' सूत्राभिधेये । चः समुच्चये । 'तथा' तेनैव प्रकारेण उत्सर्गे सामान्योक्तौ, अपवादे विशेषभणिते, भावे निश्चयनयाभिप्राये, व्यवहारे गीतार्थाचरितरूपे । समाहारस्यैकत्वेऽपि सप्तम्याः पृथग्व्याख्यानं बालावबोधनार्थम् । एतेषु यः कुशलत्वं प्राप्तः सद्गुरुप्रसादेन प्रवचनकुशलोऽसौ भवति 'षोढा' षट्प्रकारः । इति गाथाऽक्षरार्थः ॥ ५२ ॥

भावार्थं प्रकरणकार एवाह—

उचियमहिज्जइ सुत्तं सुणइ तयत्थं तहा सुतित्थंमि । उस्सग्गववायाणं विसयविभागं वियाणाइ ॥५३॥
वहेइ सइ पक्खवायं विहिसारे सव्वधम्मणुट्ठाणे । देसद्धादणुरूवं जाणइ गीयत्थववहारं ॥ ५४ ॥

'उचितं' योग्यं श्रावकभूमिकायाः, 'अधीते' पठति 'सूत्रं' प्रवचनमात्रादिषड्जीवनिकान्तम् । उक्तं च—"पवयणमाई छज्जीवणियंता उभयओवि इयरस्स ।" ग्रहणशिक्षेति तत्र प्रकृतम् । उभयतः सूत्रतोऽर्थतश्च । इतरस्य श्रावकस्येदं विशिष्टम् । श्रावकमधिकृत्योच्यते—सामान्यश्रावकस्तु संग्रहणीकर्मग्रन्थोपदेशमालादिप्रकरणसन्दोहमाचार्यादिप्रसादीकृतमन्यदपि पठतीति सूत्रे कौशलमाप्नोति १। तथा शृणोति तस्य सूत्रस्यार्थं 'तथा' तेनैव प्रकारेण स्वभूमिकौचित्यरूपेण 'सुतीर्थे' सुगुरुमूले । यत आह—"तित्थे सुत्तत्थाणं गहणं विहिणा उ एत्थ तित्थमिणं । उभयन्नू चेव गुरू विही उ विणयाइओचित्तो ॥ १ ॥" इत्यादि । अनेन यतः श्रावकस्य च गुरुसमीप एव सूत्रार्थग्रहणं युक्तमुक्तम् । यत आह—

"गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि । तस्माद्गुर्वाराधनपरेण हितकाङ्क्षिणा भाव्यम् ॥ १ ॥" इति द्वितीयं कौशलम् २। तथा 'उत्सर्गापवादयोः' जिनमतप्रतीतयोः विषयविभागं विशेषेण 'जानाति' अवगच्छति । अयमत्र भावार्थः— नोत्सर्गमेव केवलमालम्बते, नाप्यपवादमेव प्रमाणीकरोति । किं तर्हि ? तयोरवसरं गुरूपदेशादवबुध्यते । उक्तं च—"अन्न-यमवेक्ख इयरस्स पसिद्धी उन्नयस्स इयराओ । इय अन्नोन्नपसिद्धा उस्सग्गववाय दो तुल्ला ॥ १ ॥ दव्वाइएहिं जुत्तस्सु-स्सग्गो तदुचियं अणुट्ठाणं । रहियस्स तमववाओ उचियंवियरस्स न उ तस्स ॥ २ ॥" ज्ञात्वा च यथावसरमुचितविधिना यतिजनस्य पथ्यादिदाने प्रवर्त्तते । तद्यथा—"फासुयएसणिएहिं फासुयओहासिएहि कीएहिं । पूईपमिस्सिएण य आहा-कम्मेण जयणाए ॥ १ ॥" इत्यादि । युगपदुक्तत्वात्कौशल्यद्वयस्योक्ताश्चत्वारो भेदाः ३ । ४ । इति प्रथमगाथार्थः ॥५३॥ तथा भावो नैश्चयिकः परिणामः । तत्र कौशलमिदम्—'वहति' धत्ते सदा 'पक्षपातं' बहुमानं 'विधिसारे' विधानप्र-धाने 'सर्वधर्मानुष्ठाने' देवगुरुवन्दनदानधर्मादौ । किमुक्तं भवतीति विधिकारिणमन्यं बहु मन्यते, स्वयं च यथाश-क्ति विधिपूर्वकं प्रवर्त्तते । सामर्थ्याभावेऽपि विध्याराधनमनोरथान् न मुञ्चति । एवमप्यसावाराधक एव स्यात् । निश्च-यनयमतमिदम् । उक्तं चागमे—" परमरहस्समिसीणं समत्तगणिपिडगझरियसाराणं । परिणामियं पमाणं निच्छयमवलं-बमाणाणं ॥ १ ॥ तम्हा भावो सुद्धो सव्वपयत्तेण हंदि परलोए । कायव्वो बुद्धिमया आणावगजोगओ निच्चं ॥ २ ॥" इत्थं कुर्वन् भावे कुशलो भवति ५ । तथा देशः सुस्थितदुःस्थितादिः, अद्धा कालः, सुभिक्षदुर्भिक्षादिः । आदिशब्दाद्

---

१ 'मो तुल्ला" इति समग्रपुस्तकेषु वर्तते परमन्यग्रन्थे "दो तुल्ला" इति दर्शनादर्थसंगत्या च मूले स एव पाठ आहृतः ॥

द्रव्यं सुलभदुर्लभादिः, भावश्च हृष्टग्लानादिः परिगृह्यते । तेषामनुरूपं जानाति गीतार्थव्यवहारं यो यत्र देशे, काले, भावे वा वर्त्तमानैर्गीतार्थैरुत्सर्गापवादवेदिभिर्गुरुलाघवपरिज्ञाननिपुणैराचरितो व्यवहारः तं न दूषयतीति भावः । तथा च सूत्रम्—"असढेण समाइन्नं जं कत्थइ केणई असावज्जं । न निवारियमन्नेहिं बहुमणुमयमेयमायरियं ॥ १ ॥" एवंविधव्यवहारे कौशलम् । षष्ठं कौशलं भवति ६ । एतच्चोपलक्षणं जीवपुद्गलादिषु सूक्ष्मभावेषु सर्वेष्वपि यः कुशलः स प्रवचनकुशलः । तथाविधराजश्रावकवत् ॥ ५४ ॥

तद्वृत्तान्तश्चायम्—

पुहइपुरे नयरे पउमसेहरो राया। बालभावाओ साहुपज्जुवासणोवज्जियजीवाइवत्थुपरिन्नाणो पवयणपभावणापहाणो परमसावओ अहेसि । सो पुण सयलसत्तवच्छलयाए सव्वलोयस्स जिणधम्ममाइक्खइ, वन्नेइ जीवदयागुणे, परूवेइ साहुधम्मं, पसंसेइ साहूणमप्पमत्तयं, कहेइ अप्पमायाओ मोक्खसोक्खसंपयं । एवं च तेण नियरज्जे पवत्तिओ पाएण लोगो जिणधम्मे । जेवि य परप्पवाइणो तेवि जिणवयणपसिद्धहेउदिट्ठंतजुत्तीहिं तेण मुद्दियमुहा चेव कया । जहा तब्भणियं नन्नहा काउमिच्छंति । नवरमेगो सेट्ठिपुत्तो न पडिबुज्झइ । सो दुहियजीवघाए धम्मं मन्नइ, तेसिं सुगइगमणकारणत्तेण । तहा अप्पमाओ धम्ममूलंति जिणोवएसं सिरत्वेयणोवसमं तक्खगनागमत्थयमणिजलोवएसतुल्लं मन्नइ । जओ पवणाहयधयवडग्गचंचलं चित्तमेगत्थ धारिउं न तीरइ । दुन्निवाराइं सएसु सएसु विसएसु धाविराइं इंदियाइं । सो एवं वायालयाए धम्माभिमुहेवि लोगे मोहिंतो निसामिओ नराहिवेण । तओ तदुवसामणत्थं जक्खाभिहाणो छत्तो निउत्तो । सिक्खविओ

य जहाजोग्गं। समप्पियं महग्घमाणिक्कालंकियमाहरणं । एयं पच्छन्नं तस्स रयणकरंडियाए पक्खिविऊण मम निवेएहि-त्ति। तेणावि जं ते मयं तम्ममावि सम्मयंति वेंतेण कया तेण समं मेत्ती। अवसरे पक्खित्तं तमाभरणं रयणकरंडियाम-ज्झे। ताहे राइणा उग्घोसावियं पडहगेण 'जइ केणावि रायाहरणं पडियमुवलद्धं कीयं वा कुओवि सो संपइ समप्पंतो निरवराहो रायपसायं च लहइ, पच्छा नाए सारीरो दंडो भविस्सइ'त्ति तिन्नि वारा उग्घोसाविऊण पउरेहिं सद्धिं निउत्ता नियपुरिसा गेहुल्लोडाए गवेसंतेहिं दिट्ठं तमाभरणं। पुच्छिओ सेट्ठिपुत्तो कुओ ते एयं? । भणइ न याणामि, न मम संतियमेयं। तो खाइं कस्स संतियं?। सो भणइ न याणामि। अरे! कहं न याणासित्ति वेंतेहिं गहिओ रायभडेहिं। नीओ रायसयासमेसो। तेणावि वज्झो समाणत्तो। पच्चक्खचोरोत्ति न कोइ तं मोयावेइ। तओ गयजीवियासेण दीणवि-मणेण पलोइयमाणेण जक्खवयणं भणियं च। मित्त! विन्नवेहि देवं। देवावेहिं दुक्करेणावि दंडेण पाणभिक्खं। जक्खे-णावि विन्नत्तो राया। देव! ममेस मित्तो ता कीरउ पसायं एयजीवियरक्खाए[1] । निरूविज्जउ अन्नो कोइ दंडो। राइणा भणियं, मारिया पाणिणो सुगइं गच्छंति, ता किं मित्तस्स सुगइं नेच्छसि?। जक्खेण भणियं अलं सुगईए, जीवंतो नरो भद्दाणि पेच्छइ। रन्ना वुत्तं तो मुंचामि, जइ मम चलणंतियाओ तेल्लपुन्नपत्तिं घेत्तुं बिंदुमवि अपडंतो[2] सयलनयरतियच-उक्कचच्चररच्छासु परिभमिऊण मम पुरओ ठवेइ। तंपि य जीवियत्थिणा पडिवन्नं सेट्ठिसुएण। राइणावि निरूवियाइं सव्वनयरे नाणाविहकोऊहलकोलाहलाउलाहिं पए पए पेच्छणयाइं। सो किर तेसु विसेसरसिओ, तहावि रायनिउत्तपत्ति-

---

१ ' एयजीवियरक्खा ' इत्यपि। २ ' अच्छड्डुंतो ' इत्यपि॥

परिगओ भेसिज्जंतोवि तेहिं जीवियलोहेण पत्तिमेत्तनिहित्तनेत्तचित्तो सव्वत्थ भमिऊण गओ रायसमीवं। पुरओ मोत्तूण पत्तिं निवडिओ चलणेसु। भणिओ रन्ना, सेट्ठिपुत्त! अच्चंतचंचलाइं मणलोयणाइं, ता कह तुमे अइवल्लहेसु पेच्छणाइसु जं ताइं निरुद्धाइं। तेण भणियं, सामि! मरण भीएण। रायाह, जइ तुमे एगमरणभीएण एवमप्पमाओ सेविओ, ता कहमणंतजम्ममरणभीया साहुणो तं न सेवंति। एयमायन्निऊण पडिबुद्धो सेट्ठिपुत्तो। जाओ पहाणसमणोवासओ। एवमणेगे पाणिणो तेण पत्थिवेण जिण धम्मे पवत्तिया। एरिसो पवयणकुसलो भावसावओ होइत्ति॥

अथ प्रकृतमुपसंहरन्नाह—

एसो पवयणकुसलो छब्भेओ मुणिवरेहि निद्दिट्ठो। किरियागयाइं छ च्चिय लिंगाइं भावसड्ढस्स॥५५॥

'एषः' उक्तस्वरूपः प्रवचनकुशलः षड्भेदो व्यक्त एव 'मुनिवरैः' पूर्वाचार्यैः निर्दिष्टः। ततश्चावसितं श्रावकलिङ्गं षट्प्रकरणमित्येतद्दर्शयन्नाह—'क्रियागतानि' क्रियोपलक्षणानि। चियशब्दस्यावधारणार्थत्वात् षडेव 'लिङ्गानि' लक्षणानि 'अग्नेर्धूमवत्,' 'भावश्राद्धस्य' यथार्थाभिधानश्रावकस्य। इति गाथार्थः॥ ५५॥

ननु किमन्यान्यपि लिङ्गानि सन्ति येनैवमुच्यते क्रियागतानि? सत्यं, सन्त्येव। यत आह—

भावगयाइं सतरस मुणिणो एयस्स बिंति लिंगाइं। जाणियजिणमयसारा पुव्वायरिया जओ आहु॥५६॥

'भावगतानि' भावविषयाणि सप्तदश 'मुनयः' सूरयः 'एतस्य' प्रकृतश्रावकस्य 'ब्रुवते' प्रतिपादयन्ति 'लिङ्गा-

नि ' चिह्नानि ' ज्ञातजिनमतसाराः ' इति व्यक्तम् । ' पूर्वाचार्याः ' चिरन्तनसूरयो ' यतो ' यस्मात् ' आहुः ' ब्रुवन्ति । इत्यनेन स्वमनीषिकापरिहारमाह ॥ ५६ ॥

किं तदाहुः ? इत्याह—

ईत्थिदियत्थसंसारविसयआरंभगेहदंसणओ। गड्डरिगाइपवाहे पुरस्सरं आगमपवित्ती ॥ ५७ ॥
दाणाइ जहासत्ती पवत्तणं विहिररत्तदुट्टे य । मज्झत्थमसंबद्धे परत्थकामोवभोगी य ॥ ५८ ॥
वेसा इव गिहवासं पालइ सत्तरसपयनिबद्धं तु । भावगय भावसावगलक्खणमेयं समासेण ॥५९॥

आसां पूर्वमुनिप्रणीतगाथानां व्याख्या—स्त्री चेन्द्रियाणि चार्थश्चेत्यादि द्वन्द्वः । ततः स्त्रीन्द्रियार्थसंसारविषयारम्भगेहदर्शनानि, तेष्वित्याद्यादेराकृतिगणत्वात्तसि कृते ' स्त्रीन्द्रियार्थसंसारविषयारम्भगेहदर्शनतः ' इति भवति । ततश्चैतेषु विषयभूतेषु ' भावगतं भावश्रावकलक्षणं ' भवतीति तृतीयगाथायां संबन्धः । तथा गड्डरिकादिप्रवाहविषये । तथा ' पुरस्सरमागमप्रवृत्तिः ' इति प्राकृतत्वाच्छन्दोभङ्गभयाच्च पूर्वापरनिपातः । ततश्चागमपुरस्सरं प्रवृत्तिर्वर्त्तनं धर्मकार्येष्विति गम्यते, प्रकृतं लिङ्गमिति । तथा ' दानादि यथाशक्ति प्रवर्त्तनम् ' इति स्पष्टम् । प्राकृतत्वाद्दीर्घत्वं भावगतं लिङ्गमिति । तथा ' विह्रीकः' धर्मानुष्ठानं कुर्वन्न लज्जति । तथा ' अरक्तद्विष्टश्च ' सांसारिकभावेषु भवति । ' मध्यस्थः ' धर्मविचारे न रागद्वेषाभ्यां बाध्यते ' असंबद्धः ' धनस्वजनादिषु भावप्रतिबन्धरहितः । ' परार्थकामोपभोगी ' परोपरोधादेव कामेषु शब्दरूपरूपेषु, भोगेषु गन्धरसस्पर्शेषु प्रवर्त्तते । तथा ' वेश्येव ' पण्यस्त्रीव कामिनमिति गम्यते । ' गृहवासं पालयति'

अद्यः श्वो वा परित्यजाम्येनमिति भावयन्निति सप्तदशविधपदनिबद्धं 'तुः' पूरणे। 'भावगतं' परिणामरूपमिति जातावेकवचनं, अनुस्वारस्य प्राकृतशैल्या लुप्तत्वात्। उक्तं च—" नीयालोवमभूया य आणिया दोवि बिंदुदुब्भावा। अत्थं गर्मिति तं चिय जो तेसिं पुव्वमेवासि ॥ १ ॥ " भावश्रावकलक्षणमेतत् 'समासेण' सूचामात्रेण। इति गाथार्थः ॥ ५९ ॥

सांप्रतमेषामेव भावार्थं प्रचिकटयिषुर्गाथासप्तदशकमाह—

इत्थीमणत्थभवणं चलचित्तं नरयवत्तिणीभूयं। जाणंतो हियकामी वसवत्ती होइ न हु तीसे ॥६०॥

'स्त्रीम्' योषितमनर्थानां दोषाणां भवनमाश्रयस्थानम्। तद्यथा—" अनृतं साहसं माया मूर्खत्वमतिलोभता। अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः ॥ १ ॥ " तथा 'चलचित्ताम्' अन्यान्याभिलाषिणीम्। उक्तं च—" अन्नं ज्झायंति मणे पेसलवयणाइं दिंति अन्नस्स। दिट्ठीए नियंतन्नं रमंति काएण पुण अन्नं ॥ १ ॥ " तथा नरकस्य वर्त्तिनीभूतां मार्गकल्पां 'जानन्' अवगच्छन् 'हितकामी' श्रेयोऽभिलाषकः 'वशवर्त्ती' तदधीनचारी 'भवति' स्यात् 'न हु' नैव 'तस्याः' स्त्रिय उष्ट्रपत्रविक्रयकवत्। भावयति च—" आनायास्तिमिसंहतेरिव दृढाः पाशागतानामिव प्रास्तीर्णा इव सर्वदिक्षु हरिणव्रातस्य वा वागुराः। स्वैरभ्रान्तिभृतः पतत्रिनिवहस्यैवाहिताः स्कन्धकाः संसारेऽत्र विवेकमुक्तमनसां बन्धाय वामभ्रुवः ॥ १ ॥ " १ ॥ ६० ॥

तथा—

इंदियचवलतुरंगे दोग्गइमग्गाणुधाविरे निच्चं। भाविरभवस्सरूवो रुंभइ सन्नाणरस्सीहिं ॥ ६१ ॥

इन्द्रियाण्येव चपलाः शीघ्रगामित्वेन तुरङ्गाः अश्वास्तान्, दुर्गतिमार्गं दुर्योनिपदवीमनुधाविरान् धावनशीलान् 'नित्यम्' सदा भावितं पुनः पुनरालोचितं भवस्वरूपं येन स तथाविधो 'रुणद्धि' निवर्त्तयति सतीभिः शोभनाभिर्ज्ञानरश्मिभिः श्रुतवल्गाभिः। तद्यथा—"तवकुलछायाभंसं पंडिच्चफंसणा अणिट्ठपहं। वसणाणि रणमुहाणि य इंदियवसगा अणुहवंति॥१॥" तथा—" दिवसरजनिसारैः सारितं पक्षगेहं समयफलकमेतन्मण्डितं भूतधात्र्याम्। इह हि जयति कश्चिन्मोक्षमक्षैर्विधेयै-रधिगतमपि चान्ये विप्लुतैर्हारयन्ति ॥ १ ॥ " २ ॥ ६१ ॥

तथा—

सयलाणत्थनिमित्तं आयासकिलेसकारणमसारं। नाऊण धणं धीरो न हु लुब्भइ तंमि तणुयंपि ॥६२॥

इह धनं ज्ञात्वा तत्र न लुभ्यतीति योगः । किंविशिष्टं धनम्? 'सकलानर्थनिमित्तं' समस्तदुःखनिबन्धनम् । उक्तं च—"अर्थानामर्जने दुःखमर्जितानां च रक्षणे। नाशे दुःखं व्यये दुःखं धिगर्थो दुःखभाजनम् ॥ १ ॥ " तथा 'आयासः' चित्तखेदः। यथा—"राजा रोक्ष्यति किं तु मे हुतवहो दग्धा किमेतद्धनं किं चामी प्रभविष्णवः कृतनिभं लास्यन्त्यदो-गोत्रिकाः। आदास्यन्ति च दस्यवः किमु तथा नंष्टा निखातं भुवि ध्यायन्नेतदहर्निशं धनयुतोऽप्यास्तेतरां दुःखितः ॥१॥" तथा 'क्लेशः' शरीरपरिश्रमस्तयोः 'कारणं' निबन्धनम्। तथा हि—" अर्थार्थं नक्रचक्राकुलजलधिमलं केचिदुच्चैस्तरन्ति प्रोद्यच्छस्त्राभिघातोत्थितशिखिकणकं जन्यमन्ये विशन्ति । शीतोष्णाम्भःसमीरग्लपिततनुलताः क्षेत्रिकां कुर्वतेऽन्ये शिल्पं चानल्पभेदं विदधति च परे नाटकाद्यं च केचित् ॥१॥ " तथा 'असारं' सारफलासंपादनात् । उक्तं च—"व्याधी-

शो निरुणद्धि मृत्युजननव्याधिक्षयेन क्षमं नेष्टानिष्टवियोगयोगहृतिकृत्सभ्यङ्ग न जन्मान्तरे। चिन्ताबन्धुविरोधबन्धनवध-त्रासास्पदं प्रायशो वित्तं वित्तविचक्षणः क्षणमपि क्षेमावहं नेक्षते ॥ १ ॥" इत्थंभूतं धनं ज्ञात्वा 'न हु लुब्भति' नैव तत्र गृध्यति ('धीरो' धीमान्, 'तस्मिन्' द्रव्ये,) मम्मणवणिग्वत् । 'तनुकमपि' स्तोकमप्यास्तां बह्वित्यपरर्थः। भाव-श्रावको हि नान्यायेन तदुपार्जनाय प्रवर्त्तते। नाऽप्युपार्जितेऽतितृष्णावान् स्यात्। किं तर्हि?—"पादमायान्निधिं कुर्यात् पादं वित्ताय खण्डयेत्। धर्मोपभोगयोः पादं पादं भर्त्तव्यपोषणे ॥ १ ॥ इच्छतोऽनिच्छतो वाऽपि मामकं द्रविणं सदा। चैत्यसाधूपभोगाय भूयात् सर्वे भवे भवे ॥ २ ॥" इति मनोरथवांस्तत्पालनादि करोतीति भावः ३ ॥ ६२ ॥

तथा—

दुहरूवं दुक्खफलं दुहाणुबन्धि विडंबणारूवं। संसारमसारं जाणिऊण न रइं तहिं कुणइ ॥ ६३ ॥

इहापि तत्र संसारे रतिं न करोतीति योज्यम्। किं कृत्वा? ज्ञात्वा संसारम्। किंविशिष्टम्? 'दुःखरूपं' दुःखस्वभा-वम्। तदुक्तम्—" जम्मं दुक्खं जरा दुक्खं रोगा य मरणाणि य । अहो! दुक्खो हु संसारो जत्थ किस्संति जंतुणो ॥ १ ॥" तथा 'दुःखफलं' जन्मान्तरे नरकादिदुःखभावात् । 'दुहाणुबंधि' इति दुःखानुबन्धिनं पुनः पुनर्दुःखसन्तान-सन्धानात् । तथा चाह—"जाव इमो संसारो जाव य जीवस्स एत्थ आवासो । ता जम्मणमरणाणं कत्तो अंतो अणं-ताणं ॥ १ ॥" तथा विडम्बनायामिव जीवानां विचित्राणि रूपाणि यत्र स तथा । पठ्यते च—"देवो नेरइओत्ति य कीडपयंगोत्ति माणुसो वेसो। रूवस्सी य विरूवो सुहभागी दुक्खभागी य ॥ १ ॥" इत्यादि । एवंविधं 'संसारं' चतुर्ग-

तिरूपं सुखसाराभावादसारं 'ज्ञात्वा' अवबुध्य न 'रतिं' धृतिं तस्मिन् 'कुरुते' विदधाति भावश्रावकः। चिन्तयति च—"धन्ना ते सप्पुरिसा जे नवरमणुत्तरं गया मोक्खं। जम्हा ते जीवाणं न कारणं कम्मबंधस्स ॥ १ ॥" इति ४ ॥ ६३ ॥

तथा—

खणमेत्तसुहे विसए विसोवमाणे सयावि मन्नंतो। तेसु न करेइ गिद्धिं भवभीरू मुणियतत्तत्थो ॥ ६४ ॥

क्षणमात्रं सुखं येभ्यस्ते, तथा तान् 'विषयान्' शब्दादीन् 'विषोपमानान्' परिणामदारुणान् 'सदाऽपि' नैकदैव 'जानानः' बुध्यमानो, यथा किल विषं भुज्यमानं मधुरमास्वादं दर्शयति, परिणामे तु प्राणप्रहाणाय संपद्यते। एवमेतेऽपि विषया विरसावसानाः। यदाह वाचकः—"आदावत्यभ्युदया मध्ये शृङ्गारहास्यदीप्तरसाः। निकषे विषया बीभत्सकरुणलज्जाभयप्रायाः ॥ १ ॥ यद्यपि निषेव्यमाणा मनसः परितुष्टिकारका विषयाः। किंपाकफलादनवद्भवन्ति पश्चाददतिदुरन्ताः ॥ २ ॥" इत्यवगच्छन् भावश्रावकः तेषु न कुर्यात् 'गृद्धिं' अत्यासक्तिं 'भवभीरुः' संसारवासचकितमनाः। भावयति च—"सम्मद्दिट्ठीवि कयागमोवि अइविसयरागसुहवसगो। भवसंकडंमि पविसइ एत्थं तुह सच्चई नायं ॥ १ ॥" किमिति गृद्धिं न करोति? यतो 'मुणिततत्त्वार्थः' जिनवचनश्रवणाद्विज्ञाततदसारत्वः। तथा हि जिनवचनम्—"विसएसु नत्थि सोक्खं सुहाहिमाणो जियाण पुण एसो। पित्ताउरनयणाणं उवलंमि सुवन्नबुद्धि व ॥ १ ॥" तथा—"भुज्जंता महुरा विवागविरसा किंपागतुल्ला इमे कच्छू कंडूयणं च दुक्खजणया भाविंति बुद्धिं सुहे। मज्झण्हे मयतिण्हिय व नियमं मिच्छाभिसंधिप्पया भुत्ता दिंति कुजोणिजम्मगहणं भोया महावेरिणो ॥ १ ॥" ५ ॥ ६४ ॥

तथा—

वज्जइ तिवारंभं कुणइ अकामो अनिवहंतो उ। थुणइ निरारंभजणं दयालुओ सव्वजीवेसु ॥ ६५ ॥

'वर्जयति' न करोति 'तीव्रारम्भं' प्राज्यप्राणिपीडाहेतुं व्यवसायं खरकर्मादिकं, ढण्ढणकुमारादिवृत्तान्ताकर्णनात्। करोति 'अकामः' मन्दादरः, तं विना 'अनिर्वहन्' तुशब्दो विशेषणार्थः, किंविशिनष्टि? सशूको गुरुलाघवालोचनपूर्वकं न निर्द्धन्धसवृत्त्येति। यतः—"सम्मद्दिट्ठी जीवो जइवि हु पावं समायरइ किंचि। अप्पोसि होइ बंधो जेण न निद्धंधसं कुणइ ॥ १ ॥" तथा 'स्तौति' प्रशंसति 'निरारम्भजनं' साधुलोकम्। एवम्—"धन्ना हु महामुणिणो मणसावि करंति जे न परपीडं। आरंभपावविरया भुंजंति तिकोडिपरिसुद्धं ॥ १ ॥" तथा 'दयालुः' कृपावान् 'सर्वजीवेषु' समस्तप्राणिषु।—"एगस्स कए नियजीवियस्स बहुयाउ जीवकोडीओ। दुक्खे ठवंति जे केइ ताण किं सासयं जीयं? ॥ १ ॥" इत्यादि भावयन् भावश्रावकः ६। इति गाथार्थः ॥ ६५ ॥

तथा—

गिहवासं पासं पिव मन्नंतो वसइ दुक्खिओ तंमि। चारित्तमोहणिज्जं निज्जिणिउं उज्जमं कुणइ ॥ ६६ ॥

'गृहवासं' गृहस्थतां 'पाशं' बन्धनविशेषमिव 'मन्यमानः' भावयन् 'वसति' अवतिष्ठते 'दुःखितः' दुःखवान् 'तस्मिन्' गृहवासे। यथा हि किल पाशपतितो विहङ्गमो नोत्पतितुं शक्नोति, कष्टं च तत्रावस्थानं कलयति। तथा वयमपि संसारभीरवोऽपि न प्रव्रजितुं शक्नुम इति। अपि च—"नागो जहा पंकजलावसन्नो दट्ठुं थलं नाहिसमेइ तीरं। एवं वयं

कामगुणेसु गिद्धा न भिक्खुणो मग्गमणुवयामो ॥ १ ॥" इत्यादि चिन्तयन् दुःखित इव गृहे तिष्ठति भावश्रावक इति । अत एव 'चारित्रमोहनीयं' कर्म 'निर्जेतुं' अभिभवितुं 'उद्यमं' प्रयत्नं 'करोति' चारित्रवतां दानसन्मानविनयप्रभावनादौ सर्वादरेण प्रवर्त्तते, अप्रीतिनिन्दालेशमपि न करोति । यतः—"एते निर्वृतिहेतवो मुनिगुणा निन्दाकृतां दुर्लभा नृणां सन्ति भवान्तरेऽपि सुलभाः सस्नेहपूजाकृताम् । तस्मान्निर्वृतिलिप्सुना मुनिजने कार्यो विचार्यादरो द्वेषोऽनर्थकदर्थनैकनिलयो हेयः सदा दूरतः ॥ १ ॥" इति ७ ॥ ६६ ॥

तथा—

अत्थिक्कभावकलिओ पभावणा वन्नवायमाइहिं । गुरुभत्तिजुओ धीमं धरेइ सइ दंसणं विमलं ॥ ६७ ॥

भावश्रावको 'दर्शनं' सम्यक्त्वं 'विमलं' अकलङ्कं धारयतीति पर्यन्ते योगः। कथंभूतः सन् ? इत्याह—देवगुरुधर्मतत्त्वेष्वास्तिक्यरूपो यो भावः परिणामस्तेन कलितो युक्तः ।—"मोत्तूण जिणं मोत्तूण जिणमयं जिणमए ठिए मोत्तुं । संसारकन्तवारं सधम्मकम्मं जगं सेसं ॥ १ ॥" इति निश्चयसारप्रतिपत्तिः । 'प्रभावना' उत्सर्पणा अष्टप्रकाराः । उक्तं च—"पावयणी धम्मकही वाई नेमित्तिओ तवस्सी य । विज्जासिद्धो य कवी अट्ठेव पभावगा भणिया ॥ १ ॥" तस्याः शक्तितः स्वयंकरणेन शक्त्यभावेन तत्कारिणामुपष्टम्भबहुमानतः । तथा 'वर्णवादः' प्रशंसनम् । आदिशब्दाच्चैत्यायतनयात्रातीर्थयात्रादिभिः करणभूतैः। गुरुधर्माचार्यस्तत्र विशेषतो भक्तियुक्तः । कृतज्ञतासारमिदमालोचयन्—"संमत्तदायगाणं दुप्पडियारं भवेसु बहुएसु । सव्वगुणमेलियाहिवि उवयारसहस्सकोडीहिं ॥ १ ॥" ('धीमान्' मतिमान् 'सदा' निरन्तरं)

इत्थं निष्कलङ्कं दर्शनं धारयति ८ । इति गाथार्थः ॥ ६७ ॥

तथा—

गड्डरिगपवाहेणं गयाणुगइयं जणं वियाणंतो । परिहरइ लोगसन्नं सुसमिक्खियकारओ धीरो ॥ ६८ ॥

गड्डरिका एडकास्तासां प्रवाहः सञ्चरणं, एकस्या अनुमार्गेण सर्वासां गमनम् । गड्डरिकाप्रवाहद्वारगाथायामादिशब्दः कीटकादिप्रवाहसूचनार्थः । तेन कृत्वा 'गतानुगतिकं' अविचारितचारिणं 'जनं' लोकं विजानन् । उदाहरणमत्र—

वाणारसीनयरीए कम्हि महूसवे लोगो न्हाइउं गंगामोइन्नो । तत्थ एगो विप्पो तंबभायणपाणी पाणीयमोगाहिउ-कामो चोरभयाओ भायणं वालुयामज्झे निहणइ । उवरिं चाभिन्नाणनिमित्तं वालुगापुंजं करेइ, ताहे नीरमोयरइ । तं च दट्ठूण अन्नोवि अन्नोवि एवं पकओ जाव जायं पुंजपुंजाउलं पुलिणं । उत्तिन्नो भट्टो न जाणाइ कत्थ पुंजे तंबभायणं । दट्ठूण पुंजकरणपयट्टे लोए पुच्छइ, अरे! किमेए पुंजा कीरंति? अन्नो अन्नमुद्दिसइ, जाव परंपराए। अन्नेण भणियं, भट्ट! मए तुममेव कुणंतो दिट्ठोसि, तओ एस एत्थ विहित्ति मएवि कओ । भट्टो भणइ, न मए विहित्ति पुंजो कओ, किं तु भायणलहणत्थं । तं च तुब्भेहिं सुट्ठुअरं हारियंति । पठितं च ब्राह्मणेन—"गतानुगतिको लोको न लोकः पारमार्थिकः । पश्य मूर्खेण लोकेन हारितं ताम्रभाजनम् ॥ १ ॥"

एवंविधं लोकं जानन् परिहरति 'लोकसंज्ञाम्' अविचारितरमणीयां लोकहेरिम् । किं तर्हि ? 'सुपरीक्षितकारकः' सुपर्यालोचितविधायी 'धीरो' मतिमान् भावश्रावको भवति ९ । इति गाथार्थः ॥ ६८ ॥

तथा—

नत्थि परलोगमग्गे पमाणमन्नं जिणागमं मोत्तुं । आगमपुरस्सरं चिय करेइ तो सव्वकिच्चाइं ॥ ६९ ॥

'नास्ति' न विद्यते परः प्रधानो लोको मोक्षस्तस्य मार्गे ज्ञानादित्रयरूपे 'प्रमाणं' प्रत्ययहेतुरन्यत् । जिना रागादिजेतारस्तैः प्रणीतः सिद्धान्तो जिनागमस्तं मुक्त्वा तस्यैवान्यथात्वासंभवात् । उक्तं च—"रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम् । यस्य तु नैते दोषास्तस्यानृतकारणं किं स्यात् ?॥ १ ॥" पूर्वापराविरुद्धत्वाच्च । तथा हि—"धर्मस्य मूलं करुणा यथोदिता तद्वत् क्रियाऽप्यङ्गिहिता जिनोत्तमैः । सामायिकं साधितमादितो यथा क्षान्त्यादयोऽप्येवममुष्य पालकाः ॥१॥" 'आगमपुरस्सरं' आगमपर्यालोचनपूर्वकमेव, चियशब्दस्यैवकारार्थत्वात् । 'करोति' अनुतिष्ठति 'ततः' हेतोः सर्वाः क्रियाः सकलकार्याणि चैत्यवन्दनादीनि । तत्र चैत्यवन्दनविधिस्त्रिकदशकाराधनरूपः । तथा चागमः—"तिन्नि निसीहिय तिन्नि य पयाहिणा तिन्नि चेव य पणामा । तिविहा पूया य तहा अवत्थतिअ भावणं चेव ॥ १ ॥ तिदिसिनिरिक्खणविरई पयभूमिपमज्जणं च तिक्खुत्तो । वन्नाइतियं मुद्दातियं च तिविहं च पणिहाणं ॥ २ ॥ इय दहतियसंजुत्तं वंदणयं जो जिणाण तिक्कालं । कुणइ नरो उवउत्तो सो पावइ सासयं ठाणं ॥ ३ ॥" इत्यादि । पूजाविधिः—देवगुणपरिज्ञानात्तद्भावानुगतमुत्तमविधिना स्यादादरादियुक्तं यत्तद्देवार्चनं चेष्टम् । यथा—"काले सुइभूएणं विसिट्ठपुप्फाइएहि विहिणा उ । सारथुइथोत्तगरुई जिणपूया होइ कायव्वा ॥ १ ॥ वत्थेण बन्धिऊणं नासं अहवा जहा समाहीए । वज्जेयव्वं तु तहा देहंमिवि कंडुयणमाई ॥२॥" गुरुवन्दना—द्वादशावर्त्तादि द्वादशावर्त्तं षट्स्थानाराधनरूपं पञ्चविंशत्यावश्यकवि-

शुद्धं द्वात्रिंशद्दोषविकलं च भवति । तत्र स्थानानि—"इच्छा य अणुन्नवणा अव्वाबाहं च जत्त जवणा य । अवराहखामणावि य छ ट्ठाणा हुंति वंदणए ॥ १ ॥" आवश्यकाः—अवणामदुगं अहजायरूवया तह दुवालसावत्ता । चउसिर तिगुत्त दुपवेस निग्गमो एक्कसिं चेव ॥ १ ॥" दोषास्तु—"वज्जेऽणाढिय थद्धं पविद्ध परिपिंडियं च टोलगइं । अंकुस कच्छभरिंगिय मच्छुव्वत्तं मणपउट्ठं ॥ १ ॥ वेइयबद्धं भयसा भयंत मेत्तिं च गारवा कज्जा । तेणिय पडणिय रुट्ठं तज्जिय सढ हीलिय विलुत्तं ॥ २ ॥ दिट्ठमदिट्ठं सिंगं करमोयणयं तहा अणालिद्धं । ऊणं उत्तरचूलिय मूयं तह ढड्ढरं चुडलिं ॥ ३ ॥" एतेषां व्याख्या—"आयाररहियमणाढिय सुन्नयमणविग्गहो कुणइ थद्धं । पविद्धमणुवयारं अनिजंतियओ व जं देइ ॥ १ ॥ परिपिंडियं च वंदइ पिंडियवयणेहिं पिंडिए वावि । टोलगइं मेलो इव उप्फिडिउं विसयनीई वा ॥ २ ॥ उवगरणाइसु घेत्तुं गुरुं निवेसेइ अंकुसं भणियं । कच्छभरिंगियमन्नं वंदिउमभिजाइ रिंगंतो ॥ ३ ॥ मच्छुव्वत्तं उट्ठणनिसीयणे मच्छओ व उव्वत्ते । अन्नं वंदिउमहवा परियत्तइ मत्तिमीणो व ॥ ४ ॥ अप्पपरपत्तिएणं मणप्पओसेण मणपउट्ठंति । वेइयपणगं सम्मं न वज्जए वेइयाबद्धं ॥ ५ ॥ निच्छुभणाइभएणं भयकिइकम्मं न निज्जरा हेउं । भयई भइस्सइत्ति य सन्होरयं वंदइ भयंतं ॥ ६ ॥ मेत्तीहेउं मेत्तीगारवओ विहिविऊ विणीओहं । एहि य पओयणेणं सकारणं निष्फलं तंपि ॥ ७ ॥ ओहावणाभएणं गूहियकिरियस्स तेणियं जाण । पडणीयं पुण गुरुणो आहाराईण समयंमि ॥ ८ ॥ कयभालच्छिवियारो रुट्ठो जं कुणइ तं भवे रुट्ठं । अंगुलिमाईहिं गुरुं तज्जेमाणस्स तज्जिययं ॥ ९ ॥ गूहियविरियस्स सढं हीलिययं बेइ वायगगणित्ति । विकहं करेइ दरवंदियम्मि पलिउंचियमिमत्ति ॥ १० ॥ दिट्ठमदिट्ठं जं खलु दीसंतो कुणइ

नो अदीसंतो। पासेहि सीसनमणं सिंगं मन्नंति पुव्वमुणी ॥ ११ ॥ एसो करोत्ति वंदइ एयं करवंदणं सुए सिट्ठं। मुट्ठी-हामो दिन्नेण नन्नहा मोयणं एयं ॥ १२ ॥ आलिट्ठाणालिट्ठे रयहरसीसे य होइ चउभंगो। आवस्सगपयवयणक्खरेहिं हीणं भवे ऊणं ॥ १३ ॥ उत्तरचूलं वंदिय भणइ वंदामि मत्थएणंति। मूयं च सद्दरहियं ढड्डरयं ढड्डरसरेण ॥ १४ ॥ चुडलिं च रओहरणं गिण्हेइ भामेइ वा करे दिंतो। सव्वे वंदामोत्ती बत्तीस इमो चुडलिदोसो ॥ १५ ॥" प्रत्याख्यान-विधिः—"वंदणयं दाऊणं अवणयकाओ कयंजली गुरुणो। अणुभासंतो वयणं पच्चक्खाणं तु गिण्हेज्जा ॥ १ ॥" दान-विधिः—"नायागयाणं कप्पणिज्जाणं अन्नपाणाईणं दव्वाणं देसकालसद्धासक्कारकमजुयं पराए भत्तीए आयाणुग्गहबुद्धीए संजयाण दाणं ॥" इत्याद्याप्तागमपुरस्सरं सर्वाण्यपि कृत्यानि भावश्रावकः करोतीति १० ॥ ६९ ॥

तथा—

अनिगूहिंतो सत्तिं आयाबाहाए जह बहुं कुणइ। आयरइ तहा सुमई दाणाइचउव्विहं धम्मं ॥ ७० ॥

'अनिगूहन्' अगोपायन् 'शक्तिं' सामर्थ्यं 'आत्माबाधया' स्वस्य परिजनस्य च पीडां परिहरन् दानादिचतुर्विधं धर्मं आचरतीति योगः। यतोऽवाचि—"न्यायात्तं स्वल्पमपि हि भृत्यानुपरोधतो महादानम्। दीनतपस्व्यादौ गुर्वनुज्ञयादानम-न्यत्तु ॥ १ ॥" यथा 'बहु करोति' बहुकालं यावन्तं कर्तुं शक्नोति। अयमत्र भावः—सति विभवे नातितृष्णको भवति, तनुविभवो नात्युदारः स्यात्, सर्वाभावसंभवात्। अत एवोक्तं पञ्चसूत्रे—"लाभोचियदाणे लाभोचियभोयणे लाभोचिय-

---

१ अन्यत्र "आलिद्धमणालिद्धे" इत्यस्ति। "आलिट्ठाणालिद्धे" इत्यपि ॥

परिवारे लाभोचियनिहिगरे सिया ।" स एवं कुर्वाणो बहुना कालेन प्रभूतं दद्यात् । अन्यैरप्युक्तम्—"अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च वर्धनम् । अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु ॥ १ ॥" एवं शीलतपोभावनास्वपि भावनीयम् । 'आचरति' आसेवते 'तथा' तेन प्रकारेण 'सुमतिः' पारिणामिकीबुद्धिप्रधानो दानादिचतुर्विधं धर्ममिति स्पष्टं भावितं चेति ११॥७०॥

तथा—

हियमणवज्जं किरियं चिंतामणिरयणदुल्लहं लहिउं । सम्मं समायरंतो न हु लज्जइ मुद्धहसिओवि ॥ ७१ ॥

'हितां' पथ्यामिहलोकपरलोकयोः, 'अनवद्यां' अपापां 'क्रियां' अनुष्ठानं वन्दनप्रतिक्रमणादिकं 'सम्यग्' गुरूपदिष्टविशिष्टविधिना 'समाचरन्' सम्यगासेवमानो न लज्जति (ते) इति संबन्धः । किं विशिष्टां क्रियाम् ? इत्याह—चिन्तामणिरत्नमिव दुर्लभां दुरापां 'लब्ध्वा' अवाप्य मुग्धैरज्ञैर्हसितोऽपीत्यक्षरार्थः स्पष्ट एव । भावार्थः कथानकगम्यः ॥ ७१ ॥

तच्चेदम्—

हत्थिणाउरे नयरे नागदेवो नाम सेट्ठी होत्था । तस्स वसुंधरा गेहिणीजाओ जयदेवो पुत्तो । तेण दुवालसवासाणि लेहसालाए पढंतेण सिक्खिया रयणपरिच्छा । विन्नाया सव्वरयणगुणा, तेसिं लक्खणाणि य । तओ चिंतियत्थदाणाओ चिंतामणी चेव रयणं किमन्नेहिं सेलसयलसरिसेहिं ? । एस चेव विउसाणमुवाएओ । अहंपि सव्वायरेण एयं चेव गवेसामित्ति संपहारिऊण घराओ घरं हट्टाओ हट्टं भमंतो रयणाणि परिच्छिउं पवत्तो । जाहे सनयरे न पावइ चिंतामणिं, ताहे जणयमापुच्छिऊण चलिओ नयरंतरेसु । भणिओ जणएहिं, पुत्त ! किमेइणा वाएण ? न एस कत्थइ अत्थि, उवमा चेव

एसा पंडियजणेण कया । ता दिट्ठसिट्ठइट्ठववहारेण ववहरसु, जेण सुपीवरसिरीए भायणं होहि । तहावि सो चिंतामणिसत्थमणुगुणंतो तस्संपत्तिसमुस्सुओ बलावि जणयाणं निग्गओ नयराओ । पवत्तो पइनयरं रयणाणि गवेसिउं । तेसुवि तमपेच्छंतो समारूढो पव्वयसिहरेसु । किलिस्सिओ समुद्दतीरेसु वेलाउलेसु कत्थइ अलहंतो चिंतिउं च पवत्तो । किं मन्ने सच्चमेयं ? नत्थि चेव एसो । अहवा न सत्थभणियमन्नहा होइत्ति कयनिच्छओ पुणो परिब्भमिउमारद्धो । अन्नया गामं गामेण मणिखाणीओ पुच्छमाणस्स सिट्ठं केणावि वुड्ढपुरिसेण, अत्थि अमुगदेसे मणिवई नाम पाहाडिगा । तत्थ जो पुन्नवंतो सो मणिणो पावेइ । तओ पुच्छाउच्छीए किच्छेण पत्तो तत्थ गवेसंतो मणिणो । मिलिओ एगस्स पसुवालस्स उवविट्ठाण य गोट्ठीए । दिट्ठो तस्स हत्थे वट्टपासाणो, गहिओ, परिच्छिओ, परिन्नाओ य जयदेवेण । चिंतामणी एसोत्ति हरिसिएण मग्गिओ । अजवालो न देइ भणइ य, किमेइणा करिस्ससि ? । जयदेवो भणइ, गिहं गओ बालस्स कीलणयं दाहामि । पसुवालो भणइ, एत्थ एरिसा अणेगे अत्थि ता किं न गवेसेसि ? । इयरो, भणइ अहमुस्सुओ नियगामं गच्छामि, तुममेत्थ वत्थव्वओ अन्नमन्नं पाविहिसि, ता देहि ममेयंति । जाहे अपरोवयारसीलयाए सो कहवि न देइ ताहे वरमेयस्सावि एस उवयरउ, मा निप्फलो होउत्ति भाविंतेण साहिओ से वणिएण सब्भावो । भद्द ! एस चिंतामणी वुच्चइ, जइ ममं न देहि ता अप्पणावि एयमाराहेहि, जेण चिंतियाचिंतियाइं सुहाइं पावेसि । आभीरेण वुत्तं जइ सच्चमेस चिंतामणी ता चिंतियाइं मए बोरकच्चराइं, सिग्घं देउ । इयरेण वुत्तं, न एवं चिंतिज्जइ, किं तु उववासतिगंतिमराइमुहे समज्जिओवलित्तभूमिए चंदणोवलित्तकप्पूरपयरच्चियपसत्थपट्टे अहयवत्थोवरि ण्हवियविलित्तो एस ठाविज्जइ । सुरहिकुसु-

मेर्हिं पेच्छादिज्जइ। तओ पणमिऊण लक्खं वा कोडिं वा चिंतिज्जइ। पहायसमए सबमेयस्स पुरओ पुंजीकयं पाविज्जइ। इमं सोऊण तुट्ठेण आभीरेण वालियाओ छालियाओ गामाभिमुहं। एयाओ विक्किणिऊण कप्पूराइदबेहिं तुह पुयं करिस्सं। सबं पहियकहियं विहाणमणुट्ठिस्सं। तुमं पुण मम चिंतियं मा विफलीकरेज्जासि, जेण ते चिंतामणिनामं सच्चं होइ। एवं मणिमुल्लवंतो चलिओ गामाभिमुहमाभीरो। इयरोवि तयलाभविसन्नो विचिंतेइ, न एस निब्भग्गसेहरो एयं मणिरयणं धारिउं तरिस्सइ, ता अणुगच्छामि पेच्छामि य किमेस करेइत्ति चिंतिऊण लग्गो तयणुमग्गेण। ताव य भणियमाभीरेण, भो चिंतामणि! दीहो मग्गो ता कहेहि किंचिवि कहाणयं, जेण सुहं निवहइ। अह तुमं न जाणसि तो खाइं ते अहं कहेमित्ति बिंतेण पारद्धमणेण कहाणयं। जाहे मणी हुंकारंपि न देइ, ताहे कुविएण एरिसो निद्दक्खिन्नो तुमं मम हुंकारंपि न देसि, कीइसी पुण लक्खसहस्सेसु आसा?, ता न होसि चिंतामणी तुमं। अहवा सच्चं चिंतामणी चेवासि, जओ जप्पभिइं पाविओसि तप्पभिइं मम चिंता मणे न फिट्टइ। तहा जोहं पभाए समुट्ठिओ सीयलरब्बाभोयणं छासीए रोट्टयं च अणुवजीवंतो पयंपि चलिउं न पारेमि, सो कहमुववासतिगेण न मरामि?, ता तेण वेरिणा मम मारणत्थमेव वन्निओसि, तो गच्छ जत्थ न पेच्छामित्ति बिंतेण तेण पक्खित्तो मणी दूरं। चलिओ छालियाओ घेत्तूण अडविसम्मुहंति। इयरोवि हट्ठतुट्ठो पणामपुबं तं गिण्हिऊण पुण्णमनोरहो पत्थिओ नियनयरं। तप्पभावेण समुल्लसियरूवलायन्नो रयणपुंजो व दिप्पमाणो गामनगराईसु गोरविज्जंतो पत्तो महापुरं। निविट्ठो एगत्थ हट्टे। दिट्ठो सगोरवं तन्नायगेण। भद्दागिइत्ति

१ "पच्छाइज्जइ" इत्यपि॥

गाहिओ पाणिं पाणप्पियाए धूयाए। तीए सद्धिं परूढपणओ सुहमासिओ किंचि कालं। अन्नया निव्वसाएहिं लज्जिज्जइत्ति भाविऊण भणिया भज्जा, दवावेहि मे नीविं, जेण दव्वोवज्जणं करेमि। तीएवि निवेइयं जणयस्स। तेणावि तुट्ठेण दिन्नं से दीनाराण लक्खं। तओ कप्पूरागुरुचंदणाइदव्वेहिं पूइऊण सत्थुत्तविहिणाभिवासिओ वासभवणेगदेसे चिंतामणी। चिंतिया दीणारकोडी। पाविया पहायकाले पुंजीकया। सिद्धो मे चिंतामणित्ति हरिसिएण भणिया भज्जा, समप्पेहि एयं तायस्स, तीएवि विम्हियाए तहेव कयं। तुट्ठं ससुरकुडुंबं। जायं जामाउयंमि बहुमाणपरं। अन्नया महया भडचडगरेण गओ हत्थिणाउरं। अभिनंदिओ जणएण, सम्माणिओ य सयणवग्गेण, पसंसिओ सेसलोएण। जाओ भायणमुत्तमसुहाणंति॥ एत्थ एवमुवणओ—जहा तेण वणियसुएण चिरं परियडंतेण किच्छेण पाविया मणिवईपाहाडिया। तत्थवि कहं कहंपि चिंतामणिरयणं आराहिएण तेण पत्ता पहाणसुहसंपया। तहा संसारसायरे संसरंताण पाणिणं दुलहा मणिवईपाहाडियासमाणा मणुयजाई। तत्थवि कहं कहंपि पाविज्जइ अचिंतचिंतामणिसमाणं जिणधम्मरयणं। आराहिए तंमि करयलसंठियाइं सग्गमोक्खसोक्खाइं। परिचत्ते पुण आभीरस्सेव सासयं चेव दुहदालिद्दंति॥

तदेवमतिदुर्लभां धर्माराधनक्रियां कुर्वन्न लज्जते भावश्रावको मूर्खैरुपहस्यमानोऽपि। ततः स्वार्थसिद्धिमवाप्नोति, दत्तपोतनैगमवत्। तद्वृत्तान्तश्चायम्—

अत्थि पच्छिमसमुद्दोवकंठपइट्ठिया विस्सउरी नाम नयरी। सुंदेररंजिएणेव जा सा रयणायरेण अणवरयं आलिंगिज्जइ दीहरविलोलकल्लोलबाहाहिं। तीए सयलपयापियसंपायणपउणमाणसो पियंकरो नाम राया। तत्थेव कुलक्कमाग-

यापरिमियविभववित्थारियविसुद्धपसिद्धी रायाइजणसम्मओ दत्तो नाम इब्भगो होत्था। सो य परसारमुल्लभंडभरियभूरिजाणवत्तेहिं समुद्दमोगाहिऊण परकूलविढत्तदबो नियनयरीमागच्छइ। अन्नया य पडिकूलयाए कम्मपरिणामस्स विवन्नजाणवत्तो सरीरमेत्तेण पत्तो नियमंदिरं चिंतिउं पवत्तो। समुद्दे नट्ठं समुद्दे चेव लब्भइत्ति जणवाओ ता पुणो समुद्दमोगाहामित्ति निच्छिऊण विक्किणघरवत्थाभरणाइवक्खरो संगहियमहग्घभंडो पुणोवि समारूढो जाणवत्तं। भवियव्वयावसेण नियत्तमाणस्स तंपि फुट्टं। समागओ गिहमंगमेत्तेण खुट्टो दत्तोत्ति जाया जणे पसिद्धी। तहावि सो पुरिसकारं न मुंचइ, इच्छइ पुणोवि समुद्दोयरणं। न य नीवी अत्थि। पहीणपुन्नोत्ति न य से अन्नो कोवि देइ, ताहे दढं विसन्नो पणट्ठच्छुहनिद्दो उवाए मग्गमाणो झियायइ। अन्नया पहायसमए सुमरियं जणयवयणं। किर परलोयपत्थिएण भणियपुबोहं जणएण, पुत्त! विचित्ताइं विहिणो विलसियाइं, मरयब्भविब्भमाओ संपयाओ, तओ कयाइ य असंभावणिज्जंपि संभवइ, ता जइ कहंपि विभववोच्छेओ भवइ, तओ एत्थ गेहेगदेसे अब्भेजं दुवाररहियं भूमिगिहमत्थि। तंमज्झे तंबमयकरंडियाए तंबपट्टए जं किंचि लिहियमत्थि तमणुचिट्ठेज्जासि, तओ ते सबं सोहणं भविस्सइत्ति। तओ न अन्नहावाई ताओत्ति हरिसिएण उग्घाडियं भूमिगिहं दत्तेण। उवलद्धा करंडिया। वाइओ पट्टओ। तत्थ किर लिहियमेयं—"अत्थि पच्छिमदिसाए रयणायरस्संतो गोयमदीवो नाम दीवो। सो अइकक्खडफासपासाणपउरभूमितलो, रयणतणचारिसुरभिपउरो य। ताओ पुण सुरभीओ न सहंति माणुसदंसणंपि। अओ तत्थ सोमालकरीसभरियभूरिजाणवत्तेहिं गम्मइ।

१ "खुद्दो" इत्यपि। २ "अज्झोसं" इत्यपि॥

पत्तलदुमच्छायासु करीसं पत्थरिज्जइ । अप्पणा अन्नत्थ दूरे आवासो कीरइ । तओ सुविसत्थाओ सुरभीओ तेसु छाया-रुक्खेसु करीसमिउफासलुद्धाओ मज्झण्हकाले निसासु य उवविसंति छगणं च मुंचंति । तओ तासु गयासु पभाए छगण-मन्नत्थ नेऊण पिंडा कीरंति । परिसुक्कपिंडयाण जाणवत्ताणि भरिज्जंति । स गिहमाणिज्जंति । पज्जालिएसु पिंडएसु पहाण-रयणाणि पाउब्भवंति । तओ अपरिमिया रिद्धी वित्थरइ । सव्वत्थ मंतगुत्ती कायव्वा । एवं सव्वं परिणामसुंदरं होइ" त्ति लिहियमेयं दट्ठूण चिंतियं दत्तेण सुंदरमेयं, किं तु न मए पुव्वयरमेयमवलोइयं। संपइ अच्चंतनिद्धणेहिं न तत्थ गंतुं तीरइ, न य कोइ दरिद्दाणमुद्धारए देइ । मंतगुत्ती य आइट्ठा। कहिएवि सब्भावे न कोइ पत्तियइ, ता किमेत्थ पत्तयालंति । अहवा करेमि ताव गहिलचेट्ठियं ता मम कोइ किंपि अणुकंपाए वियरेज्जत्ति। तओ बुद्धी अत्थि विभवो नत्थित्ति झिखंतो तियचउक्कचच्चराइसु परिहिंडइ । जंपि तंपि पुच्छिओ एवं चेव पडिभणइ । तओ गहिलो दत्तोत्ति पसिद्धं सव्वनयरीए । अत्थनासेण उम्मत्तीभूओ वराओ दत्तोत्ति सुयं नराहिवेण । अत्थं दाऊण पउणीकरेमि तं महाणुभावंति चिंतिऊणाणा-विओ एसो पुच्छिओ य, भो दत्त ! किमेयं जंपसि ? । सो भणइ, बुद्धी अत्थि विभवो नत्थि । तओ राइणा मा एवमु-ल्लवसु, गिण्ह विहवं जत्तिएण पओयणंति बिंतेण दरिसियं भंडागारं। तओ तुट्ठेण लक्खमेत्तं गहियं दत्तेण भणियं च,एत्ति-एण चेव मे पओयणंति । उव्वरओ झिंक्खियव्वाओत्ति परितुट्ठो राया। दत्तेणवि गहिया गोयमदीवगमणविहिन्नू निज्जामगा। पउणीकयाइं पवहणाइं । संगहिया कम्मगरा। खणावियं पुंजीकयं जुन्नकरीसं । अहो ! सुंदरं दत्तेण भंडं संगहियंति हसंति लोगा । अन्ने भणंति, भद्दं नरिंदसाहस्स, जेणेरिसो वणिउत्तो विढत्तो । अवरे बिंति, दिन्नो जलंजली दालिद्दस्स, दत्तेण

एरिसभंडसंगहेण । केइ समुल्लवंति, गहिलो ताव एस वराओ, नवरं चोज्जमेयं रायावि गहिलो, जमेयस्स नीवीं पयच्छइ। एवमणेगहा उवहसिज्जइ जणेण । घेप्पइ ता लोट्टेहिं, निवारिज्जइ कारुणिएहिं, तहावि पट्टयलिहियलद्धपरमत्थो न लज्जइ खत्तखणणाइवावारेण । धूलीधूसरियंगो कच्छोट्टयठइयकडियडो अप्पणा कम्मगरेहिं च करीसमुवहइ । भरए भरेइ, नामंकीए करेइ । किं बहुणा, बहूणि पवहणाणि करीसस्स भरेऊण पत्तो सो गोयमदीवं । अणुचिट्ठिऊण पट्टयाइट्ठं पडियागओ पिंडयभरिएहिं भूरिजाणवत्तेहिं । अहो ! भंडाण रूवं पडिभंडंति हसिओ लोगेहिं । उवहासबुद्धीए चेव नीओ सुकवालेहिं नरवइसमीवं।पुच्छिओ रन्ना किं भंडमाणीयंति । तेण वुत्तं, देव! गोमयपिंडा । तओ हसिऊण भणिओ रन्ना, उस्सुको तुमं गच्छ, संगोवेहि भंडं, भवेसु सुहाण भायणंति । तओ महापसाओत्ति भणंतो पणमिऊण रायाणं पडिगओ दत्तो । संगोविया पिंडया, पज्जालिया विहिणा । पत्ताइं तेसु महग्घाइं महारयणाइं । जायं पुव्वं पिव लच्छिपडिहत्थं निगेयणंति । पुन्नवंतोत्ति पसंसिओ नरिंदाइलोएणंति । एस इहलोयकज्जसिद्धीए दिट्ठंतो । परलोएवि एवं चेव भावियव्वोत्ति॥

तथा—

देहट्ठिइनिबंधणधणसयणाहारगेहमाईसु । निवसइ अरत्तदुट्ठो संसारगएसु भावेसु ॥ ७२ ॥

देहस्थितिनिबन्धनानि शरीरोपष्टम्भकारणानि यानि धनस्वजनाहारगेहानि सुप्रतीतानि, तान्यादिर्येषां क्षेत्रकलत्रवस्त्रशस्त्रयानवाहनादीनां भावानां तेषु, 'निवसति' तिष्ठति गृह इति गम्यते । अरक्तद्विष्ट इवारक्तद्विष्टः, 'संसारगतेषु' भवभाविषु 'भावेषु' पदार्थेषु । इयमत्र भावना—शरीरनिर्वाहकारणेष्वपि वस्तुषु मन्दादरो भवति भावश्रावकः । भावयति

च—"न य एत्थ कोइ सयणो न सरीरं नेय भोगउवभोगा । जीवो अन्नभवगइं गच्छइ सव्वंपि मोत्तूण ॥ १ ॥" तथा दुर्विनीतपरिजनादावपि नातिद्वेषं विदध्यात्, अपि तु बहिर्वृत्त्यैव । यतः—"कोवाविट्ठो न मुणइ कज्जमकज्जं हियं च अहियं च । धम्माहम्मं च तहा कज्जविणासं च हाणिं वा ॥ १ ॥" तथा—"क्षमी यत्कुरुते कार्यं न तत्कोपवशंगतः । कार्यस्य साधिनी प्रज्ञा सा च क्रुद्धस्य नश्यति ॥ १ ॥ " १३ ॥ ७२ ॥

तथा—

उवसमसारवियारो बाहिज्जइ नेयं रागदोसेहिं । मज्झत्थो हियकामी असग्गहं सव्वहा चयइ ॥ ७३ ॥

उपशमः कषायानुदयः, तत्सारं तत्प्रधानं विचारयति धर्मादिस्वरूपं यः स 'उपशमसारविचारः' भावश्रावको भवति । कथं पुनरेवंविधः स्यात् ? इत्याह—यतो विचारं कुर्वन् 'बाध्यते' अभिभूयते नैव रागद्वेषाभ्याम् । तथा हि—'मयाऽयं पक्षः कक्षीकृतो बहुलोकसमक्षं, बहुभिश्च लोकैः प्रमाणीकृतस्तत्कथमिदानीमात्मानमप्रमाणीकरोमि' इत्यादिभावनया स्वपक्षानुरागेण न जीयते । तथा ममैष प्रत्यनीको, मदीयपक्षदूषकत्वात् । तदेनं जनमध्ये धर्षयामीति सदसद्दूषणोद्घटनाक्रोशदानादिप्रवृत्तिहेतुना द्वेषेणाऽपि नाभिभूयते, किं तु 'मध्यस्थः' सर्वत्र तुल्यचित्तो 'हितकामी' हिताभिलाषी, स्वस्य परस्य चोपकारमिच्छन् 'असद्ग्राहं' अशोभनाभिनिवेशं सर्वथा 'त्यजति' मुञ्चति मध्यस्थगीतार्थगुरुवचनेन । यतः—"तरिऊणवि मोहमहंतसायरं तीरनियडपत्तोवि । निज्जइ पडिप्पहेणं जीवो कुग्गाहमाहेहिं ॥ १ ॥" गोष्ठामाहिलरोहगुप्तादिवदिति १४॥७३॥

१ अन्यत्र—'नेव' इत्यपि ॥

तथा—

भावेंतो अणवरयं खणभंगुरयं समत्थवत्थूणं । संबद्धोवि धणाइसु वज्जइ पडिबंधमंबंधं ॥ ७४ ॥

'भावयन्' पर्यालोचयन् 'अनवरतं' प्रतिक्षणं 'क्षणभङ्गुरतां' सततविनश्वरतां 'समस्तवस्तूनां' सर्वभावानाम् । तद्यथा—"इष्टजनसंप्रयोगार्द्धिविषयसुखसंपदस्तथाऽऽरोग्यम् । देहश्च यौवनं जीवितं च सर्वाण्यनित्यानि ॥ १ ॥ क्षणविपरिणामधर्मा मर्त्यानामृद्धिसमुदयाः सर्वे । सर्वे च शोकजनकाः संयोगा विप्रयोगान्ताः ॥ २ ॥" इत्यादिरूपां 'संबद्धोऽपि' बाह्यवृत्त्या रक्षणोपार्जनादिरूपया (युक्तोऽपि 'धनादिषु' धनस्वजनादिषु) 'वर्जयति' न करोति प्रतिबन्धो मूर्च्छा, तद्रूपं संबन्धं संयोगं भावश्रावकः । भावयति च—"चेच्चा दुपयं चउप्पयं च खेत्तं गिहं धणधन्नं च सव्वं । कम्मप्पवीओ अवसो पयाइ परं भवं सुंदरपावगं वा ॥ १ ॥" इत्यादि १५ ॥ ७४ ॥

तथा—

संसारविरत्तमणो भोगुवभोगा न तित्तिहेउत्ति । नाउं पराणुरोहा पवत्तई कामभोगेसु ॥ ७५ ॥

संसारोऽनेकदुःखाश्रयोऽयम् । यतः—"दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवेद् गर्भवासे नराणां बालत्वे चापि दुःखं मललुलिततनुस्त्रीपयःपानमिश्रम् । तारुण्ये चापि दुःखं भवति विरहजं वृद्धभावोऽप्यसारः संसारे रे मनुष्याः ! वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ॥ १ ॥" इति । तस्माद्विरक्तमनाः । अमी भोगोपभोगाः—"सइ भुज्जइत्ति भोगो सो पुण आहा-

१ "मलमलिनतनु–" इत्यपि ॥

रपुप्फमाईओ । उवभोगो य पुणो पुण उवभुज्जइ भवणविलयाई ॥१॥" इत्येवमागमे प्रतीताः । ते न तृप्तिहेतवो भवन्ति प्राणिनाम् । तदुक्तम्—"सुमिणंतराणुभूयं सोक्खं समइच्छियं जहा नत्थि । एवमिमंपि अईयं सोक्खं सुविणोवमं होइ ॥ १ ॥ भोत्तूणं सुइरसुंदरे सुरवहूसंदोहदेहाइए भोए सागरपल्लमाणमणहे देवत्तणे जं नरा। रज्जंति त्थिकलेवरेसु असुईपुन्नेसु रिट्ठोवमा मन्ने तित्तिकरा जियाण न चिरं भुत्तावि भोगा तओ ॥२॥" इति 'ज्ञात्वा' अवधार्य भोगसुखफलतां 'परानुरोधात्' अन्यजनदाक्षिण्यादिना प्रवर्त्तते 'कामभोगेषु' पूर्वोक्तस्वरूपेषु भावश्रावकः । वैरस्वामिजनकधनगिरिवदिति १६ ॥ ७५ ॥

तथा—

वेस व निरासंसो अज्जं कल्लं चयामि चिंतंतो । परकीयं पिव पालइ गेहावासं सिढिलभावो ॥ ७६ ॥

'वेश्या' पण्याङ्गना, तद्वत् 'निराशंसः' परित्यक्तास्थाबुद्धिः । यथा हि वेश्या निर्धनकामुकाद्विशिष्टलाभमसंभावयन्ती किञ्चिल्लभमाना चाद्य श्वो वैनं त्यजामीति चिन्तयन्तीति मन्दादरा तमुपचरति। भावश्रावकोऽप्येवमेवाद्य श्वो वा मोक्तव्योऽयं मयेति मनोरथवान् 'परकीयमिव' अन्यसत्कमिव पालयति गृहवासं, कुतोऽपि हेतोः परित्यक्तुमशक्नुवन्नपि 'शिथिलभावो' मन्दादरः सन् । स हि किल व्रताप्राप्तावपि कल्याणमवाप्नोति, वसुश्रेष्ठिसुतसिद्धवत् १७ ॥

तथा हि—

तगराए वसुसेट्ठी सेणो सिद्धो य तस्स दो पुत्ता । पयइविणीया भद्दा पियंवया धम्मतिसिया य ॥ १ ॥ सेणो सोउं धम्मं पवइओ सीलचंदगुरुमूले । चरणकरणेसु नवरं पमायसीलो दढं जाओ ॥ २ ॥ सिद्धो पुण मुणिकिरियं अंगीकाउं

कहं पवायंतो । सुद्धसमणत्तकामी परिकम्मइ निच्चमप्पाणं ॥ ३ ॥ चिंतेइ मए सम्मं कायव्वो संजमो गुरुसमीवे । दमिऊण इंदियाइं अंगंपि बहुक्खमं काउं ॥४॥ जइ कहवि पवन्नवओ इंदियविसएहिं वाहिणो होक्खं। फालं च चुओ तो मक्कडो व दुहिओ भविस्सामि ॥५॥ ता सुद्धसाहुधम्मं कइया पावेज्ज एस मह जीवो । एवमणोरहगुरुरहआरूढमणो गमइ कालं ॥ ६ ॥ अह आगओ कयाई सेणो एयस्स दंसणनिमित्तं । उवविट्ठा गोट्ठीए अन्नोन्नं चोयणं दाउं ॥ ७ ॥ अह कम्मविहाणाओ विवाइया दोवि असणिपाएण । अच्चंतदुक्खिओ तो जाओ जणओ परियणो य ॥ ८ ॥ तत्थन्नया महप्पा जुगंधरो केवली समोसरिओ । पुट्ठो गईविसेसं वसुणा सो निययपुत्ताणं ॥ ९ ॥ केवलिणा सिट्ठं से सिद्धो सोहम्मकप्पमणुपत्तो। सेणो पुणो महिड्ढी वंतरदेवो समुप्पन्नो ॥१०॥ कारणमिह सामन्ने सुद्धे सिद्धस्स आसि करणिच्छा। इयरेण उ सामन्नं गहियंपि न पालियं सम्मं ॥११॥ इय नाउं परमत्थं सामन्नमणोरहे अमुंचंतो। गिहवासेवि सुसड्ढो वसेज्ज मंदायरो गेहे ॥१२॥

आह स्त्रीन्द्रियविषयाणामरक्तद्विष्टमध्यस्थासंबद्धानां गेहगेहवासयोश्चैकविषयत्वादर्थभेदो नोपलभ्यते, तत्कथं न पुनरुक्तदोषः ? इति सत्यम्, देशविरतेश्चित्ररूपत्वादेकस्मिन्नपि विषये परिणामनानात्वम् । एकस्यापि परिणामस्य विषयभेदोऽपि संभवतीति सर्वभेदनिषेधार्थत्वात्प्रपञ्चस्य न पौनरुक्त्यमिति व्याख्यानगाथाभिः प्रकाशितमेव, अतः सूक्ष्मधियाऽऽलोच्य समाधानं विधेयम् । इति गाथासप्तदशकार्थः ॥ ७६ ॥

अथ प्रकृतप्रकरणमुपसंहरन्, प्रकरणान्तरं संबन्धयन्नाह—

इय सतरसगुणजुत्तो जिणागमे भावसावगो भणिओ । एस उण कुसलजोगा लहइ लहु भावसाहुत्तं ॥७७॥

'इति' उक्तप्रकारेण सप्तदशगुणयुक्तो जिनागमे भावश्रावको भणित इति प्रकटार्थम्। 'एषः' एवंविधः 'पुनः' शब्दो विशेषणार्थः। किं विशिनष्टि? द्रव्यसाधुस्तावदेष भणित एवागमे। यदुक्तम्—"मिउपिंडो दव्वघडो सुसावओ तह य दव्वसाहुत्ति। साहू य दव्वदेवो सुद्धनयाणं तु सव्वेसिं॥ १॥" एवंविधः परिणामोपार्जितकुशलयोगात्पुनः 'लभते' अवाप्नोति 'लघु' शीघ्रं 'भावसाधुत्वं' यथाऽवस्थितयतित्वम्। इति गाथार्थः॥ ७७॥

कीदृशः पुनर्भावसाधुर्भवतीत्युच्यते—"निर्वाणसाधकान् योगान् यस्मात् साधयतेऽनिशम्। समश्च सर्वभूतेषु तस्मात्साधुरुदाहृतः॥ १॥ क्षान्त्यादिगुणसंपन्नो मैत्र्यादिगुणभूषितः। अप्रमादी सदाचारे भावसाधुः प्रकीर्त्तितः॥ २॥" स कथं छद्मस्थैः प्रत्यभिज्ञायते? लिङ्गैः, कानि पुनस्तानि? इत्याह—

एयस्स उ लिंगाइं सयला मग्गाणुसारिणी किरिया[१]। सद्धा पवरा धम्मे पन्नवणिज्जत्तमुजुभावा[३]॥ ७८॥

किरियासु अप्पमाओ आरंभो सक्कणिज्जणुट्ठाणे[५]। गुरुओ गुणाणुराओ गुरुआणाराहणं परमं[६]॥ ७९॥

द्वारगाथाद्वयम्। अस्य व्याख्या—'एतस्य' पुनर्भावसाधोः 'लिङ्गानि' चिह्नानि 'सकला' समस्ता 'मार्गानुसारिणी' मोक्षाध्वानुपातिनी 'क्रिया' चेष्टा प्रत्युपेक्षणादिका १। तथा 'श्रद्धा' वाञ्छा 'प्रवरा' प्रधाना 'धर्मे' संयमविषये २। तथा 'प्रज्ञापनीयत्वं' सद्बोधलम्पटत्वं 'ऋजुभावात्' अकौटिल्येन ३॥ ७८॥ तथा 'क्रियासु' विहितानुष्ठानेषु 'अप्रमादः' अशैथिल्यम् ४। तथा 'आरम्भः' प्रवृत्तिः 'शकनीये' शक्त्यनुरूपे 'अनुष्ठाने' तपश्चरणादौ ५। तथा 'गुरुः' महान् 'गुणानुरागः' गुणपक्षपातः ६। तथा 'गुर्वाज्ञाराधनं' आचार्यादेशवर्त्तित्वं 'परमं' सर्वगुणप्रधानम् ७। इति सप्त लक्षणानि भावसाधोः।

इति गाथाद्वयसमासार्थः ॥ ७९ ॥

व्यासार्थस्तु सूत्रकारः स्वयमेवाह—

मग्गो आगमनीई अहवा संविग्गबहुजणाइन्नं। उभयाणुसारिणी जा सा मग्गणुसारिणी किरिया ॥ ८० ॥

मृग्यतेऽन्विष्यतेऽभिमतस्थानावाप्तये पुरुषैर्यः स 'मार्गः' । स च द्रव्यभावभेदाद्द्वेधा । द्रव्यमार्गो ग्रामादेः । भावमार्गो मुक्तिपुरस्य । सम्यग्ज्ञान (दर्शन) चारित्ररूपः, क्षायोपशमिकभावरूपो वा तेनेहाधिकारः । स पुनः कारणे कार्योपचारात् 'आगमनीतिः' सिद्धान्तभणिताचारः । अथवा संविग्नबहुजनाचीर्णमिति द्विरूपोऽवगन्तव्य इति। तत्रागमो वीतरागवचनम् । उक्तं च—"आगमो ह्याप्तवचनमाप्तं दोषक्षयाद्विदुः । वीतरागोऽनृतं वाक्यं न ब्रूयाद्धेत्वसंभवात् ॥ १ ॥" तस्य नीतिरुत्सर्गापवादरूपः, शुद्धसंयमोपायः स मार्गः । उक्तं च—"यस्मात्प्रवर्त्तकं भुवि निवर्त्तकं चान्तरात्मनो वचनम् । धर्मश्चैतत्संस्थो मौनीन्द्रं चैतदिह परमम् ॥ १ ॥ अस्मिन् हृदयस्थे सति हृदयस्थस्तत्त्वतो मुनीन्द्र इति । हृदयस्थिते च तस्मिन्नियमात् सर्वार्थसंसिद्धिः ॥ २ ॥" तथा संविग्ना मोक्षाभिलाषिणो ये बहवो जनाः, अर्थाद्गीतार्थाः, इतरेषां संवेगायोगात्, तैर्यदाचीर्णमनुष्ठितं क्रियारूपम् । इह च संविग्नग्रहणमसंविग्नानां बहूनामप्यप्रमाणतां दर्शयति । बहुजनग्रहणं त्संविग्नोऽप्येकोऽनाभोगाऽनवबोधादिभिर्वितथमप्याचरेत् । ततः सोऽपि न प्रमाणमित्यतः संविग्नबहुजनाचरितं मार्गः । इत्यत एवाह—'उभयानुसारिणी' या आगमाबाधया संविग्नव्यवहाररूपा सा मार्गानुसारिणी क्रिया। इति गाथार्थः ॥८०॥

आह आगम एव मार्गो वक्तुं युक्तः । बहुजनाचीर्णस्य पुनर्मार्गीकरणमयुक्तं, शास्त्रान्तरविरोधात्; आगमस्य चाप्रमाण-

तापत्तेः । तथा हि—"बहुजणपवित्तिमेत्तं इच्छंतेहिं इह लोइओ चेव । धम्मो न उज्झियव्वो जेण तहिं बहुजणपवित्ती ॥१॥ ता आणाणुगयं जं तं चेव बुहेण होइ कायव्वं। किमिह बहुणा जणेणं हंदि ण सेयत्थिणो बहुया ॥२॥" तथा—"जेट्ठंमि विज्जमाणे उचिए अणुजेट्ठपूयणमजुत्तं । लोयाहरणंपि तहा पयडे भयवंतवयणंमि ॥ १ ॥" आगमस्तु केवलिनाऽपि नाप्रमाणीक्रियते । यतः—"ओहो सुओवउत्तो सुयनाणी जइवि गिण्हइ असुद्धं । तं केवलीवि भुंजइ अपमाणसुयं भवे इहरा ॥ १ ॥" आगमे सत्यप्याचरितस्य प्रमाणीकरणे तस्य लघुता स्फुटैवेति, नैतदेवम्, अस्य सूत्रस्य शास्त्रान्तराणां च विषयविभागापरिज्ञानात्। तथा हि—इह सूत्रे संविग्नगीतार्था आगमनिरपेक्षं नाचरन्ति। किं तर्हि?—"दोसा जेण निरुब्भंति जेण खिज्जंति पुव्वकम्माइं । सो सो मोक्खोवाओ रोगावत्थासु समणं व ॥ १ ॥" इत्याद्यागमं स्मरन्तो द्रव्यक्षेत्रकालभावपुरुषाद्यौचित्यमालोच्य संयमवृद्धिकार्येव किञ्चिदाचरन्ति, तच्चान्येऽपि संविग्नगीतार्थाः प्रमाणयन्तीति स मार्गोऽभिधीयते । भवदुच्चारितशास्त्रान्तराणि पुनरसंविग्नागीतार्थलोकमसमञ्जसप्रवृत्तिमाश्रित्य प्रवृत्तानि, ततः कथं तैः सह विरोधसंभवः? तथाऽऽगमस्यापि नाप्रमाणतापत्तिः,अपि तु सुष्ठुतरं प्रतिष्ठा, यस्मादागमोऽप्यागमश्रुताज्ञाधारणाजीतभेदात् पञ्चधा व्यवहारः प्ररूप्यते। यत उक्तं स्थानाङ्गे—"पंचविहे ववहारे पन्नत्ते। तंजहा—आगमववहारे १,सुयववहारे २,आणाववहारे ३, धारणाववहारे ४, जीयववहारे ५॥" जीताचरितयोश्चानर्थान्तरत्वादाचरितस्य प्रमाणत्वे सुतरामागमस्य प्रतिष्ठासिद्धिः । ये पुनर्मोहान्धा गीतार्थाचरितं मार्गमितरजनाचरितानि निदर्शनीकृत्य निर्लोठयन्ति ते वराका वयमागमरुचयः, इति मृषैवोद्घोषयन्ति । यत उक्तम्—"मूढा अणाइमोहा तब्भत्तामोत्ति तं कयत्थंता। तं चेव उ मन्नंता अवमन्नंता न याणंति॥ १॥"

तस्मादागमाविरुद्धमाचरितं प्रमाणमिति स्थितम् ॥

अन्नह भणियंपि सुए किंची कालाइकारणावेक्खं । आइन्नमन्नह च्चिय दीसइ संविग्गगीएहिं ॥ ८१ ॥

'अन्यथा' प्रकारान्तरेण 'भणितम्' उक्तमपि 'श्रुते' पारगतागमे 'किञ्चिद्' वस्तु 'कालादिकारणापेक्षं' दुष्षमादिस्वरूपालोचनपूर्वकं 'आचीर्णं' व्यवहृतमन्यथैव, चियशब्दस्यावधारणार्थत्वात् । 'दृश्यते' साक्षादुपलभ्यते 'संविग्नगीतार्थैः' उक्तस्वरूपैः । इति गाथार्थः ॥ ८१ ॥

किं तद् ? इत्याह—

कप्पाणं पाउरणं अग्गोयरचाय झोलियाभिक्खा । ओवग्गहियकडाहयतुंबयमुहदाणदोराई ॥ ८२ ॥

'कल्पानां' आगमप्रतीतानां 'प्रावरणं' परितो वेष्टनं प्रतीतमेव । ते हि किल कारणव्यतिरेकेण भिक्षाचर्यादौ गच्छता संवृत्ताः स्कन्धगता एव वोढव्या इत्यागमाचारः । संप्रति प्राव्रियन्ते—'अग्गोयर' इति अग्रावतारः परिधानविशेषः साधुजनप्रतीतस्तस्य त्यागः कटीपट्टकस्यान्यथाकरणम् । तथा 'झोलिका' बाहुलम्बमानपात्रबन्धपात्रकरणरूपा, तया 'भिक्षा' सा हि किल बाहूपरिधृतभाजनैर्विधेयेत्यागमः । तथा औपग्रहिककटाहकतुम्बकमुखदानदवरकादयोऽपि सुविदिता एव साधूनामाचरिताः संप्रतीति गम्यते । इति गाथार्थः ॥ ८२ ॥

तथा—

सिक्किगनिक्खिवणाई पज्जोसवणाइतिहिपरावत्तो । भोयणविहिअन्नत्तं एमाई विविहमन्नंपि ॥ ८३ ॥

सिक्किको दवरकरचितो भाजनाधारविशेषः, तत्र निक्षेपणं बन्धनमर्थात् पात्राणाम्, आदिशब्दात् पटलकपात्रकेसरिकादिधारणम्, युक्तिलेपेन पात्रलेपनम्। तथा 'पर्युषणादितिथिपरावर्त्तः' पर्युषणासांवत्सरिकम्, आदिशब्दाच्चतुर्मासकम्, केषांचिन्मतेन पाक्षिकमपि गृह्यते,तेषां तिथिपरावर्त्तस्तिथ्यन्तरकरणं,सुप्रतीतमेतत्। तथा 'भोजनविधेरन्यत्वं' यतीनां प्रतीतम्। अन्येषां तु न व्याख्येयमेव, गुप्तस्यैवागमे तस्य विधानात्। आह च—"छक्कायदयावंतोवि संजओ दुलहं कुणइ बोहिं। आहारे नीहारे दुगंच्छिए पिंडगहणे य॥ १॥" 'एमाई' इति प्राकृतशैल्या, एवंशब्दवकारलोपात्। एवमादिग्रहणेन मन्दमेधसः पुरुषान् वाचनया ग्रहणधारणाऽसमर्थानवबुद्ध्य पट्टिकापठनप्रवृत्तिः, किञ्चित् संयमविरोधेऽपि सिद्धान्तस्य पुस्तकेष्वारोपणम्, कवलिकादिधारणं च प्रवचनाव्यवच्छित्तये गीतार्थप्रणीतं गृह्यते। त्रिविधमन्यदप्याचरितं प्रमाणभूतमस्तीति। तथा च व्यवहारभाष्यम्—"सत्थपरिन्ना छक्कायसंजमो पिंडउत्तरज्झाये। रुक्खे वसहे गोवे जोहे सोही य पुक्खरिणी॥ १॥" अयमर्थः—शस्त्रपरिज्ञाध्ययने सूत्रतोऽर्थतश्चावगते भिक्षुरुत्थापनीयः, इत्यागममुद्रा। जीतं पुनः षट्कायसंयमे दशवैकालिकषड्जीवनिकाध्ययने ज्ञाते भिक्षुरुत्थाप्यते। तथा पिण्डेषणायां पठितायामुत्तराध्ययनान्यधीयन्ते स्म, संप्रति तान्यधीत्याचार उद्दिश्यते। पूर्वं कल्पवृक्षा लोकस्य शरीरस्थितिहेतवोऽभूवन्, इदानीं सहकारकरीरादिभिर्व्यवहारः। तथा वृषभाः पूर्वमतुलबला धवलवृषभा बभूवुः, संप्रति धूसरैरपि लोको व्यवहरति। तथा गोपाः कर्षकाश्चक्रवर्त्तिगृहपतिरत्नवत्तद्दिन एव धान्यनिष्पादका बभूवुः, संप्रति तादृगभावेऽपीतरकर्षकैर्लोको निर्वहति। तथा पूर्वं योधाः सहस्रयोधादयोऽभूवन्, संप्रत्यल्पबलपराक्रमैरपि राजानः शत्रूनाक्रम्य राज्यमनुपालयन्ति। तद्वत्साधवोऽपि

जीतव्यवहारेणापि संयममाराधयन्ति, इत्युपनयः । तथा शोधिः प्रायश्चित्तं षाण्मासिकायामप्यापत्तौ जीतव्यवहारे द्वादशकेन निरूपितेति । पुष्करिण्योऽपि प्राक्तनीभ्यो हीना अपि लोकोपकारिण्य एवेति दार्ष्टान्तिकयोजना पूर्ववत् । एवमनेकधा जीतमुपलभ्यते । इति गाथार्थः ॥ ८३ ॥

अथवा किं बहुना—

जं सवहा न सुत्ते पडिसिद्धं नेय जीववहहेऊ । तं सव्वंपि पमाणं चारित्तधणाण भणियं च ॥ ८४ ॥

'यद्' वस्तु 'सर्वथा' सकलप्रकारैः नैव 'सूत्रे' सिद्धान्ते 'प्रतिषिद्धं' निवारितं, मैथुनसङ्गवत् । उक्तं च—"न य किंचि अणुन्नायं पडिसिद्धं वावि जिणवरिंदेहिं । मोत्तुं मेहुणभावं न तं विणा रागदोसेहिं ॥ १ ॥" नापि 'जीववधहेतुः' आधाकर्मग्रहणवत् । 'तद्' जीतानुष्ठानं सर्वमपि प्रमाणम् । चारित्रमेव धनं येषां तेषां ('चारित्रधनानां') चारित्रिणामागमानुज्ञातत्वात् 'भणितं' उक्तं चागमे । इति गाथार्थः ॥ ८४ ॥

यद्भणितं तदेवाह—

अवलंबिऊण कज्जं जं किंपि समायरंति गीयत्था । थेवावराह बहुगुण सव्वेसिं तं पमाणं तु ॥ ८५ ॥

'अवलम्ब्य' आश्रित्य 'कार्यं' संयमोपकारि यत्किमपि 'आचरन्ति' आसेवन्ते 'गीतार्थाः' विदितागमतत्त्वाः । 'स्तोकापराधं' अल्पदोषं, 'बहुगुणं' बहूनामुपकारकारि, सर्वेषामपि चारित्रिणां तत्प्रमाणमेव । तुशब्दस्यावधारणार्थत्वात् । इत्यागमगाथार्थः ॥ ८५ ॥

अत्र कश्चित्कुटिल एवमाह—नन्वेवमाचरिते युष्माभिः प्रमाणीकृतेऽस्माकं पितृपितामहादयो नानारम्भमिथ्यात्वक्रियाप्रवृत्तयोऽभूवन्, अतोऽस्माकमपि तथैव वर्त्तितुमुचितम् ? इत्यत्रोच्यते, सौम्य ! मार्गेणापि नीयमानो मो उन्मार्गेण गमः, यतोऽस्माभिः संविग्नाचरितमेव स्थापितं, न सर्वपूर्वपूरुषाचरितमित्युन्मत्त इव प्रलपति भवानिति । अत एवाह—

जं पुण पमायरूवं गुरुलाघवचिंतविरहियं सवहं । सुहसीलसढाइन्नं चरित्तिणो तं न सेवंति ॥ ८६ ॥

'यत्पुनः' आचरितं 'प्रमादरूपं' संयमबाधकत्वात्, अत एव 'गुरुलाघवचिंताविरहितं' सगुणमिदमपगुणं चेति पर्यालोचवर्जितं, अत एव 'सवधं' यतनाभावात् । 'सुखशीलाः' इहलोकप्रतिबद्धाः, 'शठाः' मिथ्यालम्बनप्रधानाः, तैराचीर्णमाचरितम्, 'चारित्रिणः' शुद्धचारित्रवन्तः 'तन्न सेवन्ते' नानुतिष्ठन्ति । इति गाथार्थः ॥ ८६ ॥

अस्यैवोल्लेखं दर्शयन्नाह—

जह सड्ढेसु ममत्तं राढाए असुद्धउवहिभत्ताई । निद्देज्जवसहितूलीमसूरिगाईण परिभोगो ॥ ८७ ॥

'यथा' इत्युपदर्शने, 'श्राद्धेषु' श्रावकेषु 'ममत्वं' ममीकारं, मदीयोऽयं श्रावकः, इति गाढाग्रहम् ।—"गामे कुले वा नगरे व देसे ममत्तभावं न कहिंचि कुज्जा ॥" इत्यागमनिषिद्धमपि केचित् कुर्वन्ति । तथा 'राढया' शरीरशोभाकाम्यया 'अशुद्धोपधिभक्तादीनि' केचिद्गृह्णन्ति, तत्राशुद्धान्युद्गमादिदोषदुष्टानि, उपधिर्वस्त्रपात्रादिः, भक्तमशनं, आदिशब्दादुपाश्रयः, एतान्यप्यागमे निषिद्धानि । यत एवमार्षम्—"पिंडं सेज्जं च वत्थं च चउत्थं पायमेव य । अकप्पियं न इच्छेज्जा पडिगाहेज्ज कप्पियं ॥ १ ॥" इह च राढाग्रहणं पुष्टालम्बनेन दुर्भिक्षाक्षेमादौ यतनयाऽशुद्धमपि गृह्णतो न दोषः, इति

ज्ञापनार्थम्। यतोऽभाणि पिण्डनिर्युक्तौ—"एसो आहारविही जह भणिओ सव्वभावदंसीहिं धम्मावस्सगजोगा जेण न हायंति तं कुज्जा ॥ १ ॥" तथा—"कारणपडिसेवा पुण भावेणासेवणत्ति दट्ठव्वा। आणाए तीए भावे सो सुद्धो मोक्खहेउत्ति ॥ १ ॥" तथा 'निद्देज्ज' इति पत्रलेखनेनाचन्द्रकालिकं प्रदत्ता वसतिर्गृहम्, एषाऽपि साधूनामकल्पनीया, अनगारत्वहानेर्भग्नसंस्थापनादौ कायवधसंभवात्। पठ्यते च—"अविकत्तिऊण जीवे कत्तो घरसरणगुत्तिसंठप्पं। अविकत्तिया य तं तह पडिआ अस्संजयाण पहे ॥ १ ॥" तत्तद्ग्रहणमप्येकैराचर्यते। तथा तूलीमसूरकादीनामपि परिभोगः कैश्चिद्विधीयते। तत्र तूलीमसूरके प्रतीते, आदिशब्दात्कांस्यताम्रपात्रादिपरिग्रहः, एतान्यपि यतीनां न कल्पन्ते। यतोऽभाणि—"अज्जीवेहिवि जेहिं गहिएहि असंजमो न ते गिण्हे। जह पोत्थदूसपणए तणपणए चम्मपणए य ॥१॥ गंडी कच्छवि मुट्ठी संपुडफलए तहा छिवाडी य। एयं पोत्थयपणयं पन्नत्तं वीयरागेहिं ॥२॥ बाहल्लपुहत्तेहिं गंडी पोत्थो उ तुल्लगो दीहो कच्छवि अंते तणुओ मज्झे पिहुलो मुणेयव्वो ॥ ३ ॥ चउरंगुल दीहो वा वट्टागिइ मुट्ठिपोत्थगो अहवा। चउरंगुलदीहो च्चिय चउरंसो होइ विन्नेओ ॥ ४ ॥ संपुडगो दुगमाई फलगावोच्छं छिवाडिमेत्ताहे। तणुपत्तूसियरूवो होइ छिवाडी बुहा बेंति ॥५॥ दीहो वा हस्सो वा जो पिहुलो होइ अप्पबाहल्लो। तं मुणियसमयसारा छिवाडिपोत्थं भणंतीह ॥ ६ ॥ दुविहं च दूषपणगं समासओ तंपि होइ नायव्वं। अप्पडिलेहियदूसं दुप्पडिलेहं च विन्नेयं ॥७॥ अप्पडिलेहियदूसे तूली उवहाणगं च नायव्वं। गंडुवहाणालिंगिणिमसूरए चेव पोत्तमए ॥ ८ ॥ पल्हवि कोयवि पावार नवयए तह य दाढीयाली य। दुप्पडिलेहियदूसे एयं बीयं भवे पणगं ॥९॥ पल्हवि हत्थुत्थरणं कोयवओ रूयपूरिओ पडओ। दढियालि धोयपोत्ती सेसपसिद्धा भवे भेया

॥ १० ॥ तणपणगं पुण भणियं जिणेहि दुट्ठट्ठकम्ममहणेहिं। सालीवीहीकोद्दवरालयरन्ने तणाइं च ॥११॥ अयएलगाविमहिसी मईणमजिणं तु पंचमं होइ। तलिगाखल्लगवद्धे कोसगकत्तीयवीएण ॥ १२ ॥ तह वियडहिरण्णाईयाइं न गिण्हइ असंजमो माहु। सुयपडिकुट्ठं सव्वं न हु कप्पइ चरणजुत्ताणं ॥ १३ ॥ जाईफलपूगाई साहूण अकप्पिया अचित्ताविं। रागंगं जेण भवे न तेसि दाणं न वा गहणं ॥ १४ ॥" ॥ ८७ ॥

अथ प्रस्तुतमुपसंहरन्नाह—

इच्चाई असमंजसमणेगहा खुद्दचिट्ठियं लोए। बहुएहिवि आयरियं न पमाणं सुद्धचरणाणं ॥८८॥

'इत्यादि' एवंप्रकारं 'असमञ्जसं' वक्तुमप्यनुचितं शिष्टानाम्, 'अनेकधा' अनेकप्रकारं क्षुद्राणां तुच्छसत्त्वानां चेष्टितमाचरितं 'लोके' लिङ्गिजने 'बहुभिरपि' अनेकैरप्याचीर्णं 'न प्रमाणं' नालम्बनहेतुः 'शुद्धचरणानां' निष्कलङ्कचारित्रिणाम्। अप्रमाणता चास्यागमनिषिद्धत्वात्, संयमविरुद्धत्वात्, अकारणप्रवृत्तत्वाच्च सम्यगालोचनीया। इति गाथार्थः ॥ ८८ ॥

एवमानुषङ्गिकमभिधाय प्रस्तुतोपसंहारमाह—

गीयत्थपारतंता इय दुविहं मग्गमणुस्सरंतस्स। भावजइत्तं जुत्तं दुप्पसहंतं जओ चरणं ॥८९॥

'गीतार्थपारतन्त्र्यात्' आगमविदाज्ञया 'इति' उक्तनीत्या 'द्विविधं' द्विप्रकारं 'मार्गमनुसरतः' तदनुसारेण व्यवहरतः साधोरिति गम्यते, 'भावयतित्वं' सुसाधुत्वं 'युक्तं' उचितं वक्तुमिति शेषः। किम्? इत्यत आह—'दुष्प्रसहान्तं' दुष्प्रसहाचार्यपर्यन्तं 'यतः' यस्मात् 'चरणं' चारित्रमागमे श्रूयत इति शेषः। अयमभिप्रायः—यद्येवंविधाः

सद्भावसारं यतमानाश्चारित्रिणो नाभ्युपगम्यन्ते, ततस्तदन्येषामनुपलम्भाद्व्यवच्छिन्नं चारित्रम्; तद्व्यवच्छेदात्तीर्थं चेत्यायातम्। एतच्च प्रत्यक्षीभूतभूतभवद्भाविभावस्वभावस्य भगवतो महावीरस्य वचसा सह विरुद्धमिति न प्रेक्षापूर्वकारिणः प्रतिपद्यन्ते। यतो व्यवहारभाष्यम्—" केसिं चिय आएसो दंसणनाणेहि वट्टए तित्थं वोच्छिन्नं च चरित्तं वयमाणे भारिया चउरो ॥ १ ॥ जो भणइ नत्थि धम्मो न य सामइयं न चेव य वयाइं। सो समणसंघवज्झो कायवो सवसंघेण[1] ॥ २ ॥ " इत्याद्यागमप्रामाण्याज्जीतव्यवहारिणः सुसाधव इति स्थितम् १ ॥ ८९ ॥

उक्तं प्रथमं भावसाधुलिङ्गम्। अधुना द्वितीयमाह—

सद्धा तिवभिलासो धम्मे पवरत्तणं इमं तीसे। विहिसेवे[1] अतित्ती[2] सुद्धदेसणा[3] खलियपरिसुद्धी[4] ॥९०॥

श्रद्धा प्रवरा धर्मे इति द्वितीयं लिङ्गमुक्तम्। तत्र श्रद्धा तीव्रः पटुरभिलाषः कर्मक्षयोपशमसज्ज्ञानप्रभवः। न पुनर्विषयप्रतिभासमात्रं, बालस्य रत्नग्रहाभिलाषवत्। 'धर्मे' श्रुतचारित्ररूपे 'प्रवरत्वं' प्रधानत्वं विशेषणीकृतं 'इदं' वक्ष्यमाणं 'तस्याः' श्रद्धायाः फलभूतम्। तद्यथा—विधिसेवा १ अतृप्तिः २ शुद्धदेशना ३ स्खलितपरिशुद्धिः ४ इति लिङ्गानि श्रद्धायाः प्रवरत्वस्य। इति गाथार्थः ॥ ९० ॥

एतान्येव प्रत्येकं विभावयिषुर्विधिसेवामधिकृत्याह—

विहिसारं चिय सेवइ सद्धालू सत्तिमं अणुट्ठाणं। दवाइदोपनिहओवि पक्खवायं वहइ तम्मि ॥९१॥

१ अन्यत्र " समणसंघेण " इत्युपलभ्यते ॥

'विधिसारं' विधिप्रधानमेव 'सेवते' अनुतिष्ठति 'श्रद्धालुः' श्रद्धागुणवान् 'शक्तिमान्' सामर्थ्योपेतः सन् 'अनुष्ठानं' प्रत्युपेक्षणैषणादिकं कृत्यं, श्रद्धालुत्वस्यान्यथानुपपत्तेः। यदि पुनः शक्तिमान्न स्यात्ततः का वार्त्ता? इत्याह—द्रव्याण्याहारादीनि, आदिशब्दात् क्षेत्रकालभावाः परिगृह्यन्ते, तेषां दोषः प्रतिकूलता, तेन निहतोऽपि गाढपीडितोऽपि 'पक्षपातं' भावप्रतिबन्धं 'वहति' धारयति 'तस्मिन्नेव' विध्यनुष्ठान एव साधारणत्वाद्वाक्यस्य। इति गाथार्थः ॥ ९१ ॥

कथं पुनरनुष्ठानाभावे पक्षपातसंभवः? इत्याह—

निरुओ भोज्जरसन्नू कंवि अवत्थं गओ असुहमन्नं। भुंजं न तंमि रज्जइ सुहभोयणलालसो धणियं ॥९२॥

'नीरुजो' ज्वरादिरुजा रहितो भोज्यानि खण्डखाद्यादीनि, तेषां रसमास्वादविशेषं जानातीति 'भोज्यरसज्ञः' 'कामप्यवस्थां' दुष्कालदारिद्र्यादिजनितां 'गतः' प्राप्तः सन् 'अशुभं' अनिष्टं 'अन्नं' भोजनं भुञ्जानो न 'तस्मिन्' अशुभान्ने 'रज्यति' गृद्धिमुपैति। तथा हि संभवत्येवैतत्—"सुहभत्तलालिओवि हु दुकालदालिद्दभिहुओ पुरिसो। भक्कडयभुरुट्टाई भुंजइ तह कंडुयं कंटिं ॥ १ ॥ कडुयरसं च गुयारं अरणिदलाई कुडिंझराईयं। भुंजइ जणो छुहंतो तरुछल्लीहिलिझिलाई ॥ २ ॥" न चासौ गृद्धिमाधत्ते, अपि तु 'शुभभोजनलालसः' विशिष्टाहारलम्पट एव भवति। लङ्घयाम्येतां कुदशां, ततः सुभिक्षमवाप्य पुनरपि शोभनाहारं भोक्ष्ये, इति मनोरथवानिति। 'धणयं' इति बाढम्। इति गाथार्थः ॥ ९२ ॥

एवं दृष्टान्तः, अधुना दार्ष्टान्तिकयोजनामाह—

इय सुद्धचरणरसिओ सेवंतो दव्वओ विरुद्धंपि। सद्धागुणेण एसो न भावचरणं अइक्कमइ ॥ ९३ ॥

'इय' शब्दः प्राकृत एवंकारार्थो दृश्यते । तत एवं कुभक्तभोगदृष्टान्तेन 'शुद्धचरणरसिकः' निष्कलङ्कसंयमपालनोत्साहवान् 'सेवमानः' द्रव्यतो वाह्यवृत्त्या 'विरुद्धं' अकल्पनीयमौषधपथ्यादि, 'अपि' शब्दाद्वैयावृत्त्यादिकं चाकुर्वन् 'श्रद्धागुणेन' संयमाराधनलाम्पट्यपरिणामेन (एसो 'न') नैव भावचरणं 'अतिक्रामति' अतिचरति । उक्तं च—"दव्वाइया न पायं सोहणभावस्स हुंति विग्घकरा । वज्झकिरिया य उ तहा हवंति लोए विसिद्धमिणं ॥ १ ॥ दइयाकन्दुप्पलताडणं व सुहडस्स निव्वुइं कुणइ । पहुआणाए संपत्थियस्स कंडंपि लग्गंतं ॥ २ ॥ जह चेव सदेसम्मि तह परदेसेवि हंदि धीराणं । सत्तं न चलइ समुवत्थियंमि कज्जंमि पुरिसाणं ॥ ३ ॥ कालोवि हु दुब्भिक्खाइलक्खणो न खलु दाणसूराणं । भिंदइ आसयरयणं अवि अहिययरं विसोहेइ ॥ ४ ॥ एवं चिय भवस्सवि चरित्तिणो नहि महाणुभावस्स । सुहसामायारिगओ भावो परियत्तइ कयाइ ॥५॥" भावश्च क्रियातो महानेव यतोऽवाचि—"क्रियाशून्यश्च यो भावो भावशून्या च या क्रिया । अनयोरन्तरं दृष्टं भानुखद्योतयोरिव ॥ १ ॥ जो होज्ज उ असमत्थो रोगेण व पेल्लिओ झुरियदेहो । सव्वमवि जहाभणियं कयाइ न तरिज्ज काउं जो ॥ २ ॥ सोवि य नियपरक्कमववसायधिइबलं अगूहंतो । मोत्तूण कूडचरियं जइ जयई तो अवस्स जई ॥ ३ ॥" ९३ ॥

उक्ता विधिसेवा । संप्रत्यतृप्तिस्वरूपमाह—

तित्तिं न चेव विंदइ सद्धाजोगेण नाणचरणेसु । वेयावच्चतवाईसु जहविरियं भावओ जयइ ॥ ९४ ॥

'तृप्तिं' सन्तोषं, कृतकृत्योऽहमेतावतैव, इत्येवंरूपां 'न चैव' इति चशब्दस्य पूरणत्वान्नैव 'विन्दति' प्राप्नोति श्रद्धाय

१ "जई जयंतो अवस्स जई" इत्यपि ॥

योगेन संबन्धेन ज्ञानचरणयोर्विषये ज्ञाने पठितं यावता संयमानुष्ठानं निर्वहतीति संचिन्त्य न तद्विषये प्रमाद्यति । किं तर्हि ? नवनवश्रुतसंपदुपार्जनोत्साहं न मुञ्चति। यदुक्तम्—"जह जह सुयमवगाहइ अइसयरसपसरसंजुयमउव्वं। तह तह पल्हाइ मुणी नवनवसंवेगसद्धाए ॥ १ ॥ अपुव्वनाणगहणा निच्चब्भासेण केवलुप्पत्ती । भणिया सुयंमि तम्हा एयंमि महायरो जुत्तो ॥ २ ॥" तथा—"अत्थो जस्स जिणुत्तमेहि भणिओ जायंमि मोहक्खए बद्धं गोयममाइएहि सुमहाबुद्धीहि जं सुत्तओ । संवेगाइगुणाण वुड्ढिजणणं तित्थेसनामावहं कायव्वं विहिणा सया नवनवं नाणस्स तस्सज्जणं ॥ १ ॥ तथा चारित्रविषये विशुद्धविशुद्धतरसंयमस्थानावाप्तये सद्भावनासारं सर्वमनुष्ठानमुपयुक्त एवानुतिष्ठति । यस्मादप्रमादकृताः सर्वेऽपि साधुव्यापारा उत्तरोत्तरसंयमकण्डकारोहणेन केवलज्ञानलाभाय भवन्ति । तथा चागमः—"जोगे जोगे जिणसासणंमि दुक्खक्खया पउज्जंते । एक्केक्कंमि अणंता वट्टंता केवली जाया ॥ १ ॥" तथा वैयावृत्यतपसी प्रतीते, आदिशब्दात्प्रत्युपेक्षणाप्रमार्जनादिपरिग्रहः, तेषु 'यथावीर्यं' सामर्थ्यानुरूपं 'भावतः' सद्भावसारं 'यतते' प्रयत्नवान् भवतीति । अयमत्र भावः—वैयावृत्त्यतपसोरपि तृप्तिं न मुञ्चति । भावयति च—"भरहो बाहुबलीवि य दसारकुलनंदणो य वसुदेवो । वेयावच्चाहरणा तम्हा पडितप्पह जईणं ॥ १ ॥ कम्ममसंखेज्जभवं खवेइ अणुसमयमेव उवउत्तो । अन्नयरंमिवि जोगे वेयावच्चे विसेसेण ॥ २ ॥" तपोविषयेऽपि भावयति—"सव्वासिं पयडीणं परिणामवसादुवक्कमो होइ । पायमनिकाइयाणं तवसा उ निकाइयाणंपि ॥ १ ॥ नयति जलधेस्तीरं नो वा नवाऽपि हि नौः श्रिता शमयति न वा भोगो रोगं प्रसिद्ध-

महौषधिः । जनयति सुखं नो वा लक्ष्मीर्नरस्य गृहागता जिनवरतपस्त्वेकान्तेन क्षिणोत्यशुभोच्चयम् ॥ २ ॥" इत्यादि । इति गाथार्थः ॥ ९४ ॥

गदितमतृप्तिस्वरूपम् । अथ शुभदेशनामभिधित्सुस्तदधिकारिणमाह—

सुगुरुसमीवे सम्मं सिद्धंतपयाण मुणियतत्तत्थो । तयणुन्नाओ धन्नो मज्झत्थो देसणं कुणइ ॥ ९५ ॥

सुगुरोः संविग्नगीतार्थाचार्यस्य समीपे 'सम्यक्' पौर्वापर्यपर्यालोचनेन 'सिद्धान्तपदानां' आगमवाक्यानां पदार्थवाक्यार्थमहावाक्यार्थैदंपर्यार्थप्रकारेण 'मुणिततत्त्वार्थो' विज्ञातपरमार्थः । उक्तं च—"पयवक्कमहावक्कयअइदंपज्जत्थ एत्थ चत्तारि । सुयभावावगमंमी हंदि पगारा विनिद्दिट्ठा ॥ १ ॥ मंपुन्नेहिं जायइ सुयभावस्सवगमो इयरहा उ । होइ विवज्जा सोवि हु अणिट्ठफलओ य सो नियमा ॥ २ ॥" एवंविध एव देशनाधिकारी स्यात्, अन्यस्य[१] दोषसंभवः[२] । तथा चागमः—"सावज्जणवज्जाणं वयणाणं जो न याणइ विसेसं । वोत्तुंपि तस्स न खमं किमंग पुण देसणं काउं ॥ १ ॥" एवंविधोऽपि गुरुणाऽनुज्ञातो न स्वातन्त्र्येण मौखर्यास्थैर्यातिरेकात् । उक्तं च—"आचार्ये ब्रूयमाणे[३] यस्तिष्ठत्यन्तिकगोचरे । करोत्याचार्यकं मूढः शिष्यतां दूरमुत्सृजन् ॥ १ ॥ नासौ शिष्यो न वाचार्यो निर्धर्मः स कुमार्गगः । सर्वतो भ्रंशमायातः स्वाचारात्साधुनिन्दितः ॥ २ ॥" तस्माद्गुर्वनुज्ञातो 'धन्यो' धर्मधनार्हत्वात् 'मध्यस्थः' स्वपक्षपरपक्षयो रागद्वेषरहितः सद्भूतवादी 'देशनां' धर्मकथां करोति । इति गाथार्थः ॥ ९५ ॥

---

१ 'अदक्षस्य' इत्यपि । २ 'दोष संभवत्' इत्यपि । ३ 'भ्रियमाणे' इत्यपि ॥

तथा—

अवगयपत्तसरूवो तयणुग्गहहेउभाववुड्ढिकरं। सुत्तभणियं परूवइ वज्जंतो दूरमुम्मग्गं ॥ ९६ ॥

अवगतं सम्यगवबुद्धं पात्रस्य श्रावणीयस्य प्राणिनः स्वरूपमाशयो येन स तथा। तथा हि—बालमध्यमबुद्धिबुधभेदात्रिविधं पात्रं श्रावणीयं भवति। तत्र—"बालः पश्यति लिङ्गं मध्यमबुद्धिर्विचारयति वृत्तम्। आगमतत्त्वं तु बुधः परीक्षते सर्वयत्नेन ॥१॥" तेषां च देशनाविधिः—"बाह्यचरणप्रधाना कर्त्तव्या देशनेह बालस्य। स्वयमपि च तदाचारस्तदग्रतो नियमतः सेव्यः ॥ १ ॥ मध्यमबुद्धेस्त्वीर्यासमितिप्रभृतित्रिकोटिपरिशुद्धम्। आद्यन्तमध्ययोगैर्हितदं खलु साधुसद्वृत्तम् ॥ २ ॥" इत्यादि पात्रानुरूपां देशनां करोति।—"यद्भाषितं मुनीन्द्रैः पापं खलु देशना परस्थाने। उन्मार्गनयनमेतद्भवगहने दारुणविपाकम् ॥ १ ॥" इति ॥ अथवोत्सर्गप्रियमपवादप्रियं पारिणामिकं च पात्रं त्रिविधम्। इत्यादिपात्रस्वरूपमवगम्य श्रद्धावांस्तस्य पात्रस्यानुग्रहहेतुरुपकारकारी यो भावः शुभपरिणामस्तस्य वृद्धिकरम्। तदपि 'सूत्रभणितं' आगमोक्तं 'प्ररूपयति' व्याचष्टे, 'वर्जयन्' उत्सृजन् 'दूरं' यथाभवत्येवं 'उन्मार्गं' मोक्षप्रतीपां वर्त्तिनीम्। इति गाथार्थः ॥९६॥

आह देशना धर्मोपदेशः, स च समभावस्य साधोरविशेषेण दातुमुचितः, किं सामायिकबाधाविधायिनाऽतिसन्धानप्रायेण पात्रापात्रविचारेण ? इति नैतदस्ति, तदनुग्रहाय प्रवृत्तावतिसन्धानायोगात् संनिपातातुरस्य क्षीरखण्डादिनिषेधनतः क्वाथादिप्रदानवत्। अत एव सामायिकबाधाऽपि नास्ति, सर्वेष्वनुग्रहबुद्धेस्तुल्यत्वात्। अथवा सूत्रकार एव युक्त्यन्तरमाह—

सव्वंपि जओ दाणं दिन्नं पत्तंमि दायगाण हियं। इहरा अणत्थजणगं पहाणदाणं च सुयदाणं ॥ ९७॥

सर्वमपि यतो 'दानं' वितरणं 'दत्तं' वितीर्णं पात्रे 'सुपां सुपं' इति वचनात् 'पात्राय' उचितग्राहकाय ।—"जीवादि-पदार्थज्ञो यः समभावेन सर्वजीवानाम् । रक्षार्थमुद्यतमतिः स यतिः पात्रं भवति दातुः ॥ १ ॥" इत्याद्युमास्वातिवर्णिताय 'दायकानां' (दातॄणां) 'हितं' कल्याणकारि भवतीति गम्यते। 'इतरथा' कुपात्राय परिग्रहारम्भशक्ताय दत्तमिति प्रकृतम् ('अनर्थजनकं') अनर्थफलं स्यादिति शेषः। किं चातः प्रधानदानं च वर्त्तते, 'श्रुतदानं' देशनादिरूपम्। इति ॥९७॥

ततः किम् ? इत्याह—

सुट्ठुयरं च न देयं एयमपत्तंमि नायतत्तेहिं । इय देसणावि सुद्धा इहरा मिच्छत्तगमणाई ॥ ९८ ॥

'सुष्ठुतरं' अतिशयेन, चकारस्यावधारणार्थत्वात् । न देयमेवैतदपात्राय, सप्तम्याश्चतुर्थ्यर्थत्वात्, 'ज्ञाततत्त्वैः' विदितागमसद्भावैः । उक्तं च—"रत्तो दुट्ठो मूढो पुव्विं वुग्गाहिओ य चत्तारि । उवएसस्स अणरिहा अरिहो पुण होइ मज्झत्थो ॥ १ ॥" तथा—"ओहेणवि उवएसो आदेएणं विभागसो देओ । नाणाइ बुद्धिजणओ महुरगिराए विणीयस्स ॥ १ ॥" जओ—"अविणीयमाणविंतो किलिस्सई भासई मुसं तह य । घंटालोहं नाउं को कडकरणे पवत्तेज्जा ॥ १ ॥ जिणपन्नत्तं सुत्तं देज्ज विणीयस्स नाविणीयस्स । न हु दिज्जइ आभरणं पलिउंचिय कन्नहत्थस्स ॥२॥" इत्यपात्राणां परिहारेण पात्राणां चौचित्यवृत्त्या देशनाऽपि क्रियमाणा शुद्धाऽभिधीयते । इतरथा (अन्यथा) क्रियमाणायां तस्यां श्रोतॄणां मिथ्यात्वगमनम् । आदिशब्दात्प्रद्वेषातिशयाद्भक्तपानशय्याव्यवच्छेदादयः प्राणहान्यादयश्च देशकस्य दोषाः संभवन्तीति । अत एव भावानुवृत्तिसारो गीतार्थः श्लाघ्यते । यतोऽवाचि—"मग्गे य जोयइ तहा केई भावाणुवत्तणनएण । बीयाहाणं पायं च तदु-

चियाणं कुणइ एसो ॥ १ ॥" गीतार्थः । इति गाथार्थः ॥ ९८ ॥

ननु सूत्रभणितं प्ररूपयतीत्युक्तम्, यत्पुनः सूत्रानुक्तं विवादपदं लोकानां, तत्र पृच्छयमानानां गीतार्थानां किमुचितम् ? इत्याह—

जं च न सुत्ते विहियं न य पडिसिद्धं जणंमि चिररूढं । समइविगप्पियदोसा तंपि न दूसंति गीयत्था ॥९९॥

इह चशब्दः पुनरर्थे इति । 'यत्' पुनरर्थजातमनुष्ठानं वा नैव 'सूत्रे' सिद्धान्ते 'विहितं' करणीयत्वेनोक्तं चैत्यवन्दनावश्यकादिवत्, न च प्रतिषिद्धं, प्राणातिपातादिवत् । यत् 'जने' लोके 'चिररूढं' अज्ञातादिभावं 'स्वमतिविकल्पितदोषाः' स्वाभिप्रायपरिकल्पितदूषणाः 'तदपि' आस्तामागमोक्तं 'न दूषयन्ति' न युक्तमेतत्, इति परस्य नोपदिशन्ति संसारवृद्धिभीरवो 'गीतार्थाः' विदितागमतत्त्वाः । यत उक्तं भगवत्याम्—"जेणं गोयमा ! अट्ठं वा, हेउं वा, पसिणं वा, वागरणं वा, कारणं वा, अन्नायं वा, अदिट्ठं वा, असुयं वा, अपरिन्नायं वा, बहुजणमज्झे आघवेइ, पन्नवेइ, परूवेइ, दंसेइ, निदंसेइ, उवदंसेइ । सेणं अरहंताणं आसायणाए वट्टइ । अरहंतपन्नत्तस्स धम्मस्स आसायणाए वट्टइ । केवलीणं आसायणाए वट्टइ । केवलिपन्नत्तस्स धम्मस्स आसायणाए वट्टइ ॥" अन्यत्राऽप्युक्तम्—"जं बहुखाइं पत्तं न य दीसइ कहवि भासियं सुत्ते । न य पडिसेहो दीसइ मोणं चिय तत्थ गीयाणं ॥ १ ॥" इति गाथार्थः ॥ ९९ ॥

गीतार्था ह्येवं परिभावयन्ति—

संविग्गा गीयतमा विहिरसिया पुव्वसूरिणो आसि । तद्दूसियमायरियं अणइसई को निवारेइ ॥१००॥

'संविग्नाः' मङ्क्षुमोक्षाभिलाषिणः 'गीयतमा' इति पदैकदेशे पदप्रयोगो यथा—भीमसेनो भीम इति । ततो गीताः गीतार्थाः, तमटि प्रत्यये 'गीतार्थतमाः' इति भवति, अतिशयगीतार्था इति भावः । तत्काले बहुतमागमसद्भावात् । तथा विधिरसो विद्यते येषां ते 'विधिरसिकाः' विधिबहुमानिनः, संविग्नत्वादेव । 'पूर्वसूरयः' चिरन्तनमुनिनायकाः 'आसन्' अभूवन्, तैः 'अदूषितं' अनिषिद्धं 'आचरितं' सर्वं धार्मिकलोकव्यवहृतं 'अनतिशयी' विशिष्टश्रुतावध्याद्यतिशयविकलः 'को निवारयति' पूर्वपूर्वतरोत्तमाचार्याशातनाभीरुर्न कश्चित् । इति गाथाभावार्थः ॥ १०० ॥

तथैतदपि गीतार्थाः पर्यालोचयन्ति—

अइसाहसमेयं जं उस्सुत्तपरूवणा कडुविवागा । जाणंतेहिवि दिज्जइ निद्देसो सुत्तवज्झत्थे ॥ १०१ ॥

ज्वलज्ज्वालानलप्रवेशकारिनरसाहसादप्यधिकमतिसाहसमेतद्वर्त्तते, यत् 'उत्सूत्रप्ररूपणाः' सूत्रनिरपेक्षदेशनाः 'कटुविपाकाः' दारुणफला 'जानानैः' अवबुध्यमानैरपि 'दीयते' (वितीर्यते) 'निर्देशो' निश्चयः 'सूत्रबाह्ये' जिनागमानुक्ते 'अर्थे' वस्तुविचारे । किमुक्तं भवति—"दुब्भासिएण एक्केण मरीई दुक्खसायरं पत्तो । भमिओ कोडाकोडिं सागरसिरिनामधेज्जाणं ॥ १ ॥ उस्सुत्तमायरंतो बंधइ कम्मं सुचिक्कणं जीवो । संसारं च पवड्ढइ मायामोसं च कुव्वइ य ॥ २ ॥ उम्मग्गदेसिओ मग्गनासओ गूढहियमाइल्लो । सढसीलो य ससल्लो तिरिआउं बंधए जीवो ॥ ३ ॥ उम्मग्गदेसणाए चरणं नासिंति जिणवरिंदाणं । वावन्नदंसणा खलु न हु लब्भा तारिसा दट्ठुं ॥ ४ ॥" इत्याद्यागमवचनानि श्रुत्वाऽपि स्वाग्रहग्रहग्रस्तचेतसो यदन्यथान्यथा व्याचक्षते विदधति च तन्महासाहसमेवानर्वाक्पारासारसंसारापारपारावारोदरवि-

वरभाविभूरिदुःखभाराङ्गीकारात् । इति गाथाभावार्थः ॥ १०१ ॥

आह किमेवमागमार्थमवबुध्यापि कोऽप्यन्यथावादमाद्रियते ? येनैवमुच्यते, सत्यम्, आद्रियते । यत आह—

दीसंति य ढङ्कसिणोणेगे नियमइपउत्तजुत्तीहिं । विहिपडिसेहपवत्ता चेइयकिच्चेसु रूढेसु ॥ १०२ ॥

दृश्यन्ते दुष्षमारूपे च वक्रजडबहुले काले 'ढङ्कसिणः' महासाहसिका रौद्रादपि भवपिशाचादबिभ्यतः 'अनेके' विविधा निजमतिप्रयुक्ताभिरात्मीयबुद्धिव्यापारताभिर्युक्तिभिरुपपत्तिभिः 'विधिप्रतिषेधप्रवृत्ताः' इति कासांचित्क्रियाणामागमानुक्तानामपि विधौ करणे प्रवृत्ताः, अन्यासामागमानिषिद्धतया चिरन्तजनाचरितानामप्यविधिरयुक्ता एता न कर्त्तव्या धार्मिकैरित्येवं प्रतिषेधे प्रवृत्ताः । केषु ? 'चैत्यकृत्येषु' स्नात्रबिम्बकारणादिषु 'रूढेषु' पूर्वपुरुषपरम्परया प्रसिद्धेषु । पूर्वरूढिरविधिः, इदानींतनप्रवृत्तिर्विधिः, इत्येवं वादिनोऽनेके दृश्यन्ते साहसिकाः । इति गाथार्थः ॥ १०२ ॥

ननु ते धर्मार्थिनः सर्वयत्नेन तथाप्रवृत्ता गीतार्थैः श्लाघनीया न वा ? इत्याह—

तं पुण विसुद्धसद्धा सुयसंवायं विणा न संसंति । अवहीरिऊण नवरं सुयाणुरूवं परूविंति ॥ १०३ ॥

'तां पुनः' तेषां प्रवृत्तिं विशुद्धागमबहुमानसारा श्रद्धा येषां ते तथाविधाः 'श्रुतसंवादं विना' श्रुतभणितमन्तरेण 'न शंसन्ति' नानुमन्यन्ते, किं तर्हि ? बालक्रीडितमेतदिति बुद्ध्या 'अवधीर्य' मध्यस्थभावेनोपेक्ष्य ('नवरं' केवलं) 'श्रुतानुरूपं प्ररूपयन्ति' यथा सूत्रे भणितं तथैव विविदिषूणामुपदिशन्ति । अयमत्राभिप्रायः—इह हि धार्मिकंमन्यान् कांश्चन घृतादिभिर्जिनबिम्बस्नपनं दूषयतः केवलेन गन्धोदकेन कुर्वतः कारयतश्चोपलभ्य मध्यस्थधार्मिकाः, किमत्र युक्तम् ? इति

गुरून् पृच्छन्ति । ततस्तेषां संविग्नगीतार्थगुरवो व्यागृणन्ति । तद्यथा—वर्त्तमानमूलागमेषु द्रव्यस्तवः श्रावकाणामुपदिष्टो, न पुनस्तत्करणविधिरतः स पूर्वगतादौ संभाव्यते । पूर्वगतवेदिना चोमास्वातिवाचकेन प्रणीतप्रवचनोन्नतिहेतुप्रशमरति-तत्त्वार्थाद्यनेकमहाशास्त्रेण—"जिनभवनं जिनबिम्बं जिनपूजां जिनमतं च यः कुर्यात् । तस्य नरामरशिवसुखफलानि करपल्लवस्थानि ॥ १ ॥" इत्यादिद्रव्यस्तवाभिधायिप्रकरणे पूजाविधिरेवमुक्तः—"सर्पिर्दुग्धदधिप्रबुद्धकुसुमैर्धूपाम्बुदीपैस्तथा गन्धस्नात्रसुगन्धिचन्दनरसैः प्रत्युग्रसत्कुङ्कुमैः । पूजां निर्जितविद्विषोऽमलधियः कुर्वन्ति ये भावतो भुक्त्वा सौख्यमिहामरं च सततं ते यान्ति शीघ्रं शिवम् ॥ १ ॥ गव्यहव्यदधिदुग्धपूरितैः स्नापयन्ति कलशैरनुत्तमैः । ये जिनोक्तविधिना जिनोत्तमान् स्वर्विमानविभवो भवन्ति ते ॥ २ ॥" तेनापि संविग्नशिरोमणिना सिद्धान्तादृष्टोऽयमर्थो नोक्त इति संभाव्यते । अत एव गोविन्दाचार्येण सनत्कुमारसन्धिषु तथैव वर्णितः । पर्वकारेण धूपा(मा)वलिकाकारेण चानूदितः । प्रामाणिकसैद्धान्तिकमस्तकरत्नेन श्रीजिनेश्वराचार्येण कथानककोशशास्त्रे विशेषेण स्थापितः, तच्छिष्येणाभयदेवसूरिणापि पञ्चाशकवृत्तौ—देवैरपि सन्निहिते कालोदपुष्करवरसागरनीरे सत्यपि घृतक्षीरेक्षुरसवार्यानयद्भिरनादिरूढता घृतादिस्नानस्य स्थापिता चेति । तस्मान्मूर्खमुखरदूषितमपि घृतादिस्नानं युक्तमिति लक्षयामः । तथाऽधिवासनोदकानयनछत्ररथभ्रमण-दिक्पालस्थापनादीनामपि प्रभावनाविशेषहेतुत्वेन पूर्वपुरुषाचरितानां निषेधश्छद्मस्थैर्न कर्त्तव्यः, क्वाऽप्यागमे निषेधादर्शनात् । नापीन्द्रादिभिर्न कृतान्येतानीति ज्ञापकं प्रमाणं, देवमनुष्याणामाचारस्यासमानत्वात् । देवा हि प्रथमोत्पन्ना एव चैत्यपूजादि कुर्वन्ति । मनुजास्तु यावज्जीवं त्रिकालमपि । देवाः सकृदेककल्याणके पूजां कुर्वन्ति, न तु तपःकर्म । मनुजास्तु

॥ ६६ ॥

प्रतिवर्षं तपःक्रियापूर्वकं सर्वतीर्थकृतां सर्वकल्याणकेषु पूजां विदधतीत्यादि । तस्मान्मनुजानां मनुजव्यवहारः श्रेयान् । अन्यच्च जिनमहिम्नः प्रवर्द्धनमेव साधु, न विघ्नकरणम् । यत उक्तम्—"पाणवहाई (नि) सुओ जिणपूयामोक्खमग्गवि-ग्घकरो । अज्जेइ अन्तरायं न लहइ जेणिच्छियं लाभं ॥ १ ॥" अत एव जिनत्रयचतुर्विंशतिपट्टादिकारणमपि गीतार्था न दूषयन्ति, बहुविघ्नान्तरायभीरुत्वादागमेऽनिषेधदर्शनाच्च । केवलं मौनमालम्बन्ते । यतोऽयं गुरूपदेशः—"जं बहुखाइं पत्तं नवि दीसइ कहवि भासियं सुत्ते । न य पडिसेहो दीसइ मोणं चिय तत्थ गीयाणं ॥ १ ॥" तथा—"सुत्तभणियंमि सुत्तं पमाणमियरंमि होइ आयरणा । संविग्गगीयबहुजणनिसेविया सावि हु पमाणं ॥ २ ॥" किं च हरिभद्रसूरिणाऽपि त्रिधा प्रतिष्ठोक्ता । यतोऽवाचि—"व्यक्ताख्या खल्वेका क्षेत्राख्या चापरा महाख्या च । यस्तीर्थकृद्यदा किल तस्य तदा-द्येति समयविदः ॥ १ ॥ ऋषभाद्यानां तु तथा सर्वेषामेव मध्यमा ज्ञेया । सप्तत्यधिकशतस्य तु चरमेह महाप्रतिष्ठेति ॥ २ ॥" न च पृथग्बिम्बानामियमिति वक्तुमुचितं, दृष्टकल्पनावशात् । न हि प्रेक्षापूर्वकारिणो दृष्टं विहायाऽदृष्टं परिकल्पयन्ति । इत्यादिशुद्धश्रद्धावान् श्रुतानुसारेण प्ररूपयति । इति गाथार्थः ॥ १०३ ॥

उक्तं तृतीयं श्रद्धालक्षणम् । अथ चतुर्थमाह—

अइयारमलकलंकं पमायमाईहिं कहवि चरणस्स । जणियंपि वियडणाए सोहिंति मुणी विमलसद्धा॥१०४॥

अतिचरणमतिचारो मूलोत्तरगुणमर्यादातिक्रमः, स एव गुणमालिन्यहेतुत्वान्मलम्, तच्चरणशशधरस्य कलङ्क इव तं, 'प्रमादादिभिः' प्रमाददर्पकल्पैराकुट्टिकायाश्चारित्रिणः प्रायेणासंभवात्, कथमपि कण्टकाकुलमार्गे यत्नेनापि गच्छतः

कण्टकभङ्गवत् , 'चरणस्य' चारित्रस्य 'जनितं' उत्पादितम् । आकुट्टिकादीनां पुनः स्वरूपमिदम्—"आउट्टिया उ तिव्वा दप्पो पुण होइ वग्गणाईओ । विगहाइओ पमाओ कप्पो पुण कारणे करणं ॥ १ ॥" उपलक्षणं चैतत् दशविधायाः प्रतिसेवायाः । सा चेयम्—"दप्प १ प्पमाय २ णाभोगा ३ आउरे ४ आवईसु ५ य । संकिए ६ सहसाकारे ७ भए ८ पओसे य ९ वीमंसा १० ॥ १ ॥" अपिशब्दः संभावने संभाव्यते एवैतच्चारित्रिणो 'विकटनया' आलोचनया शोधयन्ते' अपनयन्ति 'मुनयः' यतयो 'विमलश्रद्धाः' निष्कलङ्कधर्माभिलाषाः । एवमवबुध्यमानाः—"नवि तं सत्थं व विसं व दुप्पउत्तो व कुणइ वेयालो । जंतं व दुप्पउत्तं सप्पो व पमाइओ कुद्धो ॥ १ ॥ जं कुणइ भावसल्लं अणुद्धियं उत्तमट्ठकालंमि । दुलहबोहीयत्तं अणंतसंसारियत्तं च ॥ २ ॥" इति गाथार्थः ॥ १०४ ॥

सांप्रतं प्रस्तुतलिङ्गमुपसंहरँल्लिङ्गान्तरं संबन्धयन्नाह—

एसा पवरा सद्धा अणुबद्धा होइ भावसाहुस्स । एईए सब्भावे पन्नवणिज्जो हवइ एसो ॥ १०५ ॥

'एषा' चतुरङ्गा 'प्रवरा' वरेण्या 'श्रद्धा' धर्माभिलाषः 'अणुबद्धा' अव्यवच्छिन्ना 'भवति' संपद्यते 'भावसाधोः' प्रस्तुतयतेः । 'एतस्याः' श्रद्धायाः 'सद्भावे' सत्तायां 'प्रज्ञापनीयः' असद्ग्राहग्रहविकलो भवत्येव ('एषः') भावमुनिः । इति गाथार्थः॥१०५॥

ननु किं चारित्रवतोऽप्यसद्ग्रहः संभवति ? सत्यं संभवत्येव, मतिमोहमाहात्म्यात् । मतिमोहोऽपि कुतः ? इति चेदुच्यते—

विहि[1]उज्जम[2]वन्नय[3]भय[4]उस्सग्ग[5]ववाय[6]तदुभय[7]गयाइं । सुत्ताइं बहुविहाइं समए गंभीरभावाइं ॥ १०६ ॥

विधिश्चोद्यमश्च वर्णकश्च भयं चोत्सर्गश्चापवादश्च तदुभयं चेति द्वन्द्वः, तस्य च स्वपदप्रधानत्वाद्गतानीति प्रत्येकम-

भिसंबध्यते । सूत्राणि च विशेष्याणि । ततश्चैवं योज्यते—कानिचिद्विधिगतानि सूत्राणि समये सन्ति । यथा—“संपत्ते भिक्खकालंमि असंभंतो अमुच्छिओ । इमेण कमजोएण भत्तपाणं गवेसए ॥ १ ॥ ” इत्यादीनि पिण्डग्रहणविधिज्ञापकानि । उद्यमसूत्राणि—“दुमपत्तए पंडुयए जहा निवडइ राइगणाण अच्चए । एवं मणुयाण जीवियं समयं गोयम ! मा पमायए ॥१॥ ” इत्यादीनि । तथा—“वंदइ उभओ कालंपि चेइयाइं थयथुईपरमो । जिणवरपडिमा घरधूयपुप्फगंधच्चणे जुत्तो ॥ १ ॥ ” कालनिरूपणस्योद्यमहेतुत्वान्नपुनरन्यदाऽपि चैत्यवन्दनं न धर्मायेति । वर्णकसूत्राणि चरितानुवादरूपाणि । यथा—द्रौपद्या पूरुषपञ्चकस्य वरमालानिक्षेपः, ज्ञाताधर्मकथाद्यङ्गेषु नगरादिवर्णकरूपाणि च वर्णकसूत्राणि । भयसूत्राणि नारकादिदुःखदर्शकानि । उक्तं च—“नरएसु मंसरुहिराइवन्नणं जं पसिद्धिमेत्तेण । भयहेउ इहर तेसिं वेउवियभावओ न तयं ॥ १ ॥ ” अथवा दुःखविपाकेषु पापकारिणां चरितकथनानि भयसूत्राणि । तद्भयात्प्राणिनां पापनिवृत्तिसंभवात् । उत्सर्गसूत्राणि—“इच्चेसिं छण्हं जीवनिकायाणं नेव सयं दंडं समारंभेज्जा ॥ ” इत्यादिषड्जीवनिकायरक्षाविधायकानि । अपवादसूत्राणि प्रायश्छेदग्रन्थगम्यानि । यद्वा—“न यालभेज्जा निउणं सहायं गुणाहियं वा गुणओ समं वा । एकोवि पावाइं विवज्जयंतो विहरेज्ज कामेसु असज्जमाणो ॥ १ ॥ ” इत्यादीन्यपि । तदुभयसूत्राणि येषूत्सर्गापवादौ युगपत्कथ्येते । यथा—“अट्टज्झाणाभावे सम्मं अहियासियव्व ओ वाही । तब्भावम्मि उ विहिणा पडियारपवत्तणं नेयं ॥ १ ॥ ” एवं ‘सूत्राणि बहुविधानि’ स्वसमयपरसमयनिश्चयव्यवहारज्ञानक्रियादिना नयमतप्रकाशकानि ‘समये’ सिद्धान्ते ‘गम्भीरभावानि’ महामतिगम्याभिप्रायाणि सन्तीति शेषः ॥ १०६ ॥

ततः किम् ? इत्याह—

तेसिं विसयविभागं अमुणंतो नाणवरणकम्मुदया। मुज्झइ जीवो तत्तो सपरेसिमसग्गहं जणइ ॥१०७॥

'तेषां' सूत्राणां 'विषयविभागं' अयमस्य सूत्रस्य विषयः, अयं चामुष्येत्येवंरूपं 'अमुणन्' अलक्षयन् ज्ञानावरणकर्मण उदयाद्धेतोः 'मुह्यते' मोहमुपयाति 'जीवः' प्राणी । ततः 'स्वपरयोः' आत्मनः परस्य च पर्युपासकस्य 'असद्ग्रहं' असद्बोधं जनयति, जमालिवत्। इति गाथार्थः ॥ १०७ ॥

ततश्च—

तं पुण संविग्ग गुरू परहियकरणुज्जयाणुकंपाए । बोहिंति सुत्तविहिणा पन्नवणिज्जं वियाणंता ॥ १०८ ॥

'तं' मूढं, पुनःशब्दादर्थिनं विनीतं च 'संविग्नाः' प्रतीताः, 'गुरवः' पूज्याः 'परहितकरणोद्यताः' परोपकाररसिकाः 'अनुकम्पया।' मा गमदेष दुर्गतिं, इत्यनुग्रहबुद्ध्या प्रेरिताः 'बोधयन्ते' प्रज्ञापयन्ति, 'सूत्रविधिना' आगमोक्तयुक्तिभिः 'प्रज्ञापनीयं' प्रज्ञापनोचितं 'विजानानाः' लक्षयन्तः । तदितरस्य सर्वज्ञेनापि बोधयितुमशक्यत्वात् । इति गाथार्थः ॥ १०८ ॥

ततः—

सोवि असग्गहचाया सुविसुद्धं दंसणं चरित्तं च । आराहिउं समत्थो होइ सुहं उज्जुभावाओ ॥१०९॥

'सोऽपि' प्रज्ञापनीयमुनिः 'असद्ग्रहत्यागात्' निजपरिकल्पितबोधमोचनात् 'सुविशुद्धं' अतिनिर्मलं 'दर्शनं' सम्यक्त्वं 'चारित्रं' संयमं, चशब्दात् ज्ञानतपसी च, आराधयितुं समर्थो भवति 'सुखं' यथा भवत्येवं 'ऋजुभावात्' आर्जवगुणात्।

इत्यनेन प्रज्ञापनीयस्याप्यार्जवादेवालोचितप्रतिक्रान्तस्य शुद्धिर्भवतीत्यावेदितम् । तथा चागमः—"सोही उज्जुयभूयस्स धम्मो सुद्धस्स चिट्ठइ । निव्वाणं परमं जाइ घयसित्तेव पावए ॥ १ ॥" ॥ १०९ ॥

इत्युक्तं भावसाधोस्तृतीयं लिङ्गम् । अथ चतुर्थं क्रियापरत्वमुच्यते, तच्च प्रमादवतो न संभवतीति प्रमादपरिहारोपदेशमेव तावदाह—

सुगइनिमित्तं चरणं तं पुण छक्कायसंजमो चेव । सो पालिउं न तीरइ विगहाइपमायजुत्तेहिं ॥ ११० ॥

शोभना गतिः सुगतिः सिद्धिरेव, तस्या निमित्तं कारणं 'चरणं' यतिधर्मः । तदुक्तम्—"नो अन्नहावि सिद्धी पाविज्जइ जं तओ इमीएवि । एसो चेव उवाओ आरम्भा वट्टमाणा उ ॥ १ ॥" तथा—"विरहिततरकाण्डा बाहुदण्डैः [1]प्रचण्डं कथमपि जलराशिं धीवरा[2] लङ्घयन्ति । ननु कथमपि सिद्धिः साध्यते शीलहीनैर्दृढयत यतिवृत्ते चित्तमेवं विदित्वा ॥ १ ॥" 'तत्पुनः' चरणं 'षट्कायसंयम एव' जीवरक्षण एव, चकाराच्चरित्रमोहनीयकर्मक्षयोपशमश्चेति सूचयति । 'सः' पुनः संयमः 'पालयितुं' वर्द्धयितुं 'न तीरइ' इति न शक्यते । विकथा विरुद्धकथा, आदिशब्दान्मद्यादिपरिग्रहः । उक्तं च—"मज्जं विसयकसाया निद्दा विगहा य पंचमी भणिया । एए पंच पमाया जीवं पाडेंति संसारे ॥ १ ॥" तत्र मद्यं साधूनामकल्पनीयमेव । यतोऽत्राचि—"सुरं वा मेरगं वावि अन्नं वा मज्जगं रसं । [3]सरक्खं न पिबे भिक्खू जसं सारक्खमप्पणो ॥ १ ॥" तथा विषयप्रमादोऽपि हेय एव । यतः सूत्रम्—"विसएसु मणुन्नेसुं पेमं नाभिनिवेसए ।

---

१ 'प्रचण्डैः' इत्यपि । २ 'धीधना' इत्यपि । ३ 'ससक्खं' इत्यपि ॥

अणिच्चं तेसि विन्नाय परिणामं पोग्गलाण उ ॥ १ ॥" एवं कषायप्रमादोऽपि न विधेयः। यत आर्षम्—"कोहं माणं च मायं च लोभं च पाववड्ढणं। वमे चत्तारि दोसे उ इच्छंतो हियमप्पणो॥ १ ॥" निद्राप्रमादोऽप्युचित एव विधेयः। तद्यथा—"पढमा पोरुसि सज्झायं बीया ज्झाणं ज्झियायइ। तइयाए निद्दसोक्खं तु सज्झायं च चउत्थिए ॥ १ ॥" कथास्वप्ययमुपदेशः—"आक्षेपणविक्षेपणविमार्गबाधनसमर्थविन्यासम्। श्रोतृजनश्रोत्रमनःप्रसादजननीं यथा जननीम् ॥ १ ॥ संवेदनीं च निर्वेदनीं च धर्म्यां कथां सदा कुर्यात्। स्त्रीभक्तचौरजनपदकथाश्च दूरात् परित्याज्याः ॥ २ ॥" तदेवमागमनिषिद्धविकथादिप्रमादयुक्तैः संयमः प्रतिपालयितुं न शक्यते, अतोऽसौ न विधेयः। इति गाथाभावार्थः ॥ ११० ॥

प्रमादस्यैव विशेषतोऽपायहेतुतामाह—

पव्वज्जं विज्जंपिव साहिंतो होइ जो पमाइल्लो। तस्स न सिज्झइ एसा करेइ गरुयं च अवयारं ॥ १११॥

'प्रव्रज्यां' जिनदीक्षां विद्यामिव साधायन् भवति यः 'पमाइल्लो' इति प्रमादवान् "मउवत्थंमि मुणेज्जह आलं इलं मणं इत्तं" इति देशी वचनात्। 'तस्य' प्रमादवतो 'न सिध्यति' न फलदानाय संपद्यते 'एषा' दीक्षा विद्येव, चकारस्य भिन्नक्रमत्वात् करोतीति च 'गुरुं' महान्तं 'अपकारं' अनर्थमिति। भावार्थः पुनरिह—प्रमादवतः साधकस्य यथा विद्या फलदा न भवति, ग्रहसंक्रमादिकमनर्थकं च संपादयति, तथा शीतलविहारिणो जिनदीक्षाऽपि न केवलं मोक्षादिसंपत्तये न भवति, (किन्तु) दीर्घभवभ्रमणापायं च विदधाति। उक्तं च—"सीयलविहारओ खलु भगवंतासायणानिओगेण। तत्तो

१ 'सुणेज्जह' इत्यपि ॥

भवो सुदीहो किलेसबहुलो जओ भणियं ॥१॥ तित्थयरपवयणसुयं आयरियं गणहरं महिड्ढीयं । आसायंतो बहुसो अणंतसंसारिओ होइ ॥ २ ॥ " तस्मादप्रमादिना सुविहितेन भाव्यम् । इति गाथार्थः ॥ १११ ॥

प्रमादस्यैव युक्त्यन्तरेण निषेधमाह—

पडिलेहणाइचेट्ठा छक्कायविघाइणी पमत्तस्स । भणिया सुयंमि तम्हा अपमाई सुविहिओ होइ ॥११२॥

प्रत्युपेक्षणा मुनिजनप्रतीता, आदिशब्दाद्गमनादिग्रहः, चेष्टा क्रियाव्यापारः, इत्यनर्थान्तरम् । षट्कायविराधि (घाति) नी 'प्रमत्तस्य' साधोः 'भणिता' उक्ता 'श्रुते' सिद्धान्ते। तद्यथा—"पडिलेहणं कुणंतो मिहो कहं कुणइ जणवयकहं वा । देइ व पच्चक्खाणं वाएइ सयं पडिच्छइ वा ॥ १ ॥ पुढवीआउक्काए तेऊवाऊवणस्सइतसाणं । पडिलेहणापमत्तो छण्हंपि विराहओ होइ ॥ २ ॥ " तस्मात्सर्वव्यापारेष्वप्रमादी सुविहितो भवतीति पूर्वत्राऽपि योज्यम् । तच्चार्थतो योजितमेव । इति गाथार्थः ॥ ११२ ॥

अथ कीदृगप्रमादी स्यात् ? इत्याह—

रक्खइ वएसु खलियं उवउत्तो होइ समिइगुत्तीसु । वज्जइ अवज्जहेउं पमायचरियं सुथिरचित्तो ॥११३॥

'रक्षति' अकरणबुद्ध्या परिहरति 'व्रतेषु' विषयभूतेषु 'स्खलितं' अतिचारम् । तत्र प्राणातिपातविरतौ त्रसस्थावरजन्तूनां संघट्टनपरितापनोपद्रावणानि न करोति । मृषावादविरतौ सूक्ष्ममनाभोगादिना, बादरं [1]वचनाभिसन्धिना न

---

१ "वञ्चनाभिसंधिना" इत्यपि ॥

भाषते । अदत्तादानविरतौ सूक्ष्ममननुज्ञाप्य कायिकादि न करोति, बादरं स्वामिजीवतीर्थकरगुरुभिरननुज्ञातं नादत्ते, नापि परिभुङ्क्ते । चतुर्थव्रते दशब्रह्मचर्यस्थानानि सम्यगाराधयति । पञ्चमव्रते सूक्ष्मं बालादिममत्वं न करोति, बादरमनेषणीयाहारादि न गृह्णाति 'परिग्गहोणेसणग्गहणे' इत्याप्तवचनात् । उपकरणं चाधिकं मूर्च्छया न धारयति । रात्रिभक्तविरतौ सूक्ष्ममामोद्गारादि रक्षति, बादरं तु दिवाग्रहीतं दिवाभुक्तमित्यादिचतुर्विधां रात्रिभुक्तिं न करोति । एवं सर्वव्रतेषु स्खलितं रक्षति । तथा 'उपयुक्तः' दत्तावधानो भवति । समितिषु प्रवीचाररूपासु, गुप्तिषु प्रवीचाराप्रवीचाररूपासु । यत उक्तम्—"समिओ नियमा गुत्तो गुत्तो समियत्तणंमि भइयबो । कुसलवइमुदीरंतो जं वइगुत्तोवि समिओवि ॥ १ ॥" उपयुक्तता चासु प्रवचनमात्राध्ययनोक्तविधिना विज्ञेया । सर्वस्वं चैताः सर्वसाधूनाम् । यत आह—"अष्टौ साधुभिरनिशं मातर इव मातरः प्रवचनस्य । नियमेन न मोक्तव्याः परमं कल्याणमिच्छद्भिः ॥ १ ॥" किं बहुना, वर्जयति अवद्यहेतुं प्रमादचरितं सुस्थिरचित्त इति स्पष्टार्थमेव । इति गाथार्थः ॥ ११३ ॥

तथा—

कालंमि अणूणहियं किरियंतरविरहिओ जहासुत्तं । आयरइ सवकिरियं अपमाई जो इह चरित्ती ॥११४॥

'काले' अवसरे, यो यस्याः प्रत्युपेक्षणादिक्रियायाः प्रस्तावस्तस्मिन्नित्यर्थः । प्रस्तावमृते कृष्यादयोऽपि नेष्टसिद्धये स्युरित्यतः काले सर्वां क्रियां करोतीति योगः । कथंभूताम् ? 'अन्यूनाधिकां' न प्रमादातिशयादूनां, नापि शून्यतया स्वस्य स्थापनार्थं वा समधिकां करोति, अवसन्नताप्रसङ्गात् । तथा चागमः—"आवस्सयाइयाइं न करे अहवावि हीण- ॥ ७० ॥

महियाइं । गुरुवयणवलाइ तहा भणिओ एसो हु ओसन्नो ॥ १ ॥ " तथा 'क्रियान्तरविरहितः' इति एकस्याः क्रियाया द्वितीया क्रिया क्रियान्तरं, तेन विरहितः । प्रत्युपेक्षणादि कुर्वन्न स्वाध्यायं करोति, स्वाध्यायं कुर्वन्न वस्त्रपात्रादिपरिकर्मगमनादि वेति । अत एवोक्तमार्षे—"इंदियत्थे विसज्जित्ता सज्झायं चेव पंचहा । तम्मुत्ती तप्पुरक्कारे उवउत्ते रियंरिए ॥ १ ॥ " नन्वेवं यत्केचन नमस्कारस्तोत्रादिसमुच्चारयन्तश्चैत्यप्रदक्षिणां ददति तदागमविरुद्धमिवाभाति, यतः केवलिनोऽप्युपयोगद्वयमेकदा नेष्यते, "सव्वस्स केवलिस्स जुगवं दो नत्थि उवओगा" इत्यागमश्रुतेः, इत्यत्रोच्यते, केवलिनो युगपदुपयोगद्वयं नास्तीत्येतन्न ज्ञापकं, तस्य सामयिकोपयोगापेक्षत्वात्, छद्मस्थोपयोगस्यान्तर्मौहूर्त्तिकत्वात्, तेषां च पदे पदेऽसंख्येयानां भावात्, जीववीर्यस्य चाचिन्त्यत्वात्, शीघ्रकारित्वाच्च, ईर्यासमितावप्युपयोगः संभवत्येव । तर्हि किमर्थमुक्तं सूत्रे ? 'इंदियत्थे विसज्जित्ता' इत्यादि । इति चेत् सत्यम्, भिन्नविषयापेक्षं तत्तथा हि भिक्षाचर्यादिक्रिया भिन्ना स्वाध्यायश्च भिन्नार्थ इति । स्वाध्यायोपयोगे ईर्योपयोगासंभवः । प्रदक्षिणायां पुनर्मनोवाक्कायैर्जिनवन्दनमेव चिकीर्षितमित्यभिन्नविषयता । तत्रोपयोगद्वयं त्रयं वा न विरुद्धम् । यत एवमागमः—"भिन्नविसयं निसिद्धं किरियादुगमेगया न एगंमि । जोगतिगस्सवि भङ्गियसुत्ते किरिया जओ भणिया ॥ १ ॥ " तथा—"सव्वत्थवि पणिहाणं तग्गयकिरियाभिहाणवन्नेसु[1] । अत्थे विसए य तहा दिट्ठंतो छिन्नजालाए ॥ १ ॥" तस्मात्संविग्नव्यवहारेण मन्दगत्या प्रदक्षिणायां स्तुतिपाठे न कश्चिद्दोषः, अपि तु त्रियोगसारमनुष्ठानमाराधितं भवतीत्यलं प्रसङ्गेन । 'यथासूत्रम्' इति सूत्रोक्तस्याऽनतिक्रमेण ।

---

१ 'सुत्तेसु' इत्यपि ॥

तत्पुनः—“सुत्तं गणहररइयं तहेव पत्तेयबुद्धरइयं च । सुयकेवलिणा रइयं अभिन्नदसपुव्विणा रइयं ॥ १ ॥” तेषां निश्चयसम्यग्दृष्टित्वेन सद्भूतार्थवादित्वादन्यग्रथितमपि तदनुयायिप्रमाणमेव, न पुनः शेषमिति । आचरति सर्वक्रियामप्रमादी य इह चारित्रीति सुगममेव । इति गाथार्थः ॥ ११४ ॥

उक्तं चतुर्थभावसाधुलिङ्गम्, अधुना पञ्चममाह—

संघयणादणुरूवं आरंभइ सक्कमेवणुट्ठाणं । बहुलाभमप्पच्छेयं सुयसारविसारओ सुजई ॥ ११५ ॥

संहननं वज्रर्षभनाराचादि, आदिशब्दाद्द्रव्यक्षेत्रकालभावा गृह्यन्ते, तदनुरूपं तदुचितमेवारभते सर्वं 'अनुष्ठानं' तपःप्रतिमाकल्पादि । यद्यस्मिन् संहननादौ निर्वोढुं शक्यते तदेवारभते, अधिकस्य निष्ठानयनाभावेन प्रतिज्ञाभङ्गसंभवात् । कीदृक् पुनरारभते ? 'बहुलाभं' विशिष्टफलप्रापकं 'अल्पच्छेदं' अल्पापकारम् । अल्पशब्दस्याभाववचनत्वात्संयमाबाधकमिति भावः । 'श्रुतसारविशारदः' सिद्धान्ततत्त्वाभिज्ञः 'सुयतिः' भावसाधुः । इति गाथार्थः ॥ ११५ ॥

कथं पुनरेवंविधं स्यात् ? इत्याह—

जह तं बहुं पसाहइ निवडइ अस्संजमे दढं न जओ । जणिउज्जमं बहूणं विसेसकिरियं तहाढवइ ॥ ११६ ॥

'यथा' येन प्रकारेण 'तत्' अधिकृतमनुष्ठानं 'बहु प्रसाधयति' पुनः पुनरासेवनेन निपतति वा 'असंयमे' सावद्यक्रियायां 'दृढं' अत्यर्थं नैव 'यतः' अनुष्ठानात् । किमुक्तं भवति—अनुचितानुष्ठानपीडितो न पुनस्तत्करणायोत्सहते, कदाचिद्रोगसंभवे च चिकित्सायामसंयमः, तदकरणे चाविधिमृतस्य संयमान्तरायः । अत एवोक्तम्—“सो हु तवो कायव्वो

जेण मणो मंगुलं न चिंतेइ । जेण न इंदियहाणी जेण य जोगा न सीयंति ॥ १ ॥ "तथा 'जनितोद्यमं' संपादितकरण-मनोरथं 'बहूनां' अन्येषां समानधार्मिकाणां, शक्यानुष्ठाने हि बहूनां चिकीर्षा संभवति, नेतरस्मिन्निति । 'विशेषक्रियां' अधिकतरानुष्ठानं प्रतिमाभ्यासादिकम् । तथाशब्दः समुच्चये, स चैवं योज्यते—शक्तौ सत्यां विशेषक्रियां चारभते, न तां निष्फलां विदधाति । इति गाथार्थः ॥ ११६ ॥

कथंभूतां पुनस्तां करोति ? इत्याह—

गुरुगच्छुन्नइहेउं कयतित्थपभावणं निरासंसो । अज्जमहागिरिचरियं सुमरंतो कुणइ सक्किरियं ॥११७॥

गुरोर्गच्छस्य चोन्नतिरुत्सर्पणा, धन्योऽयं गुरुर्गच्छो वा यत्सांनिध्यादेवंविधा दुष्करकारिणो दृश्यन्ते, इत्येवं जनश्लाघारूपा, तद्धेतुः तत्कारणम् । तथा 'कृततीर्थप्रभावनां' उत्पादितजिनशासनसाधुवादां, साधुः सुन्दरो जिनधर्मः सर्वधर्मेषु वयमप्येनमेव कुर्मः, इत्येवमादेयत्वसाधिकामिति भावः । 'निराशंसः' ऐहिकपारत्रिकाशंसाविप्रमुक्तः । तदुक्तम्—"नो इह लोगट्ठयाए आयारमहिट्ठेज्जा, नो परलोगट्ठयाए आयारमहिट्ठेज्जा, नो कित्तिवन्नसद्दसिलोगट्ठयाए आयारमहिट्ठेज्जा, नन्नत्थ आरहंतेहिं हेऊहिं आयारमहिट्ठेज्जत्ति ॥" आर्यमहागिरेराचार्यस्य चरितं वृत्तान्तमागमोक्तं स्मरन् करोति सत्क्रियां प्रकृतः साधुरिति गाथाक्षरार्थः । भावार्थः कथानकादवसेयः ॥ ११७ ॥

तच्चेदम्—

सुहम्मसामिणो अट्ठमट्ठाणे अपच्छिमचउद्दसपुव्वी भयवं थूलभद्दो सूरी संवुत्तो । तस्स य दसपुव्वधारिणो दो सीसा,

अज्जमहागिरी सुहत्थी य । परोप्पराणुराइणो भारहे वासे विहरिंसु । अन्नया भयवं महागिरी सुहत्थिस्स गणं समप्पिऊण वोच्छिन्नेवि जिणकप्पे तक्किरियमब्भसेउमारद्धो गणनिस्साए चेव विहरइ । विच्छड्डिज्जंतं भत्तपाणं गिण्हइ । जहासत्ति सेसं च जिणकप्पकिरियमणुचरइ । न याहमुत्तमकिरियाकारित्ति गव्वमुव्वहइ । खंतो दंतो गच्छेण चेव समं गामाणुगामं दुइज्जइ । अन्नया ते दोवि पाडलिपुत्तपुरं पत्ता । तत्थ सुहत्थिसूरिणा वसुभूइनामो सेट्ठी समणोवासओ कओ । सो नियपरियणं पइदिणं धम्मदेसणाए पडिबोहेइ । जाहे कोइ न पडिबुज्झइ, न य गुरुसमीवमुवेइ, ताहे सेट्ठी चिंतइ—
"गुणसुट्ठियस्स वयणं घयमहुसित्तो व पावओ भाइ । गुणहीणस्स न सोहइ नेहविहूणो जह पईवो ॥ १ ॥" ता जइ भयवंतो गुरू इहेवागंतूण एएसिं धम्मं कहंति ता कयाइ पडिबोहो होइ । अहवा विन्नवेमि ताव गुरुं, जमुचियं तं ते चेव नाणनिहिणो मुणिस्संतित्ति संपहारिऊण विन्नत्ता गुरवो । तेवि गुणदंसगाओ उवागया तस्स गिहं । तओ अमयनिस्संदसुंदरं तद्देसणं सोऊण पडिबुद्धा सव्वे सेट्ठिसन्नायगा । तेसिं थिरीकरणत्थमायरिया दिणे दिणे तत्थागच्छंति । अन्नया उवविट्ठाण तेसिं तइयपोरसीए गोयरमडंतो पविट्ठो तत्थ पाडगे महागिरी । ससंभमेण अब्भुट्ठिओ सुहत्थिणा । तओ किमेस मलपंकधारी परिजुन्नचीवरावरियसरीरेगदेसो उत्तमपयपत्तेणेएण अब्भुट्ठिउत्ति विम्हिएण पुट्ठं सेट्ठिणा, भयवं ! को एस तुम्हाणंपि गोरवट्ठाणं ? । सूरिणा भणियं, एस महप्पा अम्ह गुरू, सुयनाणसलिलसमुद्दो, परिमुक्कसरीरसक्कारो, जीवियमरणासंसाविवज्जिओ, उज्झियधम्मभत्तपाणेसणिओ, देवाणंपि वंदणिज्जो, अम्हे एयस्स पायरेणुणावि न तुल्ला । एयमायन्निऊण वसुभूई दुइयदिवसे सयणाणं कहेइ । जो सो कल्लिं गुरूहिं अब्भुट्ठिओ महातवस्सी तमागच्छंतं दट्ठूण

तुब्भे भत्तपाणाइं उज्झिज्जमाणाइं पकरेज्जह भणेज्जह य, भो समणा ! एयमम्हे उज्झाएमो जइ रोयइ ता गिण्हाहि । जइ सो कहिंपि गिण्हइ ता तुम्हे अणंतसुहभायणं भवह । तेहिवि महागिरिमागच्छमाणमुवलब्भ तहेव कीरइ । किं पुण घरे घरे एवं छड्डिज्जइत्ति उवउत्तेण अणेसणिज्जंति न गाहियं सूरिणा, भिक्खारिक्कभायणो चेवागओ उवरसयं । किमेयंति सुहत्थिणा पुच्छिए भणियमियरेण, अज्जो ! तुब्भेहिं अणेसणा कया । कहमेयं भंते !, जं कले अब्भुट्ठाणं कयंति । तओ न एत्थ एसणा जुज्झइत्ति दोवि विहरिऊण गया वइदिसं । तत्थ केइ दिवसे अत्थिऊण कयसंभासो भयवं महागिरी गओ एलगच्छनयरं । तत्थ य गयग्गपवओवरि कयाणसणो समाहिणा कालगओ गओ अमरलोगंति । सेसमक्खाणयमावस्सयाओ विन्नेयं । इह पुण उवणओ जहा महागिरिणा वोच्छिन्नावि जिणकप्पकिरिया जहासत्तीए समणुट्ठिया, तहा अन्नोवि भावसाहू वीरियमणिगूहंतो विसेसकिरियमायरइत्ति ॥

अमुमेवार्थं स्फुटतरं भावयन्नाह—

सक्कंमि नो पमायइ असक्ककज्जे पवित्तिमकुणंतो । सक्कारंभो चरणं विसुद्धमणुपालए एवं ॥ ११८ ॥

'शक्ये' सामर्थ्योचिते समितिगुप्तिप्रत्युपेक्षणास्वाध्यायाध्ययनादौ 'न प्रमाद्यति' नालस्यवान् स्यात् । 'अशक्ये' जिनकल्पमासक्षपणादौ 'प्रवृत्तिं' अङ्गीकारमकुर्वन् शक्यारम्भो भवतीति गम्यते । स च 'चरणं' संयमं 'विशुद्धं' अकलङ्कमनुरूपं कालसंहननादीनां 'पालयति' वर्द्धयति 'एवं' उक्तन्यायेन सम्यगारम्भस्येष्टसिद्धिहेतुत्वात् । इति गाथार्थः ॥ ११८ ॥

ननु धर्ममपि कुर्वन् किं कश्चिदसदारम्भः स्यात् ? उच्यते, स्यादेव मतिमोहमानातिरेकवशात् । कथमिव ? क इव ?

इति पराकूतमाशङ्क्याह—

जो गुरुमवमन्नंतो आरंभइ किर असक्कमवि किंचि। सिवभूइ व्व न एसो सम्मारंभो महामोहा ॥११९॥

'यः' कश्चिन्मन्दमतिः 'गुरुं' धर्माचार्यं 'अवमन्यमानः' हीनाचारोऽयमित्यवज्ञया पश्यन् 'आरभते' प्रकर्तुं प्रतिजानीते, 'अशक्यं' कालसंहननानानुरूपं जिनकल्पादिकम्। अपिशब्दाच्छक्यमपि 'किञ्चित्' विकृतिपरिहारादिकं गुरुभिरक्रियमाणमेव, न तु शेषमनुष्ठानमिति प्रकृतम्। 'शिवभूतिरिव' आद्यदिगम्बरवत्। नैव 'एषः' प्रक्रान्तपुरुषः 'सम्यगारम्भः' सत्प्रवृत्तिर्महामोहाद्धेतोः। अयमाशयः—नाकृतज्ञताज्ञानातिरेकौ विना कश्चिद्गुरोः परमोपकारिणश्छायाभ्रंशायोत्सहते। इति गाथाक्षरार्थः। भावार्थः कथानकगम्यः॥ तच्चेदम्—

रहवीरपुरे नयरे सीहरहो नाम पत्थिवो होत्था। साहसबलमाणधरो सिवभूई तस्स पाइक्को ॥ १ ॥ सूरोत्ति समाइट्ठो सो महुरासामिणो गहणकज्जे। सामंतमंतिसहिओ दिन्नंमि पयाणए पढमे ॥ २ ॥ संदेहो संजाओ सामंताईण तत्थ सव्वेसिं। उत्तरदाहिणमहुराण का णु घेत्तुं समाएसो ॥ ३ ॥ पुण पुच्छियंमि नियमा रूसइ रायत्ति किमिह कायव्वं। इय चिंताउलहियया भणिया सिवभूइणा ते उ ॥४॥ भो! भो! किं चिंताए सयराहं दोवि गिण्हिमो महुरे। बलियत्ते डिंभाणं न हु दोसो होइ कइयावि ॥ ५ ॥ नवरमहं एगागी तुब्भे सव्वेवि होह एगत्थ। दुग्गेज्झमहं घेच्छं इयरं तुब्भेहि सव्वेवि ॥ ६ ॥ अह सम्मएण तेसिं गहिओ सिवभूइणा अंनाएण। गंतूण दाहिणाए महुराए सामिओ सहसा ॥ ७ ॥ इयरेवि उ-

१ "पयंडेण" इत्यन्यत्र ॥

त्तराए महुराए सामियं गहेऊण । रहवीरपुरं पत्ता जुगवं वद्धाविओ राया ॥ ८ ॥ तुट्ठो दढं नरिंदो महया भिवभूइसाहसेणाह । मग्गसु वरं महाबल ! सुहड ! फुडं नियमणोभिमयं ॥ ९ ॥ भिवभूइणा पवुत्तं जइ तुट्ठो सुट्ठु देहि तो देव ! । मह इच्छियं पयारं नयरे रत्तिं व दिवसं वा ॥ १० ॥ एवंति पत्थिवेणं पडिवन्ने निब्भओ भमइ एसो । न गणइ कालमकालं अक्खलिओ नयररक्खेहिं ॥ ११ ॥ कइयावि मज्झरत्ते अहिए ऊणे व एइ कइयावि । भज्जा य जग्गमाणी चिट्ठइ जा तस्स आगमणं ॥ १२ ॥ निविन्ना सासूए साहइ सा तुज्झनंदणो एसो । एइ चिराओ गेहं अहंपि दुक्खेण जग्गामि ॥ १३ ॥ सा चिंतइ जइ राया तुट्ठो न तहावि एरिसं जुत्तं । उस्सिखलस्स भमणं ता सिक्खावेमि नियपुत्तं ॥ १४ ॥ तो भणइ सुवसु सुण्हे ! तुममहयं चेव अज्ज जग्गेमि । इय भणिय पिहियदारा पजग्गिया सा सुया तत्तो ॥ १५ ॥ सो मज्झरत्तसमए उग्घाडावेइ जाव घरदारं । तो भणियं जणणीए रुट्ठाए एरिसं वयणं ॥ १६ ॥ एत्तियमेत्तनिसाए उग्घाडं जत्थ पेच्छसे दारं । तत्थेव गच्छ पुत्तय ! न इह गिहे जग्गए कोवि ॥ १७ ॥ जगणीवयणं सोउं गहिओ माणेण माणसे एसो । साहूवस्सयदारं निच्चुग्घाडं नियइ कहवि ॥ १८ ॥ तत्थ नियच्छइ सूरिं भयसङ्गविवज्जियं जियकसायं । नामेण अज्जकण्हं सज्झायंतं महुरघोसं ॥ १९ ॥ धन्नो एस कयत्थो रहिओ माणावमाणदुक्खेहिं । इय चिंतंतो वंदइ सूरिं भूलुलियभालयलो ॥ २० ॥ भणइ य भयवं ! भीओ भवभमणाओ तुहागओ सरणं । नियदिक्खादाणेणं करेहि ता पहु ! पसायं मे ॥ २१ ॥ भणइ गुरू कोसि तुमं ? किं वा पवयसि ? सोवि पडिभणइ । सुपसिद्धो सिवभूई भिच्चोहं नयरनाहस्स ॥ २२ ॥ तो कह रायाणमपुच्छिऊण पवाविमो तओ भणइ । तो खाइ तुम्ह पुरओ दिक्खं अहयं सयं गिण्हे

॥ २३ ॥ इय भणिय जाव लोयं एसो सयमेव काउमारद्धो । ता दिक्खिओ गुरूहिं अणवत्थादोसभीएहिं ॥ २४ ॥ बलिमड्डाए राया उप्पवाविस्सइत्ति संकाए । सव्वेवि समुच्चलिया पत्ता देसंतरं अन्नं ॥ २५ ॥ कालेण पुणो रन्ना भत्तिब्भरनिब्भरेण आहूओ । रहवीरपुरं नयरं कण्हायरिएहिं सह पत्तो ॥ २६ ॥ दंसणहेउं तत्तो आहूओ नियमंदिरं रन्ना । संमाणियो य सुंदरकंबलरयणप्पयाणेण ॥ २७ ॥ आलोइयंमि गुरुणा भणिओ किं पुण इमं महामोलं । गहियंति सो पयंपइ दक्खिन्नाओ नरिंदंमि ॥ २८ ॥ तस्स परोक्खस्स पुणो कया निसेज्जाओ तंमि मुणिवइणा । अपत्तिएण गहिओ सिवभूई तो मणे मणयं ॥ २९ ॥ अह अन्नया कयाई उवहिवियारो गुरूहिं पारद्धो । जिणकप्पथेरकप्पे पडुच्च एवं सुयविहाणा ॥ ३० ॥ जिण बारस रूवाइं थेरा चोद्दसरूविणो । अज्जाणं पन्नवीसं तु अओ उड्ढमुवग्गहो ॥ ३१ ॥ दुगतिगचउक्कपणगं नवदसएक्कारसे व बारसगं । एए अट्ठविगप्पा उवहिम्मि उ हुंति जिणकप्पे ॥ ३२ ॥ सोउं तं सिवभूई जंपइ एसेव उत्तमो कप्पो । काउं जुज्जइ परलोयसाहणे बद्धकच्छाणं ॥ ३३ ॥ ता एस किन्न कीरइ संपइ साहूहिं मोक्खकंखीहिं । मोत्तूण वत्थपत्ताइसंगहं जिणवराविहियं ॥ ३४ ॥ जं किर गुरुस्स लिङ्गं तं चिय सीसस्स जुज्जए काउं । लोएवि लिङ्गिणो जं नियनियदेवाणुरूवंति ॥ ३५ ॥ गुरुणा पडिभणियं— तित्थंकराणुचिन्नं किरियं अम्हारिसा कह कुणंति । किं करिवरपल्लाणं तरंति नणु रासभा वोढुं ॥ ३६ ॥ पढमे च्चिय संघयणे सो कीरइ गरुयसत्तसारेहिं । केवलमुववूह च्चिय कायव्वा तस्स अम्हेहिं ॥ ३७ ॥ तित्थंकराणुकारं काउं न हि तरइ पागओ पुरिसो । गत्ताकोलो हरिकुंजरस्स किं लहइ तुल्लत्तं ॥ ३८ ॥ मिच्छादिट्ठी मूढा करिंति उग्घट्टयं जइ पहूणं । ता किं तिलोयपहुणो कुणंति जाणंतया पुरिसा ॥ ३९ ॥

आणावत्तित्तं चिय पहुणो आराहणं इह पहाणं । न हि कोयरिओ सेवइ रायाणं रायचिंधेहिं ॥ ४० ॥ पञ्चविहो उवइट्ठो कप्पो वीरेण विगयमोहेण । जहसत्ति तं कुणंतो आणं आराहए तस्स ॥ ४१ ॥ पढमो य थविरकप्पो परिहारविसुद्धि-कप्पजिणकप्पा । पडिमाकप्पो भणिओ तहा अहालंदकप्पो य ॥ ४२ ॥ पंचवि इमे पहाणा अन्नोन्नानिंदयाण साहूणं । अत्तुक्करिसविसूइयविवज्जियाणं जओ भणियं ॥ ४३ ॥ जोवि दुवत्थतिवत्थो एगेण अचेलओ व संथरइ । न य ते दूसिंति परं सवेवि य ते जिणाणाए ॥ ४४ ॥ एत्थ किर थेरकप्पो निच्चो जम्हा इमंमि निप्फन्ना । सेसाण हुंति जोग्गा तित्थं च इमेण निव्वहइ ॥ ४५ ॥ दुब्बलसंघयणाणं एसो च्चिय वट्टमाणपुरिसाणं । उचिओ कप्पो तम्हा एयंमि हवेज्ज उज्जुत्तो ॥ ४६ ॥ इय विविहजुत्तिसारं पन्नविओ सूरिणा तहवि एसो । गाढाभिमाणवसओ पडिभणिउं एवमाढत्तो ॥ ४७ ॥ जइ ताव मंदसत्ता तुब्भे सुहलंपडा न उज्जमह । सइ सामत्थे किमहं पमायसीलो भविस्सामि ॥ ४८ ॥ इय जंपंतो बहुहा वारिज्जंतोवि वुड्ढवसहेहिं । पडिवन्ननग्गभावो सिवभूई निग्गओ सहसा ॥ ४९ ॥ नेहेणणुपव्वइया लहुभइणी तस्स उत्तरा नाम । तं वच्चंतं दट्ठं चिंतइ महभाउणो नूणं ॥ ५० ॥ एएण पगारेणं दिट्ठो परलोयसाहणोवाओ । इय चिंतिय संचलिया तहेव सा मग्गओ तस्स ॥ ५१ ॥ लज्जाकरित्ति काउं वेसाए साडिया नियच्छा से । तमणिच्छंतीं दट्ठूण भाउणा सा इमं भणिया ॥ ५२ ॥ देवयदिन्नं एयं मा मुंचसु सुयणु ! साडियं एगं । इय एगसाडियत्तं संजायं तस्स अज्जाणं ॥५३॥ एवं सो मोहंधो आरंभेऊण कट्ठणुट्ठाणं । जाओ मिच्छादिट्ठी दुग्गइदुक्खोहभागी य ॥ ५४ ॥ तथा चागमः—

"ऊहाए पन्नत्तं बोडियसिवभूइउत्तराहि समं । मिच्छादंसणमिणमो रहवीरपुरे समुप्पन्नं ॥ १ ॥"

॥ शिवभूतिचरितं समाप्तम् ॥

महामोहता चास्य गुरावज्ञाबुद्ध्यात्मानमुन्नमयितुं प्रवृत्तत्वाद्द्रष्टव्या। गुर्वाज्ञया शासनोन्नतिकारिणो लब्धिख्यातिनिरपेक्षस्य साधोरधिकतपःकर्मातापनादिकरणं च वीर्याचाराराधनरूपत्वाद्गुणकरमेव। इति गाथार्थः ॥ ११९ ॥

उक्तं शक्यानुष्ठानारम्भरूपं पञ्चमं भावसाधुलिङ्गम्। अधुना षष्ठं गुणरागमाह—

जायइ गुणेसु रागो सुद्धचरित्तस्स नियमओ पवरो। परिहरइ तओ दोसे गुणगणमालिन्नसंजणणे॥१२०॥

'जायते' संपद्यते 'गुणेषु' ज्ञानादिषु मूलोत्तरगुणेषु वा 'रागः' प्रतिबन्धः 'शुद्धचारित्रस्य' निष्कलङ्कसंयमस्य 'नियमतः' अवश्यंभावेन 'प्रवरः' प्रधानो निर्मिथ्य इति भावः। 'परिहरति' वर्जयति 'ततः' तस्माद्गुणानुरागात् 'दोषान्' दुष्टव्यापारान्। किंविशिष्टान्? 'गुणगणमालिन्यसंजनकान्' ज्ञानादीनामशुद्धिहेतून् भावसाधुः। इति गाथार्थः ॥ १२० ॥

गुणानुरागस्यैव लिङ्गमाह—

गुणलेसंपि पसंसइ गुरुगुणबुद्धीए परगयं एसो। दोसलवेणवि निययं गुणनिवहं निग्गुणं गणइ ॥१२१॥

'गुणलेशमपि' आस्तां महीयांसं गुणमित्यपेरर्थः। 'प्रशंसति' श्लाघते 'परगतं' अन्यसक्तम्, 'एषः' भावसाधुरुत्तमप्रकृतित्वान्महतोऽपि दोषानुत्सृज्याल्पमपि परगतं गुणं पश्यति, कुथितकृष्णसारमेयशरीरे सितदन्तपङ्क्तिं दामोदरवदिति भावः। परिभावयति च—"कालंमि अणाईए अणाइदोसेहिवासिए जीवे। जं पावियइ गुणोवि हु तं पन्नेज्जा महच्छरियं ॥ १ ॥" तथा 'दोषलवेनापि' अल्पप्रमादस्खलितेनापि 'निजकं' आत्मीयं 'गुणनिवहं' सदनुष्ठानकलापं 'निर्गुणं'

असारं 'गणयति' कल्पयति । धिग् मां प्रमादशीलमिति भावनया प्रकृतो भावयतिः, कर्णस्थापितविस्मृतशुण्ठीखण्डाप-श्रिमदशपूर्वधरश्रीवैरस्वामिवत् । इति गाथार्थः ॥ १२१ ॥

तथा—

पालइ संपत्तगुणं गुणड्ढसंगे पमोयमुव्वहइ । उज्जमइ भावसारं गुरुतरगुणरयणलाभत्थी ॥ १२२ ॥

'पालयति' रक्षति वर्द्धयति च जननीव प्रियपुत्रं संप्राप्तं सम्यक्कर्मक्षयोपशमोपलब्धं, गुणं ज्ञानचरणरूपम् । तथा गुणै-राढ्यानां समृद्धानां सङ्गे मीलके चिरप्रोषितस्निग्धबन्धुसंप्रयोग इव 'प्रमोदं' आनन्दं 'उत्' प्राबल्येन 'वहति' प्राप्नोति । तद्यथा—"असतां सङ्गपङ्केन यन्मनो मलिनीकृतम् । तन्मेऽद्य निर्मलीभूतं साधुसंबन्धवारिणा ॥ १ ॥ पूर्वपुण्यतरोरद्य फलं प्राप्तं मयाऽमलम् । सङ्गेनासङ्गचित्तानां साधूनां गुणधारिणाम् ॥ २ ॥" तथा गुणरागादेव 'उद्यच्छति' प्रयतते 'भावसारं' सद्भावसुन्दरं यथा भवति, ध्यानाध्ययनतपःप्रभृतियतिकृत्येष्विति गम्यते । किम् ? इत्यत आह—गुरुतराणि क्षायिकभावभावित्वाद्यानि गुणरत्नानि क्षायिकज्ञानदर्शनचारित्राणि, तेषां यो लाभस्तदर्थी तदभिलाषवान् । तथा हि—भवत्येवोद्यमवतामपूर्वकरणक्षपकश्रेणिक्रमेण केवलज्ञानादिसंप्राप्तिः, सुप्रतीतमिदम् । इति गाथार्थः ॥ १२१ ॥

गुणानुरागस्यैव प्रकारान्तरेण लक्षणमाह—

सयणोत्ति व सीसोत्ति व उवगारित्ति व गणिव्वओ वत्ति । पडिबंधस्स न हेऊ नियमा एयस्स गुणहीणो १२३

स्वकीयो जनः 'स्वजनः' । इतिशब्दस्तद्भेदसूचकः । वाशब्दः समुच्चये । ह्रस्वत्वं तु प्राकृतशैल्या । 'शिष्यः' विनेयः ।

इतिवाशब्दौ पूर्ववत् । 'उपकारी' भक्तपानदानादिना पूर्वमुपकृतत्वात् । इतिवाशब्दावुक्तवत् । 'गणिवओ वत्ति' एकगच्छीय एकगच्छवासी । वेतिशब्दौ पूर्ववदेव । एतेषामेकैकोऽपि प्रायः प्रतिबन्धकारणं संभवति । 'नियमात्' निश्चयेन 'एतस्य' गुणरागिणः पुनः प्रतिबन्धस्य नैव 'हेतुः' निमित्तमेकोऽपि भवतीति । किंविशिष्टः सन् ? इत्याह—'गुणहीनः' निर्गुण इति । उक्तं च—"सीसो सज्झिलओ वा गणिवओ वा न सोगई निंति । जे तत्थ नाणदंसणचरणा ते सोगई मग्गो ॥ १ ॥" तथा—"परलोकविरुद्धानि कुर्वाणं दूरतस्त्यजेत् । आत्मानं योऽभिसंधत्ते सोऽन्यस्मै स्यात्कथं हितः ? ॥ १ ॥" इति गाथार्थः ॥ १२३ ॥

अथ चारित्रिणा तेषां स्वजनादीनां किं विधेयम् ? इत्याह—

करुणावसेण नवरं अणुसासइ तंपि सुद्धमग्गंमि । अच्चंताजोग्गं पुण अरत्तदुट्ठो उवेहेइ ॥ १२४ ॥

करुणा परदुःखनिवारणबुद्धिः । उक्तं च—"परहितचिन्ताः मैत्री परदुःखविनाशिनी तथा करुणा । परसुखतुष्टिर्मुदिता परदोषोपेक्षणमुपेक्षा ॥ १ ॥" तद्वशेन तद्रसिकतया, 'नवरं' केवलं रागद्वेषपरिहारेण 'अनुशास्ति' शिक्षयति 'तमपि' स्वजनादिकं, अपिशब्दात्तदितरमपि । क्व ? इत्याह—'शुद्धमार्गे' यथावस्थितमोक्षाध्वविषये । तद्यथा—"किं नारकतिर्यङ्नरविबुधगतिविचित्रयोनिभेदेषु । बत ! संसरन्न सततं निर्विण्णो दुःखनिलयेषु ॥ १ ॥ येन प्रमादमुद्धतमाश्रित्य महाधिहेतुमस्खलितम् । संत्यज्य धर्मचिन्तां रतस्त्वमार्येतराचरणे ॥ २ ॥ यन्न प्रयान्ति पुरुषाः स्वर्गं यच्च प्रयान्ति विनिपातम् । तत्र निमित्तमनार्यः प्रमाद इति निश्चितमिदं मे ॥ ३ ॥ सइ सासयम्मि थामे तस्सोवाए य परममुणिभणिए ।

एगस्स साहए सुपुरिसाण जत्तो तहिं जुत्तो ॥ ४ ॥" इत्यादिविविधवाचोयुक्तिभिरुत्पादितसंवेगं तं शुद्धधर्मे प्रवर्त्तयति ज्ञापनीयश्चेदसौ स्यात् । 'अत्यन्तायोग्यं' बाढमप्रज्ञापनीयं पुनस्तं 'अरक्तद्विष्टः' रागद्वेषरहितः 'उपेक्षते' अवधीरयति "उपेक्षा निर्गुणेषु" इति वाक्यमनुसृत्य । इति गाथार्थः ॥ १२४ ॥

गुणानुरागस्यैव फलमाह—

उत्तमगुणाणुराया कालाइदोसओ अपत्तावि । गुणसंपया परत्थवि न दुल्लहा होइ भव्वाणं ॥ १२५ ॥

उत्तमा उत्कृष्टाः, गुणाः ज्ञानादयः, तेष्वनुरागः प्रीतिप्रकर्षः, तस्माद्धेतोः, कालो दुःषमारूपः, आदिशब्दात्संहननसहायाभावौ त एव दोषा दूषणानि, विघ्नकारित्वात्, ततः 'अप्राप्तापि' आस्तां तावत्प्राप्तेत्यपेरर्थः । 'गुणसंपत्' परिपूर्णधर्मसाधनसामग्री वर्त्तमानजन्मनीति गम्यते । 'परत्रेऽपि' भाविभवे, अपिः संभावने संभाव्यते । एतन्नैव 'दुर्लभा' दुरापा भवति 'भव्यानां' मुक्तिगमनयोग्यानाम् । इति गाथार्थः ॥ १२५ ॥

उक्तं गुणरागरूपं षष्ठं भावसाधुलिङ्गम्, अधुना गुर्वाज्ञाराधनरूपं सप्तममाह—

गुरुपयसेवानिरओ गुरुआणाराहणंमि तल्लिच्छो । चरणभरधरणसत्तो होइ जई नन्नहा नियमा ॥१२६॥

अत्र कश्चिदाह—पूर्वाचार्यैश्चारित्रिणो लिङ्गषट्कमेवोक्तम् । यतोऽवाचि—"मग्गणुसारी सद्धो पन्नवणिज्जो कियावरो चेव । गुणरागी सक्कारंभसंगओ तह य चारित्ती ॥ १ ॥" तत्कुत एतत्सप्तमं लिङ्गम् ? इत्युच्यते, भणितमेवोपदेशपदशास्त्रे लिङ्गभणनानन्तरम्—"एयं च अत्थि लक्खणमिमस्स नीसेसमेव धन्नस्स । तह गुरुआणासंपाडणं च गमगं

इहं लिङ्गम् ॥ १ ॥ " इत्यलं विस्तरेण । प्रस्तुतव्याख्यानमुच्यते—गुरव उक्तस्वरूपास्तेषां पदानि चरणास्तेषां सेवा सम्यगाराधनम्, न पुनरासन्नवर्त्तित्वमात्रम् । यतः सूत्रम्—"गुरुमूलेवि वसंता अणुकूला जे न हुंति उ गुरूणं । एएसिं तु पयाणं दूरं दूरेण ते हुंति ॥ १ ॥ " तस्यां निश्चयेन रतो निरतो नैहिकफलार्थमेव, न च क्वचिन्निष्ठुरोक्तिभिर्निर्भर्त्सितोऽपि गुरुं जिहासति, केवलं गुरुषु बहुमानमेव विधत्ते । यथा—"धन्यस्योपरि निपतत्यहितसमाचरणधर्मनिर्वापी । गुरुवदनमलयनिसृतो वचनरसश्चन्दनस्पर्शः ॥ १ ॥ " तथा—"लज्जा दया संजम बंभचेरं कल्लाणभागिस्स विसोहिठाणं । जे मे गुरू सययं अणुसासयंति तेहं गुरू सययं पूययामि ॥ १ ॥ " तथा 'गुर्वाज्ञाराधने' गुर्वादेशसंपादने 'तल्लिप्सुः' तमेवादेशं लब्धुमिच्छुर्गुरोरादेशं प्रतीक्षमाणः समीपवर्त्त्येव स्यात् । इत्थंभूतश्चरणभरधरणे चारित्रभारोद्वहने शक्तः समर्थो भवति 'यतिः' सुविहितो, 'नान्यथा' भणितविपरीतो 'नियमात्' निश्चयेन । इति गाथार्थः ॥ १२६ ॥

कथं पुनरेवं (प) निश्चयोऽवसीयते ? इत्याह—

सव्वगुणमूलभूओ भणिओ आयारपढमसुत्ते जं । गुरुकुलवासोवस्सं वसेज्ज तो तत्थ चरणत्थी ॥१२७॥

सर्वे गुणा अष्टादशशीलाङ्गसहस्ररूपास्तेषां मूलभूतः प्रथमकारणं 'भणितः' उक्तः, आचारः प्रथममङ्गं, तस्य प्रथमसूत्रे—"सुयं मे आउसंतेणं भगवया एवमक्खायं" इति वाचना प्रकारे । यद्यस्मात् 'गुरुकुलवासः' गुरुपदच्छायासेवनम् । अयमत्र भावार्थः—सुधर्मस्वामी जम्बूस्वामिने कथयति स्म । श्रुतं मया वसता भगवतः समीपे तिष्ठता वक्ष्यमाणमर्थपदमिति । कः पुनरस्य कथनस्य भावार्थः ? सर्वेण धर्मार्थिना गुरुसेवा विधेयेति । तत्र व्याख्यानं यस्मादेवं तस्मादवश्यं

'वसेत्' तिष्ठेत् 'तत्र' गुरुकुले 'चरणार्थी' चारित्रकामी । तथा च गच्छे वसतो गुणः—“जइवि य निग्गयभावो तहावि रक्खिजई स अन्नेहिं । वंसकडिले छिन्नोवि वेणुओ पावए न मही (हिं) ॥ १ ॥” इति गाथार्थः ॥ १२७ ॥

नन्वागमे यतेराहारशुद्धिरेव मुख्यश्चारित्रशुद्धिहेतुरुद्घुष्यते । यत उक्तम्—पिंडं असोहयंतो अचरित्ती एत्थ संसओ नत्थि । चारित्तंमि असंते निरत्थिया चेव पव्वज्जा ॥ १ ॥” पिण्डविशुद्धिश्च बहूनां मध्ये वसताऽतिदुष्करैवेत्येकाकिनाऽपि भूत्वा सैव विधेया, किं ज्ञानादिलाभेन कार्यं ? मूलभूतं चारित्रमेव पालनीयं, मूले सत्येव लाभचिन्ता ज्यायसी, इति पराभिप्रायमाशङ्क्याह—

एयस्स परिच्चाया सुद्धुंछाइवि न सुंदरं भणियं । कम्माइवि परिसुद्धं गुरुआणावत्तिणो बिंति ॥१२८॥

'एतस्य' गुरुकुलवासस्य 'परित्यागात्' सर्वतो मोचनेन 'शुद्धोञ्छादि' शुद्धभैक्षोपधिप्रमुखं न 'सुन्दरं' शोभनं भणितमागमज्ञैरिति गम्यते । यतस्तदुक्तिः—“सुद्धुंछाइसु जत्तो गुरुकुलचागाइणेह विन्नेओ । सबरससरक्खपिच्छत्थघायपायच्छिवणतुल्लो ॥ १ ॥” अस्य व्याख्या—शुद्धोञ्छं निर्दोषभैक्षम्, आदिशब्दात्कलहममत्वपरिहारे च यत्न उद्यमः, गुरुकुलत्यागेन, आदिशब्दात्सूत्रार्थहान्या ग्लानादित्यागेन चेह जिनमते विज्ञेयो बोद्धव्यः । कथंभूतः ? इत्याह—शबरराजस्य सरजस्कस्य पिच्छार्थं घाते पादस्पर्शनतुल्यश्चरणासंघट्टनादेशकल्प इति । संविधानकसंप्रदायश्चेत्याह—

क्वचित्संनिवेशे शबराभिधानः सरजस्कभक्तो राजा बभूव । तस्यैकदा दर्शनार्थमुपरि धार्यमाणमयूरपतत्रछत्रो गुरुराजगाम । कृतसम्मानस्योपनिविष्टस्य च राजप्रियतमा तदातपत्रं चञ्चच्चाकचिक्याऽनेकचन्द्रकराजिराजितमवलोक्य

कुतूहलातिरेकतस्तं प्रार्थयितुमारेभे । तत्र च देशे मयूराभावाद्दुर्लभानि मयूरपिच्छानीत्यसावदित्सन्नुत्थाय स्वाश्रयमगमत्। ततो राज्ञी कृताभोजननिश्चया तदानयनाय राजानं प्रोत्साहयाञ्चकार । राजाऽपि यदा पुनः पुनः प्रार्थितोऽपि न ददाति गुरुः, तदा दुर्वारप्रेमग्रहमोहितेन हठादेव गृहीत्वानयत तानि, इत्यादिष्टाः पदातयः प्रत्यूचुः—नासौ जीवन्नर्पयति, प्रहारैश्चोपतिष्ठते । ततो राजोवाच दूरस्था एव तं बाणैरचेष्टं कृत्वा गृह्णीत, किं तु तच्छरीराच्छरानुत्पाटयन्तः पादेन स्पर्शनं मा कुर्द्दं, यतो गुरोरवज्ञा महते पातकाय संपद्यत इति ॥

यादृशोऽस्य शबरराजस्य गुरोर्मारणं कारयतः पादस्पर्शं च वारयतो विवेकस्तादृग्गुरुकुलत्यागिनः शुद्धोञ्छादिलालसस्य साधोरिति भावः । तथा कर्मशब्देनाधाकर्मोच्यते, आदिशब्देन सकलोद्गमोत्पादनैषणादोषपरिग्रहः । तत्रोद्गमदोषाः—"आहाकम्मुद्देसिय पूईकम्मे य मीसजाए य । ठवणा पाहुडियाए पाहुयरकीयपामिच्चे ॥ १ ॥ परियट्टिए अभिहडे उब्भिन्ने मालोहडेय । अच्छेज्जे अणिसट्ठे अज्झोयरए य सोलसमे ॥ २ ॥" उत्पादनादोषाः—"धाई दूइ निमित्ते आजीव वणीमगे तिकिच्छा य । कोहे माणे माया लोभे य हवंति दस एए ॥ १ ॥ पुव्विं पच्छा संथव विज्जा मंते य चुन्नजोगे य । उप्पायणाए दोसा सोलसमो मूलकम्मे य ॥ २ ॥" एषणादोषाः—"संकियमक्खियनिक्खित्तपिहियसाहरियदायगुम्मीसो । अपरिणयलित्तछड्डिय एसणदोसा दस हवंति ॥ १ ॥" एतद्दोषदुष्टमप्याहारादि 'परिशुद्धं' निर्दोषमेव, अपिशब्दस्यावधारणार्थस्येह योगात् 'गुर्वाज्ञावर्त्तिनः' आराध्यादेशविधायिनो, गच्छवासिन इति हृदयम् । 'ब्रुवते' प्रतिपादयन्त्यागमतत्त्वविदः । इति गाथार्थः ॥ १२८ ॥

अत एव गुर्वाज्ञाकारिणं विशेषतः स्तुवन्नाह—

ता धन्नो गुरुआणं न मुयइ नाणाइगुणगणनिहा(या)णं। सुपसन्नमणो सययं कयन्नुयं मणसि भावितो १२९

यस्माद्गुर्वाज्ञा गरीयसे गुणाय, 'तस्मात्' हेतोर्धन्य एव गुर्वाज्ञां 'न मुञ्चति' नोज्झति। किंविशिष्टाम्? ज्ञानादिगुणगणस्य निदानं कारणम्। उक्तं च—"नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य। धन्ना आवकहाए गुरुकुलवासं न मुञ्चन्ति ॥ १ ॥" सुष्ठु अतिशयेन प्रसन्नमना निर्मलमानसो निष्ठुरमपि शिक्षितो न कुप्यति, न कलुषयत्यन्तःकरणम्। केवलम्—"जं मे बुद्धाणुसासंति सीएण फरुसेण वा। मम लाभोत्ति पेहाए पयओ तं पडिसुणे ॥ १ ॥" कथम्? 'सततं' अनवरतं 'कृतज्ञताम्' उपकाराविस्मृतिरूपां 'मनसि' हृदये 'भावयन्' अवस्थापयन्। तद्यथा—"टोलो व्व लोढुलंतो अहयं विन्नाणनाणनिलएण। देवो व्व वंदणिज्जो कओम्हि गुरुसुत्तहारेण ॥ १ ॥" इत्थंभूत एव धन्यो भवति, धर्मधनार्हत्वात्। इति गाथार्थः ॥ १२९ ॥

आह—किं योऽपि सोऽपि गुरुर्गुणसंपत्तये सेवनीय आहोश्वित्कश्चिद्विशिष्ट एव? इति प्रश्ने प्रतिवचनमाह—

गुणवं च इमो सुत्ते जहत्थगुरुसद्दभायणं इट्ठो। गुणसंपया दरिद्दो जहुत्तफलदायगो न मओ ॥१३०॥

चशब्दस्यावधारणार्थत्वात् 'गुणवानेव' गुणगणालङ्कृत एव 'अयं' इति गुरुः 'सूत्रे' सिद्धान्ते, यथार्थः सान्वयो यो गुरुशब्दस्तस्य भाजनमाधारः 'इष्टः' अभिप्रेतः। तथा हि गुरुशब्दस्य यथावस्थितं शास्त्रार्थं गृणातीति गुरुः, इत्यन्वयः।

१ अन्यत्र "नणिनिहाणं" इत्यस्ति। २ अन्यत्र "टोलु व्व ढुलढुलंतो" इत्यस्ति ॥

स च संविग्नस्यैव युज्यते, अतः संविग्न एव गुणवान्, नान्यः । तस्य च गुणाः प्राधान्येन—“वय[६]छक्कं काय[१२]छक्कं अकप्पो[१३] गिहिभायणं[१४] । पलियंक[१५]निसिज्जाय[१६] सिणाणं[१७] सोहवज्जणं[१८] ॥ १ ॥ एभिर्विना गुरुत्वाभाव एव, तन्तुभिर्विना पटाभाववत् । शेषास्तु—“पडिरूवो तेयस्सी” इत्यादयो देशकुलजात्यादयोऽन्येऽपि गणिसंपदादयो विशेषगुणाः कादाचित्काः, पटस्य रक्तत्वादिवत् । तत्रेह प्रधानगुणैर्युक्तो गुणवानभिप्रेतः, कार्यसाधकत्वात् । सत्सु तेषु शेषगुणसंप्रयोगोऽपि वरीयानेवेति । विपर्यये पुनः किं स्यात् ? इत्याह—‘गुणसंपदा’ सद्गुणविभूत्या करणभूतया ‘दरिद्रः’ दुर्गतो यथोक्तं गुरुसंप्रयोगे फलं, तस्य दायकः संपादयिता ‘न मतो’ नैव संमतो गीतार्थानाम् । अतो न निर्गुणो गुरुः सेवनीयः । इति गाथागर्भार्थः ॥१२०॥

नन्नु प्रमत्तेषु दुर्लभा सर्वगुणसंपत्, यतः कोऽपि कुतोऽपि केनापि गुणेन हीनोऽप्यन्येनाधिकः, इति तारतम्यभेदेनानेकधा गुरव उपलभ्यन्ते, तेषां सामाचार्योऽपि नानारूपा एवेति तेषु कं गुरुमाश्रयामः ? कं वा न ? इति दोलायमानमानसानामस्माकं किमुचितम् ? इति शिष्येण सप्रणयं पृष्टो गुरुराह—

मूलगुणसंपउत्तो न दोसलवजोगओ इमो हेओ। महुरो वक्कमओ पुण पवत्तियवो जहुत्तम्मि ॥ १२१ ॥

मूलगुणा महाव्रतानि व्रतषट्ककायषट्कादयो वाऽष्टादश, तैः सम्यक् सद्बोधप्रधानं प्रकर्षेणोद्यमातिशयेन युक्तोऽनुगतो ‘मूलगुणसंप्रयुक्तः’ गुरुरिति प्रस्तुतत्वान्नैव दोषलवः स्तोकदोषस्तद्योगात्तत्संबन्धात् ‘अयं’ गुरुः ‘हेयः’ परित्याज्यः । उक्तं चागमे—“जेयावि मंदेत्ति गुरुं विइत्ता डहरे इमे अप्पसुएत्ति नच्चा । हीलिंति मिच्छं पडिवज्जमाणा करेंति आसायण ते गुरूणं ॥ १ ॥ पगईए मंदावि हवंति एगे डहरावि य जे सुयबुद्धोववेया । आयारमंता गुणसुट्ठियप्पा जे हीलिया सिहि-

रिव भासकुज्जा ॥ २ ॥ जेयावि नागं डहरंति नच्चा आसायए से अहिया य होइ । एवायरियं पिहु हीलयंतो नियच्छई जाइपहं खु मंदे ॥ ३ ॥ गुरुगुणरहिओ य इहं दट्ठव्वो मूलगुणविउत्तो जो । न उ गुणमेत्तविहीणोत्ति चंडरुद्दो उदाहरणं ॥ ४ ॥" इत्याद्यागमवचनान्यनुसृत्य मूलगुणशुद्धो गुरुः सामाचारीनानात्वेऽपि न मोक्तव्यः । (कदाचित्) किंचित्प्रमादवांस्तु 'मधुरोपक्रमतः' इति तृतीयार्थे पञ्चमी । ततो 'मधुरोपक्रमेण' सुखदोपायेन प्रियवचनाञ्जलिप्रणामपूर्वमनुपकृतपरहितरतैर्भवद्भिः सुष्ठु वयं मोचिता गृहवासपाशात् । तदिदानीमुत्तरोत्तरमार्गप्रवर्त्तनेन निस्तारयतास्माद्भीमभवकान्तारात्, इत्यादिप्रोत्साहनेन 'पुनः' भूयोऽपि प्रवर्त्तयितव्यो 'यथोक्ते' मार्गानुयायिन्यनुष्ठान इति शेषः । इति गाथार्थः ॥ १३१ ॥

किमित्येवमुपदिश्यते ? इत्याह—

पत्तो सुसीससद्दो एव कुणंतेण पंथगेणावि । गाढप्पमाइणोवि हु सेलगसूरिस्स सीसेणं ॥ १३२ ॥

'प्राप्तः' लब्धः सुशिष्य इति शब्दो विशेषणम्, 'एवं' गुरोरनुवृत्तिं कुर्वता 'पन्थकेन' प्रसिद्धसाधुना, अपिशब्दादन्यैरपि तथाविधैः । यतोऽभाणि—"सीएज्ज कयाइ गुरू तंपि सुसीसा सुनिउणमहुरेहिं । मग्गे ठवेंति पुणरवि जह सेलगपंथगो नायं ॥ १ ॥" तमेव विशिनष्टि—'गाढप्रमादिनोऽपि' अतिशयशैथिल्यवतोऽपि शैलकसूरेः शिष्येणेति व्यक्तमेवेति गाथाक्षरार्थः । भावार्थः कथानकगम्यः ॥ १३२ ॥

तच्चेदम्—

अत्थि सुरट्ठाविसए वारवती नाम पुरवरी रम्मा । कंचणमणिमयमंदिरपायारा धणयनिम्मविया ॥ १ ॥ तत्थ य हरि-

कुलनहयलहरिणंको अरिसमूहमयमहणो । कन्हो नामेण निवो हरि व विबुहप्पिओ आसी ॥ २ ॥ तत्थेव सत्थवाही थावच्चा नाम पायडाहेसि । कम्मवसाओ बालंमि नंदणे जायपइमरणा ॥ ३ ॥ सोयभरनिब्भराए तीए बालस्स नो कयं नामं । तो थावच्चापुत्तो सो विक्खाओ सयललोगे ॥ ४ ॥ कालेण कलाकुसलो तारुन्नं पाविओत्ति मायाए । परिणाविओ समं चिय बत्तीसमहेब्भकन्नाओ ॥ ५ ॥ ताहि समं सुहमसमं अणुहवमाणस्स विगयचिंतस्स । दोगुंदुगदेवस्स व समइक्कंतो बहू कालो ॥ ६ ॥ अह अन्नया कयाई विहरंतो समणसंघपरिकिन्नो । भयवं अरिट्ठनेमी समागओ तीए नयरीए ॥ ७ ॥ रेवयगनगसगासे उज्जाणे नंदणंमि रमणीए । सुररइयसमोसरणे उवविट्ठो देसणं काउं ॥ ८ ॥ तत्तो निउत्तपुरिसा नाऊणं बहलपुलयचिंचइओ । चलिओ भरहद्धवई वंदणहेउं जिणिंदस्स ॥ ९ ॥ चलिया तेण समाणं दसवि दसारा समुद्दविजयाई । तह चेव महावीरा पंचवि बलदेवपामोक्खा ॥ १० ॥ सोलसरायसहस्सा संचला उग्गसेणपामोक्खा । इगवीससहस्सा तह वीराणं वीरसेणाई ॥ ११ ॥ दुद्दंतकुमाराणं सट्ठिसहस्सा उ संबपमुहाणं । पज्जुन्नप्पमुहाओ कुमारकोडी उ अद्भुट्ठ ॥ १२ ॥ छप्पन्नं च सहस्सा महसेणाईण बलवगाणंपि । अन्नोवि सेट्ठिमाई नागरलोगो अणेगविहो ॥ १३ ॥ दट्ठुं कयसिंगारं एगमुहं पत्थियं नयरिलोगं । नियपडिहारं पुच्छइ थावच्चानंदणो एवं ॥ १४ ॥ कत्थ इमो संचलो कयसिंगारो जणो तुरियतुरियं । सो आह[1] नेमिनाहस्स वंदणत्थंति नेमिसुयं[2] ॥ १५ ॥ अह सोवि रहारूढो भत्तिब्भरनिब्भरो सह निवेण । वंदइ तिलोयनाहं सुणेइ धम्मं च एगग्गो ॥ १६ ॥ नाऊण असारत्तं भवस्स नीसेसदुक्खपभवस्स । मोक्खं च

१ इतः परम् अन्यत्र तु "भुवणनाहस्स नेमिनाहस्स नमणत्थं" इत्यस्ति । २ "ते निसुयं" इत्यपि ॥

महासोक्खं सज्झं चारित्तधम्मस्स ॥ १७ ॥ संवेगभाविओ तो थावच्चानंदणो जिणं भणइ । आपुच्छिऊण जणणिं तुहं-
तिए पव्वइस्सामि ॥ १८ ॥ जुत्तमिणंति पवुत्ते जिणेण गंतूण मंदिरे जणणिं । विन्नवइ पायवडिओ अम्मो गिण्हामि पव्वज्जं
॥ १९ ॥ सावि हु सिणेहमूढा रुयमाणी भणइ दुक्करा सुट्ठु । अन्नस्सवि पव्वज्जा विसेसओ तुज्झ सुहियस्स ॥ २० ॥
आसालग्गं जणणिं कह मुंचसि पुत्त ! निग्घिणो होउं । बत्तीसं भज्जाओ एयाओ विणयसज्जाओ ॥ २१ ॥ दाणोवभोगकज्जे
पज्जत्तं कुलकमागयं रित्थं । पुव्वसुकएण पत्तं विलससु ता दाणधम्मरओ ॥ २२ ॥ वड्ढियकुलसंताणो वयपरिणामे करेज्ज
हियइट्ठं । सो भणइ अणिच्चे जीवियंमि न हु एरिसं घडइ ॥ २३ ॥ अवि य—"अन्नह परिचिंतिज्जइ सहरिसकंडुज्जुएण
हियएण । परिणमइ अन्नह च्चिय कज्जारंभो विहिवसेण ॥ १ ॥" एमाइउत्तिपडिउत्तिभावणा सुट्ठु निच्छिओच्छाहं । कलि-
ऊणं थावच्चा अणुमन्नइ तं अकामावि ॥ २४ ॥ गंतुं केसवमूलं कहेइ सयलंपि पुत्तवुत्तंतं । मग्गइ य रायचिंधे दिक्खाम-
हिमाकरणहेउं ॥ २५ ॥ तुट्ठो भणइ य कन्हो धन्नो सो जस्स निच्छओ धम्मे । ता चिट्ठ निव्वुया तं दिक्खामहिमं भलि-
स्सामि ॥ २६ ॥ गंतूण य तग्गेहं तीसे पुत्तं सयं भणइ कन्हो । भुंजसु वच्छ ! सुहाइं भिक्खाचरिया महादुक्खा ॥ २७ ॥
सो पडिभणइ महापहु ! भयाभिभूयाण केरिसं सोक्खं । ता सव्वभयपणासी धम्मो च्चिय जुज्जए काउं ॥ २८ ॥ रायाह—
महव्बाहुच्छायाए वच्छ ! वसंतस्स ते भयं नत्थि । अह अत्थि ता निवेयसु जेण निवारेमि तं तुरियं ॥ २९ ॥ इयरेण
वुत्तं—जइ एवं ता इंतं जरं च मच्चुं च मे निवारेहि । जेण सुनिव्वुयहियओ भोगसुहं सामि ! माणेमि ॥ ३० ॥ भणइ
नरिंदो सुंदर ! दुव्वारमिमं दुगंपि जियलोए । सुरनाहोवि न एए वारइ अम्हारिसो दूरे ॥ ३१ ॥ जओ—कम्मवसेण

जियाणं जरमरणाइं हवंति संसारे । इयरो भणइ अओ च्चिय कम्माइ निहंतुमिच्छामि ॥ ३२ ॥ नाऊण निच्छयं से नर-
नाहो भणइ साहु साहुत्ति । पवयसु धीर ! एवं पुज्जंतु मणोरहा तुज्झ ॥ ३३ ॥ कारेइ केसवो तो उग्घोसणयं पुरीए
सव्वाए । संसारभउव्विग्गो थावच्चानंदणो धन्नो ॥ ३४ ॥ पव्वयइ मोक्खकामी जइ ता अन्नोवि कोवि पव्वयइ । ता अणु-
मन्नइ कन्हो वहइ य तत्तिं कुडंबस्स ॥ ३५ ॥ सोऊण घोसणं तं सहस्समेगं उवट्ठियं तत्थ । रायाईण सुयाणं थावच्चापु-
त्तनेहेण ॥ ३६ ॥ निक्खमणमहामहिमं राया तेसिं करेइ सव्वेसिं । इय थावच्चापुत्तो सहस्समसहिओवि निक्खंतो ॥ ३७ ॥
जाओ चोद्दसपुव्वी जिणेण सो चेव तस्स परिवारो । दिन्नो तो उग्गतवो विहरइ महिमंडलं एसो ॥ ३८ ॥ विहरंतो संपत्तो
कयाइ सेलगपुरंमि सो भयवं । पंचसयमंतिसहियं सेलगरायं कुणइ सड्ढं ॥ ३९ ॥ तत्तो य विहरमाणो पत्तो सोगंधियाए
नयरीए । तत्थवि पहाणसेट्ठिं सुदंसणं सावगं कुणइ ॥ ४० ॥ सो पुण सुयपरिवायगधम्मे पुव्वं किरासि अइभत्तो । सोऊण
सावगं तं समागओ तो सुओ तत्थ ॥ ४१ ॥ पत्तो सुदंसणगिहं दंसणमालिन्नभीरुणा तेण । नाभुट्ठिओ न पणओ न
पेहिओ नेव संलत्तो ॥ ४२ ॥ चिंतइ तओ सुओवि हु अरिहइ एसो न ताव उवएसं । जाव न एयस्स गुरू पराइओ
एयपच्चक्खं ॥ ४३ ॥ तो भणइ भो सुदंसण ! पुव्वं तं मज्झ सासणे आसि । संपइ कस्स समीवे गहिओ अन्नारिसो धम्मो
॥ ४४ ॥ तो कयअब्भुट्ठाणो पणामपुव्वं सिरत्थकरकमलो । सुमरंतो गुरुनामं सुदंसणो भणइ एयं तु ॥ ४५ ॥ सिरिथा-
वच्चापुत्तो सीसो तेलोक्कनाहनेमिस्स । नीलासोउज्जाणे विहरइ सो मज्झ धम्मगुरू ॥ ४६ ॥ भणइ सुओ तं मज्झवि दंसेहि
भवामि जेण तस्सीसो । अहवा पराजिणित्ता करेमि तं चेव नियसीसं ॥ ४७ ॥ चिंतइ सुदंसणो तो अमच्छरी एस

धम्मकामो य । गुरुवयणामयसित्तो लहिही बोहिं न संदेहो ॥ ४८ ॥ इय तं घेत्तूण गओ गुरुमूलं पुच्छई सुओ तत्थ । कुडिलाइं पसिणाइं सहच्छलगहणकज्जेसु ॥ ४९ ॥ सरिसवया तह मासा तुम्हं भक्खाउ किं कुलत्थी वा । धन्नवराई एसिं दो दो अत्था उ पसिणाणं ॥ ५० ॥ नाऊण य तब्भावं वागरियाइं गुरुहि तह ताइं । सवन्नुत्ति मणे जह सुयस्स संपन्नओ जाओ ॥ ५१ ॥ पसिणाणमुत्तराइं न एत्थ वित्थरभयाउ भणियाइं । जाणिउकामेण दढं नाएसु निरूवियवाइं ॥ ५२ ॥ सोऊण सुओ धम्मं संविग्गो सूरिपायमूलंमि । सीससहस्सेण समं पवइओ सुद्धपरिणामो ॥ ५३ ॥ जाओ चोद्दसपुवी गुरुहि दिन्नंमि पुवपरिवारो । विहरिउमारद्धो भूमिमंडले भवकयबोहो ॥ ५४ ॥ अह थावच्चापुत्तो सूरी सेलम्मि पुंडरीयंमि । दोमासकयाणसणो नेवाणमणुत्तरं पत्तो ॥ ५५ ॥ इयरोवि विहरमाणो सेलगपुरमागओ नरिंदस्स । दिक्खावसरोत्ति ठिओ सुभूमिभागंमि उज्जाणे ॥ ५६ ॥ बुद्धो सेलगराया रज्जं दाऊण मड्डुगसुयस्स । पंचहि मंतिसएहिं पंथगपमुहेहि परियरिओ ॥ ५७ ॥ निक्खंतो सुयविहिणा गुरुभाउयसुयमुणिंदपयमूले । एगारसअंगाइं अहिज्जिओ वज्जियावज्जो ॥ ५८ ॥ पंथगपमुहाण तओ पंचण्हसयाण नायगो ठविओ । सुयमुणिवरेण विहिणा सेलगसूरी महासत्तो ॥ ५९ ॥ सुयसूरीवि महप्पा समए आहारवज्जणं काउं । गिरिपुंडरीयसिहरे सहस्ससहिओ सिवं पत्तो ॥ ६० ॥ अह सेलगरायरिसी अणुचियभत्ताइभोगदोसेण । दाहजराईतविओ समागओ सेलगपुरंमि ॥ ६१ ॥ उज्जाणंमि पसत्थे सुभूमिभागंमि तं समोसरियं । सोऊण हट्ठतुट्ठो विणिग्गओ मड्डुगो राया ॥ ६२ ॥ कयवंदणाइकिच्चो सरीरवत्तं वियाणिउं गुरुणो । विन्नवइ एहि भंते ! मम गेहे जाणसालासु ॥ ६३ ॥ भत्तोसहाइएहिं अहापवत्तेहि तत्थ तुम्हाणं । कारेमि जेण किरियं धम्मसरी-

रस्स रक्खट्ठा ॥ ६४ ॥ पडिवन्नमिणं गुरुणा पारद्धा तत्थ उत्तमा किरिया । निद्धमहुराइएहिं वियडेण य वेज्जवयणाओ ॥ ६५ ॥ वेज्जाण कुसलयाए पच्छोसहपाणगाइधुवलाभा । थेवदियहेहि एसो जाओ निरुओ य बलवं च ॥ ६६ ॥ नवरं निद्धुन्हाइआहारे पाणगे य अइगिद्धो । सुहसीलयं पवन्नो नेच्छइ ठाणंतरविहारं ॥ ६७ ॥ बहुसोत्ति भणिज्जंतो विरमइ नो जाव सो पमायाओ । ताहे पंथगवज्जा मुणिणो मंतेंति एगत्थ ॥ ६८ ॥ कम्माइँ नूण घणचिक्कणाइ कुडिलाइँ वज्जसाराइं । नाणड्ढयंपि पुरिसं पंथाओ उप्पहं नेंति ॥ ६९ ॥ मोत्तूण रायरिद्धिं मोक्खत्थी ताव एस पव्वइओ । संपइ अइप्पमाया विम्हारियपओयणो जाओ ॥ ७० ॥ काले न-देइ सुत्तं अत्थं न कहेइ पुच्छमाणाणं । आवस्सगाइतत्तिं मोत्तुं बहुमन्नए निद्दं ॥ ७१ ॥ उवगारी दढमेसो अम्हाणं धम्मचरणहेउत्ता । मोत्तुं घेत्तुं च इमं जुत्तंति फुडं न याणामो ॥ ७२ ॥ अहवा किं अम्हाणं कारणरहिएण नीयवासेण । एयं पंथगसाहुं वेयावच्चे निजुंजेमो ॥ ७३ ॥ आपुच्छिऊण सूरिं विहरामो उज्जया वयं सव्वे । कालहरणंपि कीरइ जा वेयइ एस अप्पाणं ॥ ७४ ॥ सामत्थिऊण एवं पंथगसाहुं ठवित्तु गुरुपासे । गुरुसम्मएण सव्वे अन्नत्थ सुहं पविहरंति ॥ ७५ ॥ पंथगमुणीवि गुरुणो वेयावच्चं अखंडियं कुणइ । भत्तिबहुमाणसारं कुणइ अणूणं च नियकिरियं ॥ ७६ ॥ कत्तियचाउम्मासे सूरी भोत्तूण निद्धमहुराइं । पाऊण मज्जमहियं सुत्तो नीसट्ठसव्वंगो ॥ ७७ ॥ आवस्सगं कुणंतो पंथगसाहूवि खामणनिमित्तं । सीसेण तस्स पाए घट्टेइ विणयनयनिऊणो ॥ ७८ ॥ तो कुविओ रायरिसी जंपइ को एस अज्ज निलज्जो । पाए आघट्टंतो निद्दाविग्घे मह पयट्टो ॥ ७९ ॥ रुट्ठं दट्ठूण गुरुं संविग्गो पंथगो भणइ एवं । चाउम्मासियखामणकए मए दुमिया तुब्भे ॥ ८० ॥ ता एगं अवराहं खमह न काहामि एरिसं बीयं ।

हुंति खमासील च्चिय उत्तमपुरिसा जओ लोए ॥ ८१ ॥ इय पंथगमहुरगिरं आयन्नंतस्स तस्स सूरिस्स । सूरुग्गमे तमं पिव अन्नाणं दूरमोसरियं ॥ ८२ ॥ परिनिंदिऊण सुइरं अप्पाणं जायसंजमुज्जोओ । खामेइ पंथगं पिहु पुणो पुणो सुद्ध-परिणामो ॥ ८३ ॥ दुइयदिणे रायाणं आपुच्छिय दोवि सेलगपुराओ । निक्खंता पारद्धा उग्गविहारेण विहरेउं ॥ ८४ ॥ अवगयतवुत्तंता संपत्ता सेसमंतिमुणिणोवि । विहरिय चिरं सुविहिणा आरूढा पुंडरीयगिरिं ॥ ८५ ॥ थावच्चापुत्तो इव काउं संलेहणं विहुयकम्मा उप्पन्नविमलनाणा सिद्धा परिनिवुया सवे ॥ ८६ ॥ इय मूलगुणविसुद्धो मोत्तवो नियगुरू न गीएहिं । सम्ममणुवत्तियवो सुसाहुणा पंथगेणेव ॥ ८७ ॥

॥ शैलकराजर्षिकथानकं समाप्तम् ॥

एवं कुर्वतः साधोर्गुणमाह—

एवं गुरुबहुमाणो कयन्नुया सयलगच्छगुणवुड्डी । अणवत्थापरिहारो हुंति गुणा एवमाईया ॥ १३३ ॥

'एवं' गुरुममुञ्चता सन्मार्गोद्यमं च कारयता यतिना 'गुरुबहुमानः' मानसप्रीत्यतिशयः कृतो भवति । तथाहि—द्विविधो गुरुः, सामान्यगुरुः परमगुरुश्च । तत्र सामान्यगुरुरनन्तरो धर्माचार्यादिः । परंपरः पूर्वपूर्वतरपूर्वतमादिचिन्तयाऽनेकविधो यावत् सुधर्मस्वाम्यादिः । परमगुरुर्भगवांस्तीर्थकरः । ततश्चानन्तरगुरुबहुमानेन येनासौ स्थापितस्तस्मिन् बहुमानकृतो भवति । तद्बहुमानेन पूर्वतरे यावदावलिकादिभूते गणधरे, ततस्तदाराध्ये भगवति परमगुरुतीर्थाधिनायके । अत एवोक्तं परमगुरुणा—"जे गुरुं मन्नए से ममं मन्नए जे ममं मन्नए से गुरुं मन्नए" । इत्येवमनेकभेदगुरुबहुमानकृतो भवतीति ।

यथा कृतज्ञता चाराधिता भवति। प्रधानश्चायं पुरुषस्य गुणो लोकेऽपि गीयते। यदुक्तम्—"दो पुरिसे धरउ धरा अहवा दोहिंपि धारिया वसुहा। उवयारे जस्स मई उवयरियं जो न पम्हुसइ ॥ १ ॥" लोकोत्तरेऽप्येकविंशतिगुणमध्ये पठित एवेति। तथा सकलगच्छस्य गुणानां वृद्धिराधिक्यं कृतं भवति गुरुममुञ्चता। तथा हि—सम्यगाज्ञावर्त्तिनो गच्छस्य गुरुर्ज्ञानादिगुणान् वर्द्धयत्येव। यदि पुनस्ते शिष्याः—"वाइया संगहिया य भत्तपाणेहिं पोसिया। जायपंखा जहा हंसा पक्कमंति दिसोदिसं ॥ १ ॥" ततस्तान् खलुकप्रायानवबुद्ध्य न केवलं न शिक्षयति गुरुः तत्परित्यागं च विधत्ते, कालिकाचार्यवदिति। तथाऽनवस्था मर्यादाहानिस्तस्याः परिहारकृतो भवति गुरुममुञ्चतेति। अयमभिप्रायः—य एकं गुरुमल्पदोषमपि मुञ्चति, तमन्येऽपि न संगृह्णन्ति, सूक्ष्मदोषाणां परिहर्तुमशक्यत्वात्। संगृहीतोऽपि न स्थिरो भवति, अत एकाकित्वमालम्बते। तं च स्वेच्छाचारसुखितमालोक्यान्योऽप्यन्योऽपि तदेवाङ्गीकरोति। एवंप्रकारानवस्थापरिहृता भवति गुरुसेवकेनेति। 'भवन्ति' जायन्ते 'गुणा एवमादयः' अन्येऽपि गुरुग्लानबालवृद्धादीनां विनयवैयावृत्त्यकरणादयः सूत्रार्थागमस्मारणादयोऽपि भूयांसः। इति गाथार्थः ॥ १३३ ॥

एवमकरणे पुनः किं स्यात्? इत्याह—

इहरा वुत्तगुणाणं विवज्जओ तह य अत्तउक्करिसो। अप्पच्चओ जणाणं बोहिविघायाइणो दोसा ॥ १३४ ॥ ॥ ८३ ॥

'इतरथा' इतरगुरुपरित्यागरूपेण 'उक्तगुणानां' गुरुबहुमानादीनां 'विपर्ययः' अभावोऽबहुमानाकृतज्ञतादिदोषसद्भावो वा स्यात्। तथा 'आत्मोत्कर्षश्च' आत्मनि सौष्ठवाभिमानश्चानर्थपरंपराकारणं गुरुकुलवासत्यागिनः स्यात्। तथा 'अप्र-

त्ययः' अविश्वासश्च 'जनानां' लोकानां साधुविषये स्यात् । यदुत परस्परविभिन्नानामन्योन्यानुष्ठानदूषकाणामेतेषां न ज्ञायते कोऽपि सत्यवाद्यलीकवादी वेति । ततश्च को दोष ? इति चेदुच्यते, बोधिविघातः प्रेत्यजिनधर्मप्राप्त्यभावस्तेषां व्यलीकभाजां, तन्निमित्तभूतस्य यतेरपि, आदिशब्दाद्भवपातश्च । सम्यग्दर्शनाभिमुखानां चारित्राभिमुखानां च स्यात् । एते 'दोषाः' दूषणानि गुरुत्यागकारिणां भवन्ति । इति गाथार्थः ॥ १३४ ॥

ननु पूर्वं क्रियास्वप्रमादः चारित्रिणो लिङ्गमुक्तम्, इदानीं तु प्रमादवानपि गुरुश्चारित्रवानेवेति न मोक्तव्य इत्युच्यते तत्कथं न पूर्वापरविरोधः ? सत्यम्, अप्रमादश्चारित्रिणो लिङ्गं तदविनाभावित्वेनोक्तं, वह्नेर्धूमवत् । दृश्यते च क्वापि निर्दग्धेन्धनोऽत्रष्टब्धो वा धूमं विना वह्निः । एवं प्रमादिनोऽपि चारित्रमित्यत एवाह—

बकुसकुसीला तित्थं दोसलवा तेसु नियमसंभविणो।जइ तेहिं वज्जणिज्जो अवज्जणिज्जो तओ नत्थि॥१३५॥

यदि वेह पञ्चविधा यतयः—पुलाकाः, बकुशाः, कुशीलाः, निर्ग्रन्थाः, स्नातकाश्च । तत्र नियमेनाप्रमादिनो निर्ग्रन्थाः स्नातकाश्च, किं तु ते कदाचिदेव श्रेणिमस्तकारोहणे केवलज्ञानोत्पत्तौ च भवन्तीति न तीर्थप्रवाहहेतवः । पुलाकोऽपि कदाचिदेव लब्धिसद्भावे संभवतीति चेतस्याधायाह—"बकुसकुसीला" गाहा। तत्र बकुशाः शरीरोपकरणविभूषाकारिणः । यदाह—"उवगरणदेहचोक्खा रिद्धीजसगारवा सिया निच्चं । बहुसबलछेयजुत्ता निग्गंथा बाउसा भणिया ॥ १ ॥" कुशीलाः सातिचारज्ञानादिगुणाः । यदाह—"आसेवणा कसाए दुहा कुसीलो दुहावि पंचविहो । नाणे दंसण चरणे तवे

य अह सुहुमए चेव ॥ १ ॥ इह नाणाइकुसीलो ¹उवजीवं होइ नाणमाईणि । अह सुहमो पुण तुस्सं एस तवस्सित्ति संसाए ॥ २ ॥" एत एव सर्वतीर्थकृतां तीर्थसन्तानकारिणः संभवन्ति, अपरविकल्पानामभावात् । ततः किम् ? इत्याह—'दोषलवाः' सूक्ष्मदोषाः 'तेषु' बकुशकुशीलेषु नियमसंभविनः । यतस्तेषां द्वे गुणस्थानके प्रमत्ताप्रमत्ताख्येऽन्तर्मुहूर्त्तकालावस्थायिनी । ततो यदा प्रमत्तगुणस्थानके वर्त्तते तदा प्रमाद्यपि चारित्रवानेव, यावत्सप्तमप्रायश्चित्ताहीपराधम् । ततः परमचारित्रः स्यात् । उक्तं च—"छेयस्स जाव दाणं ता वयमेगंपि नो अइक्कमइ । एगं अइक्कमंतो अइक्कमे पंचमूलेण ॥ १ ॥" अत एव पार्श्वस्थादीनामपि केषांचिच्चारित्रमिष्यते । यतोऽभाणि—"पासत्थाईयाणं अब्भुट्ठत्ताण जेसि पच्छित्तं । मूलाईयं भणियं ते निच्चरणा न उण अन्ने ॥ १ ॥" तदेवं बकुशकुशीलेषु नियमभाविनो दोषलवाः, यदि च तैर्वर्जनीयो यतिः स्यात्, अवर्जनीयस्ततो नास्त्येव । तदभावे तीर्थस्याप्यभावप्रसङ्गः । इति गाथार्थः ॥ १३५ ॥

अस्योपदेशस्य फलमाह—

इय भावियपरमत्था मज्झत्था नियगुरुं न मुंचंति । सव्वगुणसंपओगं अप्पाणंमिवि अपेच्छंता ॥ १३६ ॥

'इति' पूर्वोक्तप्रकारैर्भावितो मनसि परिणामितः परमार्थो यथावस्थितपक्षो यैस्ते तथा, 'मध्यस्थाः' कुग्राहाद्यदूषिताः 'निजगुरुं' आत्मीयधर्माचार्यं 'न मुञ्चन्ति' नैव व्युत्सृजन्ति, 'सर्वगुणसंप्रयोगं' समग्रगुणसामग्रीमात्मन्यपि 'अपश्यन्तः' अनवलोकयन्तः । इयमत्र भावना—मध्यस्थो बुद्धिमानालोचयति—"दुक्करयं खु जहुत्तं जहुत्तवायट्ठिया विसीयन्ति ।

---

१ "उवजीवी" इत्यपि ॥

एस नियओ हु मग्गो जहसत्तीए चरणसुद्धी ॥ १ ॥" अयमपि मदीयो गुरुरुत्सर्गापवादवेदी, यथाशक्तिक्रियापरः, शुद्ध-मार्गोपदेष्टा, सद्भावतुलनासारः, प्रकृष्टकष्टकारिणामुपबृंहकः, साहाय्यकर्त्ता च पूजापात्रं ज्ञानवताम्। यत उक्तम्—"तुच्छं वपुः संहननं कनिष्ठं वीर्यं न वर्यं किल कालदोषात्। तथाऽपि धर्माय कृतप्रयत्नाः कथं न पूज्या विदुषां मुनीन्द्राः? ॥ १ ॥" अत एनं परमोपकारिणमादरेणाराधयामि। यत एवमागमः—"जहा हि यग्गी जलणं न मंसे नाणाहुई मंत-पयाभिसित्तं। एवायरियं उवचिट्ठएज्जा अणंतनाणोवगओवि सत्तो ॥ १ ॥ जस्संतिए धम्मपयाइँ सिक्खे तस्संतिए वेणइयं पउंजे। सक्कारए सिरसा पंजलीओ कायग्गिराहो मणसावि निच्चं ॥ २ ॥" एवमागमबहुमानान्निजगुरुं सम्यगाराध-यन्ति। इति गाथार्थः ॥ १३६ ॥

अन्यच्च गुरुत्यागकारी निश्चितं गुरोरवज्ञां विधत्ते, ततश्चानर्थमागमस्मारणेन दर्शयन्नाह—

एयं अवमन्नंतो वुत्तो सुत्तंमि पावसमणोत्ति। महमोहबंधगोवि य खिंसंतो अपडितप्पंतो ॥ १३७ ॥

'एनं' प्रस्तुतं गुरुं 'अवमन्यमानः' हीलयन् साधुरिति गम्यते, 'उक्तः' भणितः 'सूत्रे' सिद्धान्ते 'पापश्रमणः' कुत्सि-तयतिः 'इतिः' उपप्रदर्शने। तच्चेदं सूत्रम्—"आयरियउवज्झाएहि सुत्तं विणयं च गाहिए। ते चेव खिंसइ बाले पावस-मणेत्ति वुच्चइ ॥ १ ॥ आयरियउवज्झायाणं सम्मं नो पडितप्पइ। अप्पडिपूयए थद्धे पावसमणेत्ति वुच्चइ ॥ २ ॥" तथा 'महामोहबन्धकः' प्रकृष्टमिथ्यात्वोपार्जकश्च, अपिशब्दः सूत्रान्तरं संभावयति, किं कुर्वन्? 'खिंसंतो' इति गुरोर्निन्दां कुर्वन् 'अपडितप्पंतो' इति तेषां वैयावृत्त्यादावादरमकुर्वन्निति। सूत्रान्तरं चावश्यके त्रिंशत्सु मोहनीयस्थानेषु पठ्यते—

"आयरियउवज्झाए खिंसइ मंदबुद्धीए। तेसिमेव य नाणीणं सम्मं नो पडितप्पइ ॥ १ ॥" क्रियापदं च पर्यन्ते "महामोहं पकुव्वइ" इति। तओ भणितम्। इति गाथार्थः ॥ १३७ ॥

आह गुरोः सामर्थ्याभावे यदि शिष्योऽधिकतरं तपः करोति तत्किं युक्तमाहोस्विदयुक्तं? गुरोर्लाघवहेतुत्वात्, इत्यत्रोच्यते, गुरुसन्निधौ युक्तमेव, गुरोर्गौरवहेतुत्वात्। तथा हि सदाचारे चारिणि शिष्ये भवत्येव गुरोः साधुवादः, पुत्रे पितुरिव। किन्तु—

सविसेसंपि जयंतो तेसिमवन्नं विवज्जए सम्मं। तो दंसणसोहीओ सुद्धं चरणं लहइ साहू ॥ १३८ ॥

'सविशेषं' शोभनतरं, अपिशब्दात् समानमपि। किं मत्तोऽप्येषोऽधिकं करोतीति भावनया 'यतमानः' सदनुष्ठानोद्योगवान् 'तेषां' गुरूणां 'अवज्ञां' अभ्युत्थानाद्यकरणरूपां 'वर्जयति' न करोति 'सम्यक्' शुद्धपरिणामो भावसाधुरिति प्रकृतत्वात्। ततश्च दर्शनशुद्धेर्हेतोः 'शुद्धं' अकलङ्कं 'चरणं' चारित्रं 'लभते' प्राप्नोति साधुः, भावमुनिरिति। अयमत्र भावार्थः—सम्यक्त्वं ज्ञानचरणयोः कारणम्। यत एवमागमः—"नादंसणस्स नाणं नाणेण विणा न हुंति चरणगुणा। अगुणस्स नत्थि मोक्खो नत्थि अमुक्खस्स निव्वाणं ॥ १ ॥" तच्च गुरुबहुमानिन एव भवति, अतो दुष्करकारकोऽपि तस्मिन्नवज्ञां न विदध्यात्, तदाज्ञाकारी च भूयात्। यत उक्तम्—"छट्ठट्ठमदसमदुवालसेहिं मासद्धमासखमणेहिं। अकरेंतो गुरुवयणं अणंतसंसारिओ होइ ॥ १ ॥" इति गाथार्थः ॥ १३८ ॥

अथ साधुधर्मलिङ्गनिगमनं, तत्फलं चाभिधित्सुराह—

इय सत्तलक्खणधरो होइ चरित्ती तओ य नियमेण। कल्लाणपरंपरलाभजोगओ लहइ सिवसोक्खं ॥१३९॥

'इति:' उपप्रदर्शने। पूर्वोपदर्शितसप्तसंख्यलक्षणधरो भवति 'चारित्री' भावसाधुः। 'तओ' इति स कः? चशब्दोऽवधारणे। स एव, नान्यः कल्याणपरंपरा सुदेवत्वसुमनुजत्वादिरूपा, तस्या लाभः प्राप्तिः, तद्योगात्तत्संबन्धत्वात् 'लभते' अवाप्नोति 'शिवसौख्यं' सिद्धिशर्म। इति गाथार्थः॥ १३९॥

उक्तं श्रावकसाधुसंबन्धभेदाद्द्विधा धर्मरत्नम्, इदानीं कः कीदृगिदं कर्त्तुं शक्नोति? इत्येतदाह—

दुविहंपि धम्मरयणं तरइ नरो घेत्तुमविगलं सो उ। जस्सेगवीसगुणरयणसंपया सुत्थिया अत्थि ॥ १४०॥

'द्विविधं' द्विप्रकारं, न पुनरेकतरमेवेत्यपेरर्थः। 'तरति' इत्यनेकार्थत्वाद्धातूनां शक्नोति 'नरः' इति जातिनिर्देशान्नरजातीयो जन्तुः, न पुनः पुमानेवेति, 'ग्रहीतुं' उपादातुं अविकलं (संपूर्णं) स एव, तुशब्दस्यावधारणार्थत्वात्। यः कथंभूतः? इत्याह—यस्याप्येकविंशतिगुणरत्नसंपदादिप्रतिपादिता विशेषणविभूतिः 'सुस्थिता' कुबोधाद्यदूषितत्वान्निरुपद्रवा 'अस्ति' विद्यत इति। ननु पूर्वमुक्तमेवैकविंशतिगुणसमृद्धो योग्यो धर्मरत्नस्येति, तत्किं पुनरिदमुच्यते? सत्यं, पूर्वं योग्यतामात्रमुक्तं, यथा बालत्वेऽपि वर्त्तमानो राजपुत्रो राज्यार्ह उच्यते, संप्रति करणशक्तिरप्यस्याभिधीयते—यथा प्रौढीभूतो राजपुत्रः कर्तुं शक्नोत्येतावद्राज्यम्। इति गाथार्थः॥ १४०॥

एवं च स्थिते विशेषतः पूर्वाचार्याणां श्लाघामाह—

ता सुट्ठु इमं भणियं पुव्वायरिएहिं परहियरएहिं। इगवीसगुणोवेओ जोगो सइ धम्मरयणस्स ॥ १४१॥

यत एभिर्गुणैर्युक्तो धर्मं कर्त्तुं शक्नोति । ततः 'सुष्ठु' शोभनमिदं 'भणितं' उक्तं 'पूर्वाचार्यैः' अतीतसूरिभिः 'परहितरतैः' अन्यजनोपकारकरणलम्पटैः । किं तत् ? इत्याह—एकविंशतिभिर्गुणैरुपेतो युक्तो 'योग्यः' उचितः 'सकृत्' सदा 'धर्मरत्नस्य' उक्तस्वरूपस्य । इति गाथार्थः ॥ १४१ ॥

अथ प्रकृतप्रकरणार्थमनुवदन्नुपसंहारगाथायुग्ममाह—

धम्मरयणोच्चियाणं[1] देसचरित्तीण तह चरित्तीणं। लिंगाइं जाइं समए भणियाइं मुणियतत्तेहिं॥ १४२॥
तेसि इमो भावत्थो नियमइविभवाणुसारओ भणिओ। सपराणुग्गहहेउं समासओ संतिसूरीहिं॥ १४३॥

'धर्मरत्नोचितानां'[2] उक्तस्वरूपाणां 'देशचरित्रिणां' (देश) विरतानां, तथा 'चरित्रिणां' सर्वविरतानां 'लिङ्गानि' चिह्नानि यानि 'समये' सिद्धान्ते 'भणितानि' अभिहितानि 'मुनिततत्त्वैः' अवबुद्धसिद्धान्तसद्भावैः । तेषां 'अयं' उक्तस्वरूपो 'भावार्थः' तात्पर्यं 'निजमतिविभवानुसारतः' स्वबुद्धिसंपदानुरूपं 'भणितः' सिद्धान्ताम्भोधेः पारस्य लब्धुमशक्यत्वात् यावदेवावबुद्धं तावदेव भणितमिति भावः । किमर्थं पुनरियान् प्रयासः कृतः ? इत्याह—स्वपरयोरनुग्रह उपकारः, स एव हेतुः कारणं यस्य भणनस्य तत् 'स्वपरानुग्रहहेतु' । सोऽप्यागमादेव भविष्यतीति चेन्न, तत्रागमे कोऽप्यर्थः क्वापि भणितः, तमल्पायुषोऽल्पमेधसश्चैदंयुगीना नावगन्तुमीशा इति समासतोऽल्पग्रन्थेन भणितः। कैः? इत्याह—शान्तिप्रधानैर्माध्यस्थसुस्थचेतोभिः सूरिभिराचार्यैः । इति गाथायुग्मार्थः ॥ १४२ ॥ १४३ ॥

---

१ "धम्मरयणत्थियाणं देसविरत्तीण" इत्यपि । २ "धर्मरत्नार्थिनां" इत्यपि ॥

अथ शिष्याणामर्थित्वोत्पादनायोक्तशास्त्रार्थपरिज्ञानस्य फलमुपदर्शयन्नाह—

जो परिभावइ एयं सम्मं सिद्धंतगब्भजुत्तीहिं। सो मुत्तिमग्गलग्गो कुग्गहगत्तेसु न हु पडइ ॥ १४४ ॥

'यः' कश्चिल्लघुकर्मा 'परिभावयति' सम्यगालोचयति 'एनं' पूर्वोक्तं धर्मलिङ्गभावार्थं 'सम्यग्' मध्यस्थभावेन सिद्धान्तगर्भाभिरागमसाराभिर्युक्तिभिरुपपत्तिभिः 'सः' प्राणी मुक्तिमार्गे निर्वाणनगराध्वनि लग्नो गन्तुं प्रवृत्तः कुग्रहा दुष्षमाभाविनो मतिमोहविशेषास्त एव गर्त्ता अवटा गतिविघातहेतुत्वादनर्थजनकत्वाच्च, तेषु नैव पतति । हुशब्दस्यावधारणार्थत्वात् । अत एव सुखेन सन्मार्गेण गच्छति । इति गाथार्थः ॥ १४४ ॥

उक्तं प्रकरणार्थपरिभावनस्यानन्तरफलम्, अधुना परंपरफलमाह—

इय धम्मरयणपगरणमणुदियहं जे मणंमि भावेंति। ते गलियकलिलपंका नेव्वाणसुहाइं पावेंति ॥ १४५ ॥

'इय' शब्द इतिशब्दार्थे प्राकृते दृश्यते । इत्यनन्तरोक्तं धर्मरत्नमुक्तान्वर्थम्, तत्प्रतिपादकप्रकरणं शास्त्रविशेषो धर्मरत्नप्रकरणं 'अनुदिवसं' प्रतिदिनं, उपलक्षणत्वात् प्रतिसन्ध्यं प्रतिप्रहरमित्यपि द्रष्टव्यम् । 'ये' केचिदासन्नमुक्तिगमा 'मनसि' हृदये 'भावयन्ति' विवेकसारं चिन्तयन्ति 'ते' शुभशुभतराध्यवसायभाजो, गलितोऽपेतः कलिलपङ्कः पातकमलोत्करो येभ्यस्ते तथाविधाः 'निर्वाणसुखानि' अपवर्गशर्माणि 'प्राप्नुवन्ति' लभन्ते । कीदृशानि पुनस्तानि ? इति चेदुच्यते—"नवि अत्थि माणुसाणं तं सोक्खं नवि य सव्वदेवाणं । जे सिद्धाणं सोक्खं अव्वाबाहं उवगयाणं ॥ १ ॥ जह नाम कोइ मेच्छो नगरगुणे बहुविहेवि जाणंतो । न चएइ परिकहेउं उवमाए तहिं असंतीए ॥ २ ॥ इय सिद्धाणं सोक्खं अणो-

वमं नत्थि तस्स ओवम्मं । किंचि विसेसेणेत्तो सारिक्खमिणं सुणह वोच्छं ॥ ३ ॥" तच्च सादृश्यमिदम्—"वेणुवीणामृदङ्गादिनादयुक्तेन हारिणा । श्लाघ्यस्मरकथाबद्धगीतेन स्तिमितः सदा ॥ १ ॥ कुट्टिमादौ विचित्राणि दृष्ट्वा रूपाण्यनुत्सुकः । लोचनानन्ददायीनि लीलावन्ति स्वकानि हि ॥ २ ॥ चन्दनागुरुकर्पूरधूपगन्धान्वितस्ततः । पुटवासादिगन्धांश्च व्यक्तमाघ्राय निस्पृहः ॥ ३ ॥ नानारससमायुक्तं भुक्त्वाऽन्नमिह मात्रया । पीत्वोदकं च तृप्तात्मा स्वादयन्स्वादिमं शुभम् ॥ ४ ॥ मृदुतूलीसमाक्रान्तदिव्यपर्यङ्कसंस्थितः । सहसाम्भोदसंशब्दश्रुतेर्भयघनं भृशम् ॥ ५ ॥ इष्टभार्यापरिष्वक्तस्तद्रतान्तेऽथवा नरः । सर्वेन्द्रियार्थसंप्राप्त्या सर्वाबाधानिवृत्तिजम् ॥ ६ ॥ यद्वेदयति शं हृद्यं प्रशान्तेनान्तरात्मना । मुक्तात्मनस्ततोऽनन्तं सुखमाहुर्मनीषिणः ॥ ७ ॥" इति संभाव्यते । एवमागमार्थपरिभावनपराणां संवेगातिरेकात्कालसंहननतथाभव्यत्वादिसामग्रीवशात्पारंपर्येणापवर्गप्राप्तिः । इति गाथार्थः ॥ १४५ ॥

॥ इति स्वोपज्ञवृत्तिसहितं धर्मरत्नप्रकरणं समाप्तम् ॥

॥ अथ प्रशस्तिः ॥

प्रकरणमिदं गम्भीरार्थं महाश्रुतसागरादुपकृतिकृते सल्लोकानां समुद्धृतमादरात् । न जडमतिभिर्वोढुं शक्यं यतो विवृतिं विना, तदिति सुगमा स्वल्पा वृत्तिर्मया परिचिन्तिता ॥ १ ॥ ऐदंयुगीनैर्गदितं न यस्मात्, प्रत्येति लोको वितथाभिशङ्की । सिद्धान्तसूत्राणि यतो बहूनि, संप्रत्ययार्थं किल मीलितानि ॥ २ ॥ ततोऽपराधोऽस्ति महान् ममैष, क्षन्तव्य एवागमतत्त्वविद्भिः । दानातिभूरिव्यसना हि पुत्राः, सुरक्षितं तातधनं व्ययन्ति ॥ ३ ॥ यदिह समयबाह्यं शब्दशास्त्रप्रतीपं, रचितममलबोधैः शोधनीयं तदुच्चैः । अतिगहनवनान्ते भ्राम्यतो मन्ददृष्टेः, प्रभवति मतिमोहः कस्य नैवैककस्य ॥ ४ ॥ यदर्जितं मया पुण्यं ग्रथ्नता शास्त्रमीदृशम् । पुण्यपापविनिर्मुक्तस्तेन स्यामचिरादहम् ॥ ५ ॥ नमः श्रीवर्द्धमानाय सर्वशास्त्रार्थभाषिणे । वर्त्तमानस्य तीर्थस्य नायकाय महात्मने ॥ ६ ॥[१] छ ॥ मङ्गलं महाश्रीः ॥ छ ॥ शुभं भवतु ॥ छ ॥ लेखकपाठकयोः ॥ छ ॥

---

१ इतः परम्—"इति सिद्धान्तसंग्रहभूषा भव्यजनहितानां धर्मरत्नवृत्तिः समाप्ता ॥ छ ॥ चन्द्रकुलाम्बरविदु (धु) भिः परोपकारैकरसिकचेतोभिः । श्रीशान्तिसूरिभिरियं बुधप्रिया विरचिता वृत्तिः ॥" १ इत्येतादृश एव पाठस्तालपत्रपुस्तके × एतादृशं चिह्नं कृत्वा पत्रान्ते केनापि लिखितो दृश्यते, परमयं पाठो ग्रन्थकारकृतोऽन्यकृतो वेति संदेहमावहति मानसं मे ॥

समाप्तमिदं स्वोपज्ञवृत्तिसमेतं धर्मरत्नप्रकरणम्

श्रीआत्मानन्द–ग्रन्थरत्नमाला–सप्तविंशं रत्नम् (२७)

महोपाध्यायश्रीमद्भावविजयगणिविरचिता

चम्पकमालाकथा ।

न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरिशिष्यप्रवर्तकश्रीमत्कान्तिविजयशिष्यमुनिचतुरविजयेन शोधिता ।

पूज्यपादश्रीमद्हंसविजयमुनिपुङ्गवशिष्यप्रज्ञांसश्रीमत्संपद्विजयगणिवरोपदिष्टसुरतवास्तव्य–ओशवा–
लज्ञातीय–श्रेष्ठि–लालभाइ–तनूज–गुलाबचन्द्र–भार्या–फुलकोर–द्रव्यसाहाय्येन
प्रकाशयित्री–भावनगरस्था–श्रीआत्मानन्दसभा ।

इदं पुस्तकं मुम्बय्यां वल्लभदास त्रिभुवनदास गांधी सेक्रेटरी जैनआत्मानन्दसभा भावनगर इत्यनेन
निर्णयसागरमुद्रणालये कोलभाटवीथ्यां २३ तमे गृहे रामचंद्र येसू शेडगेद्वारा मुद्रयित्वा प्रकाशितम् ।

वीरसंवत् २४४०　　आत्मसंवत् १९　　विक्रमसंवत् १९७०

Printed by Ramchandra Yesu Shedge at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay, and
Published by Vallabhadas Tribhuvandas Gandhi, Secretary, Jaina Atmananda Sabha, Bhavanagar.

॥ प्रस्तावना ॥

अस्या जनमनःस्फारचमत्कारकारिण्या अत्यद्भुतशीलसौरभ्यसुरभिताखिलदिक्कवालायाश्चम्पकमालाया इव चम्पकमालाकथायाः के मिथ्यात्वतिमिरस्तोमवित्रासने सवितारः कवितारः ? इति विचारे जायमाने प्रस्तुतकथायाः प्रतिप्रस्तावप्रान्तविन्यस्तगुरुपरम्परायाम्—

"इति तपागच्छाधिराजश्रीविजयदानसूरीश्वरशिष्यमहोपाध्यायश्रीविमलहर्षगणिमहोपाध्यायश्रीमुनिविमलगणिशिष्योपाध्यायश्रीभावविजयगणिविरचितायां चम्पकमालाकथायां चतुर्थः प्रस्तावः"

इत्येतच्चतुर्थप्रस्तावान्तिमोल्लेखनिभालनेन, तथाऽस्यां कथाकारविन्यस्तप्रशस्तौ—

"तपगणगगनरवीणां श्रीविजयानन्दसूरिशक्राणाम् । राज्ये कथानकमिदं भावविजयवाचकस्तेने ॥ "

इति पद्यावलोकनेन च श्रीविजयानन्दसूरिराज्ये वाचकवर्याः श्रीमन्तो भावविजयगणयो बृहत्तपागच्छाधिराजश्रीमद्विजयदानसूरिपुरन्दरप्रशिष्यमहोपाध्यायश्रीमुनिविमलगणीनां शिष्या एव प्रस्तुतकथायाः कर्तार इति स्फुटमेवावगम्यते । एते पाठकपुङ्गवाः स्वकृतोत्तराध्ययनवृत्तिप्रशस्तावपि आत्मनो महोपाध्यायश्रीमन्मुनिविमलगणीनामेवान्तेवासित्वमाविष्कुर्वन्ति ।

एतेषां वाचकवाचस्पतीनां सत्तासमयनिर्णयस्तु क्रमेणोत्तराध्ययनवृत्तिप्रशस्तौ प्रस्तुतकथाप्रचरितप्रशस्तौ च—

"निधिवसुरसवसुधामितवर्षे १६८९ श्रीरोहिणीमहापूर्याम् । सोऽस्याः प्रथमादर्शे स्वयमेव प्रापयत्सिद्धिम् ॥ २० ॥"

"सिद्धिगगनमुनिचन्द्रप्रमितेऽब्दे १७०८ विजयदशमिकासुतिथौ । विद्यापुरे वितेने कथाममुं सोऽर्थितः प्राज्ञैः ॥"

इति पद्यद्वयनिरीक्षणेन त्वेतयोरनन्तरोक्तग्रन्थयोर्निर्माणकालः स्फुटमेव प्रतीयते। अत एवामीषां पाठकप्रष्ठानां श्रीमतां भावविजयगणीनां

सत्तासमयोऽपि निर्विरोधं विक्रमार्कीयसप्तदशाष्टादशशताब्द्यां निर्णीयते ।

एभिर्वाचकवात्सोप्पतिभिरुक्तव्यतिरिक्ता अपरेऽपि ग्रन्थाः गुम्फिता भवेयुः, परं कति किं विषयपोषकाः ? इत्यद्यापि न निर्णीतम् ।

प्रसिद्धं चैतद्यदुत तथाभूतसदाचरणसमुत्पन्नयशःप्रसरधवलिताखिलदिक्चक्राणां सत्पुरुषाणां सतीमतल्लिकानां च ब्रह्मचर्यादिविशुद्धाचरणचारुचरित्रमपि श्रवणगोचरतां गतं प्रणाशयति प्राणिनामनेकभवसञ्चितकर्मकदम्बकम् । अतः कथानकादिश्रवणरसिकानां हितहेतवे कथाकारैरेषा श्रोतृजनसुकृतवल्लीसमुज्जीवनकाम्यकुल्याकल्पा कथा प्रस्तावचतुष्टयेन विभज्य निबद्धा ।

अमुष्या विषयविभागस्त्वेतदवलोकनेनैव स्वयमेवावबुध्यते बुद्धिमद्भिरित्यतिकथने न ममावश्यकतेति ।

एतस्याः संशोधनसमये द्वे पुस्तके समुपलब्धे । तयोरेकम्—"लिखिता चेयं प्रतिः सकलवाचकसंसत्सीमन्तिनीतिलकमहोपाध्यायश्री-५ श्रीभावविजयगणिशिष्यपं० मानविजयगणिना भृगुकच्छबन्दिरे स्ववाचनार्थम् । कल्याणमस्तु श्रीजिनचरणारविन्दसेवनमधुकराणाम् ।" इत्येतदुल्लेखाङ्कितपुस्तकादर्शादादर्शीभूतं चतुर्विंशतिपत्रात्मकं नूतनं शुद्धं पूज्यपादप्रवर्तकश्रीमत्कान्तिविजयमुनिपुङ्गवसत्कम् । द्वितीयं पुनः सप्तदशपत्रात्मकं पुरातनं नात्यशुद्धं कथाकारप्रशस्तिरहितं पत्तनस्थसागरगच्छीयचित्कोशसत्कम् ।

एतत्पुस्तकद्वितयीनिरीक्षणेन महता प्रयासेन संशोधितेऽप्यत्र निबन्धे मतिमान्द्यादक्षरयोजकदोषाद्वा यत्र किमप्यशुद्धं कृतं जातं वा भवेत्तत्र संशोधयन्तु कविकोटीकोटीरा इति प्रार्थयते—

प्रवर्तकश्रीमत्कान्तिविजयचरणसेवाहेवाकः

चतुरविजयो मुनिः ।

॥ अर्हम् ॥

न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीश्वरचरणकमलेभ्यो नमः ।

श्रीमद्भावविजयगणिविरचिता चम्पकमालाकथा ।

ॐ नमो विश्वविख्यातकीर्त्तये स्फारमूर्त्तये । श्रीशङ्खेश्वरपार्श्वाय, त्रैलोक्याह्लादकारिणे ॥ १ ॥ यो बाल्ये सुरचाणूरं, विजिग्येऽरिष्टनाशकृत् । यशोदयाश्रितं वन्दे, तं वीरं पुरुषोत्तमम् ॥ २ ॥ ऐन्द्रीदिगिव मार्तण्डं, या बोधं जनयत्यलम् । तां शारदां श्रये नावमिव शास्त्राब्धिपारदाम् ॥ ३ ॥ स्वगुरून् सज्जनांश्चैव, वन्दे विश्वोपकारकान् । दुर्वृत्तमपि ये सूक्त्या, नयन्ति श्रेष्ठवृत्तताम् ॥ ४ ॥ शिष्टाचारं विधायेति, शीलमाहात्म्यमञ्जुलाम् । कथां चम्पकमालाया, यथा दृष्टां तनोम्यहम् ॥ ५ ॥ सर्वजन्तूपकारित्वात्, प्रधानमिति पारगैः । दानं चतुर्विधे धर्मे, यद्यप्यादौ निवेशितम् ॥ ६ ॥ शीलमेव तथाऽप्याप्तैः, सुदुष्पालमुदीरितम् । तैर्यदस्यैव रक्षार्थं, स्थापिता नवगुप्तयः ॥ ७ ॥ चारित्रवपुषः प्राणभूतमप्येतदेव हि । यदस्मिन् सर्वथा नष्टे चारित्रं हि सदप्यसत् ॥ ८ ॥ अन्यव्रतानां भग्नानां, सन्धानं जातु जायते । भग्नस्यास्य तु तत् पक्वमृत्कुम्भस्येव दुष्करम् ॥ ९ ॥ सम्यगाराधितस्यास्य, प्रभावोऽप्यद्भुतावहः । ऐहिकः पारत्रिकश्च, सुप्रतीतो जगत्त्रये॥ १०॥

१ शीलस्य ॥

ज्ञात्वा विशेषैरित्याद्यैः, शीलस्यापि प्रधानताम् । तन्माहात्म्यं वदे[1] तस्याः, शीलवत्या निदर्शनात् ॥ ११ ॥ तथा ह्यत्रैव भरते, भरिते कमलाभरैः । देशोऽस्ति मालवो नाम, यस्य स्वर्गोऽपि मा[2]लवम् ॥ १२ ॥ पुराणि यत्र राजन्ति, विमानानीव ताविषे । [3]वैराप्सरांसि सद्धामान्युलसद्विबुधानि च ॥ १३ ॥ ग्रामाश्च विषयग्रामा, इव यत्र विदामपि । [4]श्यामारामाभिरामा द्राक्, प्रीतिमन्तर्वितन्वते ॥ १४ ॥ सुधासारं सुरत्रस्तो, मन्येऽब्धिन्य[5]ासयद्भुवि । नो चेत्कथं स्युः सर्वत्रेक्षवस्तत्र सुधारसाः ॥ १५ ॥ सिद्धिः स्याद्बहुधा[6]न्याया, यत्राल्पेऽप्यागतेऽम्बुदे । स्वल्पेऽप्यधिगते शास्त्रे, कुशाग्रीयमताविव ॥ १६ ॥ दुर्भिक्षोपप्लवो यत्र, कृतसर्वाङ्गिविप्लवः । तमिस्रोपद्रवः स्वर्ग, इव जातु न जायते ॥ १७ ॥ यत्र मैत्रीजुषोऽन्योन्यं भान्ति सन्मुदिता जनाः । कारुण्यपुण्या दुष्कर्मोपेक्षादक्षा मुमुक्षुवत् ॥ १८ ॥ तत्राचलातपत्राभाऽचलायास्तापहारिणी । रराज राजधानी स्वर्जयिन्युज्जयिनी पुरी ॥ १९ ॥ सुखावहा वहा[7] दीप्रा, शिप्रा क्षिप्राङ्गिपावने । रेजे यदन्तिके सिद्धापगेव स्वर्गसंनिधौ ॥ २० ॥ रराजारामराजी यां, परितः परितोषकृत् । यया जितं ह्रिया मेरुमाश्रयत् खलु नन्दनम् ॥ २१ ॥ प्राकारः प्रवरो यस्यां जलाढ्यपरिखाञ्चितः । सप्रेमप्रेयसीजु[8]ष्टः, प्रेयानिव दधौ श्रियम् ॥ २२ ॥ यत्रार्ह[9]तां गृहाः शातकु-

१ 'दीप्तिज्ञानयत्नविमत्युपसंभाषोपमन्त्रणे वदः' ३।३।७८ इत्यात्मनेपदं अत्र 'वदे' दीपयामीत्यर्थः । २ मा[ः] लक्ष्म्या लेशस्तम् । ३ नगरपक्षे अपां सरासि अप्सरांसि वराणि अप्सरांसि येषु तानि तथा । विमानपक्षे वरा अप्सरसो येषु तानि तथा । ४ ग्रामपक्षे श्यामैरारामैरभिरामाः । विषयग्रामपक्षे श्यामा षोडशवार्षिकी अप्रसूताङ्गना च । एवंविधा या रामा वशास्ताभिरभिरामाः । अत्र श्यामाशब्दस्य संज्ञाशब्दत्वेन पुंवद्भावः । ५ न्यस्तवान् । ६ बहुधान्यलाभा । पक्षे बहुधा बहुप्रकारा न्याया युक्तयो यस्यां सा । ७ नदी । ८ सेवितः । ९ स्वर्णम् ॥

म्भकुम्भाङ्कसानवः । नवोदितार्कसंपृक्तमुदयाद्रिं व्यडम्बयन् ॥ २३ ॥ सौधेषु यत्र धनिनां, प्रायो द्रविणसंमितिः । अलूचि केतुभिः कोटिसंख्यानुमितिहेतुभिः ॥ २४ ॥ न साम्यं यन्महेच्छानामर्थीच्छाधिकदायिनाम् । सुरद्रुमणयो भेजुः, समीहामितदायिनः ॥ २५ ॥ तत्रासीत्रासितारातिघूको विक्रमतेजसा । सान्वर्थनामा स्थामाढ्यो, विक्रमादित्यपार्थिवः ॥ २६ ॥ यो धैर्येण च बुद्ध्या चाग्निकवेतालनिर्जरम् । उपाचरत्तथा राज्यं, तं च चक्रे यथाऽऽत्मसात् ॥ २७ ॥ दानशौण्डो ददौ दानं, तथा सोऽत्यर्थमर्थिनाम् । अब्दा इवाब्धेर्दातृत्वं यथा तस्यार्थिनोऽप्ययुः ॥ २८ ॥ आजन्मतोऽपि विमलं यस्तथा शीलमाश्रयत् । परस्त्रीसोदर इति, यथाऽद्यापि स गीयते ॥ २९ ॥ महाप्रभावैर्यच्चित्ते, सिद्धसेनदिवाकरैः । अपास्य मिथ्यात्वतमः, सम्यक्त्वोद्द्योत आहितः ॥ ३० ॥ स्तवानुभावाद्भित्त्वोग्रैलिङ्गं तैरेव सूरिभिः । प्रादुष्कृतं पार्श्वबिम्बमर्चन् यो भृशमैधत ॥ ३१ ॥ यः स्वर्णं स्वर्णमर्त्योत्थं, नृणां दत्वानृणां धराम् । कृत्वा संवत्सरं स्वीयं, सत्रात् सर्वगं न्यधात् ॥३२॥ निघ्नन् पीडां सहित्वापि, परदुःखानि योऽनिशम् । जीमूतवाहनादीनां, कथामवितथां व्यधात् ॥ ३३ ॥ कलाचार्य इवाबोधि, सकलाः सकलाः कलाः । तथाऽपि सोऽभवत् स्वल्पकलावत्यपि सादरः ॥ ३४ ॥ इत्यनेकगुणास्थानं, सोऽन्यदा विबुधैर्वृतः । आस्थानं भूषयामास, सुधर्मामिव वासवः ॥ ३५ ॥ गोष्ठी शिष्टैस्तदारेभे, तस्य संसदि संमदात् । कलावैषम्यविषयतारतम्यविवेचिनी ॥ ३६ ॥ तां निशम्य नृपोऽवादीत्, भो भो ब्रूत विशारदाः ! । विषमामप्यहं सम्यक्कलयामि न कां कलाम् ॥३७॥ तेऽप्यभ्यधुः सभ्यधुर्या, वर्यधीजितगीष्पते ! । न हि काऽपि कला विश्वे, साऽस्ति वेत्ति न यां प्रभुः ॥३८॥

---

१ उदाराणाम् । २ अब्धेरर्थिनः अब्दा इव मेघा इव यस्य राज्ञोऽर्थिनो दातृत्वं ययुः । ३ शिवलिङ्गम् । ४ सर्वव्यापिनम् । ५ सत्याम् ॥

याः शास्त्रशस्त्रकरणाभ्यासरूपाः कला विभो ! । याश्च प्रज्ञाप्रकाशोत्थास्त्वयि सर्वा वसन्ति ताः ॥ ३९ ॥ तां तदुक्तिं समाकर्ण्य, सकर्णः कोऽपि कोविदः । धूतमूर्द्धाऽभ्यधान्मूर्द्धाभिषिक्तमिति युक्तवाक् ॥ ४० ॥ स्वामिन्नमी न मीमांसापूर्वं सर्वे वदन्त्यदः । प्रीणयन्ति प्रियालापैः, किं तु त्वामिष्टदायिनम् ॥ ४१ ॥ यतः—

अवास्तवैर्वास्तवैर्वा, संस्तवैः संस्तवैषिणः । ये प्रियोक्तिप्रियान्नाथान्, रञ्जयन्ति जयन्ति ते ॥ १ ॥

इत्येते तेजसां धाम, बहुधा मधुरोक्तिभिः । स्तुवन्ति त्वां घनमित्र सारङ्गाः कमलार्थिनः ॥ ४२ ॥ सत्यं पृच्छसि चेद्देव !, वाचाटोऽहं तदा ब्रुवे । को वाचाटं विना राज्ञः, प्रतीपं प्रतिपादयेत् ॥ ४३ ॥ यद्यपि त्वं कला वेत्सि, सर्वाः सर्वंसहापते ! । तथाऽपि न स्त्रीचरितकला ते विषयो मतेः ॥ ४४ ॥ क्रियाकारकभावार्थगूढादीन्यपि ये विदुः । सर्वशास्त्रविदः स्त्रीणां, हृद्गूढं तेऽपि नो विदुः ॥ ४५ ॥ ये वञ्चयन्ते सुधियः, स्वधिया त्रिदशानपि । तेऽपि सत्तमहेलाभिर्महेलाभिः प्रवञ्चिताः ॥ ४६ ॥ चेतो विलासेन्द्रजालैर्मोहयन्ति विशां वशाः । शक्तिर्मूढहृदां च स्यात्, क तच्चरितचिन्तने ? ॥ ४७ ॥ मदिरावन्मदिराक्षी-क्षीवयत्यङ्गिनं क्षणात् । मरौ सरिदिव क्षीवे, तत्त्वचिन्ता च दुर्लभा ॥ ४८ ॥ तन्नाथ ! नारीचरितं दुर्बोधं धीमतामपि । व्योम्नीव विष्किरपदं, मीनक्रम इवाम्भसि ॥ ४९ ॥ तज्ज्ञानं च विना नाथ !, वेत्सि त्वं सकलाः कलाः । इति प्रवदता, मेषां, गीरङ्गीक्रियते कथम् ? ॥ ५० ॥ तन्निशम्य नृपः सम्यग् . दध्यावध्याममानसः । सत्यमस्य वचो नूनमनूनज्ञानशेवधेः ॥ ५१ ॥ नीतिशास्त्रादिसंवादिवचनं ह्यस्य तेषु यत् । पारावारादप्यपारं, कुस्त्रीचरितमीरितम् ॥ ५२ ॥ सत्यप्येवं परीक्षेऽहं, सत्य-

१ विचारपूर्वकम् । २ प्रतिकूलम् । ३ उत्तमसुरतक्रीडाभिः । ४ मनुष्याणाम् । ५ मत्तं करोतीति । ६ पक्षिचरणम् । ७ निश्चिन्तमानसः ॥

मप्येतदात्मना । न किं जात्यमपि स्वर्णं, परीक्ष्येत तदर्थिभिः ? ॥ ५३ ॥ कन्यामन्यां शठंमन्यां काश्चित् परिणयाम्यहम् । कषोपलोपमां वाक्यस्वर्णस्यास्य परीक्षणे ॥ ५४ ॥ विमृश्येति विशामीशः, प्रत्यासन्नेऽशनक्षणे । सभाजनं विसृज्यागात्, स्नानवेश्म मनोरमम् ॥ ५५ ॥ तत्र स्नात्वा स विधिना, गत्वा च जिनसद्मनि । अर्हतामर्हणामस्तगर्हणां विदधे विभुः॥५६॥ ततोऽसौ भोजनस्थानमागतो बुभुजे सुखम् । दिनशेषं विशेषज्ञैः, समं गोष्ठ्या समत्यगात् ॥ ५७ ॥ अथ ज्ञात्वेन्दुभर्त्तारं, निशायां संगमोद्यतम् । सन्ध्यारागाङ्गरागाढ्या, गगनश्रीरजायत ॥ ५८ ॥ यस्योदयोऽस्ति तस्यास्तमप्यस्तीतीव सूचयन् । तदार्यमा जगामास्तमस्तपर्वतमस्तके ॥ ५९ ॥ खगमस्तङ्गतं वीक्ष्य खगाः कोलाहलं परे । चक्रिरे स्वस्ववाग्योगैस्तद्वियोगासहा इव ॥ ६० ॥ लोकंपृणार्कभूपास्तैर्ध्वान्तैर्लोकापकारिभिः । तदा प्रस्फुरितं चौरैरिवावसरवेदिभिः ॥ ६१ ॥ संकुचत्पद्मवदनास्तदा निःश्रीकतां गताः । वीक्ष्याऽब्जिन्यः स्वकान्तास्तं, मम्लुः सत्य इव द्रुतम् ॥ ६२ ॥ ततस्तताभियोगोऽसौ, कृतसान्ध्यविधिः कृती । शुद्धात्मागत्य शुद्धान्तं, भेजे तल्पमनल्पधीः ॥ ६३ ॥ तत्र वारवधूवारोपचारैरपि स प्रभुः । नाप स्वापं कोविदोक्तमर्थं स्त्रीगोचरं स्मरन् ॥६४॥ दध्यौ च वामवामाक्षीदुश्चरित्रं विदामपि । दुर्बोधमुक्तं तत्कीदृग्, भावि द्रक्ष्यामि वा कथम् ? ॥ ६५ ॥ दिदृक्षा यद्यपीदृक्षाऽस्मादृक्षाणां न युज्यते । खलाः खलु परच्छिद्रवीक्षासज्जा न सज्जनाः ॥ ६६ ॥ मया वीक्ष्यं तथाऽप्येतन्निर्णेतुं तत्सुधीवचः । सम्यग् वीक्षां विना वस्तुनिर्णयः खलु दुष्करः ॥ ६७ ॥ शिष्टगीर्न मृषा यद्यप्यहं वीक्षे तथाऽप्यदः । श्रुताद् दृष्टं विशिष्टं हि, शिष्टं शिष्टजनैर्ननु ॥ ६८ ॥ अद्यैव च परीक्षा सा, विधातुमु-

१ पूजाम् । २ सूर्यम् । ३ पक्षिणः । ४ यस्मात् । ५ उक्तम् ॥

चिता मम । कार्यौत्सुक्ये विलम्बो हि, भवेदरतिकारणम् ॥ ६९ ॥ विमृश्येति भुवो भर्त्तैकाकी नाकीव शक्तिमान् । नीलाम्बरो बल इव, निशितासिकरो निशि ॥ ७० ॥ निर्गत्यान्तःपुरादन्तःपुरं छन्नतया भ्रमन् । द्वे कन्यके क्वचित् क्रीडासक्ते व्यक्ते ददर्श सः ॥ ७१ ॥ युग्मम् ॥ संलापं स तयोः श्रोतुं, तत्र यावदवास्थितः । तयोरेकाऽवदत्तावत्, स्वभावसरला कनी ॥ ७२ ॥ हलेऽहं विहितोद्वाहा, सोत्साहा स्वपतिं सदा । सेविष्ये परमप्रीत्या, नीत्यायातमिदं खलु ॥ ७३ ॥ गृहभारस्य वोढायां, त्विवोढाज्ञां प्रदास्यति । सततं तां वहिष्येऽहं, शिरसा सरसा हृदि ॥ ७४ ॥ पतिव्रतानां स्त्रीणां हि, भवेद्भर्त्तैव दैवतम् । तदाज्ञाराधनं तासां, तद्धर्मपरमो मतः ॥ ७५ ॥ उक्तं हि—

> न दानैः शुद्ध्यते नारी, नोपवासशतैरपि । अव्रताऽपि भवेच्छुद्धा, भर्तृहृद्गतमानसा ॥ १ ॥
>
> अन्धं च कुब्जकं चैव, कुष्ठाङ्गं व्याधिपीडितम् । जीविताविधि भर्त्तारं, पूजयेत्सा महासती ॥ २ ॥
>
> त्यजेत्पुत्रं च मित्रं च, पितरावपि शोभनौ । जीविताविधि भर्त्तारं, न त्यजेत् सा महासती ॥ ३ ॥

इति नीतिवचोमन्त्राकर्णनाप्तहृष्टहृद्यता । आजन्माराधयिष्ये स्वं, धवं राधेव माधवं ॥ ७६ ॥ तदाकर्ण्यापरा शाठ्यधरारुहधराऽवदत् । मुग्धे ! किमिवे वक्षीदं, जाड्यालस्यादिसूचकम् ॥ ७७ ॥ सतीत्वलालसा त्वादृक्, स्याद्बुद्धिविकलालसा । दक्षा मादृक्षा तु सर्वं, स्वाभीष्टं साधु साधयेत् ॥ ७८ ॥ अहं हि जातवीवाहा, गता च श्वशुरालयम् । करिष्ये कान्तमेकान्तासक्तं नानाप्रलोभनैः ॥ ७९ ॥ परैरपि नरैः प्रेम, विधास्ये गुणबन्धुरैः । नानारसार्थिनी भृङ्गी, नैकमेव द्रुमं भजेत्

---

१ निपुणे । २ किमतेरिव शब्दयोजनं कथयस्यर्थमभिन्नमेव हि । किमिवास्ति सुखं शरीरिणां विषयातीवविलुप्तचेतसाम् ॥ १ ॥

॥ ८० ॥ वयं चातुर्यमप्येकनरासक्तौ भवेत्कथम् ?। अनेकच्छेकसख्यं हि, प्रोक्तं चातुर्यकारणम् ॥ ८१ ॥ प्रौढस्त्रीणामसङ्गोऽपि, शाम्येदेकनरेण किम् ?। एकेनाम्बुघटेनेवारण्यानीनां दवानलः ? ॥ ८२ ॥ एकस्त्रिया न तुष्यन्ति, कामिनो मानवा अपि । तेभ्यो भूयिष्ठकामाक्षी, तुष्येदेकनरेण किम् ? ॥ ८३ ॥ यदुक्तम्—

नाग्निस्तृप्यति काष्ठानां, नापगानां महोदधिः । नान्तकः सर्वभूतानां, न पुंसां वामलोचनाः ॥ १ ॥

यद्दक्षापि सती स्यात्तत्, तादृक् पुंसोऽसमागमात् । तादृशान्याश्रयालाभाच्छ्रयन्त्यम्बुधिमापगाः ॥८४॥ सदालि ! शालिलावण्यमौलि ! मालिन्यहृत्तनोः । पुण्यं तारुण्यमासाद्य, कामिचित्तैककार्मणम् ॥ ८५ ॥ करिष्येऽहं त्रिचतुरैश्चतुरैः प्रेमसज्जनैः । यथाऽवकेशिनः साम्यं, यौवनं लभते न मे ॥ ८६ ॥ युग्मम् ॥ अथाध्यासीदिति श्रुत्वा, तत्संलापमिलापतिः । अहो ! मिथो विसंवादि कन्ययोर्मतमेतयोः ॥ ८७ ॥ असौ सौम्या शठा चेयं, शैशवादप्यहो ! कथम् ?। यद्वा केन कृता द्राक्षा, मधुरा तुम्बिका कटुः ?॥८८॥ यद्यप्याद्या सतीत्वेन, संस्तवार्हा तथाऽप्यहम् । स्वीकरिष्येऽपरां कार्यविशेषादसतीमपि ॥ ८९ ॥ चिकीर्षितो निर्णयो हि, स्यादीदृश्यैव नान्यया । जायते स्वर्णमानं हि गुञ्जया न तु मुक्तया ॥ ९० ॥ एनां पाणौकृत्य कृत्यं, करिष्ये चिन्तितं शनैः । त्वरया कार्यकरणं, वरणं विपदां खलु ॥ ९१ ॥ किं च—मद्बुद्धिरुद्धा यद्येषा, स्वेष्टं कर्त्तुं न शक्ष्यति । तदास्या दाक्ष्यदर्पोऽपि, दौष्ठ्येन सह नंक्ष्यति ॥ ९२ ॥ ध्यात्वेति तत्र ताम्बूलोद्गालक्षेपादिचिह्नकृत् । कृतकृत्य इवामन्दानन्दोऽगात् स्वगृहं नृपः ॥ ९३ ॥ स्वल्पनिद्रस्तत्र तल्पं, बभाज गुणभाजनम् । उपास्य च क्षणं

---

१ धारि ॥

निद्रां, निशाशेषे व्यबुद्ध्यत ॥ ९४ ॥ तदा च स्वद्विषोऽर्कस्यागमं संभाव्य नश्यतः। निशा स्वसूनोर्ध्वान्तस्य, पृष्ठेऽभूद्गन्तु-मुत्सुका ॥ ९५ ॥ भात्रिस्वकान्ताविरहतीव्रदुःखात्तदाद्रुतम्। विधुर्विधुरतां भेजे, विच्छायः स न चेत्कथम्? ॥ ९६ ॥ द्रष्टुं पेष्टुं च तां स्वामिदुर्दशामसहा ग्रहाः। तदा ह्रीणा इव क्षीणांशवः प्रापुरदृश्यताम् ॥ ९७ ॥ प्राची प्रेक्ष्यारुणं रागा-रुणं प्राचीनसंस्तवात्। सुप्रकाशस्मिता रागं, दधौ सन्ध्यामिषात् स्फुटम् ॥ ९८ ॥ भानुः स्वप्रग्रहग्रस्तोदग्रग्रहमहःस्मयः। पूर्वाद्रिमौलौ माणिक्यमौलितामाश्रयत्तदा ॥ ९९ ॥ तदा बालातपैः सूर्यो, द्यावाभूम्यावभूषयत्। प्रेयानिव समप्रेम्णा, स्वपत्न्यौ कुङ्कुमद्रवैः ॥ १०० ॥ तदा मित्रकरैः स्पृष्टास्तन्द्रां पद्मव्रजा जहुः। स्ववाक्यैः स्वागतं मित्रमप्राक्षुः पक्षिणो मुहुः ॥ १०१ ॥ तदा पयोधेः सौधाच्च, रविं क्ष्मापं च निर्गतम्। शिष्टास्तुष्टुविरे तुष्टास्तेजःपुञ्जविराजितम् ॥ १०२ ॥ प्रभातविधिमासूत्र्य, महीमान् महिमाश्रयः। आस्थानमण्डपमलञ्चक्रे व्योमेव भानुमान् ॥ १०३ ॥ साभिज्ञानं ततो गेहा-द्युदीर्य प्रेष्य चानुगान्। तातं स तस्याः कन्यायाः, न्यायाढ्योऽजूहवन्नृपः ॥ १०४ ॥ तं चायातं स सम्मान्यः, सम्मा-न्याऽभीष्टया गिरा। स्माह श्रेष्ठिन्! स्वपुत्रीं मे, देहि दक्षमतल्लिकाम् ॥ १०५ ॥ श्रेष्ठभूयिष्ठभार्योऽपि, परिणेष्याम्यमूमहम्। आमुक्तमुक्तामालोऽपि, धत्ते पुष्पस्रजं न किम्? ॥ १०६ ॥ तन्निशम्याभ्यधादिभ्यः, स्वामिन्! सा परिणीयताम्। दिष्ट्या ते सौम्यदृष्ट्यापि, संबन्धः किं पुनस्त्वया? ॥ १०७ ॥ कन्यां धन्यां वयं मन्यामहे या काम्यते त्वया। गौरी गौरीषु किं नार्च्या, यां महेशः समीहते? ॥ १०८ ॥ इत्युदित्वा गृहं गत्वा, परिष्कृत्य निजाङ्गजाम्। पृथ्वीपतिमुपानिन्ये, हरिं पद्मा-

---

१ असमर्थाः। २ पुरातनपरिचयात्। ३ किरण। ४ हर्षेण। ५ अलङ्कृत्य ॥

मिवोदधिः ॥ १०९ ॥ तदैव दैवज्ञगिरा, नृपतिः परिणीय ताम् । इष्टिकाजातजातैकस्तम्भस्थे धामनि न्यधात् ॥ ११० ॥ स्तम्भे तस्मिन् गृहाधारे, सुधालेपातिकोमले । कीटिका अपि नारोढुमशकन् किं पुनः परः ? ॥ १११ ॥ स्वयं त्वग्निकवेतालबलात्तत्र ययौ नृपः । कृशाम्वीवाऽकृशां[1] रागदशामभिनयन्नयम् ॥ ११२ ॥ कल्पवृक्ष इवाभीष्टामदनाच्छादनादिकाम् । ददौ स तस्यै सामग्रीं, समग्रामग्रणीः सताम् ॥ ११३ ॥ दध्यौ सा तु महीशोऽयं, विना हेतुं रिपुर्मम । यन्मामिह गृहेऽक्षैप्सीत्, सारिकामिव पञ्जरे ॥११४॥ अथ चेन्मामिह क्षिप्त्वा चिकीर्षति सतीमसौ । तदान्या अपि किं स्वस्त्रीर्द्धाम्नि न क्षिपतीदृशे ?॥११५ ॥ यद्वा सख्या समं वार्त्ता, या मया निशि निर्मिता । तामश्रौषीदसौ नूनं पर्यटन्नष्टचर्यया ॥११६॥ तदा मदाश्रितं दाक्ष्यमदावेशमुदीक्ष्य वै । कर्त्तुं तदुपचारं मामुदुवाहैष मन्त्रवित् ॥ ११७ ॥ तत एव प्रतिज्ञाततीव्रभावां च मामसौ । कोशे[3] शस्त्रीमिवेशः स्त्रीकृत्य धाम्नि न्यधादिह ॥ ११८ ॥ अस्तु वस्तुस्वभावाज्ञोऽनेन वाऽन्येन हेतुना । मां रक्षितुं सोद्यमोऽसौ, न तु रक्षितुमीश्वरः ॥ ११९ ॥ यद्वाऽनेन विमर्शेनाधुना कृतमसाधुना । कुर्वे कालोचितं स्वालोचितं त्वग्रे विधास्यते ॥ १२० ॥ दम्बाम्बुवापी सापीति, श्रयन्ती प्रश्रयं बहिः । मनो रञ्जयितुं राज्ञश्चारुचाटून्यनाटयत् ॥१२१॥ मुग्धभावं च सा दुग्धमुखीवादर्शयत्तथा । सोऽप्रगल्भां यथाऽमंस्त, तां विदग्धां विदन्नपि ॥ १२२ ॥ आनुकूल्यरसः स्त्रीणामिति चेतसि जानती । भूपचित्तानुवर्त्तित्वं, प्रपेदेऽप्रेरिताऽपि सा ॥ १२३ ॥ अतुल्येनानुकूल्येन, तस्या राजाऽपि रञ्जितः । तां बभाजानुकूल्यं हि निर्मन्त्रं विश्वकार्मणम् ॥ १२४ ॥ सान्यदोचे नृपं स्वामिन्!, गमयामि कथं दिनम् ? । निर्व्यापारा

---

१ नट इव । २ पुष्टाम् । ३ शस्त्री यथा तीव्रतायुक्ता कोशे क्षिप्यते तथा मा स्त्रीकृत्य असौ ईशोऽत्र धाम्नि न्यधात् ॥

गात्रमात्रपरीवाराऽहमन्वहम् ॥ १२५ ॥ दिनैस्त्रिचतुरैरत्र, त्वं यत्राभ्येषि तद्दिनम् । सा क्षपा च क्षणायेते, वर्षायेते परे तु ते ॥ १२६ ॥ ततो लेखनसामग्रीं, मषीमुख्यां प्रदेहि मे । व्याक्षेपेण यथाऽनेन, कालक्षेपं करोम्यहम् ॥ १२७ ॥ तत्प्रार्थितः पार्थिवोऽपि, सदयः समपादयत् । पिप्रिये साऽपि प्रियेऽन्तर्नीरागा बाह्यभक्तिभाक् ॥ १२८ ॥

इत्थं नरेन्द्रो विविधैरुपायैरावर्जयत्तां दयितां तदिष्टैः ।
वशाऽपि साऽपिप्रिणदिङ्गितज्ञा, बाह्योपचारैर्वसुधाधवं तम् ॥ १२९ ॥

॥ इति श्रीतपागच्छाधिराजश्रीविजयदानसूरीश्वरशिष्यमहोपाध्यायश्रीविमलहर्षगणिमहोपाध्याय-
श्रीमुनिविमलगणिशिष्योपाध्यायश्रीभावविजयगणिविरचितायां
चम्पकमालाकथायां प्रथमः प्रस्तावः ॥

अथागात्तत्र गगनधूलिनामापरेद्यवि । सार्थनाथोऽर्थरूपाभ्यां, श्रीदश्रीनन्दनौ जयन् ॥ १ ॥ सोऽरञ्जयच्छत्लवस्तुसंभृतैः प्राभृतैर्नृपम् । सोऽपि तुष्टोऽमुचच्छुल्कं, तत्सार्थस्यार्थशेवधेः ॥ २ ॥ सदावासं च वासार्थं, सार्थपायार्पयन्नृपः । पण्यैः पुण्यैरगण्यैः स्वैर्भृत्वा सोऽप्यध्युवास तम् ॥ ३ ॥ याप्ययानगतं तं च, स्वगृहासन्नवर्त्मना । यान्तं भूपसभेऽन्येद्युरद्राक्षीत् सा नृपाङ्गना ॥ ४ ॥ दध्यौ चैवमहो ! एषः, पुमान् सम्मानमङ्गतः । उल्लासयति मां नेत्राध्वना मन्मानसं गतः॥५॥ वर्णः सकर्णवर्ण्योऽस्य सौभाग्यं भुवनोत्तरम् । रूपमप्रतिरूपं च, न स्यात् कस्याद्भुतावहम् ॥ ६ ॥ अहं स्वे लोचने धन्ये, मन्ये याभ्यामयं पुमान् । लावण्यजलधिर्दृष्टोऽदृष्टोज्झितसुदुर्लभः ॥७॥ दृष्टोऽसौ सुभगोत्तंसो, न यया तज्जनिर्मुधा । दृष्टोऽपि परिरब्धोऽयं न यया तज्जनिर्मुधा ॥ ८ ॥ विधे ! विधेहि पक्षौ मे, निधेहि करुणां मयि । यथोड्डीयाङ्कमलमलङ्कुर्वेऽस्य मञ्जुलम् ॥ ९ ॥ चेतः ! प्रसीद त्वं बाह्वोर्देहि विद्यां प्रसारिणीम् । अमू यथा प्रसार्यामुं, मनोऽभीष्टं परिष्वजे ॥ १० ॥ अद्यास्य दर्शनान्नेत्रे, यथा सफलतां गते । तथाऽस्य स्पर्शनाद्भावि, साफल्यं वपुषः कदा ? ॥ ११ ॥ ध्यायन्तीति तदेकाग्रमनास्तस्मिन् गतेऽपि हि । वीक्षापन्नतया वीक्षामास तन्मार्गमेव सा ॥ १२ ॥ क्षणान्तरे च सा सावधाना दध्याविदं हृदि । ममास्य संयोगमृते, मृतेर्योगोऽपि संभवेत् ॥ १३ ॥ सङ्गोपायं तदस्य द्राक्, कुर्वे कञ्चन जीवितुम् । क्रियते जीवनोपाये, विलम्बो नालसैरपि ॥ १४ ॥ ध्यात्वेति धनिनस्तस्य, स्वाशयावेदनाशया । गताऽश्लोकभया श्लोकयुगं पत्रे लिलेख सा ॥ १५ ॥ तच्चैवम्—"नाथ ! प्रदोषसंरुद्धसञ्चारा पद्मसद्मगा । भृङ्गी समीहते चिन्ताचान्ता मित्र ! तवागमम् ॥ १६ ॥

---

१ आलिङ्गितः । २ अमू बाहू । ३ आलिङ्गामि । ४ विलक्षतया । ५ अयशोभयम् ॥

तदुपेक्षां भवान् भास्वन्, कर्त्ता चेत्तदभाग्यतः । हताशान्तकसंयोगं, तदा सा लप्स्यते ध्रुवम्" ॥ १७ ॥ इति श्लोकद्वयीपत्रं क्षिप्त्वा सत्पत्रबीटके । सा प्रत्यागच्छतस्तस्योत्सङ्गे दक्षाऽक्षिपतद्रुम् ॥ १८ ॥ तद्वीक्ष्य गगनायातं, दत्तं देवतयेव सः । ऊर्द्ध्वं पश्यन्नपश्यत्तां, गवाक्षस्थां मृगेक्षणाम् ॥ १९ ॥ तां च पश्यन्निर्निमेषमेष मेष इवोन्मदः । न बिभाय न जिह्राय, भीह्रियौ क्व नु कामिनाम् ? ॥ २० ॥ दध्यौ च हृदि मामेषा, पश्यन्ती स्निग्धया दृशा । ज्ञापयत्यान्तरं रागं, न ह्यरागैवमीक्षते ॥२१॥ नागवल्लीदलानां मे, बीटकं रागमालिनाम् । सत्यङ्कारमिव प्रेम्णस्तत एवेयमार्पयत् ॥ २२ ॥ तद्वीक्षे बीटकं सम्यग्, रागिण्याऽर्पितमेतया । सामान्यमपि मान्यं हि, वस्तु रागिजनार्पितम् ॥ २३ ॥ ध्यात्वेति बीटकं वीक्षमाणः श्लोकद्वयाङ्कितम् । पत्रं ददर्श तन्मूर्त्तमिव मन्मथशासनम् ॥ २४ ॥ तत्तन्मानसकोशस्थरागशेवधिबीजकम् । प्रवाच्य भृशमुत्कण्ठां, भेजे तत्सङ्गमाय सः ॥ २५ ॥ दध्यौ चास्या अहो! रूपमहो ! लावण्यमुल्बणम् । अहो ! दाक्ष्यमहो ! स्नेहोऽन्योक्तिकौशलमप्यहो ! ॥ २६ ॥ दर्शनस्पर्शरागाः स्युरीदृशां हि मृगीदृशाम् । यथोत्तरं दुरापास्तन्नोपेक्षास्या ममोचिता ॥ २७ ॥ उपेक्षिता क्षिताशासौ, वशा कामदशावशात् । म्रियेत चेत्तदा स्यान्मे, स्त्रीहत्यापातकं महत् ॥ २८ ॥ तदुपायेन केनापि, मया गन्तव्यमेकशः । तस्याः समीपे पश्चात्तु, करिष्ये समयोचितम् ॥ २९ ॥ ध्यायन्निति गतः सौधं, मित्रायाऽसौ न्यवेदयत् । तां वार्त्तां परमप्रेमनिधयेऽम्बुधये धियाम् ॥ ३० ॥ ऊचे च मित्रेदं कार्यं, दुःसाधं प्रतिभाति मे । यदेकस्तम्भसौधस्थाभिसर्त्तव्या नृपाङ्गना ॥ ३१ ॥ न यामि चेत्तदा कामविवशा म्रियतेऽपि सा । तत्किं करोम्यहं पश्यन्निति व्याप्रमितस्तटीम् ॥३२॥ यद्वा त्वदीयसाहाय्याद्भाव्यसंभाव्यमप्यदः । स्थपतेरुद्यमाद्भेजे, राट्सुतां कौलिको न किम् ? ॥ ३३ ॥ रजोऽपि वायुसा-

हाय्यादारोहति गिरेः शिरः । असहायो मणिरपि, न याति क्रममप्यहो ! ॥ ३४ ॥ तन्मन्ये कार्यमेतन्मे, साहाय्याद्धीमतस्तव । भावीत्याकर्ण्य सङ्क्रान्ततद्दुःखः[1] सोऽप्यदोऽवदत् ॥ ३५ ॥ सखे ! सखेदं मा मेदं, वादीत्रादीव हीलितः । नासाध्यं कष्टसाध्यं वा, ममेदं वृद्धसेविनः ॥ ३६ ॥ वृद्धेभ्यो हि श्रुतं गोधा. चन्दनाह्वा महाबला । याति गेहे दुरारोहेऽप्यारोहाय सहायताम् ॥ ३७ ॥ कुतोऽप्यानीय तां तस्मान्नेष्यामि त्वां तदन्तिकम् । दीनं तद्विरहान् मीनमिव नीरवियोगतः ॥ ३८ ॥ त्वदीयहार्दसौहार्दप्रणुन्नोऽकार्यमप्यदः । करिष्येऽग्निरिवोदग्रवायुनुन्नो वनक्षयम् ॥ ३९ ॥ तन्मा कृथा वृथा चिन्तां, मतिमोहविधायिनीम् । चितातोऽप्यधिकां जीवज्जनज्वालनकर्मणा ॥ ४० ॥ स्वस्थीकृत्येति तं क्वापि, ग्रामे गत्वा स तस्करात् । प्राक् संस्तुताच्चन्दनाह्वगोधां तच्छिक्षितां ललौ ॥ ४१ ॥ तामादाय घटे क्षिप्तां सार्थेशेन समन्वितः । हस्तमात्रान्तराबद्धग्रन्थिना रश्मिना युतः ॥ ४२ ॥ तस्यैकस्तम्भसौधस्य, संनिधौ सोऽगमन्निशि । घटादाकृष्य गोधां तत्कक्ष्यां रज्जुं बबन्ध च ॥ ४३ ॥ युग्मम् ॥ वंशमारोप्य सा तेनोद्धस्ता[2] सीत्कारपूर्वकम् । गवाक्षे व्यलगद्गाढं, तत्रोत्कीर्णेव शिल्पिभिः ॥ ४४ ॥ सार्थेशोऽथ सुहृद्वाचा, हस्तयुग्मात्तरज्जुकः । पादाङ्गुष्ठाङ्गुलीमध्याक्रान्ततद्ग्रन्थिसन्ततिः ॥ ४५ ॥ तत्रारोहन्[3] दुरारोहेऽप्यभीकस्तद्दिदृक्षया । प्राप वातायनं लङ्कां इव वंशाग्रमाशया ॥ ४६ ॥ युग्मम् ॥ तद्भयस्यस्तु तां गोधां, फूत्कारेण समागताम् । घटे क्षिप्त्वा निलीयास्थात्, क्वापि तत्सौधसंनिधौ ॥ ४७ ॥ सार्थनाथः पुनर्दीपोद्द्योतादेकाकिनीं स ताम् । विज्ञाय प्राविशत्तस्याः, सदने मनसीव सः ॥ ४८ ॥ सा पूर्ववीक्षितत्तया, तं झगित्युपलक्षितम् । अभ्युत्तस्थौ समं रोमह-

---

१ मित्रदुःखः । २ उत्क्षिप्ता । ३ एकस्तम्भसौधे ॥

र्वैर्हर्षभरोत्थितैः ॥ ४९ ॥ कटाक्षैर्लक्षयन्ती तं, पूजयन्तीव कैरवैः । सुस्मिता विस्मिता प्राक्षीन्मृगाक्षी स्वागतं च सा ॥५०॥ ऊचे च निर्विकल्पं मत्तल्पं स्वापायकल्पितम् । अलङ्कुरु कुरु प्रेमशाखिनं सफलं चिरात् ॥ ५१ ॥ ततः स तस्यां शय्यायां, सज्जायां समुपाविशत् । सुधामुधाकारिगिरा, ततो भूयोऽपि सेत्यवक् ॥ ५२ ॥ यतः प्रभृतिदृष्टस्त्वं, गच्छन् स्वच्छमतेऽध्वनि । तदादि कुरुते कामं, कामः कामपि मे व्यथाम् ॥ ५३ ॥ नष्टा निद्रा बुभुक्षा च, मम वेदनयाऽनया । भवत्सङ्गमपीयूषपिपासाऽ वर्द्धताधिकम् ॥ ५४ ॥ तदद्य हृद्य ! हृद्यस्मान्, स्मृत्वेदं सुन्दरं व्यधाः । भियं राज्ञोऽप्यवज्ञाय, यदिहागाद्दुरागमे ॥ ५५ ॥ तत्कृतार्थीकृतागत्य, यथा मे प्रार्थना त्वया । तथा स्वाङ्गेन सङ्गत्य, मां सार्थेश ! कृतार्थय ॥ ५६ ॥ सोऽभ्यधाद्वीटकान्तःस्थपत्राद् ज्ञात्वा त्वदाशयम् । स्वस्थीकर्त्तुं त्वामिहागां, न तु रन्तुं त्वयानघे ! ॥ ५७ ॥ भोग्या नान्यस्त्रीति नीतिधर्मशास्त्रवचः स्मरन् । सेवेऽन्यामपि नान्यस्त्रीं, किं पुनस्त्वां नृपप्रियाम् ? ॥ ५८ ॥ परलोकविरुद्धेऽपि, प्रवृत्तिर्नोचिता सताम् । लोकद्वयविरुद्धेऽस्मिन्, प्रवर्त्ते तत्कथं ? शुभे ! ॥ ५९ ॥ प्रेत्यभीतिमदृश्यत्वात्, प्रेम्णावगणयाम्यपि । तां प्रत्यक्षां पार्थिवोत्थामैहिकीं जरये कथम् ? ॥६०॥ दण्ड्यते स्वाङ्गनाशाद्यैरन्योऽप्यन्यायकृन्नृपैः । यत्पुनस्तद्वशासक्तो, दण्ड्यते तत्र का कथा ? ॥ ६१ ॥ पुन्नागा नागवन्नागः, सहन्ते सुहृदामपि । भुजङ्गे भूभुजङ्गे च, क्षान्तिः, प्रीतिश्च दुर्लभा ॥ ६२ ॥ नाकस्मान्मृत्युदं तस्मात्, त्वत्सङ्गं कर्त्तुमुत्सहे । किं पाकोऽपि हि किम्पाकमश्नीयात्तद्विपाकवित् ?॥ ६३॥ तन्मामयि गृहान् गन्तुं, कृपां कृत्वा समादिश । त्वत्प्रेमपाशमुक्तोऽहं जीवामि ससुखं यथा ॥६४॥ यदुक्तम्—

१ अवाच्याम् । २ परलोकभयम् । ३ भीतिम् । ४ अपराधम । ५ शिशु. । ६ "अपि" इत्यपि ॥

तावदेव सुखं यावन्न कोऽपि क्रियते प्रियः । प्रिये तु विहिते सद्यो, दुःखेष्वात्मा नियोज्यते ॥ १ ॥

साचल्यौ यदि मे स्वास्थ्यं, कर्तुमागास्तदा तु माम् । रमय स्फारदुर्वारमारापस्मारविह्वलाम् ॥ ६५ ॥ स्वस्थीभावो हि भावत्कभोगाभोगं विना न मे । ऋतेऽम्बु तृषितस्येव, बुभुक्षोर्वा विनाऽशनम् ॥ ६६ ॥ स्वास्थ्ये सत्येव नीत्यादिवाक्यमासेव्यते बुधैः । तदभावे त्वपि प्राज्ञैर्निषिद्धमपि सेव्यते ॥ ६७ ॥ यदुक्तम्—

निषिद्धमप्याचरणीयमापदि, क्रिया सती नावति यत्र सर्वथा ।
घनाम्बुना राजपथेऽतिपिच्छिले, क्वचिद्बुधैरप्यपथेन गम्यते ॥ १ ॥

तथा—

स्वस्थावस्थे शरीरे हि, निषिद्धं सद्भिरौषधम् । विपर्यये तु तैरेव तदप्याद्रियते ध्रुवम् ॥ १ ॥

सर्वत्रोत्सर्गापवादौ दृश्येते वाङ्मयेष्वपि । प्रस्तुतार्थेऽपि सार्थेशापवादवचनं शृणु ॥ ६८ ॥ कामार्त्तां वनितां प्रीत्या, याचमानां पुनः पुनः । भजमानां न भुञ्जीत, तं वै चण्डालदर्शनम् ॥ ६९ ॥ अपवादवचांस्येवं, स्मृत्यादीनां विदन्नपि । भोग्या नान्यस्त्रीति वाचा, किं मां वञ्चयते भवान् ॥ ७० ॥ सेहे प्रेत्यभयाद्दुःखं, तदोग्रं त्वद्वियोगजम् । दुःखादस्मान्महद्वीक्षे, साक्षात्तत्प्रेत्यजं यदा ॥ ७१ ॥ सविद्य ! विद्यते तावत्, परलोकस्य संशयः । तत्र दुःखं महदिति, शुद्धधीः श्रद्दधीत कः ? ॥ ७२ ॥ संशये परलोकस्य, तद्दुःखस्यापि संशयः । सन्दिग्धदुःखभीतेस्तत्करस्त्यजेदैहिकं सुखम् ? ॥ ७३ ॥

---

१ तद्दुःखम् । २ परलोकभवम् ॥

ऐहिकी राजभीर्योक्ता, सा तु तुल्यावयोर्द्वयोः । ज्ञातास्महुर्नयो ह्येष, हन्यादावामुभावपि ॥ ७४ ॥ किं तु मय्यल्परागत्वात्, त्वं तां वेदयसे हृदि । अहं त्वयि त्वयि प्राज्यरागत्वात्तां न वेदये ॥ ७५ ॥ सङ्कोचरमपि स्नेहं, प्राणत्राणाय भीरुकः । जह्याच्छूरस्तु सत्प्रीतिकृते प्राणांस्तृणीयति ॥ ७६ ॥ उक्तं च केनचित्—

भवत्कृते खञ्जनमञ्जुलाक्षि ! शिरो मदीयं यदि याति यातु ।
दशाननेनापि दशाननानि नीतानि नाशं जनकात्मजार्थम् ॥ १ ॥

भवान्तरेऽपि सुप्रापाः, प्राणाः स्नेहः पुनः सताम् । दुष्प्रापः प्रेत्य तत्प्राणांस्त्रातुं मत्प्रेम कस्त्यजेत् ॥ ७७ ॥ राजा तु जातु जानीयान्नेदं ज्ञात्वाऽपि वा सहेत् । स्मरस्तु घस्मरोऽद्यैव, मां हताशां हनिष्यति ॥ ७८ ॥ तद्विमुञ्च वणिग्जातिसुलभं साध्वसं कृतिन् !। मामामर्दय मद्दुःखं, मर्दयान्तर्दयां कुरु ॥ ७९ ॥ स्नाहेभ्योऽद्रिप्रवाहेभ्योऽप्यस्थेम प्रेम योषिताम् । ता हि रक्ता विरक्ताश्च, जायन्ते क्षणमात्रतः ॥ ८० ॥ रक्ता च हरति द्रव्यं, या विरक्ता त्वसूनपि । तदर्थं देहसन्देहकार्यकार्यं करोति कः ? ॥ ८१ ॥ सोवाचायुक्तया वाचा, भवतः कृतमेतया । नार्यो नार्या न यत्सर्वा, न च सर्वे शुभा नराः ॥ ८२ ॥ दृश्यन्ते वज्रवत्केऽपि, पुरुषाः परुषाशयाः । विनाऽपि विप्रियं प्राणप्रियाप्राणापहारिणः ॥ ८३ ॥ स्त्रियोऽपि काश्चिद्वीक्ष्यन्ते, स्वकान्तविरहासहाः । जुह्वत्यः स्वं क्षणाज्ज्वालाजिह्वेऽनुगमनोद्यताः ॥ ८४ ॥ नार्योऽस्नेहा न तत्सर्वाः, सस्नेहा न नराः समे । महत् समानजातिष्वप्यन्तरं दृश्यते मिथः ॥ ८५ ॥ उक्तं हि—

१ भक्षणशीलः । २ भयम् । ३ अस्थिर. ॥

वाजिवारणलोहानां, काष्ठपाषाणवाससाम् । नारीपुरुषतोयानामन्तरं महदन्तरम् ॥ १ ॥

हित्वा विमर्श तत्सर्वं, प्रार्थनां मे कृतार्थय । दीनां स्वीकुरु मां कान्त !, त्वदेकायत्तजीविताम् ॥ ८६ ॥ तस्या वाणीं स वाणिन्याः, श्रुत्वान्तर्वाणिरप्यमूम् । तस्यां रक्तोऽभवत्को वा, व्यक्तोऽप्याभिर्न भिद्यते ? ॥ ८७ ॥ ततः स तां सतां मार्गं, विहायाङ्के न्यवीविशत् । गुणान् ज्ञानविवेकादीनुद्वास्य हृदयालयात् ॥ ८८ ॥ यतः—

जीवव्योम्नि ज्ञानभानुस्तावदुद्द्योततेतमाम् । कान्ता काम्बदनी यावद्रागाभ्रैः स्थगयेन्न तम् ॥ १ ॥

विवेकदीपो हृद्गेहे तावदेव प्रभासते । यावत् प्रबाधते श्यामाकटाक्षपवनो न तम् ॥ २ ॥

तावत् क्रीडन्ति हृत्सौधे, विनयादिगुणार्भकाः । यावन्नायाति तत्रोग्रो, रमणीरागराक्षसः ॥ ३ ॥

ततश्च तामसौ कामतामसौघहृतत्रपाम् । करणैर्विविधैः कामशास्त्रप्रोक्तैररीरमत् ॥ ८९ ॥ तां कामुकीं यथा कामं, कामी सोऽक्रीडयत्तथा । यथा सा काञ्चनीरागा, नीरागा भूपतावभूत् ॥ ९० ॥ अब्रवीत् साऽथ सार्थेशमेकशस्त्वत्समागमात् । नीलीरागा महाभाग !, जाताऽस्मि त्वय्यहं कृतिन् ! ॥ ९१ ॥ राहुः शशाङ्कमण्डल्या, इव तानवकृत्तनोः । मयाऽथ नाथ ! विश्लेषः, सोढुमीशिष्यते न ते ॥ ९२ ॥ प्रसद्य सद्यो मे देयास्तदा देयं स्वदर्शनम् । मा मां त्वदेकजीवातुं, सौभाग्यस्मर ! विस्मरः ॥ ९३ ॥ दिवसैः पञ्चषैरत्रायाति राजा तु जातुचित् । तत्ताध्वसान्मम प्रेमध्वंसं तन्मा कृथा वृथा ॥ ९४ ॥ आमेत्युक्त्वा गृहं गन्तुं, गवाक्षे तत्र सोऽगमत् । तयाऽनुगम्यमानोऽश्रुजलाप्लावितनेत्रया ॥ ९५ ॥ मित्रं प्रति

---

१ बहुशास्त्रवाक्याभिज्ञोऽपि । २ हरिद्रारागा ॥

ततः संज्ञां, चक्रे स प्राक् प्रतिश्रुताम् । तां श्रुत्वाऽऽगत्य सोऽपि द्राक्, प्राग्वद्रोधां मुमोच ताम् ॥ ९६ ॥ तत्पुच्छरज्जुमालम्ब्योत्तीर्णस्तूर्णं स मित्रयुक् । गेहं जगाम तां चित्ताभिमतां संस्मरन् भृशम् ॥ ९७ ॥ सा राजदयिता तूग्रतदीयविरहातुरा । आलिङ्गितकपिकच्छूरिव नाप रतिं क्वचित् ॥ ९८ ॥ तद्वियोगाग्निनाऽत्यर्थं, स्फूर्जता तन्मनोवने । चिन्ताज्वालाभिरज्वालि, तत्सातोरुतरुव्रजः ॥ ९९ ॥ तत्सङ्गतर्षोत्कर्षोत्था, दुःखाद्वर्षायितं दिनम् । यूथभ्रष्टा कुरङ्गीव, कथञ्चित्साऽत्यवाहयत् ॥ १०० ॥ रात्रौ भूयोऽपि सार्थेशः, प्रेम्णाकृष्टस्तदन्तिके । प्राग्वद्ययौ वृष इवाकृष्टो नस्ताधराङ्गिना ॥ १०१ ॥ स्वां वशामिव निश्शङ्कं, रमयित्वा चिरं सताम् । निशाशेषेऽगमत्सौधमेवं चक्रे मुहुर्मुहुः ॥ १०२ ॥ उप्तो नेत्रारामिकाभ्यां, संसिक्तो वचनाम्बुदैः । तयोः प्रेमद्रुमः पुष्टिं, दधौ संभोगदोहदैः ॥ १०३ ॥ तौ बाढं निबिडस्नेहौ, निशाचन्द्रमसाविव । अन्योन्यविरहेऽगातां, विच्छायत्वं क्षणादपि ॥ १०४ ॥ ततो राज्ञ्या तया प्रोक्तस्तत्सौधस्तम्भमूलगाम् । सुरङ्गां स्वगृहान्मर्त्यैः, स विश्वस्तैरचीकरत् ॥१०५॥ स्तम्भभित्तिकृतद्वाराकृष्यतन्मध्यपूरणम् । तस्मिन्मनारक इव, सोपानान्यभितो न्यधात् ॥ १०६ ॥ विधाप्य स्तम्भमूलस्थद्वारान्ते शयनास्पदम् । स्तम्भाग्रेऽकारयद्गेहमध्ये द्वारमगोचरम् ॥ १०७ ॥ शिल्पिभिः सर्वमप्येतद्धनदानवशीकृतैः । छन्नं व्यधापयत् क्षिप्रं, वित्ताद्वा किं न जायते ? ॥ १०८ ॥ स्तम्बे भृङ्ग इव स्तम्भे, वसंस्तत्र स पद्मिनीं । राजहंसप्रियां सद्मसरो गत्वा बभाज ताम् ॥ १०९ ॥ नृपस्तत्रान्यदाऽऽयातः, प्रातःकाले ददर्श ताम् । चिह्नैः सद्यस्कसंभोगसूचकैरुपलक्षिताम् ॥ ११० ॥ अनावृतश्लथीभूतकबरीं शबरीमिव । विच्छिन्न-

१ राज्ञीपक्षे विच्छिन्ना पत्रलता पत्रवल्ली यस्याः सा तथा । क्रीडावनीपक्षे विशेषेण च्छिन्नपत्रा लता वल्ल्यो यस्यां सा तथा ॥

पत्रलतिकां, कपिक्रीडावनीमिव ॥ १११ ॥ उत्फुल्लगलसंलग्नताम्बूलरसलत्राम् । रतायासोद्भवन्निद्रासङ्कुचन्नेत्रपल्लवाम् ॥ ११२ ॥ गतकृ[1]त्रिमरागत्वाद्विरलारुणताञ्चितम् । रदक्षतपदैराढ्यमाबिभ्राणां रदच्छदम् ॥ ११३ ॥ तां वीक्ष्य क्षितिपो दध्यौ, हा धात्रीहापि रक्षिता । अन्यासक्ताऽभवदसौ, धिग् रामाः कामविह्वलाः ॥ ११४ ॥ चतुर्भिः कलापकम् ॥ एतत्कामितकल्पद्रौ, मय्यासक्तेऽपि सत्यसौ । सेवतेऽन्यं नरं स्त्रीणां, दुष्पूरत्वमहो! महत् ॥ ११५ ॥ सती स्याच्चेदसौ तस्यादियं देहस्थितिः कथम् ? । स्यादेकस्याश्च ताम्बूलोद्गालादिकमियत्कथम् ? ॥ ११६ ॥ केनापि रसिकेनासौ, तन्नूनं रमतेऽन्वहम् । अहं तु मोहाद्[2]विमोहाज्जानाम्येनां सतीमिति ॥ ११७ ॥ भियं ममाप्यनादृत्य, यो विशत्यत्र सोऽप्यहो ! । महत्साहसिको भावी, सिद्धो विद्याञ्जनादिना ॥ ११८ ॥ स च जारनरो नूनमिहासन्नो भविष्यति । सद्यस्कभोगलिङ्गाढ्यदेहाऽसौ दृश्यते यतः ॥ ११९ ॥ ध्यायन्निति स निर्[3]ध्यायन्, भूनेता तत्र सर्वतः । काष्ठे कीट[4]मिवाद्राक्षीत्, स्तम्भमध्यागतं न तम् ॥ १२० ॥ सो[5]ऽथागाद्गृहमज्ञातो, निद्राघूर्णितया तया । जिज्ञासुर्जारमार्जारं, तं स्त्रीप्रेमपयोहरम् ॥ १२१ ॥ ततश्छन्नं भ्रमन् रात्रावेष वेषान्तरं दधत् । अपश्यद्योगिनं कञ्चिद्भूरिविद्याबलाञ्चितम् ॥ १२२ ॥ कन्थया श्लथया मूर्त्तमाययेव वृताङ्गकम् । गृह्णन्तं चारुपक्वान्नपत्रपुष्पफलादिकम् ॥ १२३ ॥ तं वीक्ष्य जाताशङ्कोऽसौ, तदज्ञातोऽनुसञ्चरन् । तन्मठं प्राप्य कर्म[6]ठ इवासीन्निभृताङ्गकः ॥ १२४ ॥ युग्मम् ॥ यावत्तद्वृत्तवीक्षार्थं, तत्रैकाग्रोऽभवन्नृपः । तावदन्धारिकामध्यादाविश्चक्रे स बालिकाम् ॥ १२५ ॥ विद्यालघूकृतां विद्यान्तरेण तरुणीकृताम् । स तां भोजितपक्वान्नताम्बूलां बुभुजे

१ कृत्रिमरागस्ताम्बूलालक्तकादिः । २ विपरीतवितर्कात् । ३ अवलोकयन् । ४ घुणमिव । ५ स राजा । ६ कच्छप इव ॥

स्वयम् ॥ १२६ ॥ रमयित्वा चिरं सुप्ते, तस्मिन् योगिनि योगिनी । साऽपि स्वान्धारिकामध्यात्, प्रादुश्चक्रे स मुद्गकम् ॥ १२७ ॥ भृङ्गं भानुप्रभेवाब्जान्नरं लघुतरं ततः । साऽऽविश्चक्रे विद्यया तं, कृत्वा प्रौढमरीरमत् ॥ १२८ ॥ कृतार्था तु लघूकृत्य, विद्यया तं समुद्गके । न्यधात् करण्डके नागं, संवेल्येवाहितुण्डिकी ॥ १२९ ॥ क्षिप्त्वान्धार्यामुपपतिसमुद्गं सोपपँत्यगात् । तद्वीक्ष्य कौतुकं भूमानध्यासीदिति विस्मितः ॥ १३० ॥ गौरीं गिरीश इव यामवियुक्तां सदात्मना । अन्याङ्गिसङ्गत्यागार्थं, लघूकृत्य दधात्ययम् ॥ १३१ ॥ साऽप्यन्यपुंसा रमते, क्रमते चेच्छया स्वया । मतीत्वन्यासमन्यासु, तत्कः कुर्यात्सुधीरपि ? ॥ १३२ ॥ भुङ्क्ते स्थिताऽप्युपपतिं, याऽभयोपपतिं सदा । सात्त्विकी तात्त्विकी साऽपि, भीरुरित्युच्यते कथम् ? ॥ १३३ ॥ यद्वा त्रैलोक्यजैत्रस्य, साहाय्यात्पुष्पधन्वनः । नैसर्गिकीमपि जहौ, भीरुतामबलाऽप्यसौ ॥ १३४ ॥ सुप्तो मृतोपम इति, लोकोक्त्या निर्भयाऽथवा ॥ सुप्तं पतिं मृतमिव, ज्ञात्वाऽसौ सेवते परम् ॥ १३५ ॥ नरोऽपि निशि सुप्तेऽस्मिन्, भाव्येष स्वीकृतोऽनया । विद्ययाऽयं वशीकृत्य, लघूकृत्य दधात्यसौ ॥ १३६ ॥ यस्याः प्रयोगादन्यस्य, लाघवं स्याद्गुरोरपि । विद्याऽपि भात्यविद्येव, सानयोः सन्नयोनयोः ॥ १३७ ॥ यद्वा विस्तारसङ्कोचौ, करोत्यङ्गिकजेषु या । सा विद्याऽपि न सामान्या, मान्या भानुप्रभेव मे ॥ १३८ ॥ दुश्चारिणीत्वमप्यस्याः संवृतं विद्ययाऽनया। न ज्ञायते यथा तस्या, मत्पद्वया माययावृतम् ॥१३९॥ दौःशील्यमस्यास्तस्याश्च, स्वसंवेद्यमियच्चिरम् । करोमि परसंवेद्यमद्य वैद्य इवामयम्॥१४०॥ मादृशामन्यदोषाविर्भावो यद्यपि नोचितः । तथाऽपि नासौ दोषाय, धूर्त्तदम्भप्रकाशने ॥ १४१ ॥ ध्यात्वेति भूधवो

१ उपपति पतिसमीपम् । २ अप्रतिबद्धा प्रवर्तते । ३ पतिसमीपे । ४ सता शोभनेन नयेन न्यायेन ऊनौ सन्नयोनौ तयोः, सन्न्यायरहितयोरित्यर्थः ॥

गत्वा, गेहं स सुखमस्वपीत् । निशान्ते च समुत्थाय, निशान्तात्तं मठं ययौ ॥ १४२ ॥ अत्याग्रहेण तं सिद्धं, भोजनाय निमन्त्र्य सः । स्तम्भहीनो महीनोऽगात्तदेकस्तम्भमन्दिरम् ॥ १४३ ॥ कारयित्वा रसवतीं, मर्त्यपट्टकाशनोचिताम् । पञ्चासनानि स्थालादिसनाथानि न्यवेशयत् ॥ १४४ ॥ निःश्रेणिकाप्रयोगेणारूढं तत्र स योगिनम् । कृतस्नानादिकर्माणमासयत् प्रथमासने ॥ १४५ ॥ क्षुधितायां स्वकान्तायां युष्माभिर्भोक्ष्यते कथम् ? । पङ्क्तिभेदो महापापं, मयाऽपि क्रियते कथम् ? ॥ १४६ ॥ तदाविष्कृत्य सान्धार्याः, स्थाप्यतामन्यविष्टरे । तद्दर्शिनो विधेयस्य, विधेया वञ्चना न मे ॥ १४७ ॥ राज्ञेति साग्रहं प्रोक्तो, विममर्शेति योगवित् । यां नैक्षत जगच्चक्षुः, कथमैक्षत तामसौ ॥ १४८ ॥ निशि पर्यटता यद्वा, दृष्टा साऽनेन भाविनी । मर्मज्ञस्यास्य नाथस्य, नाऽथ स्याद्वञ्चना हिता ॥ १४९ ॥ ध्यात्वेत्याविष्कृत्य स द्राग्, विद्यया प्रौढतां गताम् । तां द्वितीयासने न्यास्थत्ततो राजेति तां जगौ ॥ १५० ॥ प्रादुष्कुरु प्रियं भद्रे !, स्वान्धारीस्थसमुद्गकात् । भोक्तुं युक्तं न शिष्टानां त्यक्त्वाऽभीष्टं क्षुधातुरम् ॥ १५१ ॥ भर्तुर्भिया ह्रिया च त्वं, माकार्षीर्मद्वचो मृषा । मदाज्ञाकारिकायास्ते, कर्त्ता ह्येष न विप्रियम् ॥ १५२ ॥ यथाऽयं त्वां दधानोऽदाद्योगित्वाय जलाञ्जलिम् । तं बिभ्रती सतीत्वाय, तथा त्वमपि पण्डिते ! ॥ १५३ ॥ तदेष तुल्यदोषत्वान्न त्वां दूषयितुं क्षमः । तुल्यदोषैः समं युक्तिर्निषिद्धा तार्किकैरपि ॥ १५४ ॥ तथा च तद्वचः—

यत्रोभयोः समो दोषः, परिहारोऽपि वा समः । नैकस्तत्र नियोक्तव्यस्तादृगर्थविचारणे ॥ १ ॥

किञ्च—

---

१ स्तम्भो जाड्य तेन हीनः । २ राजा । ३ भवत्कान्तादर्शिनः । ४ वचने स्थितस्य । ५ छन्नं प्रियम् । ६ परिहारः समाधानम् ॥

रक्ष्यमाणा षडक्षीणममुनाऽक्षीणहृद्भुवा । त्वं ज्ञाताऽसि यथा तद्वत्, सोऽपि ज्ञातोऽस्त्ययेे ! मया ॥ १५५ ॥ भियं ह्रियं च तद्दूरीकृत्योरीकृत्य मद्गिरम् । कान्तमाविष्कुरु स्वान्त, इव न्यस्तं समुद्गके ॥ १५६ ॥ इति राजाज्ञया वीतभयाकृष्य समुद्गकात् । तं तृतीयासने न्यास्थत्मा विद्याकृतगौरवम् ॥ १५७ ॥ ततो राजा जगौ राज्ञीं, योगिनीव त्वमप्यहो ! । मद्वाक्यं मानयाभीष्टमानयाशु निजं शुभे ! ॥ १५८ ॥ साऽऽह साहसभृन्नाहमित्वरीवाऽन्यगत्वरी । वेश्यादेश्या च नास्मीश ! तदेतत्कथ्यते कथम् ? ॥ १५९ ॥ प्राणाधारतया प्राणप्रियो नाथ ! त्वमेव मे । रक्षणाद्व्यापदापत्तौ, शरणं च त्वमेव मे ॥ १६० ॥ देव ! त्वमेव मे देवमणिः कामितपूरणात् । पोषकत्वाच्च भर्त्ता त्वं, जीवनाज्जीवितं च मे ॥ १६१ ॥ तदद्य यावन्नैवास्ति, त्वां विनाऽन्यः प्रियो मम । आमृतेस्त्वामृते नान्यं, करिष्यामि च वल्लभम् ॥ १६२ ॥ सर्वाभीष्टार्थदातारं, हित्वा त्वां स्वर्द्रुमोपमम् । करीरकल्पमपरं, सेवे स्यां करभी यदि ॥ १६३ ॥ कुलाङ्गजा कुलवधूर्नान्याप्यन्यं निषेवते । किं पुनस्त्वत्कुलधूरहं सत्कुलसंभवा ? ॥ १६४ ॥ तद्दीर्घदर्शिनां श्रेष्ठ !, सद्विपश्चिदपश्चिम ! । किमेतदविमृश्योक्तमसमञ्जसमञ्जसा ॥ १६५ ॥ तन्निशम्य नृपोऽध्यासीदहो! साहसभूरसौ । स्वदोषं निह्नुते सन्तं, मां कृत्वाऽलीकवादिनम् ॥ १६६ ॥ संवादयत्यसौ सौवचरित्रैस्तद्विदो वचः । तथाऽप्याविष्कारयिष्येऽनया जारं सदुक्तिभिः ॥ १६७ ॥ ध्यात्वेति भूधवोऽवादीदयि त्वं दयिते ! शृणु । दक्षब्रुवे ! ब्रुवे नाहमसत्यमसमञ्जसम् ॥ १६८ ॥ किं तु प्रातर्मया स्वैरमागतेन गतेऽहनि । दृष्टाऽसि सद्यः संभोगचिह्ना भोगाढ्यभूघना ॥ १६९ ॥ संभोगश्च न भोक्तारमन्तरेणोपपद्यते । तेना-

१ अत्यन्तकामिनेत्यर्थः । २ त्वां विना । ३ अपलपनि । ४ स्त्रीचरित्रं दुर्ज्ञेयमिति ॥

[1]र्थापत्तिनिर्णीतमर्थं कथमपह्नुषे ॥ १७० ॥ प्रादुष्कुरु स्वोपपतिं, मुधा मा वञ्चयस्व माम् । मा भैषीस्त्वां च तं चाहं, न हनिष्यामि सर्वथा ॥ १७१ ॥ त्वया ह्याविष्कृते तस्मिन्, मत्तो नैवोभयोर्भयम् । विद्यादिभिर्मया त्वाविष्कृते तद्भावि मृत्युकृत् ॥ १७२ ॥ श्रुत्वेति भीतिवात्यास्तगाढशाठ्याभ्रसंहतिः । द्यौरिवेषत्प्रसन्नेति, सा वचोभगणं दधौ ॥ १७३ ॥ सर्वंसह ! सहस्वामुं, मन्तुमप्युग्रमावयोः । मा भूच्चलाचलागीस्ते, सत्यसन्धाऽ[2]चलाचला ॥ १७४ ॥ इत्युदित्वा तया क्लृप्तात्सङ्केतात्तूर्णमागतः । चुक्षोभ सार्थपो भूपं, वीक्ष्यागस्त्यमिवोदधिः ॥ १७५ ॥ शीतज्वरार्त्तमिव तं, वीक्ष्य कम्पितभूघनम् । नरेशः स्माह मा भैषीर्मन्तुः सोढो मया हि ते ॥ १७६ ॥ सार्थनाथः प्रणम्याथ, पृथ्वीनाथं कृताञ्जलिः । हर्षगद्गदगीरेवं, गुणविज्ञो व्यजिज्ञपत् ॥ १७७ ॥ दुष्टानामवतंसोऽहं, यत्कर्माकार्षमीदृशम् । शिष्टानामवतंसस्त्वं, यत्तदप्यसहः प्रभो ! ॥ १७८ ॥ नृपा निर्मन्तुमप्यन्ये, ग्रसन्ते राक्षसा इव । त्वं तूग्रमन्तुमपि मां, बाधसे न शमीशवत् ॥ १७९ ॥ ये तुच्छशक्तयोऽप्यन्यं, व्यथन्ते वृश्चिका इव । ते भूयांसो भुवि स्वामिन्, मानवा दौष्ट्यदानवाः ॥ १८० ॥ ये तु शेषाहिवद्भूरिशक्तयोऽपि क्षमाधराः । [3]सागसेऽपि न कुप्यन्ति, त्वादृशास्ते सुदुर्लभाः ॥ १८१ ॥ सामर्थ्ये सहनं सारमिति सर्वे विदो [4]विदुः । तद्विस्मरन्ति जडवत्, सहनावसरे तु ते ॥ १८२ ॥ मिथो विरुद्धे अप्युच्चैः, क्षमाशक्ती महीपते ! । त्वां

---

१ अर्थापत्तिः प्रमाणविशेषः। यथा रोगादिरहितो देवदत्तो दिवाऽभुञ्जानोऽपि पीनोऽस्तीति केनाऽप्युक्तम् । तदाऽन्यः प्राह, दिवाऽभुञ्जानस्य पीनत्वं रात्रिभोजनं विना नोपपद्यत इत्यसौ निशि भुङ्क्ते इत्यादौ रात्रिभोजननिर्णायकमर्थापत्तिप्रमाणम् । २ अचला भूमिः, यद्वाऽचलाः पर्वतास्तद्वदचला । ३ सापराधायाऽपि । ४ जानन्ति ॥

प्राप्य लोकमध्यस्थं, मन्ये जाते सुसङ्गते ॥ १८३ ॥ असहिष्णुतया व्याप्ता, शक्तिमत्तेति निर्णयः । त्वय्येव व्यभिचारेण, विभो! कर्त्तुं न शक्यते ॥ १८४ ॥ तद्रत्नगर्भेत्याह्वानं, पृथ्व्याः सान्वर्थतां नयन् । दक्षैकरत्न ! सुचिरं, जय रञ्जय सज्जनान् ॥ १८५ ॥ चातुर्यादेवमूचानं, न्यस्य तुर्ये तमासने । प्रपञ्चमेदुरां न्यास्थत्, पञ्चमे तु निजां प्रियाम् ॥ १८६ ॥

प्रभोज्य भोज्यैः सरसैं रसेशः, सर्वांस्ततस्तान् बुभुजे स्वयं सः ।
सत्कृत्य सिद्धं व्यसृजत् सतन्त्रं, तं सार्थनाथं च दधौ स्वपार्श्वे ॥ १८७ ॥

इति श्रीतपागच्छाधिराजश्रीविजयदानसूरीश्वरशिष्यमहोपाध्यायश्रीविमलहर्षगणिमहोपाध्याय-
श्रीमुनिविमलगणिशिष्योपाध्यायश्रीभावविजयगणिविरचितायां
चम्पकमालाकथायां द्वितीयः प्रस्तावः ॥

---

१ यत्र यत्र शक्तिस्तत्र तत्रासहिष्णुता इत्येवंरूपो निर्णयः त्वयि व्यभिचारेण कर्त्तुं न शक्यते, सत्यामपि शक्तौ सहनाद्व्यभिचारः ॥

अथ सर्वाङ्गसुभगं, सार्थेशं स्निग्धया दृशा । प्रतिप्रतीकं नृपतिसुप्रतीको निभालयन् ॥ १ ॥ स्वर्णचम्पकमालावदम्लानां चम्पकस्रजम् । तन्मौलौ वीक्ष्य सञ्जाताश्चर्यः पर्यन्वयुक्त तम् ॥ २ ॥ युग्मम् ॥ माला सुमनसामङ्गसङ्गान्म्लायति नः क्षणात् । तवेयं म्लायति न किं, माला सुमनसामिव ? ॥ ३ ॥ स स्माहोर्वीश ! मा स्माहो ! मन्यथा इदमन्यथा । शीलप्रभावान्मत्पत्न्या, म्लायत्येषा न जातुचित् ॥ ४ ॥ कथमित्यथ राजोक्तः, सोऽब्रवीत् श्रूयतां विभो ! । अस्त्यङ्गदेशे चम्पाख्या, नगरी श्रीगरीयसी ॥ ५ ॥ तत्र श्रेष्ठी धन इति, नामासीद्धनदोपमः । तस्याहं नन्दनो नाम्ना, धनकेलिरिति प्रभो ! ॥ ६ ॥ कलाकलापमादाय, शशीव त्यक्तशैशवः । सल्लावण्यामृतः स्वीयकुलाम्भोधिममूमुदम् ॥ ७ ॥ इतश्च पुर्यां कौशाम्ब्यां, श्रेष्ठी विमलवाहनः । तस्यासीन्नन्दना नाम्ना, रूपलक्ष्म्या च रुक्मिणी ॥ ८ ॥ तातान्ज्ञया पर्यणयं, तामहं समहामहम् । प्राणेभ्योऽपि प्रियां तां च, मानयन् सौधमानयम् ॥ ९ ॥ भुञ्जानश्च तया सार्कं, भोगान् निर्भाग्यदुर्लभान् । इति नीतिवचोऽश्रौषमन्यदा कोविदोदितम् ॥ १० ॥ जातषोडशवर्षोऽपि, यो भुङ्क्ते पैतृकं धनम् । स्यादुत्तमर्ण एवासौ, पितुर्न तु सुखावहः ॥ ११ ॥ यदुक्तम्—

जनकार्जिता विभूतिर्भगिनीति सुनीतिवेदिभिः सद्भिः । सत्पात्र एव योज्या, न तु भोग्या यौवनाभिमुखैः ॥ १ ॥

स्तन्यं मन्मनवचनं, चापलमपहेतुहास्यमत्रपताम् । शिशुरेवार्हति पांशुक्रीडां भुक्तिं च पितृलक्ष्म्याः ॥ २ ॥

श्रुत्वेति जलमार्गेण, यियासुर्धनमर्जितुम् । जलोपद्रवभीतेन, तातेनाहं निवारितः ॥ १२ ॥ स्थलाध्वना ततो नानावस्तुस्तोमभृतो वृषान् । आदाय व्यवसायार्थमहं देशान्तरं ययौ ॥ १३ ॥ तत्र चिन्तातिगं लाभं, प्राप्यान्यैः पण्यसञ्चयैः ।

---

१ प्रतिशरीरावयवम् । २ दिग्गजः । ३ पप्रच्छ । ४ पुष्पाणाम् । ५ देवानाम् ॥

लक्षशोऽपि वृषान् भृत्वा, यातस्तातममोदयम् ॥ १४ ॥ परम्वदेशयोरेवं, मुहुः कुर्वन् गमागमान् । धनमार्जयमालस्यावर्णवादममार्जयम् ॥ १५ ॥ रजोभिर्वृषभव्यूहक्षुण्णक्षोणीतलोत्थितैः । अकाण्डोद्यद्धनमिव, गगनं यदभूत्तदा ॥ १६ ॥ जनो मे तेन गगनधूलिरित्यभिधां व्यधात् । ततः प्रतीता सैवासीदाख्या सर्वत्र मे विभो ! ॥ १७ ॥

इतश्च पुर्यां चम्पायां, वशावर्गमतल्लिका । वेश्या कामपताकाख्या, रूपसौभाग्यभूरभूत् ॥१८॥ मृगाक्षी वीक्षिताऽन्येद्युः, सा तद्देहगवाक्षगा । अबलाऽपि मनोऽहार्षीत्, प्रसह्य बलिनोऽपि मे ॥ १९ ॥ यद्वा—वशिनो[1]ऽपि वशीकर्त्तुं, योर्वशीव प्रभूयते । वशीकरोति मच्चेतः, सा चेत्तत्र किमद्भुतम् ॥ २० ॥ मद्देहगेहसारस्य, चित्तवित्तस्य चोरणात् । गर्हार्हामपि तां मोहादचिकीर्षं प्रियामहम् ॥ २१ ॥ ततोऽनु धेनुमिव गौस्तस्याः सौधेऽनु तामगाम् । आकृष्टमानसो बाढं, तद्गुणैः कार्मणैरिव ॥२२॥ निविष्टां विष्टरे तत्र, पद्मे पद्मामिवोच्चकैः । दिशो दशोद्द्योतयन्तीं, हृद्यद्युतिकदम्बकैः ॥२३॥ भूषितावयवां रत्नालङ्कारैराशिरःक्रमम् । वर्द्धयन्तीं स्वसाहाय्यादनङ्गस्यापि विक्रमम् ॥ २४ ॥ कृतरम्भाजयारम्भां, रम्भागर्भाभविग्रहाम् । सुवर्णेन समं स्वाङ्गवर्णेन कृतविग्रहाम् ॥ २५ ॥ अगण्यपुण्यलावण्यवशीकृत[2]रसाधराम् । तामद्राक्षमहं द्राक्षासवजिष्णु[3]रसौधराम् ॥ २६ ॥ चतुर्भिः कलापकम् ॥ सापि वारवधूवारमुख्या सख्याय सादरा । मां समीक्ष्य समुत्थाय, कृताञ्जलिरदोऽवदत् ॥२७॥ स्वामिन्नेहि निजां सौम्यदृशं मयि निधेहि च । स्वाभीष्टमभिधेहि त्वं, यद्विधेयं विधेहि तत् ॥ २८ ॥ तयैव मुदितश्चित्ते, मुदितस्तद्गृहे वसन् । नित्यं तया सहाक्रीडं, रम्भयेव सुधाशनः ॥ २९ ॥ तत्प्रार्थितं धनं चादां, पित्रा प्रहितमन्वहम् । इत्थं मे वसतस्तत्र, जज्ञे द्वादशव-

१ मुनीनपि । २ नृपो यया ताम् । ३ मदिराजेतृरसवान् ओष्ठो यस्यास्ताम् ॥

त्सरी ॥ ३० ॥ वित्तार्थं वेश्यया दासी, मत्सौधे प्रेषिताऽन्यदा । रिक्ता प्रत्याययौ भिक्षुकीव कीनाश[1]वेश्मनः ॥ ३१ ॥ ततो दूना विदूना[2] सा, मां स्माहेति पणाङ्गना । क्षीणवित्तोऽपि किं नाद्य, वेश्मास्माकं जहासि भोः ! ॥ ३२ ॥ वेश्या वश्याः सवित्तानां, वित्तं[3] ह्येतज्जगत्त्रये । प्रेमास्माकं त्वयि कथं, तत्क्षीणविभवे भवेत् ? ॥ ३३ ॥ दृश्यते चापवित्तस्य, वयस्योऽपि रिपूभवन् । शोषयत्यम्बुहीनानि, भानुः पद्मानि किं न हि ? ॥ ३४ ॥ कलावन्तमपि क्षीणं, नाद्रियन्ते विचक्षणाः । शुभकर्मसु दैवज्ञाः[4], किं न क्षीणेन्दुमत्यजन् ? ॥ ३५ ॥ तद्गच्छ स्वच्छ ! भोगाशां, वर्जयावर्जयोद्यमम् । धनमर्जय दारिद्र्यं, मार्जयारांश्च तर्जय ॥ ३६ ॥ यदि चास्मासु ते स्नेहः, प्रगाढश्चिरमंस्तवान् । तदोपार्जितवित्तस्त्वं, भूयोऽपि द्रुतमापतेः ॥३७॥ तच्छ्रुत्वाऽचिन्तयमहो !, निर्दाक्षिण्या पणाङ्गना । चिरकालीनमपि या, स्नेहं हित्वैवमाह माम् ॥ ३८ ॥ यद्वा या द्रव्यलोभेन, कुष्ठिनोऽपि स्मरीयति । तासां वित्तैकचित्तानां, कः स्नेहः पणयोषिताम् ॥ ३९ ॥ ध्यायन्निति गृहात्तस्या, निर्गतो विमना मनाक् । स्वीयभोगकृते वेश्याच्छिन्नसद्वस्त्रभूषणः ॥ ४० ॥ मेद[5]स्विखेदः प्रस्वेदक्लिन्नकायः स्खलत्क्रमः । स्वगेहेऽगां च्युतः स्वर्गात्, स्वर्गीव नरजन्मनि ॥ ४१ ॥ युग्मम् ॥ समीक्ष्य तच्च पतितप्रायं शून्यमरण्यवत् । अहं भूवल्लभाऽभूवं, श्रवदश्रुजलाविलः ॥ ४२ ॥ वेश्यापमानदुःखाग्निदाहोर्द्ध पिटकोपमम्[6] । बन्धुगेहादिनाशोत्थं, दुःखं मेऽभूत् सुदुःसहम् ॥ ४३ ॥ ततः कथञ्चित्स्वस्थोऽहमप्राक्षं प्रातिवेश्मिकाम् । दशा मद्वेश्मनः केयं, पितरौ क्व स्नुषा च मे ? ॥ ४४ ॥ ते प्रोचुर्गणिकासक्तस्त्वं धनं निधनं नयन् । यत्स्थितस्तद्गृहे नागाश्चिरेणापि स्वमालयम् ॥ ४५ ॥ पिता ते तापितस्तेन, दुःखे-

---

१ कृपणगृहात् । २ चिदा ज्ञानेन ऊना । ३ प्रसिद्धम् । ४ ज्योतिषिकाः । ५ अत्यन्त– । ६ स्फोटकोपमम् ॥

नागात् परं भवम् । दुःसहः सुतविश्लेषः, किं पुनर्धननाशयुक् ? ॥ ४६ ॥ दुःखैरत्युल्बणैर्भर्तृपुत्रवित्तवियोगजैः । प्रेत्यपत्यनुगेवाऽगात्तव माताऽपि तापिता ॥ ४७ ॥ ततः कान्ता तत्रावादीत्, मत्कान्तो गणिकारतः । अपेक्षते न मां नापि रमां न च गृहक्षमाम् ॥ ४८ ॥ किं चापेक्षाकारिणौ मे, विपन्नौ श्वशुरावपि । नाथे सत्यप्यनाथायाः, स्थातुं युक्तं न मेऽत्र तत् ॥ ४९ ॥ वेश्याऽपि भाटीद्रव्यार्थं, पीडयेन्मामिह स्थिताम् । निरपाये पितुर्धाम्नि, तत्प्रयातुं ममोचितम् ॥ ५० ॥ इत्युक्त्वा सा समादायावशिष्टं भूषणादिकम् । सौधस्य साश्रुनेत्राभ्यां, ददतीव जलाञ्जलिम् ॥ ५१ ॥ युष्माभिः सौधमेतन्मे, पतत्पातव्यमित्यरम् । सगद्गदं गदन्त्यस्मान्, स्वबन्धूनिव सादरम् ॥५२॥ मा रुण[1]न्मो[2]ऽरुणविभां, घनालीव पणाङ्गना । वित्तार्थमिति साशङ्का, भृत्येनैकेन संयुता ॥ ५३ ॥ महसा सहसार्थेनागात्कौशाम्ब्यां पितुर्गृहान् । योषितः प्रोषिते कान्तपक्षे स्थानं तदेव हि ॥ ५४ ॥ चतुर्भिः कलापकम् ॥ पित्राऽपि मृतभार्येण, सा सौधाधिकृता कृता । तां तत्र नीत्वाऽऽयातेनभृत्येनोक्तमिदं हि नः ॥५५॥ सौधं त्वरक्षकमिदं, लोकैर्नीतमिमां दशाम् । रात्रावाच्छिन्नवलभीवंशनीव्रकटादिभिः ॥५६॥ इत्थं तावकतातादिवार्त्ता तावत्तवोदिता । वयस्य ! खेदं मा कार्षीर्दुर्वारा भवितव्यता ॥ ५७ ॥ इति पित्रादिवृत्तान्तं, श्रुत्वोक्तं प्रातिवेश्मिकैः । स्वामिन्नवाप[3]मह[4]कर्मकं[5] वाचामगोचरम् ॥५८॥ अचिन्तयं च धिग् धिग्मां, मातापित्रादिदुःखदम् । व्यसनासेवनावाप्तव्यसनं कुलपांसनम् ॥ ५९ ॥ कुलीनेनापि कौलीनं, व्यसनैर्धिग् मयाऽर्जितम् । ध्वस्तं वित्तं महत्त्वं च, पूर्वजार्जितमूर्जितम् ॥ ६० ॥ आजन्मोद्द्योतयन्तः स्वाऽन्वयाभ्रं केऽपि सूनवः । नवोदितार्कवद्भान्ति, ध्वस्तदुःखतमो-

१ मा रौत्सीत् । २ मा इति माम् । ३ अहम् । ४ दुःखम् । ५ कलदूषकम् ॥

भराः ॥ ६१ ॥ केचित्तु मन्दरुचयो, भास्वद्वंशोद्भवा अपि । रक्षन्ति न पितुर्नाम, धाम वा मादृशाः सुताः ॥ ६२ ॥ धिग्मे विवेकं स्नेहं धिग्, धिग् दाक्ष्यं धिग् विनीतताम् । वेश्यासक्तेन न ज्ञातौ, यन्मया पितरौ मृतौ ॥ ६३ ॥ व्यसनैर्नाशितश्रीको, मातापित्रादिदुःखदः । सतां समाजे वदनं, दर्शयिष्याम्यहं कथम् ॥ ६४ ॥ गतानुशोचितैर्बालिशोचितैरथवा कृतम् । शोचनाद्धि भवेद्बुद्धिनाशस्तस्मात् पुनः क्षयः ॥ ६५ ॥ व्यवसायमथ द्रव्यलाभोपायं तनोम्यहम् । वित्ते हि सति भूयोऽपि, महत्त्वाद्याप्स्यते स्वयम् ॥ ६६ ॥ उक्तं च—

यस्यास्ति वित्तं स नरः कुलीनः, स पण्डितः स श्रुतवान्[1] गुणज्ञः । स एव वक्ता स च दर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ते ॥१॥

बीजं विना कृषिरिव, नीवीवित्तं[2] विना मया । व्यवसायः कथं वित्ताद्याप्त्युपायः करिष्यते ? ॥ ६७ ॥ नीवीं विना हि व्यापारः, पारवश्यादिदुःखदः । सेवाप्रभृतिरेव स्यान्न च स क्रियते मया ॥ ६८ ॥ नीवी च श्वशुरादेव, लप्स्यते नान्यतो मया । स हि दाता सुतास्नेहादुर्देयमपि मे धनम् ॥ ६९ ॥ श्वशुरप्रार्थना प्रत्यादिष्टा[3] यद्यपि धीमताम् । अनन्यगतिकत्वेन, करिष्यामि तथाऽपि ताम् ॥ ७० ॥ प्रियार्थमन्यदाऽप्यस्ति, गम्यं मे श्वशुरौकसि । तद्याम्यद्यैवास्तु कृत्यद्वयमेकश्रमेण मे ॥ ७१ ॥ रामां ततः समानीय, वासयामि स्वमन्दिरम् । रमां पुनः समानीयोद्वासयामि दरिद्रताम् ॥ ७२ ॥ ध्यात्वेत्यहं वपुर्मात्रपरिवारोऽङ्घ्रिवाहनः । प्रस्वेदजलसंपृक्तरजोभरविलेपनः ॥ ७३ ॥ असंस्कृतश्लथप्रौढधम्मिल्लातपवारणः । वटादितरुपत्रालीकृतभोजनभाजनः ॥ ७४ ॥ वित्ताभावात् स्वीयवस्त्रविक्रयेण कृताशनः । क्रमाजगाम कौशाम्बीपुर्यां श्वशु-

---

१ "श्रुतिमान्" इत्यपि । २ मूलधनम् । ३ निराकृता ॥

रवेश्मनि ॥ ७५ ॥ त्रिभिर्विशेषकम् ॥ तत्र सामान्यवेषत्वान्न केनाप्युपलक्षितः । निषिद्धो दौवारिकेण, प्रवेशमपि नाप्नवम् ॥ ७६ ॥ ततोऽहं भिक्षुवेषेण, प्राविशं भिक्षुभिः समम् । भिक्षां तदादान्मे पत्नी, मां तूपालक्षयन्न सा ॥ ७७ ॥ चिरदृष्टतया भिक्षुवेषाद्वेषा न वे[1]द माम् । तदस्यै ज्ञापयामि स्वमित्यस्थां तत्र यावता ॥ ७८ ॥ तावत्सा भृकुटीभङ्गभीषणास्येत्युवाच माम् । आत्तभिक्षोऽपि किं भिक्षो !, वीक्षमे स्वास्पदं व्रज ॥ ७९ ॥ ततो निर्गत्य तद्गेहात्तदामन्नबहिर्भुवि । निषण्णोऽन्तर्विषण्णोऽहमेवमध्यायमुन्मनाः ॥ ८० ॥ लभेऽपमानमद्याहं, सर्वत्रापदशावशात् । यदज्ञानात् स्वपत्न्याऽपि, निर्भाग्योऽहं तिरस्कृतः ॥ ८१ ॥ सति भाग्योदये सौख्यं, विपक्षेभ्योऽपि लभ्यते । स्वबन्धुभ्योऽपि दुःखं च, लभ्यते तद्विपर्यये ॥ ८२ ॥ दशास्यं त्रिदशा भेजुर्दस्यवोऽपि दशोदये । तस्या विपर्यये त्वस्य, सोदरोऽप्याप दे[2]स्युताम् ॥ ८३ ॥ तत्किं कुर्वेऽत्र तिष्ठामि, यामि वा स्वपुरीं पुनः ? । यद्वा विना रमां रामां, तत्र गत्वा करोमि किम् ? ॥८४॥ तच्चेदेतद्द्वयीमध्यात्, स्यादेकाऽप्यात्मसान्मम । निजां पुरीं यामि तदाऽन्यथा तु विपयान्तरम् ॥ ८५ ॥ किं चौत्सुक्येन कार्यस्य, हानिरित्युच्यते बुधैः । तदौत्सुक्यं विहायात्र, तिष्ठामि कतिचिद्दिनान् ॥ ८६ ॥ जातु प्रत्यभिजानीयान्मां जायाऽप्यत्र संस्थितम् । शनैः शनैः स्मर्यतेऽपि, भावो हि चिरविस्मृतः ॥ ८७ ॥ इत्यादिचिन्ताजालान्तःपतिते मयि दु[3]र्विधे । विधेर्नियोगाद्दिवसावसानमभवत्तदा ॥ ८८ ॥ प्रातः प्राप्तोदयः संप्रत्यस्तं याम्यहमप्यतः । त्वं मा शोचीरिति तदा, भानुर्मामन्[4]वशादिव ॥८९॥ तदा रथाङ्गाः क्रन्दन्तः, कान्ताविश्लेषदुःखतः । प्रियावियोगतप्तस्य, समदुःखा ममाभवन् ॥ ९० ॥ प्रास्फुरत् सान्ध्यरा-

१ जानाति । २ शत्रुताम् । ३ दरिद्रे । ४ अशिक्षयदिव ॥

गश्च, वेश्याराग इवास्थिरः । पद्माकराश्च निःश्रीकास्तदाऽऽ[1]मन्मादृशा इव ॥ ९१ ॥ दुःखैरहमिव [2]व्यापि, तदा विश्वं तमोभरैः । मद्विपक्षैरिव प्रोच्चैः, कुमुदैर्मुदवाप्यत ॥ ९२ ॥ निरुद्धसारव्यापारा, मद्दशेवाऽभवन्निशा । पापैर्मत्कर्मभिरिव, तदा प्रस्फूर्जितं जनैः ॥ ९३ ॥ रात्रेर्यामे ततोऽतीते, कपाटार्गलतालकैः । सौधप्रतोलीं संवृत्य, द्वाःस्थः स्वस्थोऽस्वपत् सुखम् ॥ ९४ ॥ ततोऽहं द्वारपार्श्वस्थाऽट्टालकेऽवस्थिते वहिः । सुष्वाप नापं स्वापं तु, चिन्ताचान्तमनस्तया ॥ ९५ ॥ निशीथेऽथ प्रतीहारमेत्य स्माहेति मेऽङ्गना । आर्य ! केनापि कार्येणावश्यं गन्तव्यमस्ति मे ॥ ९६ ॥ क्षिप्रमुद्घाटय द्वारमधुना मा धुनाः शिरः । गत्वाऽऽगच्छामि यावच्च, तावत्तिष्ठाप्रमद्वरः ॥ ९७ ॥ तामुद्विग्ननया चण्डतया चैवमुवाच सः । यास्यसि क्वार्द्धरात्रे त्वं, ब्रूहि कार्य किमस्ति ते ? ॥ ९८ ॥ अयं हि गन्तुं समयश्चौरादीनां सतां न हि । तत्प्रातरेव तत्कुर्याः, सांप्रतं यच्चिकीर्षितम् ॥ ९९ ॥ नाहं निशीथादारभ्यानिशं जागरितुं क्षमे । दौवारिकं कुरुष्वान्यं, निशि जागर्त्ति योऽन्वहम् ॥ १०० ॥ इत्युच्चैरुदिता तेन, रुदिता वेदिताऽसुखा । दिताशा सान्तरुदिताऽनलेव प्राज्वलद्रुषा ॥ १०१ ॥ ततोऽन्तर्धाम भूच्छायाविच्छायास्या जगाम सा । जाग्रत्तदा तदालापं, श्रुत्वेत्यहमचिन्तयम् ॥ १०२ ॥ निशीथे याऽनिशं याति, बहिः सा न हि शोभना । वीक्षिष्येऽस्याश्चरित्रं तत्, स्त्रीरागामयभेषजम् ॥ १०३ ॥ ध्यायन्नित्याद्यहं किञ्चित्, स्वस्थो निद्रामवाप्नवम् । अजागरं प्रभाते च, सह स्मेरैः पयोरुहैः ॥ १०४ ॥ द्रष्टुकामोऽहमुत्तस्थौ, भार्याकार्यं श्रिताम्बरः । जगत्कर्म जगत्कर्मसाक्षीव प्रगुणस्तदा ॥ १०५ ॥ नष्टं तमोभिस्त्वद्वैरियशोभिरिव सर्वतः । तिरोहितं तदा [4]तारैस्त्वद्राज्ये तस्क-

१ अभवन् । २ व्याप्तम् । ३ ध्वान्तम् । ४ 'भकनीनिकयोस्तारः' इति तारशब्दस्य पुंस्त्रीलिङ्गता ॥

रैरिव ॥ १०६ ॥ तदा चक्रैः प्रमुदितं, सदा त्वत्सेवकैरिव । कौशिकैश्च भवद्वैरिवर्गैरिव पलायितम् ॥ १०७ ॥ तदाऽर्कोऽस्तुतस्त्वद्वद्धैर्यमन्दरसोदयः । कजव्रजस्त्वज्जनवज्जज्ञेऽमन्दरसोदयः ॥ १०८ ॥ दिने तत्रापि भिक्षायै, ततोऽहं तद्गृहे गतः । किं जातीयोऽसीति पृष्टो, मत्पत्न्या दत्तभिक्षया ॥१०९॥ अहं वणिक्सुतोऽस्मीति, मयोक्ते सा पुनर्जगौ । अस्मत्सौधप्रतोल्यां भो भद्र! द्वाःस्थो भविष्यसि ॥ ११० ॥ दिदृक्षोस्तच्चरित्रं मे, तदभूत्तद्वचः प्रियम् । पिपासोरिव शीताम्बु, बुभुक्षोरिव भोजनम् ॥ १११ ॥ ततो मया ओमित्युक्ते, सा कञ्चित् पूर्ववेत्रिणः । बभाषे कृत्रिमं दोषं दोषारोपात् पितुः पुरः ॥११२॥ तत्सत्यासत्यतां पुत्र्या, विश्वासादविमृश्य सः । व्यसृजत्तं प्रतीहारं, तस्या वाचा व्यधाच्च माम् ॥ ११३ ॥ सा मामावर्जयामासाशनाद्यैः स्वार्थसिद्धये । तातेति रासभमपि, ब्रूते कार्यवशाज्जनः ॥ ११४ ॥ रात्रौ तु लोके सुप्ते सा, सारालङ्कारधारिणी । उपासरन्मां सामोदमोदकस्थालभारिणी ॥ ११५ ॥ तया प्रोक्तोऽथ मद्योऽहं, प्रतोलीमुदघाटयम् । स्थालं च मोदकापूर्णं, तद्दत्तमुदपाटयम् ॥ ११६ ॥ शनैः प्रतोलिकाद्वारं, संवृत्यान्वगमं च ताम् । सा त्वगात् कामितनरास्पदं सौवर्णिकापणम् ॥ ११७ ॥ तत्र सा मोदकस्थालमादायेति जगाद माम् । याहि सत्यापय द्वारं, क्षणादेष्याम्यहं पुनः ॥ ११८ ॥ किञ्चिद्गतस्ततस्तस्या, विश्वासाय गृहं प्रति । व्यावृत्यागां तत्स्वरूपावगमाय तदापणम् ॥ ११९ ॥ निशावशात्तदज्ञातस्तत्र स्तम्भतिरोहितः । चौरवन्निभृतः सावधानश्चर इवाभवम् ॥ १२० ॥ तदा तत्कृतसंज्ञाभिर्जारो ज्ञाततदागमः । उद्घाट्य द्वारमित्यूचे, कोपकम्पितभूघनः ॥ १२१ ॥ अरे! कुत्राऽपि सङ्केतं, गतनिश्यागता न किम् । कामुकः सरसः कोऽपि, सङ्गतः

१ धैर्यवन्मेरुपर्वते उदयवान् अर्कः ॥

किं तवापरः ॥ १२२ ॥ उज्जागरं गरमिव, गिरीशो हन्त ! दुःसहम् । असासहमहं त्वं तु, सुखं शेषे परैः समम् ॥ १२३ ॥ याहि रे याहि पापिष्टे!, पृष्ठं दर्शय मे निजम् । नव स्नेहाग्निना दग्धदेहगेहेन मे कृतम् ॥ १२४ ॥ इत्युक्त्वा तच्छिरोवस्त्रमाकृष्यासौ क्रुधा ज्वलन् । प्रजहार चपेटाभिर्भूताक्तामिव मूर्ध्नि ताम् ॥ १२५ ॥ तत्प्रहारत्रुटज्जीर्णसूत्रस्तस्याः शिरोमणिः । तदोत्प्लुत्य तदज्ञातो, न्यपतन्मत्क्रमोपरि ॥ १२६ ॥ भाग्याकृष्टं सुरमणिमिव तं चाहमाददे । सा पांशुला तु तत्पादपतितेति तदाऽवदत् ॥ १२७ ॥ कोपं संवृणु मद्वाक्यं, शृणु नाथ ! यथास्थितम् । निर्मन्तुमपि मां हन्तुं, कथं कान्त ! प्रवर्त्तसे ? ॥ १२८ ॥ मां ह्यस्तमायामायान्तीमिह दौवारिकोऽरुणत् । मया स हि बहूक्तोऽपि, प्रतोलीं नोदघाटयत् ॥ १२९ ॥ स सदैवानुकूलोऽपि, दैवाद्वक्रस्तदाऽभवत् । विधाविव विरुद्धे हि, विधौ स्वोऽपि रिपूयते ॥ १३० ॥ वारीगता गजीवाहं, मृगीवावासवागुरा । दुःखं प्रापं तदाहं यत्तन्मा भून्मद्रिपोरपि ॥ १३१ ॥ प्रातस्तु तातं विज्ञप्यापरं द्वाःस्थमकारयम् । व्यसर्जयं च प्राचीनं, त्वद्वियोगोरुदुःखदम् ॥ १३२ ॥ तत्तुल्यमेव दिवसं, चातिवाह्य कथञ्चन । स्मरापस्मारविवशा, त्वां दोषज्ञमुपाश्रयम् ॥ १३३ ॥ तन्मामनुगृहाण त्वं निर्दोषां निगृहाण मा । गृहाण मोदकानेतान्, सद्गणेशोपदीकृतान् ॥ १३४ ॥ धुनीहि संशयं नास्मि, धुनी दोषाम्भसामहम् । पुनीहि मां सौम्यदृशा, दुःखदर्भांल्लुनीहि च ॥१३५॥ तयेत्युक्तः प्रसन्नात्मा, स्वीचक्रे तान् स मोदकान् । यदज्ञानान्मयोक्तं तत्, सहस्वेति च तां जगौ ॥ १३६ ॥ इयन्तमेव

---

१ विषमिव । २ कल्ये । ३ चन्द्रे इवं । ४ तत्तुल्यं त्वद्वियोगोरुदुःखदायित्वात् दौवारिककल्पं दिवसमतिवाह्य अतिक्रमय्य । ५ अन्योऽपि गणेशः प्राभृतीकृतान्मोदकान् गृह्णाति त्वमपि सद्गुणानामुत्तमवृन्दानामीशः सद्गणेशो वर्त्तसे इति ॥

वृत्तान्तं, स्वपत्न्या वीक्ष्य दुर्मनाः । अहं सञ्जातनिर्वेदातिरेकस्तद्गृहं ययौ ॥ १३७ ॥ अचिन्तयं च रे जीव!, यां ध्यायं-स्त्वमिहागतः । सा त्वां दासीयति परं, नरं च रमणीयति ॥ १३८ ॥ स्वत्रशासक्तमपरं, चेन्न हन्तुं त्वमीशिषे[1] । तत्किं न हंसि स्वं जीवं, क्लीबदुर्दैवपीडितम् ? ॥ १३९ ॥ रे दैव ! कृत्वा मां वित्तनाशाद्यसुखदर्शिनम् । न तुष्टस्त्वं महाकष्टं, यदीदृशमदीदृशः ॥ १४० ॥ किं चेयं कुलजाऽप्येवं, कुलटात्वं दधौ कथम् ? । कृष्णोद्भवाऽपि वा देववेश्या नाभूत् किमुर्वशी ? ॥ १४१ ॥ यद्वा स्वेनैव दोषेण, व्यनेशत् स्त्री रमेत्र मे । द्वादशाब्दीमुपेक्ष्यामू[2], यद्भेजे गणिकामहम् ॥ १४२ ॥ यद्वा मद्विरहेऽप्येषा, नैवेत्थं कर्त्तुमर्हति । न हि भानुवियोगेऽपि, विधुं भजति पद्मिनी ॥ १४३ ॥ सन्नारीभिर्विपन्नेऽपि पत्यौ नासेव्यते परः । मयि सत्यप्यसौ त्वन्यं, निर्लज्जा भजतेऽनिशम् ॥ १४४ ॥ इयं चान्यैरपि नरैर्विलसन्ती भविष्यति । यदतिक्रान्तकान्तानां, नरेयत्ता न योषिताम् ॥ १४५ ॥ अनाचाराम्बुकुल्यासौ, तत्कुल्या[3] कथ्यते कथम् ? । उच्यते हि सदाचारः, कुलीनत्वादिलक्षणम् ॥ १४६ ॥ सङ्गोऽस्यास्तदनार्याया, नार्या नार्यस्य मे श्रिये । दुष्टा हि कान्ता दुष्टाहिकान्तावन्मृत्यवे भवेत् ॥ १४७ ॥ स्वकीयं वादमीयं वा, वृत्तं न क्वाप्यदोऽधुना । मया प्रकाश्यं कस्यापि, पुरो लाघवकारणम् ॥ १४८ ॥ नाथेह मे स्थितिर्युक्ता, दुःखस्मृतिनिबन्धनम् । न वा गन्तिर्निजपुरे, दुःखस्मृतिनिबन्धनम् ॥ १४९ ॥ तदद्यलब्धतच्चूडामणिस्वर्णोत्थशम्बलः । यास्यामि यद्भविष्येऽहं, प्रत्यूषे विषयान्तरम् ॥ १५० ॥ ध्यात्वेति सुप्तस्तत्रैव, प्रभाते त्वन्यतोऽगमम् । तं चोपालक्षयं सम्यग्, वीक्षमाणः शिरोमणिः ॥ १५१ ॥ दध्यौ चैवं जनन्या मे, मौलिं योऽभू-

१ समर्थो भवसि । २ अमू स्त्रीश्रियौ । ३ कुलीना ॥

पर्यच्चिरम् । सोऽयं चूडामणिनूनमस्मद्वंशक्रमागतः ॥ १५२ ॥ त्सुताया एव देयोऽयं, नाङ्गजायास्तु जातुचित् । यस्येति संप्रदायो मे, पितृभ्यामुदितो मुहुः ॥ १५३ ॥ भिनद्मि दुर्दशामग्नो, भिक्षोद्विग्नस्तमप्यहम् । इत्युदश्रुरहं यावत्, कृतयत्नो विभेद तम् ॥ १५४ ॥ निःससार ततस्तावदेका पत्री सदक्षरा । अवाचयं च तामेवं, विस्मयस्मेरलोचनः ॥ १५५ ॥ वेश्मनीहापवरके, विद्यते वामकोणके । निधिः सौवर्णदीनारचतुष्कोटिमितो महान् ॥ १५६ ॥ तत् प्रवाच्य महासिद्धि-पाठसिद्धोरुमन्त्रवत् । प्रोच्चैरवापमानन्दमहं वाचामगोचरम् ॥ १५७ ॥ तत्रागमनमुख्यो मे, प्रयासोऽप्यखिलस्तदा । तपोवदासीदापातदुःखोऽप्यायतिसुन्दरः ॥ १५८ ॥ पुत्र्या न देयो वध्वाश्च, प्रदेयोऽयं शिरोमणिः । संप्रदायगिरोऽमुष्या, मुख्यार्थं च तदाऽविदम् ॥ १५९ ॥ ततः शिरोमणिस्वर्णविक्रयोत्पन्नशम्बलः । चम्पापुर्यामगां स्वीयं, वेश्म सोत्साहसाहसः ॥ १६० ॥ निशि देशे यथोक्ते च, खनन्ननलसो रसाम् । साक्षाद्भूतं निजं पुण्यमिव तं निधिमासदम् ॥ १६१ ॥ जीवातुमातुर इव, गताक्ष इव लोचनम् । आसाद्य शेवधिं तं चावापं निरवधिं मुदम् ॥ १६२ ॥ तदाकृष्टैः प्रकृष्टैः स्वैः[1], सौवं सौधमसज्जयम् । विशिष्टभूषा वासोभिः, कुर्वस्त्रिदिवसज्जयम्[2] ॥ १६३ ॥ अथाऽन्यदा युतो मित्रैः, सादिभिः सुरसादिभिः । श्वेतवाजिगतः शक्रः, इवाढ्यः सुरसादिभिः ॥ १६४ ॥ सेवकव्यूढसुप्रौढमायूरातपवारणः । बन्दिभिः संस्तुतो भृङ्गैरिव सन्मत्तवारणः ॥ १६५ ॥ महार्घांशुकसौवर्णालङ्कारशतशोभितः । सारसंपत्तिभिर्जुष्टः, पत्तिभिः शतशोभितः ॥ १६६ ॥ स निःस्वानस्वनं मार्गे, चलन्नाशु रमालयम् । अगां नगर्यां कौशाम्ब्यामहं श्वाशुरमालयम् ॥ १६७ ॥ चतुर्भिः

१ धनैः । २ त्रिदिवसदां सुराणां जयम् ॥

कलापकम् ॥ तत्राहं कृतसत्कारः, श्यालकैः संमुखागतैः । श्वशुरेण सुरेणेव, सुरद्रुर्मानितो भृशम् ॥ १६८ ॥ विस्मारिताः किं युष्माभिर्निजा वयमियच्चिरम् ? । चिरात् किं दर्शनं दत्तमस्मद्दर्शनपावनम् ? ॥ १६९ ॥ भवन्तं मुदिरं द्रष्टुं, सोत्कण्ठाः केकिनो वयम् । अद्य मानातिगं हृद्यहृद्यानन्दं वहामहे ॥ १७० ॥ श्यालकाद्यास्तदेत्यादिमुदिता मामवादिषुः । सर्वोऽसाञादरः श्रीणां, भवतीत्यनुचिन्तितम् ॥ १७१ ॥ त्रिभिर्विशेषकम् ॥ नानापक्वान्नमरसरसवत्यादिभिस्ततः । राजेव सपरीवारो, भोजितोऽहं सगौरवम् ॥ १७२ ॥ ततोऽक्रीडमहं नानाकौतुकैः श्यालकैस्समम् । गीतशास्त्रविनोदैर्हि, यानि कालो मनीषिणाम् ॥१७३॥ स्वभार्या तु कृताकार्या, मनोबाह्यतया मया । नालोकिताऽपि सद्दृष्ट्या, दृष्टिः खलु मनोऽनुगा ॥१७४॥ मनोऽनुरक्तं यत्र स्यात्तत्र रुद्धाऽपि याति दृक् । मनो विरक्तं यत्र स्यात्, प्रहिताऽपि न तत्र तु ॥१७५॥ यद्रूपं सति रागे स्यान्नेत्रयोरमृताञ्जनम् । रागाभावे तदेव स्यान्नेत्रयोर्लवणाञ्जनम् ॥ १७६ ॥ याते यामेऽथ यामिन्याः, कामिन्या कल्पिते तया । तल्पे सुप्तोऽभवं यावत्, प्रमीलामीलितेक्षणः ॥१७७॥ तावत्समेत्य मे पत्नी, कृत्रिमप्रणया क्रमौ । संवाहयितुमारेभे, हर्षात्सामर्षचेतसः ॥ १७८ ॥ प्रबुद्धस्तामथोचेऽहं, काऽसि त्वं किं करोषि च ? । सा स्माह त्वद्भुजिष्याहमंह्री संवाहयामि ते ॥ १७९ ॥ भूयो मयोचे न कृतमदः सुन्दरि ! सुन्दरम् । यन्मां स्वप्नं वीक्ष्यमाणमक्षणे त्वमबूबुधः ॥१८०॥ सोचे रूपजितास्वप्न ! स्वप्नोऽसौ मे निवेद्यताम् । पुरः प्राणप्रियाया मे, नावाच्यं किञ्च नास्ति ते ॥ १८१ ॥ ततोऽहमूचे यद्येवं, शृणु तर्हि समाहिता । स्वप्ने स्वमहमद्राक्षं, धाम्नीह द्वाःस्थतां गतम् ॥ १८२ ॥ मया च मोदकस्थालधारिणाऽनुगता निशि । उपजारं गतां त्वां चापश्यं सौवर्णिकापणे ॥ १८३ ॥ सङ्केत्य मां गतनिशि, नागाः किमिति वादिना ? । तेन कोटाच्चपेटाभिर्हतां च त्वां व्यभा-

लयम् ॥ १८४ ॥ तच्चपेटाप्रहारैश्च, पतितं ते शिरोमणिम् । अग्रहीषमहं यावत्तावज्जागरितस्त्वया ॥ १८५ ॥ स्वप्नेऽस्मिन्न-दृष्टेऽपि, सुन्दरोदर्कसूचक । यदजागरयस्त्वं मां, तन्नाकार्षीः शुभं शुभे ! ॥ १८६ ॥ इति स्वप्नमिषेणापि, प्रोक्तमीर्ष्यालुना मया । सा निशम्य निजाकार्यं, मर्मज्ञं बुध्यते स्म माम् ॥ १८७ ॥ ततो मद्वाक्यबाणेन, तेन मर्माविधा हृदि । विद्धा भीह्रीव्यथापूरैः, सा भृशं व्याकुलाऽभवत् ॥ १८८ ॥ ततो हृदयमङ्घट्टात् , परासुः साऽजनि द्रुतम् । मर्मवाक्यं हि महतेऽनर्थाय खलु कल्पते ॥ १८९ ॥ ततस्तां न्यग्मुखीं नष्टचेष्टां मीलितलोचनाम् । निरुच्छ्वासां च दीपेन, वीक्ष्यावेदमहं मृताम् ॥ १९० ॥ कोपावेशोल्लसद्वीर्यधैर्यस्तामेककोऽप्यहम् । धेनुं व्याघ्र इवोत्पाट्य, द्राक् प्रतोलीमुपानयम् ॥ १९१ ॥ भूरिप्राघूर्णकत्वेनाप्रदत्तार्गलतालकाम् । द्वाःस्थाभावाच्च को यातीत्यादिप्रच्छकवर्जिताम् ॥ १९२ ॥ शनैरुद्घाट्य तां चाहं, ययौ सौवर्णिकापणम् । तद्द्वारि कुड्यावष्टम्भादूर्ध्वामस्थापयं च ताम् ॥ १९३ ॥ युग्मम् ॥ या श्रुताऽऽसीन्मया पूर्वमागतेन तया समम् । संज्ञां तां च विधायाहमन्यतोऽस्थां तिरोहितः ॥ १९४ ॥ तज्जारोऽपि तदा द्वारं, प्रकाश्येति हसन्नवक् । किमायासीर्निशीथे त्वं, निद्राविद्रावणाय मे ? ॥ १९५ ॥ अहो ! ते धृष्टता स्नेहनिष्टता च वचोऽतिगा । यत्प्रवञ्च्यागताऽसीह, चिरायातमपि प्रियम् ॥ १९६ ॥ व्योधाममध्ये ! द्राग् धाममध्ये नाद्य समेषि किम् ? । द्वारे ह्युद्घाटिते न त्वं, कदाऽप्येवं विलम्बसे ॥ १९७ ॥ न भाषसे किं रुष्टाऽसि ?, हास्यवाक्यं सहस्व मे । प्रविशान्तर्विशांचेतोहरे ! किमिह रे ! स्थिता ॥ १९८ ॥ तेनेत्युक्ताऽपि सा यावन्नागतान्तर्गतासुका । एह्येहीति वदंस्तावदाचकर्ष स तत्पटम् ॥ १९९ ॥ ततः

---

१ भित्ति । २ वज्रमध्ये ! ॥

पपात सा पृथ्व्यां, निश्चेष्टा काष्ठमूर्त्तिवत् । विपन्नां सोऽथ तां वीक्ष्य, वीक्षापन्नोऽभवद्भृशम् ॥ २०० ॥ असौ ममार मारार्त्ता, वाला व्यालार्दिताऽथवा । सगद्गदं वदन्नेवं सोऽन्तर्हट्टं निनाय ताम् ॥ २०१ ॥ गर्त्तां विधाय तां तत्र, निधाय च निधानवत् । सुनिर्व्यूढचिरारूढप्रेमा गूढं रुरोद सः ॥ २०२ ॥ तत्सर्वं प्रेक्ष्य तद्वृत्तं, निवृत्तोऽहं गतो गृहम् । मित्रायावेदयं सोऽपि, तत्पित्रे तथ्यवेदयत् ॥ २०३ ॥ तद्वृत्तान्तेन तेनान्तस्त्वत्तातस्तान्तमानसः । अप्रकाश्यमधादुग्रं, दुःखमौर्वमिवार्णवः ॥ २०४ ॥ वार्त्ताऽसावार्त्तताहेतुस्तद्गेहे प्रासरत्तदा । तिष्ठेच्छन्ना न वै दुष्टा, वार्त्ता लशुनगन्धवत् ॥ २०५ ॥ चिन्तार्त्तानामवस्थातुं, ममैषां धाम्नि नोचितम् । इत्यहं यावदचलं, निर्विण्णः स्वपुरीं प्रति ॥ २०६ ॥ तावच्चम्पकमालाह्वाऽपरा मत्प्रेयसीस्वसा । मां वरीतुं करोपात्तचम्पकस्रगुपागमत् ॥ २०७ ॥ कटाक्षमालां न्यस्यन्ती, मदास्ये प्राज्यसंमदात् । तां मालिकां सा सोत्कण्ठा, मत्कण्ठे क्षिप्रमक्षिपत् ॥ २०८ ॥ स्माह च त्वां पतीयन्तीं, मा मायातां महामते! । निराकृथा मा सन्तो हि, प्रार्थनाभङ्गभीरवः ॥ २०९ ॥ ततोऽहमूचे त्वज्जामिस्वभावज्ञः कथं शुभे ! । त्वां स्वीकुर्वे तत्समैवायतौ त्वमपि भाविनी ॥ २१० ॥ साऽवादीन्नायमेकान्तो, यद्भगिन्योऽखिला अपि । समस्वभावाः स्युः सर्वे सोदरा वा धियांनिधे ! ॥ २११ ॥ यदुक्तम्—

एकोदरसमुत्पन्ना, एकनक्षत्रसंभवाः । न भवन्ति समाचारा, यथा बदरिकण्टकाः ॥ १ ॥

किञ्च—फलप्रसूनपत्राणां, नरवारणवाजिनाम् । उपलोत्पलमुख्यानामप्येकस्थानजन्मनाम् ॥ २१२ ॥ यद्यर्थानां मिथोऽ-

१ विस्मितः । २ पीडितमानसः । ३ समुद्रो वाडवानलमिव । ४ तद्भगिनी– । ५ उत्तरकाले ॥

न्येषामप्यन्यान्यस्वरूपता । दृश्यते तर्हि सा न स्यात् , कथं स्त्रीणामपि प्रभो ! ॥ २१३ ॥ युग्मम् ॥ गुणप्रवासात् संवासात् , तस्या वा दुष्टचेष्टिता । भवता नो शुभवता, शङ्कनीया कनीयसी ॥ २१४ ॥ यद्दुष्टसंस्तवेनापि, सन्तो नो यान्ति दुष्टताम् । आजनेर्भोगियोगेऽपि, तत्स्वभावो मणिर्नहि ॥ २१५ ॥ करिष्येऽहं तत्स्वभावं, तत्स्वसाऽपि स्वसान्न तत् । को नाम कूपपतितं, निजं धीमाननुव्रजेत् ? ॥ २१६ ॥ दृष्ट्वा दोषं तदेकस्या, नान्या हातुं तत्रोचिता । विदग्ध ! दुग्धदग्धो हि, मुग्ध एव दधि त्यजेत् ॥ २१७ ॥ यद्वा किं भृशमुक्तेन, व्रीडामुक्तेन मेऽमुना ? । त्वत्कण्ठन्यस्तमालैव, मच्छीलं ज्ञापयत्वसौ ॥ २१८ ॥ यावत् कुर्यामहं सम्यक्, शीलस्य परिशीलनम् । तावत्सद्यस्कपुष्पेव, मा म्लासीन् मालिकाऽप्यसौ ॥ २१९ ॥ यदा तु शीलमालिन्यं, कुर्वीय मनसाऽप्यहम् । तदा म्लायत्वसौ सद्योऽसद्योगादिव साधुता ॥ २२० ॥ तन्निशम्य समुद्भूताश्चर्यः स्वीकृत्य तद्गिरम् । हस्तेकृत्य प्रशस्तेऽह्नि, तामहं समहामहम् ॥ २२१ ॥ तत्तातदत्तं चादाय, यौतकं कृतकौतुकम् । जगामाहं निजं धाम, सोल्लासः सपरिच्छदः ॥ २२२ ॥ युग्मम् ॥ सा स्वामिन् ! दयितादत्ता, मालेयं मौलिगा मम । अस्या मदन्तिकस्थाया, जज्ञे द्वादशवत्सरी ॥ २२३ ॥ तच्छीलस्य प्रभावाच्च, देवस्येवानुभावतः । न शुष्यति म्लायति वा, मालिकेयमिलापते ! ॥ २२४ ॥ किञ्च—शीलानुभावात् सीताया, यथाग्निर्जलतां ययौ । छिन्नौ करौ कलावत्या, यथा जातौ पुनर्नवौ ॥ २२५ ॥ यथा सुदर्शनस्यासीत् , शूलिका सिंहविष्टरः । दवदन्त्याविरकरोत् , शुष्कनद्यां यथोदकम् ॥ २२६ ॥ पत्ये दत्तं शीलवत्या, स्मेरमब्जं यथाऽभवत् । सुभद्रा चालनिकया, पयः कूपाद्यथाऽकृषत् ॥ २२७ ॥ तथा तदर्पिता तस्याः,

१ विवाहकाले लब्धधनम् ॥

शीललीलायितादियम् । त्वत्कीर्त्तिरिव सुस्फूर्त्तिर्माला म्लायति न क्वचित् ॥ २२८ ॥ शीलस्याहो ! प्रभावोऽयं, प्रभो ! वाचामगोचरः । यद्वचो नातिवर्त्तन्ते, तद्वतोऽचेतना अपि ॥ २२९ ॥ अम्लानिहेतुर्मालाया, मयोक्तोऽयं यथातथः । अनुकूलं च सत्यं च, वाच्यं हि स्वामिनां पुरः ॥ २३० ॥ ततः स्माह नृपः स्मित्वा, शीलमाहात्म्यमीदृशम् । यदि वेत्सि तदा कार्षीः, किमेतदसमञ्जसम् ॥ २३१ ॥ एवं विज्ञानयुक्तोऽपि, सेवते दुर्नयं कथम् ? । करोपात्तप्रदीपोऽपि, कूपे पतति किं सुदृक् ? ॥ २३२ ॥ विज्ञानां खलु विज्ञानं, तदेव हि फलेग्रहि । येन द्विपोऽङ्कुशेनेवोन्मत्तः स्वात्माऽनुशिष्यते ॥२३३॥ अथ रागवशाच्चेत्त्वं, जानन्नप्यकरोरिदम् । रागाविष्टो हि शिष्टोऽपि, कार्याकार्यं न वीक्षते ॥ २३४ ॥ तदेमां स्वीकुरु मया, प्रदत्तां स्वानुरागिणीम् । रक्तीकृतजनत्यागस्त्वादृशां न हि युज्यते ॥ २३५ ॥ किञ्च—यथाऽदायि तदिष्टाय, त्वया स्वदयिता मृता । तथैवैतदभीष्टाय, तुभ्यमेतां ददाम्यहम् ॥ २३६ ॥ ददे विरहदुःखं हि, युवयोर्नवयोः कथम् । सर्वस्यापीष्टविरहो, यद्वह्निरिव दुःसहः ॥ २३७ ॥ अन्यच्च—प्राज्ञैः स्त्रीचरितं ज्ञानामपि दुर्बोधमीरितम् । इमामहं पर्यणयं, तत्परीक्षाकृते कृतिन् ! ॥ २३८ ॥ दास्याम्युपपतेरेव, यद्यमौ भात्रिनीत्वरी[२] । इत्यन्तर्निश्चिकायाऽहं, स्वीकुर्वन्नप्यमूं तदा॥२३९॥ अत्रैकस्तम्भसौधे चापरेभ्यो रक्षितुं न्यधाम् । एतदिच्छापूरणेनान्वहं च सुखिनीं व्यधाम् ॥ २४० ॥ तथाऽपि तद्द्विजवचः सत्यीकर्त्तुमिवासकौ । स्वैरं प्रावर्त्तत न्यस्ता, रमेव हरिणाम्बुजे ॥ २४१ ॥ उक्तं च—

कल्लोलैः सह पांसुखेलनतया लोलेयमित्याशयादेकस्तम्भसरोजसौधकुहरे सिन्धोः सुता शौरिणा ।

१ शीलवतः । २ इत्वरी व्यभिचारिणी ॥

यन्मुक्तापि पितामहप्रहरके छेकेयमिन्दोः करैर्निर्यात्यंशुकरैरुपैति च नमो नारीचरित्राय तत् ॥ १ ॥

इत्थं च चेष्टमानेयमानेयं मनसि व्यधात् । अश्रद्धेयमपि प्राज्ञवाक्यं तद्वाक्यमयानुगम् ॥ २४२ ॥ तद् यदर्थं स्वीकृतेयं, सोऽर्थः सिद्धिं बभाज मे । कृतकृत्योऽपि नीरागां, भजाम्येनामथो कथम् ? ॥ २४३ ॥ स्यादस्यामनुरागोऽपि, नीरागायां कथं मम ? । नारी विरक्ता नाऽरीणां, सादृश्यं ह्यतिवर्त्तते ? ॥ २४४ ॥ न वां नवाङ्गभाजौ निर्विशयौ विषयौ रुषाम् । कुर्वे व्यङ्गौ निर्धनौ वा, सत्यसन्धतया ध्रुवम् ॥ २४५ ॥ तन्मा भैषीरिमामङ्गीकृत्य याहि स्वमन्दिरम् । युवां युवाना माकार्ष्ट, भूयो विप्लवमीदृशम् ॥ २४६ ॥ इहायासि यथा येन, रहस्तेन नयेरिमाम् । यथा जनो न जानाति, तवान्यायं क्षमां च मे ॥ २४७ ॥ तदिष्टवैद्यादिष्टाभं, मन्यमानो विभोर्वचः । स्वीचक्रे तां धनी वामदेवो देवोपगामिव ॥ २४८ ॥ क्षमयित्वा ततः स्वागो, नत्वा भूमीशमीश्वरः । ययौ सुरङ्गामार्गेण, स्वं वेश्म स्वैरिणीयुतः ॥ २४९ ॥

सर्वंसहागुणधरः क्षमया सुपर्वसर्वंसहाधरदृढस्थितिरस्तगर्वः ।
सर्वंसहाभृदपि वेश्म निजं जुजोष, सर्वं सहायमिव विश्वजनं तुतोष ॥ २५० ॥

॥ इति श्रीतपागच्छाधिराजश्रीविजयदानसूरीश्वरशिष्यमहोपाध्यायश्रीविमलहर्षगणिमहोपाध्याय श्रीमुनिविमलगणिशिष्योपाध्यायश्रीभावविजयगणिविरचितायां चम्पकमालाकथायां तृतीयः प्रस्तावः ॥

---

१ प्राणव्यपरोपणेन युवाम् । २ महादेव ॥

अथ राजसभावस्थो, राजा विधिरिवान्यदा । पुरो हास्यगृहास्यानां, चतुर्णां नर्ममन्त्रिणाम् ॥ १ ॥ सत्याश्चम्पकमालायाः, शीलमाहात्म्यमद्भुतम् । अवर्णयल्लब्धवर्णविश्रुतश्रीर्यथाश्रुतम् ॥ २ ॥ युग्मम् ॥ तन्निशम्य समुद्भूताश्चर्यास्तेऽप्यवदन् विभो ! । इदं हि भाव्यसंभाव्यमाभाव्यं तन्न सूनृतम् ॥ ३ ॥ प्रोक्तो यद्यपि शास्त्रेषु, सर्वसिद्धिविधायिनः । ब्रह्मणो ब्रह्मण इव, प्रभावो भुवनाद्भुतः ॥ ४ ॥ तथाऽप्यैदंयुगीनानां, मीनानां विषयाम्भसः । नृणां स्त्रीणां च तच्छुद्धं, क भवेच्चलचेतसाम् ? ॥ ५ ॥ नरः स्यात् त्वादृशः कश्चिच्छुद्धशीलोऽपि शुद्धधीः । स्त्रियस्तु प्रियकौटिल्याः, शुद्धशीलधराः कथम् ? ॥ ६ ॥ वाक्कायाभ्यां काऽपि शीलं, लज्जाद्यैः शीलयेदपि । चेतःशुद्ध्या तु तत्स्त्रीणां, दुष्पालं तच्चलत्वतः ॥ ७ ॥ मनो विना च यन्नाथ !, शीलस्य परिशीलनम् । मन्दुरावद्धाश्वशीलतुलामेव प्रयाति तत् ॥ ८ ॥ तादृशस्य च शीलस्य, स्यान्माहात्म्यमिदं कथम् ! । न शुद्धवस्तुकार्यं हि, तदाभासेन जायते ॥ ९ ॥ या च तत्कान्तमौलिस्थमाल्यस्याऽम्लानिरीक्षिता । सा न शीलोद्भवा किं तु, देवताद्यनुभावजा ॥ १० ॥ तन्मायिन्या तया नूनं, वञ्चितोऽस्ति धवो निजः । मायां कृत्वा दृढामिन्द्रजालिक्येत्राखिलो जनः ॥ ११ ॥ तन्निशम्य जगौ राजा, मा वादिष्टेति यूयकम् । बहुरत्ना हि भूस्तेन, शुद्धशीलाऽपि सा भवेत् ॥ १२ ॥ कालेऽत्रापि सुशीलः स्याद्यथा कश्चिन्नरेष्वपि । तथाऽजिह्मब्रह्मचर्या, न स्यात् स्त्रीष्वपि काऽपि किम् ? ॥ १३ ॥ सत्यप्येवं यदि स्याद्वस्तस्याः साधुत्वमंशयः । तत्किं यूयं तत्परीक्षां, कुरुध्वं न विचक्षणाः ! ॥१४॥ परीक्षामन्तरेण स्यान्न हि सत्तत्त्वनिर्णयः । विना परीक्षां निष्कोऽपि नाश्नुते निष्कलङ्कताम् ? ॥ १५ ॥ इत्युक्ता भुभूजा

---

१ चिन्तनीयम् । २ दीनारोऽपि ॥

दुष्टधीसखास्तेऽपि धीसखाः। प्रमाणमादेश इति, प्रोच्य स्वस्वगृहानगुः ॥ १६ ॥ त्यक्तक्रमाः कृतान्यायप्रक्रमा वक्रमानसाः। ते क्रमाद्विक्रमादित्यपुर्या निर्याय मन्त्रिणः ॥१७॥ चम्पायामस्तकम्पायां, जग्मुरेकैकशः पृथक्। स्वैरं स्वल्पपरीवारास्तत्रा-स्थुश्च पृथक् पृथक्॥१८॥युग्मम्॥तेष्वाद्यो मूलदेवाख्यस्तस्थौ दम्भाम्बुनीरधिः। वृद्धाया धाम्नि कस्याश्चित्, सार्थेशगृहपार्श्वगे ॥१९॥दूतीमावर्जयच्चैकां, कुलटाकुलदेवताम्। पार्श्वे चम्पकमालायास्तां प्रैषीच्चानुशिष्य सः ॥२०॥ सा गत्वा तां रहोऽवादीदहो! रूपमहो! रमे!। त्वत्प्रियाङ्गद्रव्यशालास्वस्ति स्वस्ति मनोरमे!॥२१॥ कियान् कालोऽभवद्बाले!, कान्तस्य प्रोषितस्य ते। कथं च सहसे हन्त!, विरहं तस्य दुस्सहम्?॥ २२॥ विना रमणमन्याऽपि, रमणी स्यात् सुदुःखिता। किं पुनस्त्वादृशी दक्षग्रामणी-र्नवयौवना?॥ २३ ॥ भर्त्ताऽपि तव लुब्धानां, धुरीणः खलु दृश्यते। त्वां हित्वाऽन्यत्र वित्तार्थं, यः श्रीमानप्यटाट्यते ॥ २४ ॥ हरेः प्रियायामासक्तः, संभ्रमी बंभ्रमीति यः। अन्यासक्ते शठे तत्र, प्रतिबन्धस्तवास्तु कः?॥ २५ ॥ यौवनो-रुवने कामकण्ठीरव[२]सुभैरवे। योऽगाद्विहाय त्वां बालां, ततोऽन्यः कोऽस्तु निर्दयः॥ २६ ॥तत्तदेकाग्रतां हित्वा, हितां शृणु गिरं मम। स्वैरं रमस्व सत्पुंसा, मनोऽभीष्टेन केनचित्॥ २७ ॥ भोगान् विना हि विफलं, तारुण्यं कासपुष्पवत्। भो-गाङ्गं चादिमं स्त्रीणां, पुमान् पुंसामिवाङ्गना ॥ २८ ॥ न च वाच्यं पुमान् श्रेष्ठगुणवान् क्व भवेत्? इति। यद्भावी सद्गुणः कोऽपि, पुंस्वपि त्वं वशास्विव॥२९॥गुणी च गुणसङ्गाय, स्वत एव प्रवर्त्तते। प्रवर्त्तयति हंसं हि, कोऽब्जिनीसङ्गहेतवे॥३०॥दूर-तोऽपि समभ्येति, गुणिसङ्गकृते गुणी। त्वत्सङ्गाय यथाऽवन्त्या, इहायातोऽस्ति धीसखः ॥ ३१ ॥ स हि सर्वकलाशाली,

१ 'अहो' इति संबोधने। २ सिंह—॥

शालीनो रूपमन्मथः । दक्षः प्रियंवदः स्थूललक्षः सलक्षशेखरः ॥ ३२ ॥ मूलदेवाभिधः पूर्वदेवाचार्य इवोग्रधीः । क्रमायातो विक्रमार्कभूभर्तुः सचिवाग्रणीः ॥ ३३ ॥ मर्त्यात् कुतश्चिदाकर्ण्य, त्वदीयान् प्रगुणान् गुणान् । त्वत्सङ्गिगंसयैवात्रागतोऽस्ति भृशमुत्सुकः ॥ ३४ ॥ त्रिभिर्विशेषकम् ॥ प्राहिणोच्च स एवात्र, स्वाशयावेदनाय माम् । न ह्याशयं गोपयितुमुग्ररागः प्रभूयते ॥ ३५ ॥ तत्स्वानुरूपं रूपाद्यैरभिरूपे! भजस्व तम्। प्राज्यपुण्योदयप्राप्यं, भाग्यसौभाग्यशेवधिम् ॥३६॥ तेनाखिलवशाचित्तहारिणा सौख्यकारिणा । न याऽक्रीडन्मुधा तस्या, यौवनं वनपुष्पवत् ॥ ३७ ॥ तत्तमाकारय क्षिप्रमवधारय मन्दिरम् । मावधीरय तं चिन्तामणिवच्चिन्तितप्रदम् ॥ ३८ ॥ व्यक्ते ! वक्तव्यमुक्तं ते, वद सद्यस्तदुत्तरम् । स्वहृद्गेहस्थसद्भावप्रादुर्भावनदीपकम् ॥ ३९ ॥ इत्युदित्वा क्षणं मौनमुद्रां सा दूतिका दधौ । तदीयमुत्तरं श्रोतुं, सावधाना समुत्सुका ॥ ४० ॥ सती मतिमती साऽथ, तन्निशम्येत्यचिन्तयत् । व्यसनासक्तमुन्मत्तं, धिग् धिक् तं धीसखाधमम् ॥४१॥ न्यायिना विक्रमार्केण, किमसौ धीसखः कृतः ? । धिक्कारयोग्यो व्यसनी. नाधिकारित्वमर्हति ॥ ४२ ॥ न्यस्तो भाति सदाचारेऽधिकारो नापरे नरे । निहितो राजति स्वर्णे, मणिस्त्रपुणि नो पुनः ॥ ४३ ॥ नरं ज्ञात्वाऽप्यनाचारं, यः करोत्यधिकारिणम् । स नाथोऽपि सदाचारः, कथं श्रद्धीयते बुधैः ? ॥ ४४ ॥ क्रमायातत्वमोहाद्वा, दुष्टत्वाज्ञानतोऽथवा । राज्ञा बुद्ध्यादिमत्त्वाद्वा, कृतो भाव्येष धीसखः ॥ ४५ ॥ सोऽयं मन्त्री कथमभूद्रतोऽपि रतो मयि ? । मामश्रौषीत् कुतो वाऽयं, स्थितां देशे दवीयसि ॥ ४६ ॥ रूपवत्यो युवत्यः स्युः, सर्वत्राप्युन्मदाः सदा । ता विहाय स्वदेशस्थाः, कथं

१ पूर्वदेवा दैत्यास्तेषामाचार्यः शुक्राचार्य इत्यर्थः । २ मावगणय ॥

वाऽत्रायमागमत् ? ॥ ४७ ॥ यदि वा व्यवसायार्थं, भर्त्ताऽवन्त्यां गतोऽस्ति मे । स च स्वच्छमतिर्गच्छन्, भावी नित्यं नृपान्तिके ॥ ४८ ॥ तदा चम्पकमालां तां, प्रेक्ष्य मत्प्रियपार्श्वगाम् । तस्याश्चाम्लानतां नित्यं, ज्ञात्वा मच्छीलहेतुकाम् ॥ ४९ ॥ तद्विध्वंसचिकीर्नूनमायातोऽसौ भविष्यति । गुणिनां हि गुणान् हन्तुं, खलः स्यात् खलु सादरः ॥ ५० ॥ युग्मम् ॥ विधुन्तुदो विधुज्योत्स्नां, दुर्वायुर्वा घनोन्नतिम् । यथा न सहते तद्वत्, साधुकीर्त्तिमसज्जनः ॥ ५१ ॥ तदेष द्वेषवानार्येऽनार्यबुद्धिः स्वभावतः । प्रजिघांसतु मच्छीलं, न तु तद्धन्तुमीश्वरः ॥ ५२ ॥ जिघृक्षुस्तक्षकशिरोमणिं न स्यात् सुखी यथा । तथा मच्छीलविध्वंसं, चिकीर्षुरयमप्यहो ! ॥ ५३ ॥ सम्यक् प्रतिवचस्तस्य, ततो दूतिकयाऽनया । ज्ञापयामि तदाकूतामयप्रशमनौषधम् ॥ ५४ ॥ यद्वाऽसौ यौवनधनाधिकाराख्यत्रिदोषवान् । तदुत्थदर्पकोन्मादात्, प्रलपन्नसमञ्जसम् ॥५५॥ विवेकपाटवं गन्ता, न हि मद्वाक्यभेषजैः । सन्निपातो हि नापैति, चिकित्सां परुषां विना ॥ ५६ ॥ युग्मम् ॥ यतः—

संपनीपद्यते यावन्नानुरूपा प्रतिक्रिया । तावन्नैवामयो याति, प्रतिपक्ष इव क्षयम् ॥ १ ॥

यथास्थिते च स्वाकूते, ज्ञापिते न प्रतिक्रिया । तद्योग्या जायत इति, मायामायामयेऽधुना ॥ ५७ ॥ महात्मानोऽपि कुर्वन्ति, मायां कार्यविशेषतः । निग्रहीतुं बलिं विष्णुर्नाभूत् किं नाम वामनः ? ॥ ५८ ॥ ध्यात्वेति दूतिकामेवं, सा जगाद मनस्विनी । साधु साधु समायासीर्दूतिके ! त्वं मदन्तिके ॥ ५९ ॥ स्यान्मन्मथव्यथाक्रान्तं, प्रायो हि तरुणीमनः । तां व्यथां हन्तुमगेदंकारस्तु प्रिय एव हि ॥ ६० ॥ तद्वियोगे च सा पीडा, पीडयन्ती मनो भृशम् । सन्तापव्यापमतनोत्तना-

---

१ विस्तारयामि । २ वैद्यः । ३ सती ॥

वपि ममातनुम् ॥ ६१ ॥ कुलाचारं च लज्जां च, प्रोल्लङ्घयितुमक्षमा । ग्रीष्मार्कतापं वल्लीव, चिरं सेहे तमप्यहम् ॥ ६२ ॥ मृगीव दावतापार्त्ता, शफरीवोष्णरेणुगा । अन्यदा च स्मरार्त्ताऽहमतीवव्याकुलाऽभवम् ॥ ६३ ॥ अचिन्तयं च कान्तो मे, लोभावेशवशंवदः । देशान्तरेषु भ्रमति, न त्वायाति निजं गृहम् ॥ ६४ ॥ मदनार्त्तिर्मया चेयं, वडवानलदुस्सहा । कियच्चिरं विसोढव्या, जीवितव्ययकारिणी ॥ ६५ ॥ तत्कश्चित् कामुकघनं, नानागुणसुधाञ्चितम् । गवेषयामि विषयानलशान्तिविधायिनम् ॥ ६६ ॥ एवमुत्कण्ठिता यावदहं चेतस्यचिन्तयम् । तावत् पुण्यैरिवाकृष्टा, त्वमागा मम सन्निधौ॥६७॥ शुभवत्या भवत्या चागामिनं कामिनं नरम् । उदीर्यानुगृहीताऽहं, सञ्जीवातुमिवातुरा ॥ ६८ ॥ को युवा सद्गुणो भावी, सङ्गन्ता स च मे कथम् ? । इति चिन्तामहार्षीस्त्वं, मम वात्येव रेणुकाम् ॥ ६९ ॥ कुल्ययेव त्वयानीतं, तत्सन्देशामृतं मम । चित्तालवालगं चक्रे, कामितद्रुं सपल्लवम् ॥ ७० ॥ किं बहूक्तेन हे दूति !, समयप्राप्तया त्वया । निर्वापिताऽहमत्यर्थं, कादम्बिन्येव मेदिनी ॥ ७१ ॥ तत्सङ्गायाथ सोत्साहं, मनो मे जायते भृशम् । कुतश्चित् कारणात् किञ्चित्, विलम्बिष्ये तथाऽप्यहम् ॥ ७२ ॥ तत्तुर्येऽह्नि दिनादस्माद्वपुर्मात्रपरिच्छदम् । यामिन्याः प्रथमे यामे, प्रेषयेस्तं मनोरमम् ॥ ७३॥ किं च वित्तं विना भोगसामग्री नैव जायते । तद्दानं च विनौदार्यपरीक्षाऽप्यस्य नो भवेत् ॥ ७४ ॥ दानं च प्रोच्यते प्राज्ञैः, प्रीतेर्लक्षणमादिमम् । तदग्रतः स्वर्णलक्षं, प्रेषयत्वेष धीसखः ॥ ७५ ॥ याहि भद्रे ! समाख्याहि, तस्मै मद्दत्तमुत्तरम् । आश्वासय भृशोत्कण्ठं, तं च मत्सङ्गमाशया ॥ ७६ ॥ इत्थं निशम्य सा सम्यक्, तस्मै स्माह तदुत्तरम् । कृतार्थमानी तच्छ्रुत्वा, सचिवः सोऽप्यमोदत ॥ ७७ ॥ धान्यन्यासमिषेणाथ, सा सती वसतिर्धियाम् । उण्डामकारयद्भर्त्ता, गृहा-

पवरके क्वचित् ॥ ७८ ॥ गर्त्ताधस्तनभूमिं च, सा कृपालुरकारयत् । सत्करेणुगतिः सिन्धुसत्करेणूत्करैर्मृदुम् ॥ ७९ ॥ गर्त्तास्योपरि तल्पं च, कल्पयामास सा सुधीः । विरलैस्तन्तुभिर्व्यूतं, स्वच्छांशुकसमावृतम् ॥ ८० ॥ अथो यथोक्तसमये, प्रेषितस्वर्णलक्षकः । कुपथ्यकल्पं नेपथ्यं, बिभ्रन्मारामदीपकम् ॥ ८१ ॥ एलादिमिश्रताम्बूलसौरभभ्राजिताननः । कर्पूर-मिश्रघुसृणपङ्कपङ्किलभूघनः ॥ ८२ ॥ माल्यगर्भितधम्मिल्लजितोपात्तेन्दुराहुकः । पुष्पधन्वधनुष्कल्पपुष्पमालाढ्यकन्धरः ॥ ८३ ॥ कस्तूरीपङ्किलश्मश्रुर्धूपधूपितचीवरः । रात्रौ तस्यामगात्तस्याः, सन्निधौ धीसखोऽपि सः ॥ ८४ ॥ चतुर्भिः कलापकम् ॥ महत्या प्रतिपत्त्या तं, सा सती समुपाचरत् । अन्तर्गुञ्जेव नीरागा, श्रयन्ती रक्ततां बहिः ॥ ८५ ॥ प्रोन्मादसे-चिवः सोऽथ, सचिवः करसंज्ञया । प्रदर्शिते तया सद्यस्तत्रापवरकेऽविशत् ॥ ८६ ॥ उपाविशच्च पर्यङ्के, यावत्तत्रासमीक्ष्य सः । तावत्तदाशया साकं, तुत्रुटुस्तल्पतन्तवः ॥ ८७ ॥ अन्तर्गर्तं निराधारः, पापात्मा सोऽपतत्ततः । प्रस्तावयन्निव श्वभ्र-पातमायतिभाविनम् ॥ ८८ ॥ इतश्च—परेऽपि विक्रमादित्यामात्यास्तत्रागताः पुरा । सहस्रदेवश्रीसारबुद्धिसाराह्वयास्त्रयः ॥ ८९ ॥ तस्यै पृथग् दूतिकास्यैरावेदितनिजाशयाः । तस्या एव निशोऽन्यान्ययामेष्वाकारितास्तया ॥ ९० ॥ तथैवोपागता-स्तत्र, तल्पे तत्रोपवेशनात् । तस्मिन्नेवापतन् गर्त्ते, मिथः सङ्गोत्सुका इव ॥ ९१ ॥ त्रिभिर्विशेषकम् ॥ गर्त्तातलं सिकतिलं, वीक्ष्य तेऽथ जगुर्मिथः । अहो! दयालुरेषा यन्नाङ्गभङ्गं चकार नः ॥ ९२ ॥ गर्त्ताप्रपातनं त्वेतत्तया शिक्षाकृते कृतम् । सन्तो ऽप्यापातकटुकं, कुर्वन्त्यायतिसुन्दरम् ॥ ९३ ॥ किं चास्याः सत्प्रशस्याहो!, धिषणा धिषणाधिका । यया दम्भाञ्चिता

---

१ कन्दर्परोगदीपकत्वान्नेपथ्यस्य कुपथ्यस्य पथ्यकल्पता । २ संयुक्तः ॥

बुद्धिनिचिता वञ्चिता वयम् ॥ ९४ ॥ विषयार्त्ता वयं यद्वा, स्वदोषेणैव वञ्चिताः । लभन्ते शलभा यद्वदिन्धनत्वं धनञ्जये ॥ ९५ ॥ विषयाशामयध्वस्तविवेकवरलोचनान् । धिगस्मान् गर्तपतितान्, द्विरदानिव दुर्मदान् ॥ ९६ ॥ विषयामिषलीनानां, मीनानामिव दुर्धियाम् । दुर्दशागलिसंबन्धः, स्यादेवात्र किमद्भुतम् ? ॥ ९७ ॥ तद्विषाद्विषया नूनं, गुणैर्वर्णेन चाधिकाः । विषं हि बाधते भुक्तं, विषयास्त्वीहिता अपि ॥ ९८ ॥ अस्याः शीलक्षयं कर्त्तुकामाः कामाकुला वयम् । अप्राप्तकामाः प्राप्ताः स्मो, ही दशां कामतर्किताम् ? ॥ ९९ ॥ गर्त्ते कूपानुरूपेऽस्मिन्, पातिताः पातकैः स्वकैः । स्थास्यामः कथमाकालं, नरके नारका इव ! ॥ १०० ॥ अनुक्त्वोपागतान् गर्त्तागतान् दुष्कर्मसङ्गतान् । मार्गयन् भृत्यवर्गोऽपि, लप्स्यतेऽस्मान् कथं हहा ? ॥ १०१ ॥ गर्त्तादस्मान्महावर्तादिव पोताः कथं वयम् । निर्यास्यामः स्वसौधे च, यास्यामः श्यामबुद्धयः ? ॥ १०२ ॥ इत्यादि प्रलपन्तस्ते, चिन्ताचान्ततया भृशम् । गर्त्तासूकरवत्तत्र, गर्त्ते तस्थुः सुदुःखिताः ॥१०३॥ अथोदवरिकाबद्धशिक्कस्थैः शरावकैः । आदाय कोद्रवाद्यन्नं, करकैः सलिलं पुनः ॥ १०४ ॥ भोः सावधानाः ! गृह्णीत, भोजनादीति वादिनी । दयां कृत्वा दयांचक्रे, सा तेषां प्रत्यहं सती ॥ १०५ ॥ युग्मम् ॥ लघु स्याल्लङ्घनगुणं भोजनं खल्वितीव सा । तेषां स्मरज्वरार्त्तानां, तादृग्भोजनमार्पयत् ॥ १०६ ॥ तदपि प्राप्यते जातजीविताशा मुदं दधुः । अभ्यधुश्चाऽहो ! दयाऽस्या, यदस्यूनपि पाति नः ॥ १०७ ॥ अस्याः शीलधनं कीर्तिदेहं चापजिहीर्षवः । द्वेधाऽपि दस्यवो जाता, दोषजातान्विता वयम् ॥ १०८ ॥ तेषामपीयमस्माकं, जीवनोपायकारिणी । सतीमतल्लिका प्रष्ठा, दयालुष्वपि

१ वह्नौ । २ शीलधनापजिहीर्षातो दस्यवश्चौराः कीर्तिशरीरापजिहीर्षातो दस्यवो रिपवः इति द्विधा दस्यवः ॥

दृश्यते ॥ १०९ ॥ इत्यादिवार्तिनस्तेऽहर्निशं चिन्ताविधायिनः । स्वस्थान एव विण्मूत्रत्यागिनः पशुजातिवत् ॥ ११० ॥ कायक्लेशावमोदर्यरसत्यागादिकं तपः । तप्यमाना विना भावं, द्वेधा निर्बलविग्रहाः ॥ १११ ॥ दीनश्वान इवान्याशा-विवशा विरसाशिनः । षट्पल्यतुल्यान् षण्मासांस्ते कष्टादत्यवाहयन् ॥ ११२ ॥ त्रिभिर्विशेषकम् ॥

इतश्च कञ्चनारातिं, जित्वा विक्रमपार्थिवः । चम्पामुपागाद्गगनधूलिसार्थेशसंयुतः ॥ ११३ ॥ ततो राजाज्ञया सार्थनाथः स्वगृहमागमत् । तस्मै सा सत्यवक् सत्यां, वार्त्तां तां मन्त्रिगोचराम् ॥११४॥ तदा तच्छीलवीक्षार्थं, प्रेषितांस्तत्र मन्त्रिणः । स्मृत्वा नृपोऽपि तच्छुद्ध्यै, यावदासीत् समुत्सुकः ॥ ११५ ॥ तावत्सार्थपतिर्नुन्नः, सुधिया स्वीयकान्तया । ससैन्यं विक्रमनृपं, भोजनाय न्यमन्त्रयत् ॥ ११६ ॥ नृपोऽप्यत्याग्रहात्तस्य, तद्वचः प्रत्यपद्यत । सार्थेशोऽगात्ततो धाम, तत्सामग्रीसमुद्यतः ॥ ११७ ॥ स पक्वान्नादिसामग्रीं, सर्वां छन्नामकारयत् । धामस्वन्येषु धनिनां, सर्वमीषत्करं खलु ॥ ११८ ॥ दध्यौ भूपस्तु तुष्टो नः, सिद्धं खलु समीहितम् । मयाऽऽगतेन गेहेऽस्य, मन्त्रिवार्त्ताऽपि लभ्यते ॥ ११९ ॥ किं त्वेतत् कृतसामग्रीयोग्यं लात्वा परिच्छदम् । अदनायास्य सदने, गमनं मम युज्यते ॥ १२० ॥ हर्षाद्यद्यप्यसौ भोक्तुं, ससैन्यं मां न्यमन्त्रयत् । सद्यस्तथाऽपि सामग्री, क्व स्यान्मत्सैन्यभोजिका ? ॥ १२१ ॥ प्रायो मितंपचा एव, वाणिजाः स्युः स्वभावतः । तेषां चाल्पाऽपि सामग्री, बह्वीति प्रतिभासते ॥ १२२ ॥ तत्सामग्रीं समीक्ष्यैव, भोक्तुं नेष्ये परिच्छदम् । मा मां श्रितस्य तस्याभूज्जनेऽपभ्राजनान्यथा ॥ १२३ ॥ विमृश्येति विशामीशस्तत्सौधेऽसौ धियांनिधिः । प्रातः प्रैषीच्चरं सोऽपि,

गत्वाऽऽयातोऽब्रवीदिति ॥ १२४॥ दिवीव देव! तद्गेहे, नैव धूमोऽपि दृश्यते । [1]पाकार्हापि प्रभो ! पाकसामग्री तत्र नास्ति तत् ॥ १२५ ॥ तन्निशम्य क्षमानाथः, क्षमावानप्यभूत्तदा । स्वं विप्रतारितं मन्यमानो मन्युभराकुलः ॥ १२६ ॥ दध्यौ च मां निमन्त्र्यापि, यो निश्चिन्तोऽवतिष्ठते । पातकी वातकी सोऽस्ति, मन्दो वा ग्रहिलोऽथवा ॥ १२७ ॥ अथ सौधेऽस्य यास्यामि, भोक्तुं भूरिपरिच्छदः । प्रेक्षे विनाऽपि सामग्रीं, कर्त्तातिथ्यं कथं [2]मम ? ॥ १२८ ॥ इति तत्रापदोषेऽपि, दोषं भूपो व्यभावयत् । तत्त्वाज्ञाने हि विज्ञानामप्यहो! धीविपर्ययः ॥ १२९ ॥ इतश्च—

अस्थिचर्मावशेषाङ्गांस्तान् गर्त्तागतमन्त्रिणः । उपागत्याब्रवीदेवं, सार्थनाथः प्रियाधिया ॥ १३० ॥ भो धीसखा ! मदादेशं, कुरुध्वं यद्यसंशयम् । तदोद्धरामि वो गर्त्तात्, सद्धर्मो नरकादिव ॥ १३१ ॥ यदीषदपि मद्वाक्यवैपरीत्यं करिष्यथ । तदा भूयोऽपि गर्त्तेऽस्मिन्नेव क्षेप्स्यामि निश्चितम् ॥ १३२ ॥ ते प्रोचिरे करिष्यामो, न त्वदाज्ञाविपर्ययम् । गर्त्ताद्दुद्धरदुःखार्त्तानस्मानस्मात्तदुद्धर ॥ १३३ ॥ दयानदीन ! दीनेषु, दयामस्मासु धारय । तक्षेव दारु नो दुःखं, दारुणं द्राग् विदारय ॥ १३४ ॥ सार्थपस्तांस्ततो गर्त्तादाकृष्य द्रागसिस्नपत् । रक्तचन्दनपङ्कौघैः सर्वाङ्गं विलिलेप च ॥ १३५ ॥ तान् यक्षानिव सद्यक्षकर्दमेन प्रपूज्य सः । पुष्पैर्माल्यैश्च विस्मेरैः प्राज्यैरानर्च बन्धुरैः ॥ १३६ ॥ ईषत्प्रकाशे देशेऽन्तर्गर्भगेहं निवेश्य तान् । रहो भोज्यादिसामग्रीं, सर्वां न्यास्थत्तदन्तिके ॥ १३७ ॥ अशिक्षयच्च तानेवं, पश्यत्स्वन्यजनेषु भोः ! । युष्माभिर्निर्निमेषाक्षैः, स्थातव्यं त्रिदशैरिव ॥ १३८ ॥ भूमीजानौ च भुञ्जाने, दातव्यं द्राग् [3]यथोदितम् । सर्वं भोज्यादिवस्त्रादि,

१ बालकयोग्यापि । २ 'स मे' इत्यपि । ३ 'यथोचितम्' इत्यपि ॥

पश्चान्मोक्ष्यामि वः स्वयम् ॥ १३९ ॥ तत्सर्वे प्रतिपन्नेषु, तेषु सार्थपतिः स्वयम् । उपागाद्भूपतिं तं च, प्रणम्येति व्यजिज्ञपत् ॥ १४० ॥ संपन्नयाढ्यसंपन्नः, सांप्रतं जक्षणक्षणः । तत्पुण्यीक्रियतां पादावत्रधार्य गृहं मम ॥ १४१ ॥ भूसुत्रामाऽपि सद्धामा तद्धामाऽगात् स्वसैन्ययुक् । सन्दिग्धमानसोऽप्युच्चैर्दाक्षिण्यादिग्धमानसः ॥ १४२ ॥ गेहद्वारे च संप्राप्तमवनीशमवाकिरत् । लाजैः स्वर्णादिपुष्पैश्च, मौक्तिकैश्च तदङ्गना ॥ १४३ ॥ ततस्तं श्रितकौपीनं, कौ पीनयशसं नृपम् । शतपाकादिभिस्तैलैः, सोऽभ्यानञ्ज सुगन्धिभिः ॥ १४४ ॥ लघुमध्यदृढैः पाणिव्यापारैः स यथास्पदम् । मर्दयन् भूभुजः कायं, सानन्दं तन्मनोऽतनोत् ॥ १४५ ॥ सदुद्वर्त्तनचूर्णैश्च, समुद्वर्त्य सुगन्धिभिः । जलैः कवोष्णैः कुसुमवासितैस्तमसिस्नपत् ॥ १४६ ॥ उन्मृज्याङ्गं ततः शुद्धवाससा स व्यलेपयत् । सुसारघनसाराढ्यश्रीचन्दनरसैर्घनैः ॥ १४७ ॥ मृगमीनमदोदारकर्पूरागुरुसंभवैः । धूपैरधूपयत्तस्य, वेर्णीं च व्याचितोदकाम् ॥ १४८ ॥ मूर्ध्नि मूर्द्धाभिषिक्तस्य, धम्मिल्लं माल्यगर्भितम् । गाङ्गाम्बुमिश्रयमुनावीचिजैत्रं बबन्ध सः ॥ १४९ ॥ विष्वग् माल्यावृतः किञ्चित्, प्रकाशस्तत्कचोच्चयः । अन्तर्लीनकुरङ्गस्य, पूर्णेन्दोः कमलां दधौ ॥ १५० ॥ कश्मीरजन्मपङ्केन, जात्यस्वर्णानुकारिणा । भाग्यश्रीवर्यपट्टाभं, तद्भाले तिलकं न्यधात् ॥ १५१ ॥ सवर्णे हि सवर्णेन, योगे स्यात् साध्वितीव सः । श्मश्रुमिश्रं व्यधाद्राज्ञो, मृगमीनमदद्रवैः ॥ १५२ ॥ धीह्रीविवेकलक्ष्मीनां वसन्तीनां मनोगृहे । दोला इव तदा राज्ञः, कण्ठे न्यस्ताः स्रजो बभुः ॥ १५३ ॥ इत्थं स्नानाधिवासादि, द्राक् परेऽपि परश्शताः । सामन्तादीनां यथाऽर्हं, सार्थेशादेशतो व्यधुः ॥ १५४ ॥ नृपोऽथ भोजनस्थानमागात् सार्थेशदेशितम् । यक्षीकृतामात्ययुक्तगर्भगेहस्य संमुखम् ॥ १५५ ॥ तान् गुह्यकीकृतामात्यान्नत्वा स्माहाथ

सार्थपः। यक्षा जक्षणसामग्रीममिमां मे प्रदत्त भोः! ॥ १५६ ॥ आसनानि ततस्तेऽदुस्तरवो नियता इव। स्थालादीनि च पात्राणि, भृङ्गाराख्यद्रुमा इव ॥ १५७ ॥ ततो द्राक्षाक्षोटचारुकुलीमुख्यां फलावलीम्। माधुर्यधुर्यस्वरसाधरीकृतसुधारसाम् ॥ १५८ ॥ खण्डोपलिप्तखाद्यानि, सुखाद्यान्यतिमार्दवात्। मानसामोदकान् सिंहकेसरादींश्च मोदकान् ॥१५९॥ घृतपूरांश्च संपूर्णचन्द्रमण्डलसोदरान्। पीयूषपूरसरसशर्कराक्षोदसुन्दरान् ॥ १६० ॥ अशोकवर्त्तीर्भोक्तारं, कुर्वतीः शोकवर्जितम्। विसर्पिसर्पिद्धारां च, सुपक्कां लपनश्रियम् ॥ १६१ ॥ प्राज्याज्यपक्कान् पक्कान्नप्रकारानपरानपि। स्वादिष्ठान् सार्थपादिष्टांस्ते सर्वे सत्वरं ददुः ॥ १६२ ॥ पञ्चभिः कुलकम् ॥ ततश्च शालिकूरं. सन्, मुदङ्कुराभिवर्द्धकम्। निस्तुषां मुद्गदालीं च, सर्पीरसमरुस्थलीम् ॥ १६३ ॥ हैयंगवीनं सौगन्ध्या पीनं दीनत्वहृत्तनोः। धान्यपत्रफलोत्थानि, शाकानि विविधानि च ॥ १६४ ॥ मसृणं घुसृणोन्मिश्रमेलामेलनमञ्जुलम्। दधिकूरकरम्बं च, स्निग्धं कर्पूरवासितम् ॥ १६५ ॥ एलालवङ्गककोलपूगकर्पूरचूर्णकैः। श्रेष्ठान्यहिलतापत्रवीटकानि महान्ति च ॥ १६६ ॥ इत्यादि सार्थनाथोक्तं, सद्वस्त्राभरणादि च। सर्वेऽहंपूर्विकापूर्वं, ददुस्ते वटवासिनः ॥ १६७ ॥ पञ्चभिः कुलकम् ॥ तैरेवं दीयमानं च, यद्यदल्पमभूत्तदा। तत्तदन्यगृहाच्छन्नद्वारान्ये छन्नमार्पयन् ॥ १६८ ॥ कल्पवृक्षानिवाध्यक्षांस्तांश्च पूरितकामितान्। यक्षान् वीक्ष्य क्षमानाथो, विस्मितो ध्यातवानिति ॥ १६९ ॥ अहो! धनी सभाग्योऽसौ, यस्यामी कामितप्रदाः। कुर्वन्ति शश्वदादेशं, गुह्यकाः किङ्करा इव ॥ १७० ॥ भवेयुरीदृशा यस्य, त्रिदशा वशवर्त्तिनः। व्यर्थं किमर्थमायासं, स कुर्यात्पाचनादिना ॥ १७१ ॥ यक्षा दौःस्थ्येभहर्यक्षा, दक्षाः कामितपूरणे। एते स्युर्यदि मद्गेहे, तत्कृतार्थो भवाम्यहम् ॥ १७२ ॥ भोजनानन्तरं तस्मात्

सार्थेशं तमहं मुदा । याचिष्ये स हुदारोऽमून्, दुर्देयानपि दास्यति ॥ १७३ ॥ एतेषां च प्रभावेण, यथेच्छं भोजयन् जनम् । संवर्द्धयिष्यामि यशः, पुण्यं चान्योपकारजम् ॥ १७४ ॥ यद्वा राज्ञा मया याच्ञा, कथमस्य करिष्यते । महतामपि याच्ञा हि, लाघवाय हरेरिव ॥ १७५ ॥ यदुक्तम्—

बलिअब्भत्थणि महु महणु लहुई हूआ सोइ । जइ इच्छह वडप्पणउं, देहु म मग्गउ कोइ ॥ १ ॥

लोकोपकारिणी याच्ञा, यद्वा सद्भिरपीष्यते । मेघा लोकोपकाराय, याचन्ते किं न वारिधिम् ? ॥ १७६ ॥ ध्यायन्निति तदेकान्तस्वान्तः कान्तः क्षितेस्ततः । न सम्यग् भोजनास्वादमपि वेदयते स्म सः ॥ १७७ ॥ तद्ध्यानतत्परत्वाच्च, मन्त्रिशुद्धिं चिकीर्षिताम् । स नास्मार्षीत्परासक्ततायाः स्वीयाङ्गनामिव ॥ १७८ ॥ अथ भुक्त्वा यथाकामं, विहिताचमनादरः । सार्थेशदत्तताम्बूलबीटकास्वादसुन्दरः ॥ १७९ ॥ अमात्ययक्षदत्तैः सन्माल्यभूषणचीवरैः । आतङ्कुजिष्यं धनिना, कृतिना कृतसत्कृतिः ॥ १८० ॥ सार्थनाथं धरानाथः, सोपरोधमदोऽवदत् । देहि यक्षानमून्मह्यं, मित्र! चित्रविधायिनः ॥ १८१ ॥ त्रिभिर्विशेषकम् ॥ एते यद्यपि दुर्देयाश्चिन्तामणिवदिष्टदाः । तथाऽपि प्रार्थनामेनां, सखे ! मा मे कृथा वृथा ॥ १८२ ॥ सार्थवाहस्ततः स्माह, स्वामिन् ! किमिदमुच्यते ?। नान्यस्यापि वृथा कुर्वे, प्रार्थनां किं पुनः प्रभोः ? ॥ १८३ ॥ शक्तिमानपि यो वाञ्छां, पूरयेन्नार्थिनः पुमान् । तरवोऽपि ततः श्रेष्ठा, यथाशक्त्युपकारिणः ॥ १८४ ॥ यद्वा सेवकसत्कं यत्, सर्वं स्वामिन एव तत् । तत्स्वामिसत्का एवामी, तेनात्र प्रार्थनाऽपि का ॥१८५॥ सेवकेन च सद्वस्तु, दातव्यं स्वामिनां स्वयम् । इत्यमून् दातुमेवाहं, भोक्तुमामन्त्रयं प्रभून् ॥१८६॥ स्वामिना च स्वयममी, प्रार्थिताः प्रार्थितावहाः । एतद्वितरणोत्साहस्ततो

मेवर्द्धताधिकम् ॥ १८७ ॥ उपयोगोऽप्यमीषां स्याद्भूयान् स्वामिनिकेतने । तत्कृतार्था भवन्त्वेते, त्वदिष्टादिष्टसाधनात् ॥ १८८ ॥ स्कन्धावारे वृषस्कन्धाऽधुना पादोऽवधार्यताम् । तत्रानेष्ये द्रुतं पश्चान्मञ्जूषानिहितानमून् ॥ १८९ ॥ तेनैव मुदितोऽत्यर्थं, मुदितो भूधवस्ततः । अगच्छत् स्वच्छधीः सेनानिवेशं सपरिच्छदः ॥ १९० ॥ अथापवरकाकाराश्चन्दनस्थासकाङ्किताः । मञ्जूषामाल्यसजुषः, सज्जयामास सार्थपः ॥ १९१ ॥ तासु प्रत्येकमेकैकं, न्यस्य कृत्रिमगुह्यकम् । तास्ततः स्थगितद्वारा, भुजिष्यैरुदपाटयत् ॥ १९२ ॥ सोऽथ ताः प्राभृतीचक्रेऽनीकं नीत्वाऽवनीशितुः । कृतावहित्थो बोहित्थो, धियामित्थं जगौ च तम् ॥ १९३ ॥ स्वामिन् ! ये स्वामिनः प्रेष्ठाः, श्रेष्ठास्ते वटवासिनः । सन्मञ्जूषाजुषस्तोषजुषाऽऽनीता इमे मया ॥ १९४ ॥ एते ते देव ! सेवन्तां, सन्निधिं सन्निधेरिव । अभीष्टसृष्टिं कुर्वन्तु, बाहुदण्डा विधेरिव ॥ १९५ ॥ कार्यावसर एवैषां, दर्शनं पूजनं तथा । कार्यं कार्यविदार्येणान्यथा कुप्येयुरप्यमी ॥ १९६ ॥ श्रुत्वेति पार्थिवस्तुष्टः, स्माह सार्थेश ! सार्थकम् । मयि स्नेहमकार्षीस्त्वं, ददानोऽमून् सुदुर्लभान् ॥ १९७ ॥ वाक्कायाभ्यां बहिर्वृत्त्या, स्नेहं सन्दर्शयन्ति ये । तेषां न संख्यन्तर्वृत्त्या, स्निग्धस्तु त्वादृशोऽल्पकः ॥ १९८ ॥ तव प्रेमान्तरङ्गं च, निरणैषमहं सखे ! । उदारैरप्यदेयानामेषां वितरणाध्रुवम् ॥ १९९ ॥ ततश्च—तिष्ठासुर्यद्यपीह त्वं, भावी स्वस्थानमोहतः । तथाऽप्येहि मया साकं, वत्स ! वत्सलचेतसा ॥ २०० ॥ गुणानुरक्ते सुव्यक्ते, स्नेहाभ्यक्ते च मे दृशौ । त्वद्दर्शनस्य कान्तस्य, विश्लेषं न सहिष्यतः ॥ २०१ ॥ को वेद स्यान्न वा जातु, भूयः सङ्गो वियोगिनाम् । दुरापोऽभीष्टसङ्गश्च, तद्वियुज्येत न प्रियैः ॥ २०२ ॥ सार्थेश ! तन्न सार्थो मे, मोचनीयस्त्वयाऽधुना । धुनाति स्वास्थ्यवृक्षं हि, प्रियविश्लेषकुञ्जरः ॥ २०३ ॥ किं चौत्सुक्यं तव

भवेद्विना येनाङ्गनादिना ? । तं चानयेः सहाभीष्टवियोगः खलु दुःसहः ॥ २०४ ॥ सार्थेशः स्माह दुर्मोचा, जन्मभूर्यद्यपि प्रभो ! । त्वां तथाऽप्यनुयास्यामि, स्वामिंस्त्वत्प्रेममोहितः ॥ २०५ ॥ पत्नी पतिव्रता मित्रं, सौस्थ्यदौःस्थ्यसमक्रियम् । स्वामी चाकृत्रिमप्रेमा, विना पुण्यैर्न लभ्यते ॥ २०६ ॥ इत्युदित्वा गृहं गत्वा, सख्यौ सख्यौकसि स्वके । गृहव्यापारमारोप्य, सर्वं सर्वगुणान्विते ॥ २०७ ॥ आत्तसारपरीवारः, समं चम्पकमालया । सार्थनाथः क्षमानाथस्कन्धावारमुपासरत् ॥ २०८ ॥ ततोऽथ प्रस्थितः प्रातर्जाते मध्यंदिनक्षणे । सैन्यं न्यस्य क्वाऽपि तस्थौ, भूकान्तः श्रान्तसैनिकः ॥ २०९ ॥ सूपकारांस्तदा पाकसामग्रीकरणोद्यतान् । न्यवारयन्नृपः सर्वं, यक्षा दास्यन्त इत्ययम् ॥ २१० ॥ स्वयं तु विधिनिष्णातः, स्नातः पेटाः प्रकाश्य ताः । औत्सुक्यात् पुष्पधूपाद्यैर्यक्षानानर्च तान् नृपः ॥ २११ ॥ भक्तिप्रह्वोऽब्रवीच्चैवं भोः ! प्रसीदन्तु गुह्यकाः । सैन्ययोग्यां रसवतीं, सार्थेशस्येत्र दत्त मे ॥२१२॥ यथा बुभुक्षितान् श्रान्तान्, भोजयित्वा जनानमून् । युष्मच्छक्तिं विवेकं च, स्वकं सफलयाम्यहम् ॥ २१३ ॥ तेऽथ स्माहुर्नृपापीडं, व्रीडापीडाकुला अपि । नोपलक्षयसि स्वामिन् !, स्वभृत्यान् किं वदस्यदः ? ॥ २१४ ॥ ये सार्थेशवशाशीलपरीक्षार्थं गतास्तदा । निजान् जानीहि भूजाने !, तानस्मान्नर्मधीसखान् ॥२१५॥ धनिना तेन चास्मासु, यक्षत्वारोपणं कृतम् । नरत्वारोपणं चश्चास्विव कार्यविशेषतः ॥ २१६ ॥ आरोपेण च सद्भावकार्यं नाथ ! न जायते । रजःपर्वमहीशेन, तात्त्विकोर्वीशकार्यवत् ॥ २१७ ॥ सार्थेशधाम्नि चास्माभिर्यद्दत्तं सर्वमीहितम् । अदीयत तदीयं तत्, तन्नुन्नैर्भृतकैरिव ॥ २१८ ॥ तद्देव ! न वयं देवाः, किं तु त्वत्सेवका ध्रुवम् । देवात् प्राच्यामपि स्वीय-

---

१ तत्प्रेरितैः । २ कर्मकरैः ॥

शक्तिं गमितपूर्विणः ॥ २१९ ॥ स्वामिन्ननुगृहाण त्वं, ननु स्वाननुजीविनः । प्रणामकारणाद्यं च, मन्तुमेनं सहस्व नः ॥ २२० ॥ तच्छ्रुत्वा विस्मयप्रेमकारुण्यैर्भावसङ्करम् । दधानो भूधवः सर्वान्, मञ्जूषाभ्यश्चकर्ष तान् ॥ २२१ ॥ सूदान् पाकार्थमादिश्य, ततस्तान् धीसखान्नृपः । दृशा प्रेमस्पृशा पश्यन्नित्यूचे स्निग्धया गिरा ॥ २२२ ॥ हे सखायः ! कथं यूयमत्यर्थं क्षामकुक्षयः ? । व्यक्तकङ्कालदुष्कालरङ्कौपम्यं गताः समे ॥ २२३ ॥ कच्चित् सच्चित्तमुत्कारिरूपा अपि विरूपताम् । प्राप्ता यूयं कुतोऽसाध्यव्याधिव्याबाधिता इव ॥ २२४ ॥ हे वयस्याः ! वयस्याद्योत्तरे सत्यपि जज्ञिरे । भवन्तो निर्बलाः कस्माज्जराजर्जरिता इव ॥ २२५ ॥ वहन्तो हन्त ! शर्मोच्चैर्देवा दोगुन्दका इव । केनैवं प्रापिता यूयं, दुर्दशां दुर्दशां हहा ! ॥ २२६ ॥ किं बहूक्तेन युष्मासु, पूर्वावस्थासलक्षणम् । कुबेरौपम्यमेवैकं, कुतः संप्रति दृश्यते ? ॥ २२७ ॥ इति राज्ञोदिताः पूर्वानुभूता सातसंस्मृतेः । उदश्रवस्तेऽजायन्त, सायङ्काले रथाङ्गवत् ॥ २२८ ॥ ऊचिरे च यथावृत्तं, स्ववृत्तान्तं सगद्गदम् । प्रेर्यमाणा नृपतिना, वार्यमाणा अपि ह्रिया ॥ २२९ ॥ भूयोऽभ्यधुश्च ते स्वामिन् !, दुःशीलां तां महासतीम् । चिकीर्षवः पूतिजलां, मन्दा मन्दाकिनीमिव ॥ २३० ॥ सत्याः सत्यामपि ख्यातिं, मत्सरेणासहिष्णवः । पातकैः पातिताः स्वीयैर्गर्त्ते पातकिनो वयम् ॥ २३१ ॥ युग्मम् ॥ नात्र दोषो महासत्यास्तस्याः कोऽपि प्रभो ! ततः । स्वयं भ्रियन्त एवार्कं प्रति धूलिक्षिपो जडाः ॥ २३२ ॥ गर्त्तान्नादिप्रदानेनास्माकं पापात्मनामपि । चक्रे सा जीवनोपायं, तत्तु चित्राय जायते

१ अस्थिपञ्जरम् । २ द्वितीये । ३ पूर्वं हि कुबेरौपम्यं विभवादिभिः धनदसादृश्यं बभूव अधुनाऽपि कुबेरः कुत्सितशरीरस्तदौपम्यं कुबेरौपम्यं कुशरीरसाम्यम् ॥

॥ २३३ ॥ कदम्बं यद्ददौ गर्त्तास्थानान्तः सा महासती । विज्ञेयं तत्तु विस्मेरस्मरापस्मारशान्तये ॥ २३४ ॥ तत्कृतैरुपचारैस्तैर्मदनोन्मादहारिभिः । क्षामत्वादिकमेतन्नो, जातमापातमङ्कुलम् ॥ २३५ ॥ निशम्येति गुणांस्तस्या, भूपतिर्विस्मितो भृशम् । प्रशशंस सदाशंसो, गुणज्ञ इति तां मुदा ॥ २३६ ॥ स्त्रीजातेरप्यहो ! तस्याः, पेशलं बुद्धिकौशलम् । शीलस्य च त्रिधा शुद्ध्या, परिशीलनमुत्तमम् ॥ २३७ ॥ वपुषाऽपि सुदुष्पालं, शीलं वाचा ततोऽपि च । मनसा तु सुशीलत्वं, यत्तल्लोकोत्तरं खलु ॥ २३८ ॥ यतः—नव्ये स्फूर्जति तारुण्ये, त्रिकाराङ्कुरनीरदे । स्वकान्तविरहे चान्तराचान्तस्वास्थ्यशर्मणि ॥ २३९ ॥ वित्तादिमत्तामत्तेषु, वित्तेषु प्रगुणैर्गुणैः । कामं कामयमानेषु, कामिषूपान्तगामिषु ॥ २४० ॥ अविद्यमानश्वशुराद्यङ्कुशाऽपि कुशाग्रधीः । शुद्धं शीलं यथा साधाद्विश्वेऽप्येवं दधातु का ? ॥ २४१ ॥ त्रिभिर्विशेषकम् ॥ धन्यो धन्येष सा यस्य, वल्लभा विश्वदुर्लभा । सीता शीलेन रूपेण, रतिर्बुद्ध्या च भारती ॥ २४२ ॥ इत्याद्युक्त्वा नृपः सार्थवाहमाहूय सत्वरम् । स्मित्वा स्माह सखे ! साधु, दत्ता मे वटवासिनः ॥ २४३ ॥ अमी शठधियोऽप्युच्चैर्नीताः शालीनतां यया । अस्तु स्वस्ति भवत्पत्न्यै, तस्यै प्रबलशक्तये ॥ २४४ ॥ यद्वा नोलङ्घ्यते यद्वाक्, पुष्पाद्यैरप्यचेतनैः । तत्प्रभावादमी शाठ्यं जहुस्तत्र किमद्भुतम् ॥ २४५ ॥ स्तुवीत गुणिनं वीतमत्सरो नापरस्तु नेर। स्तुवन्त्येनां पुनरमी, पूर्वमत्सरिणोऽप्यहो ! ॥ २४६ ॥ यद्वा शीलमहिम्नायां, स्तुवीरंस्त्रिदशा अपि । उर्वीस्पृशो न कुर्वीरन्, शस्तास्तत्संस्तवं कथम् ? ॥२४७॥ यः शीलमहिमा लब्धवर्णैः शास्त्रेषु वर्ण्यते । सोऽनया सत्यतां निन्ये, सत्या संशुद्धशीलया ॥ २४८ ॥ तदियं दयिता

---

१ अन्तर्हृदये आचान्तं भक्षितं विनाशितमिति यावत् स्वास्थ्यशर्म येन स तथा तस्मिन् । २ नरः ॥

यन्ताद्रिमुख्यतीर्थानि सोऽनमत् ॥ २८१ ॥ इत्थं तौ दम्पती शुद्धं, श्राद्धधर्मं समाश्रितौ । यथाशक्ति जिनाधीशशासनो-
द्द्योतनोद्यतौ ॥ २८२ ॥ यथावत् पालयन्तौ चाभिग्रहीतानभिग्रहान् । आनन्दशिवनन्दादिदम्पत्यौपम्यमापतुः ॥२८३॥
युग्मम् ॥ समाधिमृत्युमासाद्य, प्रान्तेऽप्यनशनादिना । सुगतिं तौ गतौ सा हि, सुप्रापा जिनसेविनाम् ॥ २८४ ॥

इत्थं चम्पकमालया सुविमलं शीलं दधत्या दृढं, लेभेऽत्रापि महान् प्रभावविभवः प्रेत्यापि शर्मोत्तमम् ।
तद्धेतौ दुरितक्षयाय परमे हेतौ परब्रह्मणः, सम्यग् ब्रह्मणि भावसाधुमहिते यत्नः समाधीयताम् ॥ २८५ ॥

॥ इति श्रीतपागच्छाधिराजश्रीविजयदानसूरीश्वरशिष्यमहोपाध्यायश्रीविमलहर्षगणिमहोपाध्याय-
श्रीमुनिविमलगणिशिष्योपाध्यायश्रीभावविजयगणिविरचितायां
चम्पकमालाकथायां चतुर्थः प्रस्तावः ॥ तत्संपूर्त्तौ च संपूर्णेयं चम्पकमालाकथा ॥

॥ अथ प्रशस्तिः ॥

तपगणगगनरवीणां, श्रीविजयानन्दसूरिशक्राणाम् । राज्ये कथानकमिदं, भावविजयवाचकस्तेने ॥ १ ॥ सिद्धिगगनमु-
निचन्द्रप्रमितेऽब्दे १७०८ विजयदशमिकासु तिथौ । विद्यापुरे वितेने, कथाममूं सोऽर्थितः प्राज्ञैः ॥ २ ॥ महासतीवृत्तमिदं
वितन्वताऽयुक्तं यदुक्तं मयकाल्पबुद्धिना । मिथ्याऽस्तु तत्पापमपाग्रहस्य मे, सद्भिश्च तच्छोध्यमुदारबुद्धिभिः ॥ ३ ॥

श्रीआत्मानन्द-ग्रन्थरत्नमाला-षोडशं रत्नम् (१६)

तपागच्छाधिपश्रीमद्देवेन्द्रसूरिसंदृब्धा सिद्धपञ्चाशिका

(अवचूर्या समलङ्कृता)

पूज्यपादप्रवर्त्तकश्रीमत्कान्तिविजयविनेयाणुचतुरविजयोपदिष्टसुरतनगरवास्तव्य-
श्रीमालिज्ञातीयश्रेष्ठि-सीरचन्द्रात्मज-रत्नचन्द्र-द्रव्यसाहाय्येन
प्रकाशयित्री-श्रीआत्मानन्दसभा-भावनगर ।

इदं पुस्तकं मुम्बय्यां वल्लभदास-त्रिभुवनदास गांधी सेक्रेटरी जैन आत्मानन्दसभा भावनगर इत्यनेन
निर्णयसागरमुद्रणालये कोलभाटवीथ्यां २३, तमे गृहे रामचन्द्र यशवन्त शेडगेद्वारा मुद्रयित्वा प्रकाशितम् ।

वीरसंवत् २४३९. आत्मसंवत् १९. विक्रमसंवत् १९६९.

Printed by R. Y Shedge at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay, and Published by
Vallabhadas Tribhuvandas Gandhi, Secretary, Jaina Atmananda Sabha, Bhavanagar.

॥ प्रस्तावना ॥

इदं सिद्धपञ्चाशिकाभिधानं प्रकरणरत्नं प्रकरणकारैः ऐदंयुगीनमन्दमतीनां हितहेतवे सिद्धप्राभृतात्समुद्धृत्य गाथानुबन्धेन निबद्धम्, तच्चाद्यगाथागतस्य—" सिरिसिद्धपाहुडाओ " इति पदस्यावलोकनेन, अस्यावसानगाथागतस्य—"लिहिअं" इति पदस्य—"लिखितमक्षरविन्यासीकृतं सिद्धप्राभृतादिति शेषः" इति व्याख्यालवावलोकनेन च प्रकटमेव । "देविंदसूरीहिं" इत्यनेन मूलपाठेन, संशोधनकाले एकीकृतानां पुस्तकादर्शानां मध्यादेकस्यैव पुस्तकस्य—"करालकलिकालपातालतलावमज्जद्विशुद्धधर्मधुरोद्धरणधुरीणश्रीमज्जगच्चन्द्रसूरिचरणसरसीरूहचञ्चरीकैरिति" इत्यवचूरिगतपाठेन चास्य प्रणेतारः तपागच्छभट्टारकपुरन्दरश्रीमद्देवेन्द्रसूरय एवेति सुप्रतितम् । एतेषां सत्तासमयोऽपीह निर्विरोधं विक्रमार्कीयत्रयोदशशताब्द्यां सुप्रसिद्ध एव । अस्यावचूरिकारकालमानं तु निर्णेतुं न शक्यते, क्वाप्येतस्य नामाद्यनुपलम्भात् ।

अस्यां सिद्धपञ्चाशिकायां सत्पदप्ररूपणादिभिर्नवभिर्द्वारैः पञ्चदशसु क्षेत्रादिद्वारेषु अनन्तरसिद्धानां परम्परसिद्धानां च स्वरूपं विगतविकारैः प्रकरणकारैः संक्षेपेण प्रतिपादितमस्ति । तत्तु स्वयमेवावभोत्स्यते पण्डितप्रकाण्डैरिति नात्रास्माकं कथनावश्यकतेति ।

सवृत्तिकस्यास्य प्रकरणस्य संशोधनसमये पुस्तकमेकं पूज्यपादप्रवर्तकश्रीमत्कान्तिविजयसत्कम्, द्वे च प्रवर्तकशिष्यमुनिश्रीभक्तिविजयसत्के, द्वे तु पत्तनसङ्घसत्कचित्कोशीये, एकं पुनः पत्तनस्थसागरगच्छोपाश्रयसत्कचित्कोशीयम्, एतानि षट् पुस्तकानि संप्राप्तानि । ततः शोधनकर्मणि साहाय्यमुपलभमानः पुस्तकप्रेषणेनानुग्रहं वितन्वताममीषां मन्येऽहं महतीमुपकृतिम् ।

एतत्पुस्तकषट्काधारेण संशोधितेऽप्यत्र निबन्धे यत्र क्वचनाशुद्धिः कृता जाता वा भवेत्तत्र संशोधनीयं प्रवचनविचारज्ञैरिति प्रार्थयते—

प्रकल्पिताञ्जलिः प्रवर्तकपादपाथोजपरागः **चतुरविजयो मुनिः** ॥

॥ अर्हम् ॥

श्रीमद्देवेन्द्रसूरिकृता सिद्धपञ्चाशिका ।

(अवचूरिसमलंकृता)

सिद्धं सिद्धत्थसुअं, नमिउं तिहुअणपयासयं वीरं । सिरिसिद्धपाहुडाओ, सिद्धसरूवं किमवि वुच्छं ॥१॥

संतपय[1]परूवणया, दव[2]पमाणं च खित्त[3] फुसणा[4] य । कालो[5] अ अंतरं[6] तह, भावो अप्पाबहू दारा ॥ २ ॥

गाथे[1] स्पष्टे । नवरं सिद्धं निष्ठितार्थं प्रसिद्धं शाश्वतं बद्ध[2]ध्मातकर्माणं वा । सिद्धाः प्रतिष्ठिताः सत्यत्वेन केनाप्यचाल्याः । अर्था जीवा[3]जीवादिपदार्थाः । श्रुते द्वादशा[4]ङ्गरूपे यस्य । अथवा सिद्धार्थाः सिद्धप्रयोजना मोक्षावाप्तेः । सुता इव सुताः शिष्या गण[5]धरादयो यस्य[6] ॥ १ ॥ २ ॥

एहिँ अणंतरसिद्धा, परंपरा सन्निकरिसजुत्तेहिं । तेहिं विआरणिज्जा, इमेसु पनरससु दारेसु ॥ ३ ॥

एभिः पूर्वोक्तैरष्टभिः सत्पदप्ररूपणादिभिर्द्वारैरनन्तराः सिद्धा विचारणीयाः । परम्पराः सिद्धास्तु 'तेहिं' तैः सत्पदप्ररूपणादिभिर्द्वारैः संनिकर्षयुक्तैर्नवभिर्द्वारैरित्यर्थः । न विद्यते समयेनाप्यन्तरं व्यवधानं येषां तेऽनन्तराः, सिद्धत्वप्रथमस-

---

1 'गाथाद्वयं स्पष्टम्' इति । क्वचित्सर्वथापि नास्ति । 2 'सितं बद्धं ध्मातं कर्म येन स तथा तं इति वा' इति क्वचित् । 3 'जीवादयः' इत्यपि । 4 'सिद्धान्ते' इत्यपि । 5 'गणधरादय' इति क्वचित् नास्ति । 6 'सिद्धार्थनरेन्द्रसुत इति वा' क्वचिदित्यधिकम् ॥

मयवर्त्तिन इत्यर्थः । प्राकृतत्वाज्जमो लोपः । विवक्षिते प्रथमे समये यः सिद्धस्तस्य यो द्वितीयसमये सिद्धः स परः, तस्यापि यस्तृतीयसमये सिद्धः स परम्परः । एवमन्येऽपि वाच्याः । परम्परे च ते सिद्धाश्च परम्परसिद्धाः । विवक्षितसिद्धत्वप्रथमसमयात्प्राग् द्वितीयादिषु समयेष्वनन्तामतीताद्धां यावद्वर्त्तमाना इत्यर्थः । संनिकर्षो नाम संयोगः। ह्रस्वदीर्घयोरिव विवक्षितं किञ्चित्प्रतीत्य विवक्षितस्याल्पतया बहुत्वेन वा अवस्थानरूपः संबन्धः । उभयेऽपि सिद्धाः । केषु विषयेषु विचारणीयाः ? इत्याह—'इमेसु' इति एषु पञ्चदशसु द्वारेषु ॥ ३ ॥ तान्येवाह—

खित्ते[1] काले[2] गइ[3] वेअ[4] तित्थ[5] लिंगे[6] चरित्त[7] बुद्धे[8] य। नाण[9]ोगा[10]हु[11]क्कस्से[12], अंतर[13]मणुसमय[14]गणण[15]अप्पबहू ॥[2] ४॥

'उक्कसे' इति उत्कर्षद्वारम् ॥ ४ ॥ प्रथमत एषु पञ्चदशसु द्वारेषु सत्पदप्ररूपणयाऽनन्तरसिद्धाश्चिन्त्यन्ते—

खित्ति तिलोगे १ काले, सिज्झंति अरेसु छसुवि संहरणा ।
अवसप्पिणि ओसप्पिणि, दुतिअरगे जम्मु तिदुसु सिवं २ ॥ ५ ॥

क्षेत्रद्वारे त्रिलोके । तत्रोर्ध्वलोके पण्डकवनादौ, अधोलोकेऽधोलौकिकग्रामेषु, तिर्यग्लोके मनुष्यक्षेत्रे सिध्यन्तीति क्रिया सर्वत्र योज्या । संहरणात् समुद्रनदीवर्षधरादिष्वपि । तीर्थकृतः पुनः संहरणाभावात् अधोलौकिकग्रामेषु तिर्यग्लोके वा पञ्चदशसु कर्मभूमिषु १ । कालद्वारेऽवसर्पिण्यामुत्सर्पिण्यां च षट्स्वप्यरकेषु सिद्ध्यन्ति । देवादिकृतसंहरणादप्येवमेव । जन्माश्रित्य पुनरवसर्पिण्युत्सर्पिण्योर्यथासंख्यं द्वयोस्त्रिषु चारकेषु जन्म । त्रिषु द्वयोश्च शिवं मोक्षः । अयमर्थः—अवस-

1 'स परः' इत्यपि । 2 'गीतिच्छन्दः' । 3 इतोऽग्रे 'न शेषस्थानेषु' इत्यधिकं क्वचित् ॥

पिण्यां जन्म चरमशरीरिणां नियमतस्तृतीयचतुर्थारकयोः । सिद्धिगमनं तु एवमेव । परं केषांचित्पञ्चमारकेऽपि यथा जम्बूस्वामिनः । उत्सर्पिण्यां तु द्वितीयतृतीयचतुर्थारकेषु जन्म । सिद्धिगमनं तु तृतीयचतुर्थयोरेव । महाविदेहेषु पुनः कालः सदैव सुषमदुःषमारूपः तद्वक्तव्यताभणनेनैव भणितो द्रष्टव्यः । तीर्थकृतां पुनरवसर्पिण्यामुत्सर्पिण्यां च जन्म । सिद्धिगमनं च सुषमदुःषमादुःषमसुषमारूपयोरेवारकयोर्ज्ञेयम् २ ॥ ५ ॥

चउगइआगय नरगइठिय सिव ३ वेयतिग ४ दुविहतित्थेऽवि ५ ।

गिंहि–अन्न–सलिंगेसु अ ६, चरणे अहखाइ वट्टंता ॥ ६ ॥

ति चउ पण पुव्वि तिचरण, जिणा ७ सयं–बुद्धि–बुद्ध–पत्तेया ।

दु–ति–चउनाणा ९ लहुतणु, दुहत्थ गुरु पणधणुसयाओ १० ॥ ७ ॥

गतिद्वारे चतुर्गत्यागताः सामान्यतः सिध्यन्तीति शेषः । विशेषचिन्तायां पुनश्चतसृभ्यो नरकपृथिवीभ्यो न शेषाभ्यः । तिर्यग्गतेः पृथिव्यम्बुवनस्पतिपञ्चेन्द्रियेभ्यो न शेषेभ्यः । मनुष्यगतेः स्त्रीभ्यो नरेभ्यो नपुंसकेभ्यो वा । देवगतेश्चतुर्भ्योऽपि देवनिकायेभ्यः । तीर्थकृतः पुनर्देवगतेर्नरकगतेर्वा अनन्तरागताः सिध्यन्ति । तत्राप्याद्यपृथिवीत्रयादेव न शेषाभ्यः । वैमानिकेभ्यो न शेषदेवेभ्यः । वर्तमाननयमाश्रित्य मनुष्यगतिस्था एव शिवं प्राप्नुवन्तीति शेषः३ । वेदद्वारे प्रत्युत्पन्ननयमाश्रित्यापगतवेद एव सिध्यति । तद्भवानुभूतपूर्ववेदापेक्षया बाह्याकारमात्रापेक्षया च वेदत्रिकेषु । तीर्थकृतः पुनः स्त्रीवेदे पुरुषवेदे वा४ ।

1 इतः प्राग् 'गर्भजेभ्यः' इत्यधिकं क्वचित् । 2 इतोऽग्रे–'न नपुंसकवेदे' इत्यपि ॥

तीर्थद्वारे तीर्थकरतीर्थकरीतीर्थरूपे द्विविधेऽपि तीर्थे ५। लिङ्गद्वारे इदं लिङ्गत्रयं द्रव्यलिङ्गापेक्षया ज्ञेयम्। संयमरूपभावलिङ्गापेक्षया तु स्वलिङ्गे एव ६। चारित्रद्वारे चारित्रे यथाख्याते क्षायिके एव वर्त्तमानाः सिध्यन्ति ॥६॥ तद्भवपूर्वानुभूतचरणापेक्षया त्रिकं चतुष्कं पञ्चकं च प्राप्य सिध्यन्ति। अयमर्थः—केचित्सामायिकसूक्ष्मसंपराययथाख्यातचारित्राणि, केचित्सामायिकच्छेदोपस्थापनीयसूक्ष्मसंपराययथाख्यातानि, केचित्सामायिकपरिहारविशुद्धिकसूक्ष्मसंपराययथाख्यातानि, केचित्सामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिकसूक्ष्मसंपराययथाख्यातानि चारित्राणि प्राप्य सिध्यन्ति। जिनास्त्रिचरणा एव प्राप्तसामायिकसूक्ष्मसंपराययथाख्यातचारित्राः ७। बुद्धद्वारे 'सयंबुद्धिबुद्धपत्तेआ' इति सूचनात्सूत्रस्य स्वयं बाह्यप्रत्ययनिरपेक्षं[1] बुद्धाः स्वयंबुद्धाः। बुद्धी मल्लिस्वामिनी सामान्यस्त्री वा तया बोधिता बुद्धीबोधिताः। बुद्धा आचार्यादयः, तैर्बोधिता बुद्धबोधिताः। प्रत्येकं किमपि बाह्यप्रत्ययं दृष्ट्वा बुद्धाः प्रत्येकबुद्धा इति निर्देशो ज्ञेयः। ततः स्वयं च बुद्धी च बुद्धाश्च प्रत्येकाश्च स्वयंबुद्धीबुद्धप्रत्येकाः। प्राकृतत्वाद् ह्रस्वः। स्वयंबुद्धीबुद्धप्रत्येकबुद्धानां बोधि १ उपधि २ श्रुत ३ लिङ्ग ४ कृतो विशेषः। स्वयंबुद्धा बाह्यप्रत्ययमन्तरेण जातिस्मरणादिना बोधिभाजः। प्रत्येकबुद्धाश्च प्रत्येकं बाह्यं वृषभादिकं हेतुमभिवीक्ष्य बोधिभाजः, ततस्ते प्रत्येकमेव विहरन्ति न गच्छवासिन इव संहिताः। स्वयंबुद्धानामुपधिर्द्वादशविध एव पात्रादिकः। प्रत्येकबुद्धानां तु द्विधा, उत्कर्षतो जघन्यतश्च। उत्कर्षतो नवविधः प्रावरणवर्जः। जघन्यतो द्विविधो रजोहरणमुखवस्त्रिकारूपः। तथा स्वयंबुद्धानां पूर्वाधीतं श्रुतं भवति वा न वा। यदि भवति ततो लिङ्गं देवता समर्प-

[1] 'बाह्यं निमित्ताद्यनपेक्ष्य' इत्यपि क्वचित् ॥

यति, गुरुसंनिधौ वा प्रतिपद्यते। यदि चैकाकी विहरणसमर्थः, इच्छा वा तस्य तथारूपा जायते; तत एकाक्येव विहरति, अन्यथा गच्छे एव तिष्ठति। अथ पूर्वाधीतं श्रुतं न स्यात् तर्हि नियमाद्गुरुसंनिधौ लिङ्गं प्रतिपद्यते, गच्छं चावश्यं न मुञ्चति। प्रत्येकबुद्धानां पूर्वाधीतं श्रुतं नियमाद्भवति; तच्च जघन्यत एकादशाङ्गानि, उत्कर्षतः किञ्चिन्न्यूनानि दशपूर्वाणि। लिङ्गं च तस्मै देवता समर्पयति। लिङ्गरहितो वा कदाचित्स्यात् ८। ज्ञानद्वारे केवलज्ञाने एव वर्त्तमानाः सिध्यन्ति। तद्भवानुभूतपूर्वज्ञानापेक्षया केचिद् द्विज्ञाना मतिश्रुतज्ञानाः, केचित्त्रिज्ञाना मतिश्रुतावधिज्ञानाः, यद्वा मतिश्रुतमनःपर्यायज्ञानाः, केचिच्चतुर्ज्ञाना मतिश्रुतावधिमनःपर्यायज्ञानाः। तीर्थकृतस्तु चतुर्ज्ञानिन एव ९। अवगाहनाद्वारे लघ्वी जघन्या तनुर्द्विहस्ता द्विहस्तप्रमाणा; गुरुरुत्कृष्टा पञ्चधनुश्शता धनुश्शतपञ्चकप्रमाणा। तुशब्दाद् धनुषां पञ्चविंशत्याधिकापि। सा च मरुदेव्या अवसेया तस्या आदेशान्तरेण नाभिकुलकरतुल्यत्वात् 'संघयणं संठाणं, उच्चत्तं चेव कुलगरेहिं समं' इति वचनात्। इत्थं सिद्धप्राभृतटीकायामप्युक्तम्। ततः सिद्धस्तुशब्दार्थः। शेषा तु मध्यमावगाहना। तीर्थकृतां जघन्या सप्तहस्तप्रमाणा, उत्कृष्टा पञ्चशतधनुर्माना शेषा मध्यमेति १०॥ ७॥

कालमणंतमसंखं, संखं चुअसम्म अचुअसम्मत्ता ११।
लहु गुरु अंतर समओ, छमास १२ अडसमय अवहिआ १३॥ ८॥
जहनिअर इक्क अडसय १४, अणेग एगा य थोव संखगुणा १५।

उत्कर्षद्वारे कालशब्दस्य प्रत्येकं योगात्। अनन्तं कालं असंख्यं संख्यं च कालं च्युतसम्यक्त्वाः सिध्यन्ति अच्युतम-

म्यक्त्वाश्च । अयमर्थः—च्युतसम्यक्त्वाः केचिदनन्तं कालं अर्धपुद्गलपरावर्त्तलक्षणं संसारे भ्रान्त्वोत्कर्षतो लब्धसम्यक्त्वादिरत्नत्रयाः सिध्यन्ति । अपरेऽनुत्कर्षतोऽसंख्यातम् । अन्ये तु संख्येयम् । केचनाच्युतसम्यक्त्वा अपि सिध्यन्तीति ११ । अन्तरद्वारे जघन्यत एकसमयः, उत्कर्षतः षण्मासाः १२ । अनुसमयद्वारे निरन्तरद्वारे जघन्यतो द्वौ समयौ निरन्तरं सिध्यन्ति, उत्कर्षतोऽष्टौ समयाः । अव्यवधानं निरन्तरतेत्यर्थः १३ ॥ ८ ॥ गणनाद्वारे जघन्यत एकः, इतरत उत्कर्षतोऽष्टाधिकं शतं सिध्यति । श्रीनाभेयस्य निर्वाणसमयेऽष्टोत्तरशतमेकसमयेन सिद्धम् । आह च संघदासगणिर्वसुदेवहिण्डौ—"उसभो अभीइणा नक्खत्तेणं एगूणपुत्तसएहिं अट्ठहिं नत्तूएहिं सह एगसमएणं निव्वुए। सेसाणवि अणगाराणं दससहस्साणि अट्ठसयऊणगाणि तंमि चेव नक्खत्ते वहुसु समयंतरेसुत्ति" १४ । अल्पबहुत्वद्वारे युगपद्द्वित्रादिकाः सिद्धाः स्तोकाः, तेभ्य एकका: सिद्धाः संख्येयगुणा विवक्षितसमये एकैकसिद्धानां बाहुल्यादिति भावः १५ । गतं सत्पदप्ररूपणाद्वारम् १ । संप्रति[1] द्रव्यमानं क्षेत्रादिषु पञ्चदशसु द्वारेष्वभिधीयते—

चउ उड्ढ नंदणजले, वीस पहुत्तं अहोलोए ॥ ९ ॥

इगविजय वीस अडसय, पत्तेयं कम्मभूमि तिरिलोए। दु दु जलहि पंडगवणे, अकम्ममहि दस य संहरणा॥१॥

तत्र क्षेत्रद्वारे चतुश्शब्दस्य प्रत्येकं योगात् । ऊर्ध्वलोके सामान्यतो मेर्वादौ नन्दनवने जले सामान्यतो नद्यादिगते च जले "चउक्कं दुवे समुद्दंमि" इति वचनात् । श्रीजिनभद्रगणिक्षमाश्रमणरचितसंग्रहण्याम्—"तओ जले चेव" इत्युक्तम्।

1 'सप्रति द्रव्यमानमाह' इत्यपि ॥

तदत्र तत्त्वं केवलिनो विदन्ति। यदुक्तम्—"वीस पहुत्तं अहोलोए" इति सिद्धप्राभृते। संग्रहण्यां पुनः—"बावीसमहोलोए" इत्युक्तम्। "दो अ वीसा अहोलोए" इत्युत्तराध्ययने उक्तम्। तदत्र तत्त्वं ज्ञानिनो विदन्ति। पृथक्त्वं द्विप्रभृतिरानवभ्यः ॥ ९ ॥ एकस्मिन् विजये २० पञ्चदशकर्मभूमिषु प्रत्येकं १०८ तिर्यग्लोकेऽप्येवं सिध्यन्ति । सामान्यतः समुद्रे पण्डकवने च द्वौ द्वौ। अकर्ममहीषु हैमवत ५ हरिवर्ष ५ देवकुरु ५ उत्तरकुरु ५ रम्यक ५ ऐरण्यवत ५ रूपासु त्रिंशत्संख्यास्वपि संहरणं प्रतीत्य दश दश सिध्यन्ति १ ॥ १० ॥

ति चउत्थ अरे अडसय, पंचमए वीस दस दस य सेसे २।
नरगतिग भवण–वण–नर–जोइस–तिरि–तिरिखिणी दसगं ॥ ११ ॥

वेमाणिअ अट्ठसयं, हरिय छऊ पंकपुढविजल चउरो। जोइविमाणिनरित्थी, वीसं भवणवणथी पणगं३।१२

कालद्वारे उत्सर्पिण्यामवसर्पिण्यां च प्रत्येकं तृतीये चतुर्थे चारकेऽष्टशतम्। सामान्योक्तावपि "व्याख्यानतो विशेषप्रतिपत्तिः" इति न्यायात् अवसर्पिण्यां पञ्चमारके विंशतिः। 'सेसे' इति जातावेकवचनम्। ततः शेषेष्वरकेषु प्रत्येकं उत्सर्पिण्यामवसर्पिण्यां च संहरणतो दश दश २। गतिद्वारे नरकत्रिकात् रत्नशर्करावालुकाप्रभालक्षणात् भवनपत्यादिभ्य आगता दश दश सिध्यन्ति ॥ ११ ॥ वैमानिकेभ्योऽत्रागता अष्टशतम्। वनस्पतिभ्यः षट्। पङ्कप्रभायाश्चतुर्थनरकपृथिव्याः पृथिव्यप्कायाभ्यां च प्रत्येकं चत्वारः। ज्योतिष्कादीनां त्रयाणां स्त्रीभ्यो विंशतिर्विंशतिः; व्यन्तरस्त्रीभ्यो भवनपतिस्त्रीभ्यश्चागताः पञ्च पञ्च सिध्यन्तीति शेषः। जघन्यतो नरकत्रिकादिषु एको वा द्वौ वा त्रयो वा। उत्कर्षतो दशेति सर्वत्र ३ ॥ १२ ॥

वीसत्थि दस नपुंसग, पुरिसट्ठसयं नरा नरुव्वट्टा । इय भंगे अट्ठसयं, दस दस सेसट्ठ भंगेसु ४॥१३॥

वेदद्वारे स्त्रियो विंशतिः, इत्यादि। तथा नरा देवादिपुरुषाः नरेभ्यो देवादिपुरुषेभ्य उद्वृत्ता इति आद्यो भङ्गः १, स्त्रीभ्यो नराः २, षण्डेभ्यो नराः ३ इति भङ्गत्रयम् । एवं स्त्रीनपुंसकयोरपि भङ्गत्रयम् । सर्वे नव । तत्राद्यभङ्गे अष्टशतम् । शेषेषु अष्टभङ्गेषु दश दश ४ ॥ १३ ॥

तित्थयरी[1] जिण[2] पत्तेअबुद्ध[3] संबुद्ध[4] दु[1] चउ[2] दस[3] चउरो[4] ५ ।
चउ[1] दस[2] अडसय[3] गिहि परे[2], सलिंग[3] ६ परिहार विणु ओहो ॥ १४ ॥
दस परिहारजुए ७ बुद्धिबोहिथी वीस जीव वीस पहू ८ ।
चउ मइसुअ[1] मइसुअमणनाणे[2] दस सेसे[3] दुगि ओहो ९ ॥ १५ ॥

तीर्थद्वारे तीर्थकर्यः १ जिनाः २ प्रत्येकबुद्धाः ३ स्वयंबुद्धाश्च ४ एकसमयेन सिध्यन्ति यथासंख्यं द्वौ चत्वारो दश चत्वारः। उपलक्षणत्वादष्टशतमतीर्थकृताम् ५। लिङ्गद्वारे गृहि १ पर २ स्व ३ लिङ्गे यथाक्रमं चत्वारो दशाष्टशतम् ६। चारित्रद्वारे 'परिहार विणु ओहो' इति यत्र यत्र चारित्रभङ्गे परिहारविशुद्धिपदं न भवति तत्र तत्र ओघोऽष्टशतं सिध्यन्तीति ज्ञेयम्। इदमुक्तं भवति—सामायिकसूक्ष्मसंपरायथाख्यातचारित्रिणाम्, सामायिकच्छेदोपस्थापनीयसूक्ष्मसंपरायथाख्यातचारित्रिणां च प्रत्येकमष्टशतम् ॥ १४ ॥ परिहारविशुद्धियुते भङ्गे दश दश । इदमुक्तं भवति—सामायिकपरिहारविशुद्धि-

सूक्ष्मसंपराययथाख्यातचारित्रिणाम्, सामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिकसूक्ष्मसंपराययथाख्यातचारित्रिणां दश दश ७। बुद्धद्वारे बुद्धीबोधिताः स्त्रियो विंशतिरेकसमयेन सिध्यन्ति। तथा बुद्धीबोधितजीवानां पुंस्त्रीषण्ढविशेषितानां विंशतिपृथक्त्वम्। अयं च सिद्धप्राभृतोक्तो विशेषः। बुद्धबोधितानां पुरुषाणामष्टशतम्। स्त्रीणां विंशतिः। नपुंसकानां दशकम्। प्रत्येकबुद्धानां दशकम् ८। ज्ञानद्वारे पूर्वभावमपेक्ष्य मतिश्रुतज्ञानिनश्चत्वारः। मतिश्रुतमनःपर्यायज्ञानिनो दश। शेषभङ्गद्विके मतिश्रुतावधिज्ञानिनो मतिश्रुतावधिमनःपर्यायज्ञानिन इत्येवंलक्षणे 'ओहो' इति अष्टशतं सिध्यतीति ९ ॥ १५॥

मज्झे गुरु लहुवगाहण, अडसय दुग चउर अट्ठ जवमज्झे १०।
चुअणंतकालसम्मा, अडसय चउ अचुअ दस सेसा ११। १२ ॥ १६ ॥

अवगाहनाद्वारे मध्यावगाहनायामष्टशतम्। उत्कृष्टायां द्वौ। लघ्व्यां चत्वारो युगपत्सिध्यन्तीति। अष्टौ यवमध्ये। यवमध्यं नाम उत्कृष्टावगाहनायाः पञ्चविंशत्यधिकपञ्चशतधनूरूपाया अर्धं द्विषष्ट्युत्तरद्विशतधनूंषि। एवमग्रेऽपि समार्धस्य यवमध्यमिति संज्ञा ज्ञेया १०। उत्कृष्टद्वारे अनन्तकालच्युतसम्यक्त्वा अष्टशतम्। अच्युतसम्यक्त्वाश्चत्वारः। शेषा असंख्यातकालच्युतसम्यक्त्वाः, संख्यातकालच्युतसम्यक्त्वाश्च प्रत्येकं दश दश सिध्यन्ति ११। अन्तरद्वारेऽल्पविषयत्वात्सूत्रेऽनुक्तमपि दर्श्यते। अन्तरद्वारे एको वा सान्तरः सिध्यति। बहवो वा तत्र बहवो यावदष्टशतम् १२ ॥ १६ ॥

अड १०८ दुरहिअ १०२ सय छनुई, चुलसी दुगसयरि सट्ठि अडयाला।
बत्तीस इक्क दु ति चउ, पण छग सग अड निरंतरिया १३ ॥ १७ ॥

अनुसमयद्वारे अष्टाधिकं शतम्, द्व्यधिकं शतं चेत्यर्थः । अष्टोत्तरशतादयोऽष्टौ यथासंख्यं एकसमयादीन् (दि) यावदष्टौ समयान्निरन्तरं सिध्यन्तीति संबन्धः । त्र्युत्तरशतं यावदष्टशतं सिध्येत् एकसमयमेव यावल्लभ्यते, ततः परतो नियमादन्तरं भवति । तथा सप्तनवत्यादयो द्व्यधिकशतपर्यन्ता द्वौ समयौ यावन्निरन्तरं सिध्यन्ति, ततः परमवश्यमन्तरम् । एवं पञ्चाशीत्यादयः षण्णवतिपर्यन्तास्त्रीन् समयान् यावत् । त्रिसप्तत्यादयश्चतुरशीतिपर्यन्ताश्चतुरः समयान् यावत् । एकषष्ट्यादयो द्वासप्ततिपर्यन्ताः पञ्चसमयान् यावत् । एकोनपञ्चाशदादयः षष्टिपर्यन्ताः षट्समयान् यावत् । त्रयस्त्रिंशदादयोऽष्टचत्वारिंशत्पर्यन्ताः सप्त समयान् यावत् । तथा एकादयो द्वात्रिंशत्पर्यन्ता अष्टौ समयान् यावन्निरन्तरं सिध्यन्तः प्राप्यन्ते, ततः परमवश्यमन्तरम् । अत्रायमाशयः—आद्यसमये जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशत् सिध्यन्तः प्राप्यन्ते । द्वितीयसमयेऽपि जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशत् । एवं तृतीयसमये यावदष्टमसमयेऽपि । ततः परमवश्यमन्तरमेव । एवं सर्वत्रापि योज्यम् १३॥१७॥ गणनाद्वारमल्पबहुत्वद्वारं च प्रागिव द्रष्टव्यम् । तदेवमुक्तं द्रव्यप्रमाणं मौलं द्वितीयं द्वारम् । सांप्रतं क्षेत्रद्वारं स्पर्शनाद्वारं चैकगाथयाह—

लोअग्गठिआ सिद्धा, इह बुंदिं चइय पडिहय अलोए३[1] । फुसइ अणंते सिद्धे, सव्वपएसेहि सो सिद्धो[2] ४॥१८

क्षेत्रद्वारे लोकाग्रे सिद्धशिलातललक्षणे सिद्धाः स्थिताः । इह मनुष्यक्षेत्रे बुन्दिं शरीरं सर्वपरिशाटेन त्यक्त्वा; अलोके प्रतिहता लग्ना न परतोऽपि गमनं संभवति, धर्मास्तिकायाभावादिति ३। स्पर्शनाद्वारे स्पृशत्यनन्तान् सिद्धान् स विवक्षितसमयसिद्धः ।

1 मौलं क्षेत्रद्वारम् । 2 मौलं स्पर्शनाद्वारम् । इदं द्वारद्वय पञ्चदशसु द्वारेषु स्वबुद्ध्या भावनीय सूत्रे सुगमत्वान्नोक्तम् ॥

सर्वप्रदेशैर्जीवसंबन्धिभिर्ये तु तद्देशप्रदेशैः स्पृष्टास्तेऽसंख्येयगुणाः । "फुसइ अणंते सिद्धे, सव्वपएसेहिँ नियमसो सिद्धो । तेऽवि असंखिज्जगुणा, देसपएसेहिँ जे पुट्ठा १ " ४ ॥ १८ ॥

जत्थट्ठसयं सिज्झइ, अट्ठ उ समया निरंतरं तत्थ। वीस दसगेसु चउरो, दु सेसि जवमज्झि चत्तारि५॥१९॥

कालद्वारे चेयं परिभाषा सर्वेषु द्वारेषु यत्र यत्र स्थानेऽष्टशतं सिध्येत् एकसमयेनोक्तम् ,तत्र तत्राष्टौ समयान् यावन्निरन्तरं कालो वाच्यः।[1] यत्र यत्र विंशतिस्तत्र तत्र चतुरः समयान् यावन्निरन्तरं सिद्धिकालो वाच्यः । यत्रापि दश दश एकसमयेन सिध्यन्त उक्तास्तत्रापि चतुरः समयान् यावन्निरन्तरं कालः। शेषेषु स्थानेषु द्वौ समयौ । यवमध्ये चत्वारः । इदं संक्षिप्तत- रमुक्तम्। संप्रत्येतदेव मन्दमतिविनेयानुग्रहार्थं सविस्तरं पञ्चदशस्वपि द्वारेषु तदेव चिन्तयामः—तत्र क्षेत्रद्वारे पञ्चदशस्वपि कर्मभूमिष्वष्टौ समयान् यावन्निरन्तरं सिद्ध्यन्तः प्राप्यन्ते । हरिवर्षादिष्वधोलोके च चतुरश्चतुरः समयान् । नन्दनपण्ड- कवनयोर्लवणाब्धौ च द्वौ द्वौ समयौ १। कालद्वारे उत्सर्पिण्यामवसर्पिण्यां च प्रत्येकं तृतीयचतुर्थारकयोरष्टावष्टौ समयान् शेषेषु चतुरश्चतुरः समयान् २ । गतिद्वारे देवगतेरागता अष्टौ समयान्, शेषगतिभ्य आगताश्चतुरः समयान् ३ । वेद द्वारे पुरुषवेदा अष्टौ समयान् । स्त्रीनपुंसकवेदाः प्रत्येकं चतुरश्चतुरः समयान् । पुरुषेभ्य उद्धृत्य पुरुषा एव सन्तः सिध्य- न्तोऽष्टौ समयान् यावत् । शेषेषु चाऽष्टभङ्गेषु चतुरश्चतुरः समयान् ४ । तीर्थद्वारे तीर्थकरतीर्थे तीर्थकरीतीर्थे चातीर्थकर- सिद्धा उत्कर्षतोऽष्टौ समयान्। तीर्थकरस्तीर्थकर्यश्च द्वौ समयौ ५। लिङ्गद्वारे स्वलिङ्गेऽष्टौ समयान् ,अन्यलिङ्गे चतुरः समयान् ,

---

1 इतोऽग्रे 'संख्यामधिकृत्य द्वितीयचतुर्थसमयादिषु अष्टशतं न्यूनमेव भवतीति ज्ञेयम्' इति लभ्यतेऽधिकम्॥

गृहिलिङ्गे द्वौ समयौ ६। चारित्रद्वारे अनुभूतपरिहारविशुद्धिकचरित्राश्चतुरः समयान्। शेषा अष्टावष्टौ समयान् ७।बुद्धद्वारे स्वयंबुद्धा द्वौ समयौ, बुद्धबोधिता अष्टौ समयान्, प्रत्येकबुद्धा बुद्धीबोधिताः स्त्रियो नरादयो वा सामान्यतः प्रत्येकं चतुरः समयान् ८। ज्ञानद्वारे मतिश्रुतज्ञानिनो द्वौ समयौ,मतिश्रुतमनःपर्यायज्ञानिनश्चतुरः समयान्, मतिश्रुतावधिज्ञानिनो मतिश्रुतावधिमनःपर्यायज्ञानिनो वाष्टावष्टौ समयान् ९। अवगाहनाद्वारे उत्कृष्टायां जघन्यायां चावगाहनायां द्वौ द्वौ समयौ, यवमध्ये चतुरः समयान्, मध्यमावगाहनायां पुनरष्टौ समयान् १० । उत्कृष्टद्वारे अपतितसम्यक्त्वा द्वौ समयौ संख्येयकालप्रतिपतिता असंख्येयकालप्रतिपतिताश्च चतुरश्चतुरः समयान्, अनन्तकालप्रतिपतिता अष्टौ अष्टौ समयान् ११। इत्यन्तरादीनि चत्वारि द्वाराणि नेहावतरन्ति॥१९॥गतं मौलं पञ्चमं काल इति द्वारम्। सांप्रतं षष्ठमन्तरद्वारमाह—

जंबुद्दीवे धायइ, ओह विभागे य तिसु विदेहेसु । वासपहुत्तं अंतर, पुक्खरदुविदेह वासहियं १ ॥२०॥

क्षेत्रविभागे 'ओह' इति सामान्येन जम्बूद्वीपे धातकीखण्डे च विभागेन विशेषचिन्तायां जम्बूद्वीपसत्के एकस्मिन् विदेहे द्वयोश्च धातकीखण्डसत्कयोरेवं त्रिषु विदेहेषु उत्कृष्टं वर्षपृथक्त्वमन्तरं सिद्धिगमनलक्षणम् । तथा पुष्करवरद्वीपार्द्धे ओघेन विभागेन च तद्विदेहयोश्च वर्षमधिकमन्तरमिति १ ॥ २० ॥

भरहेरवए जम्मा, कालो जुगलीण संखसमसहसा। संहरण २ नरयतिरिए, समसहसा समसंयपहुत्तं ॥२१॥
तिरिईसुरेनरेनारीसूरीहिँ उवएससिद्धिलद्धीए। वासहिअंतर अहसयं, बोहीओ संखसमसहसो ॥ २२ ॥
सयमुवएसा भूजलेवणेसुहेमीसाणपढमदुगनेरया ३ ।

कालद्वारे भरतैरावतेषु जन्मतः कालो युगलिनां युगलिकालः किञ्चिदूनाष्टादशसागरकोटाकोटीलक्षणः । अवसर्पिण्या आद्यद्वितीयतृतीयारकाः उत्सर्पिण्याश्चतुर्थपञ्चमषष्ठारका इति भावः । संहरणतः संख्येयानि वर्षसहस्राणि २ । गतिद्वारे नरकतिर्यग्गत्योरागत्य सिध्यन्तो यथाक्रमं वर्षसहस्रं समाशतपृथक्त्वं चान्तरम् ॥ २१ ॥ तिरश्चादिभ्य आगत्योपदेशेन सिध्यतां सिद्धिलब्धेः शिवप्राप्तेरन्तरं वर्षं साधिकम् । अथ स्वयंबोधितस्ततः संख्यातसमासहस्राः ॥ २२ ॥ पृथिव्यब्वनस्पतिसौधर्मेशानाद्यद्वितीयनरकेभ्य आगत्य स्वयमुपदेशाद्वा सिध्यन्तः संख्याताः समासहस्राः ३ ॥

थीकीवेसुं भंगट्ठगे असंखिज्जसमसहसा ॥ २३ ॥

नरवेअ पढमभंगे, वरिसं ४ पत्तेअं[1]जिण[2]जिणी[3]सेसा । संखसमसहसं पुव्वासहस[1]पिहू[2]णंत[3]हिअवरिसं ५ ॥ २४ ॥

वेदद्वारे स्त्रीक्लीबवेदयोः शेषभङ्गाष्टके च नराः स्त्रीभ्य आगत्य सिध्यन्तीत्यादिपूर्वोक्तलक्षणे संख्येयाः समासहस्राः॥२३॥ नरवेदे तथा प्रथमभङ्गे पुरुषाः पुरुषेभ्य उद्धृत्य सिध्यन्तीतिलक्षणे वर्षं साधिकमित्यध्याहारः ४ । तीर्थद्वारे प्रत्येकबुद्धजिनजिनी शेषाः जिनीति प्राकृतत्वात् ङीप्रत्यये तीर्थकरी, शेषाः सामान्यतः सर्वपुरुषाः, एतेषु यथासंख्यं संख्यातसमासहस्राणि पूर्वसहस्रपृथक्त्वम् , 'अणंत' इति अनन्तकालः, समधिकं च वर्षमुत्कृष्टमन्तरम् ५। 'पुव्वासहसपिहू' इत्यत्र पूर्वशब्दस्य दीर्घत्वम् । 'दीर्घह्रस्वौ मिथो वृत्तौ' इति सूत्रेण ॥ २४ ॥

संखसमसहस गिहि अन्नलिंगाहिअ वरिस तिचरण सलिंगे ।
सेसचरित्ते जुअली, ६ । ७ बुद्धबोहि अ पुरिस वरिसहिअं ॥ २५ ॥

संखसमसहस सेसा, पुवसहस्सप्पहुत्त संबुद्धे ८। मइसुअ पलियअसंखो, भागोहिजुएऽहिअं बरिसं॥२६॥
सेसदुभंगे संखा, समसहसा ९ गुरुलहूइ जवमज्झे। सेढीअसंखभागो, मज्झवगाहे वरिसमहिअं १०॥२७॥

लिङ्गद्वारे गृहिलिङ्गेऽन्यलिङ्गे च संख्यातसमासहस्राणि। स्वलिङ्गे च वर्षं समधिकम् ६। चारित्रद्वारे 'तिचरण' इति चारित्रत्रये सामायिकसूक्ष्मसंपरायथाख्यातस्वरूपे समधिकं वर्षम्, शेषचारित्रे च्छेदोपस्थापनपरिहारविशुद्धियुक्ते पूर्वोक्तचारित्रत्रये। किमुक्तं भवति—सामायिकच्छेदोपस्थापनसूक्ष्मसंपराययथाख्यातचारित्रिणां सामायिकच्छेदोपस्थापनपरिहारविशुद्धिसूक्ष्मसंपराययथाख्यातचारित्रिणां च 'जुअली' इति युगलिकालोऽष्टादशातरकोटाकोट्यः किञ्चिदूनाः। यत एते चरणे भरतैरावतेषु प्रथमचरमतीर्थकरतीर्थ एव प्राप्येते, तत्र चेदमन्तरमुत्कर्षतो लभ्यत इति ७। बुद्धद्वारे बुद्धबोधितानां पुरुषाणां समधिकं वर्षम्। सूत्रे च 'तिचरण सलिङ्गे' इति द्वारव्यत्ययो गाथाबन्धानुलोम्यादिति ज्ञेयम्॥२५॥ 'सेसा' इति षष्ठ्यर्थे प्रथमा। ततः शेषाणां बुद्धबोधितस्त्रीणां प्रत्येकबुद्धानां च संख्यातसमासहस्राण्यन्तरम्, स्वयंबुद्धे पूर्वसहस्रपृथक्त्वम्८॥ ज्ञानद्वारे मतिश्रुतज्ञानिनामुत्कृष्टमन्तरं पल्याऽसंख्यातभागः, अवधियुक्ते मतिश्रुतज्ञाने समधिकं वर्षम् ॥ २६ ॥ शेषभङ्गद्विके मतिश्रुतमनःपर्यायलक्षणे मतिश्रुतावधिमनःपर्यायलक्षणे च संख्यातसमासहस्राणि ९। अवगाहनाद्वारे गुर्ववगाहनायां लघ्ववगाहनायां च यवमध्ये च प्रत्येकं "चउदसरज्जू लोगो, बुद्धिकओ सत्तरज्जुमाणघणो। तद्दीहेगपएसा सेढीपयरो य तव्वग्गो १" इत्येवंलक्षणश्रेण्यसंख्येयभागः श्रेण्यसंख्येयभागगतप्रदेशापहारकाल इत्यर्थः। मध्यमावगाहने वर्षमधिकम्१०॥२७॥

अचुअ असंखं सुअही, अणंतहिअवास सेस संखसमा ११।

संतर १२ अणंतरं १३ इग, अणेग १४ समसहस संखिज्जा ॥ २८ ॥

उत्कृष्टद्वारे सूचनात्सूत्रस्य अच्युतसम्यक्त्वानां असंख्यांशो भाग उद्धेः सागरोपमस्य। 'अणंत' इति अनन्तकालच्युतसम्यक्त्वानां साधिकं वर्षम्। 'सेस' इति असंख्यातकालपतितसंख्यातकालपतितानाम् 'संखसमा' इति "व्याख्यानतो विशेषप्रतिपत्तिः" इति न्यायात् संख्यातसमासहस्राणि ११। अन्तरद्वारे सान्तरं सिध्यताम् १२। अनुसमयद्वारे निरन्तरं सिध्यताम् १३। गणनाद्वारे एककानामनेककानां च सिध्यतां उत्कृष्टमन्तरं संख्येयानि वर्षसहस्राणि १४ ॥ २८ ॥ उपसंहरन्नाह—

इअ गुरुअंतरमुत्तं, लहु समओ ६ भावु सव्वहिं खइओ ७।

इत्येवं 'जंबुद्दीवे धायई' इत्यादिपूर्वोक्तप्रमाणेन गुरुमुत्कृष्टमन्तरं सिद्धिगमनविरहकाले उक्तम्। लघु जघन्यमन्तरं सर्वत्र पञ्चदशस्वपि द्वारेषु एकसमयः ६। इत्युक्तं मौलं षष्ठमन्तरद्वारम्। संप्रति भावद्वारमाह—सर्वत्र सर्वद्वारेषु भावः क्षायिक एव ७। संप्रत्यल्पबहुत्वद्वारमाह—

चउ दस वीसा वीसप्पहुत्त अट्ठस्सयं कमसो ॥ २९ ॥

सम थोव समा संखागुणिआ इय भणिअणंतरा सिद्धा। अह उ परंपरसिद्धा, अप्पबहुं मुत्तु भणिअत्था ३०

'चउ दस' इत्यादि। तत्र ये तीर्थकरा ये च जले ऊर्ध्वलोकादौ चत्वारश्चत्वारः सिध्यन्ति, ये च हरिवर्षादिषु संहरणतो दश दश सिध्यन्ति, ते परस्परं समास्तुल्याः। तथैवोत्कर्षतो युगपदेकसमयेन प्राप्यमाणत्वात्। तेभ्यो विंशतिसिद्धाः

स्तोकाः तेषां स्त्रीषु दुःषमायामेकस्मिन् विजये वा प्राप्यमाणत्वात्, तैस्तुल्या विंशतिपृथक्त्वसिद्धाः। यतस्तेऽधोलौकिकग्रामेषु। बुद्धीबोधितस्त्र्यादिषु वा लभ्यन्ते, ततो विंशतिसिद्धैस्तुल्याः। क्षेत्रकालयोः स्वल्पत्वात्कादाचित्कत्वेन च संभवादिति। तेभ्योऽष्टशतसिद्धाः संख्यातगुणिताः संख्येयगुणाः इत्यर्थः। गतमल्पबहुत्वद्वारम्। इत्येवं प्रागुक्तप्रकारेणानन्तराः सिद्धाः भणिताः। अथानन्तरं पुनः परम्परासिद्धा भणितव्याः। ते पुनरल्पबहुत्वं मुक्त्वा भणितार्थाः। अयं विशेषः—द्रव्यप्रमाणे सर्वेष्वपि द्वारेषु सर्वत्रैवानन्ता वक्तव्याः। क्षेत्रस्पर्शने प्रागिव। कालः पुनरनादिरूपोऽनन्तो वक्तव्यः, अत एवासंभवादन्तरं न वाच्यम्॥ २९॥ ३०॥ संप्रति अवशिष्टमल्पबहुत्वं उच्यते—

सामुद्द दीव जल थल, थोवा संखगुण थोव संखगुणा। उड्ढ अह तिरिअलोए, थोवा दुन्नि पुण संखगुणा ३१॥

लवणे कालोअम्मि य, जंबुद्दीवे अ धायईसंडे। पुक्खरवरदीवड्ढे, कमसो थोवा उ संखगुणा॥ ३२॥

हिमवंते हेमवए, महहिमवं कुरुसु हरि निसढ भरहे। संखगुणा य विदेहे, जंबुद्दीवे समा सेसे॥ ३३॥

समुद्रे द्वीपे च सिद्धाः यथाक्रमं स्तोकाः संख्यातगुणाश्च। तथा जलसिद्धाः स्तोकाः, तेभ्यः संख्यातगुणाः स्थलसिद्धाः। तथा ऊर्ध्वलोकसिद्धाः स्तोकाः, तेभ्योऽधोलोकसिद्धाः संख्येगुणाः, तेभ्योऽपि तिर्यग्लोकसिद्धाः संख्येयगुणाः॥ ३१॥ लवणे सिन्धौ सिद्धाः स्तोकाः, तेभ्यो यथोत्तरं कालोदादौ सिद्धाः संख्येयगुणाः॥३२॥ जम्बूद्वीपे हिमवत्सिद्धाः स्तोकाः, ततो हैमवते संख्येयगुणाः, ततो महाहिमवति, ततो देवकुरुषु, ततो हरिवर्षे, ततो निषधे, ततो भरते, स्वस्थानत्वात् ततो विदेहे संख्येयगुणाः सदाभावात् महत्त्वाच्च। 'समा सेसे' इति समास्तुल्याः शेषे, जातावेकवचनम्। शेषेषु क्षेत्रेषु

तुल्यायामविस्तरेषु । इयमत्र भावना—शिखरिणि हिमवत्तुल्याः, हैरण्यवते[1] हैमवत्तुल्याः, रुपिणि[2] महाहिमवत्तुल्याः, उत्तरकुरुषु देवकुरुतुल्याः, रम्यके हरिवर्षतुल्याः, नीलवति निषधतुल्याः, ऐरवते भरततुल्याः सिद्धाः । हेतुः सर्वत्र क्षेत्रतुल्यबाहुल्यमेव ॥ ३३ ॥

चुल्ल महहिमव निसढे, हेम कुरू हरिसु भारह विदेहे । चउ छट्टे साहीया, धायइ सेसा उ संखगुणा ॥ ३४ ॥

पुक्खरवरेऽवि एवं, चउत्थठाणंमि नवरि संखगुणा । एसुं संहरणेणं, सिज्झंति समा य समगेसु ॥ ३५ ॥

धातकीखण्डे क्षुद्रहिमवति सिद्धाः स्तोकाः १ ततो महाहिमवति संख्यातगुणाः २ ततो निषधे संख्यातगुणाः ३ ततो हैमवते विशेषाधिकाः ४ ततो देवकुरुषु संख्यातगुणाः ५ ततो हरिवर्षे विशेषाधिकाः ६ ततो भरते संख्यातगुणाः ७ । 'भारह' इति सूत्रे आकारः 'अतः समृद्ध्यादौ वा' इति प्राकृतसूत्रे पाठः । ततो विदेहेषु संख्यातगुणाः ८ । क्षेत्रबाहुल्यात्स्वस्थानत्वाच्च 'चउ छट्टे साहीया' इत्यादि भावितमेव ॥ ३४ ॥ पुष्करार्द्धेऽप्येवं धातकीखण्डवद् ज्ञेयम् । केवलमियान् विशेषः—चतुर्थस्थाने हैमवतलक्षणे संख्यातगुणा वाच्याः । ननु हिमवदादिषु मनुष्योत्पत्त्यभावात् कथं सिद्धिसंभवः ? इत्याह—'एसुं संहरणेणं' इति एषु हिमवदादिषु संहरणेन देवादिसंहरणमधिकृत्य सिध्यन्तीति । यद्येवं शिखरिगिर्यादिषु तर्हि सिध्यतां का वार्त्ता ? इत्याह—'समा य समगेसु' इति समास्तुल्याः समकेषु समक्षेत्रपर्वतेषु । यथा हैमवतस्य हैरण्यवतस्य च तुल्याः । देवकुरूणामुत्तरकुरूणां चेत्यादि । तथा हिमवतः शिखरितुल्याः । महाहिमवतो रुक्मितुल्या इत्यादि

1 'ऐरण्यवते' इत्यपि । 2 रुक्मिणि ॥

॥ ३५ ॥ अथ सर्वक्षेत्रपर्वतादिसमवायेनाल्पबहुत्वमाह गाथाद्वयेन—

जंबु निसहंत मीसे, जं भणिअं पुव्वमहिअ बीअहिमे ।दु ति महहिम हिमवंते, निसढ महाहिमवबिअहिमवे

तिअनिसहे बिअकुरुसुं, हरिसु अ तह तइअहेमकुरु हरिसु ।

दु दु संख एग अहिआ, कमभरहविदेहतिग संखा १ ॥ ३७ ॥

अत्रैवं पदघटना—'मीसे' इति क्षेत्रद्विकादियोगे 'जंबु' इति जम्बूद्वीपे हिमवदादिनिषधान्तं यद्भणितं पूर्वं तत्तथैव ज्ञेयम् । तथाहि—जम्बूद्वीपसत्के हिमवति सिद्धाः स्तोकाः १ ततो हैमवते संख्यातगुणाः २ ततो महाहिमवति ३ ततो देवकुरुषु ४ ततो हरिवर्षे ५ ततो निषधे संख्येयगुणाः ६ ततः 'अहिअ' इति विशेषाधिकाः 'बीअहिमे' इति द्वितीयहिमवति धातकीखण्डहिमवतीत्यर्थः ७। 'दु ति महहिम हिमवंते' इति ततो द्वितीयमहाहिमवति धातकीसत्के इत्यर्थः ८। तृतीये हिमवति पुष्कराद्धसत्के इत्यर्थः संख्येयगुणाः ९। तेभ्यः 'दु ति' इत्यनुवर्त्तते ततो द्वितीये धातकीखण्डसत्के निषधे १० तृतीये पुष्करार्द्धसत्के महाहिमवति च सिद्धाः संख्येयगुणाः ११ ततः 'बिअहिमवे' इति धातकीखण्डसत्के हैमवते विशेषाधिकाः १२ तेभ्योऽपि तृतीयनिषधे पुष्करार्द्धसत्के सिद्धाः संख्येयगुणाः १३ ततो द्वितीयकुरुषु धातकीखण्डसत्केषु कुरुषु देवकुरुषु संख्येयगुणाः १४ तेभ्यो धातकीखण्डसत्क एव हरिवर्षे विशेषाधिकाः १५ तथा तृतीये पुष्करार्द्धसत्के हैमवते संख्यातगुणाः १६ ततोऽपि पुष्करार्द्ध एव देवकुरुषु सिद्धाः संख्येयगुणाः १७ तेभ्योऽपि तत्रैव हरिवर्षे विशेषाधिकाः १८ 'दु दु संख एग अहिआ' इति द्वयोर्द्वयोः स्थानयोः संख्यातगुणा इति वाच्यम् । एकस्मिन् स्थाने विशेषाधिका इति वाच्यम् ।

एतच्च पूर्वमेव सविस्तरं भावितम्। 'कम' इति ततः क्रमेण भरतत्रिकसिद्धाः विदेहत्रिकसिद्धाश्च यथोत्तरं संख्यातगुणा वाच्याः। इदमुक्तं भवति—पुष्करार्द्धहरिवर्षसत्केभ्यः सिद्धेभ्यो जम्बूद्वीपभरतसिद्धाः संख्येयगुणाः १९ तेभ्यो धातकीखण्डभरतसिद्धाः संख्येयगुणाः २० ततः पुष्करार्द्धभरतसिद्धाः संख्येयगुणाः २१ ततो जम्बूद्वीपविदेहसिद्धाः संख्येयगुणाः २२ ततो धातकीखण्डविदेहसिद्धाः संख्यातगुणाः २३ ततः पुष्करवरद्वीपार्द्धविदेहसिद्धाः संख्यातगुणाः २४। समानक्षेत्रेषु समानगिरिषु च निजनिजवर्षैर्वर्षधरैश्च समं तुल्या वाच्याः ॥ ३६ ॥ ३७ ॥ गतं क्षेत्रद्वारम्। संप्रति कालद्वारमाह—

दुसमदुसमाइ थोवा, दूसमसंखगुण सुसमसुसमाए। अस्संखा पण छट्ठे, अहिआ तुरिअंमि संखगुणा॥३८॥

अवसप्पिणि अरएसुं, एवं ओसप्पिणीइ मीसेवि। परमवसप्पिणि दुस्समअहिआ सेसेसु दुसुवि समा॥३९॥

अवसर्पिण्यां संहरणतो दुःषमदुःषमाया सिद्धाः स्तोकाः १ दुःषमायां संख्यातगुणाः २ तेभ्यः सुषमदुःषमायामसंख्येयगुणाः कालस्यासंख्येयत्वात् ३ 'पण छट्ठे अहिआ' इति ततः पञ्चमारके सुषमाभिधे 'अधिका' विशेषाधिकाः ४ ततः षष्ठे सुषमसुषमाख्ये विशेषाधिकाः ५ तेभ्यः 'तुरीये' चतुर्थे दुःषमसुषमारके सिद्धाः संख्यातगुणाः ६। ३८॥ एवमवसर्पिण्या अरकेषु गणितम्। उत्सर्पिण्या अरकेष्वप्येवमेव ज्ञेयम्। 'मीसेवि' इति अवसर्पिण्युत्सर्पिणीरूपे मिश्रेऽप्येवमेव, परं केवलमयं विशेषः—उत्सर्पिणीदुःषमारके 'अधिका' विशेषाधिका वाच्याः। द्वयोरप्यवसर्पिण्युत्सर्पिण्योः शेषेष्वरकेषु 'समाः' तुल्या वाच्याः। इदमुक्तं भवति—द्वयोरप्येकान्तदुःषमासिद्धाः सर्वस्तोकाः १ तत उत्सर्पिणीदुःषमारके सिद्धा विशेषाधिकाः २ ततोऽवसर्पिण्यां दुःषमासिद्धाः संख्येयगुणाः ३ ततो द्वयोरपि सुषम दुःषमासिद्धा असंख्येयगुणाः ४ तेभ्योऽपि द्वयोरपि

सुषमासिद्धा विशेषाधिकाः ५ तेभ्योऽपि द्वयोरपि सुषमसुषमासिद्धा विशेषाधिकाः ६ तेभ्योऽपि द्वयोरपि दुःषमसुषमासिद्धाः संख्येयगुणाः ७ ततोऽवसर्पिण्यां सर्वसिद्धाः संख्येयगुणाः ८ तेभ्योऽप्युत्सर्पिण्याः सर्वसिद्धा विशेषाधिकाः ९ । २ ॥ ३९ ॥ गतं कालद्वारम्, संप्रति गतिद्वारमाह—

थी १ नर २ नरय ३ तिरित्थी ४, तिरि ५ देवी ६ देव ७ थोव १ संखगुणा ६ ।
इग १ पणिंदि २ थोव १ संखा २, तरु १ भू २ जल ३ तसिहि ४ संखगुणा ॥ ४० ॥
चउ १ ति २ दुग ३ नरय तरु ४, महि ५ जल ६ भवण ७ । ८ वणिंद ९ । १० जोइ ११ देविसुरा १२ ।
नारी १३ नर १४ रयणाए १५, तिरिई १६ तिरि १७ णुत्तरा १८ य सुरा २९ ॥ ४१ ॥
दु पढमदिवदेवि ३० । ३१ सुरा ३२ ॥ ३ ।

मानुषीभ्योऽनन्तरमुद्धृत्य सिद्धाः सर्वस्तोकाः शेषेभ्यो यथोत्तरं संख्येयगुणा वाच्याः । तथा एकेन्द्रियेभ्योऽनन्तरमुद्धृत्य सिद्धाः स्तोकाः, तेभ्यः पञ्चेन्द्रियेभ्योऽनन्तरागता सिद्धाः संख्येयगुणाः । तथा तरुभ्योऽनन्तरागताः सिद्धाः स्तोकाः, ततः पृथिवीकायेभ्यः, जलकायेभ्यः, त्रसकायेभ्योऽनन्तरागता यथोत्तरं संख्यातगुणाः ॥ ४० ॥ चतुर्थनरकागताः सिद्धाः सर्वस्तोकाः संख्येयगुणाः १ एवं तृतीय २ द्वितीयनरकागताः सिद्धाः संख्येयगुणाः ३ तरुभ्यः पर्याप्तबादरप्रत्येकवनस्पतिभ्यः ४ महीकायिकेभ्यः पर्याप्तबादरपृथिवीकायिकेभ्यः ५ ततो बादरजलकायिकेभ्यः ६ ततो भवनपतिदेवीभ्यः ७ ततो

भवनपतिदेवेभ्यः ८ ततो व्यन्तरदेवीभ्यः ९ ततो व्यन्तरदेवेभ्यः १० ततो ज्योतिष्कदेवीभ्यः ११ ततो ज्योतिष्कदेवेभ्यः १२ नारीभ्यः १३ नरेभ्यः १४ ततो रत्नप्रभायाः १५ तिरश्चीभ्यः १६ तिर्यग्भ्यः १७ ततोऽनुत्तरोपपातिदेवेभ्यः १८ ग्रैवेयकेभ्यः १९ ततोऽच्युतदेवलोकेभ्यः २० ततोऽप्यारणात् २१ ततः प्राणतात् २२ एवमधोमुखं तावज्ज्ञेयं यावत्सनत्कुमारादनन्तरमुद्धृत्य सिद्धा यथोत्तरं संख्येयगुणाः २९ ततो द्वितीयदिवो देवीभ्यः ३० सौधर्मदेवीभ्यः ३१ द्वितीयदिवो देवेभ्यः ३२ ततः प्रथमदिवो देवेभ्यः ३३ अनन्तरमुद्धृत्य सिद्धा यथोत्तरं संख्येयगुणाः ३४। उक्तं च—"नरगचउत्था पुढवी, तच्चा दुच्चा तरूपुढविआऊ। भवणवइदेविदेवा, एवं वणजोइसाणंपि ॥१॥ मणुई मणुस्स पढमा, नारय तत्तो तिरित्थि तिरिआ य। देवा अणुत्तराई, सव्वेवि सणंकुमारंता ॥ २ ॥ ईसाणदेविसोहम्मदेविईसाणदेवसोहम्मा। सव्वेवि जहाकमसो, अणंतराया य संखगुणा ॥ ३ ॥" गतं गतिद्वारं ३ संप्रति वेदद्वारमाह—

कीवि त्थी नर ४ गिहन्ननिअलिंगे ५। तित्थयरि तित्थपत्ते, समणी मुणि कमिणसंखगुणा ॥ ४२ ॥
तित्थयर तित्थिपत्ते समणी मुणिणंतसंखसंखगुणा ६।

वेदद्वारे क्लीबसिद्धाः स्तोकाः, ततः स्त्रीसिद्धाः संख्येयगुणाः, ततः पुरुषसिद्धाः संख्यातगुणाः ४। लिङ्गद्वारे गृहलिङ्गसिद्धाः स्तोकाः, तेभ्योऽन्यलिङ्गसिद्धा असंख्येयगुणाः, ततः स्वलिङ्गसिद्धा असंख्येयगुणाः। अत्र च द्वारे 'मुणि कमिण संखगुणा' इत्यत्र सूत्रपाठेऽकारविश्लेषो द्रष्टव्यः 'गिहिअन्नसलिङ्गेहिं थोवा दुवे असंखगुणा' ५। तीर्थद्वारे तीर्थकरीसिद्धाः स्तोकाः,

1 'अनन्तरच्युताः संख्यातगुणा आरणे, ततः संख्यातगुणाः प्राणते, प्राणतादेवं' इत्थं रूपेण क्वचित्।

तेभ्यः तत्तीर्थ एव प्रत्येकबुद्धसिद्धाः संख्येयगुणाः, तेभ्यस्तत्तीर्थ एवातीर्थकरी श्रमणीसिद्धाः संख्यातगुणाः, तेभ्यस्तत्तीर्थमुनिसिद्धाः संख्येयगुणाः ॥ ४२ ॥ तीर्थकरीतीर्थमुनिसिद्धेभ्यः तीर्थकरसिद्धा अनन्तगुणाः, तेभ्यस्तत्तीर्थ एव प्रत्येकबुद्धसिद्धाः संख्येयगुणाः, ततः श्रमणीसिद्धाः संख्येययगुणाः, ततस्तत्तीर्थ एव मुनिसिद्धाः संख्यातगुणाः ६ ।

परिहार चउग पणगे, छेय ति चउ सेसचरणंमि ॥ ४३ ॥

संख असंख दु संखा ७. सं पत्ते बुद्धि बुद्ध संखगुणा ८ ।

मणजुअ थोवा मइसुअ, संख चउ असंख तिग संखा ९ ॥ ४४ ॥

चारित्रद्वारे च्छेदोपस्थापनपरिहारविशुद्धिकसूक्ष्मसंपराययथाख्यातचारित्रसिद्धा इति चतुष्कसिद्धाः स्तोकाः १। सामायिकरहितं च च्छेदोपस्थापनं भग्नचारित्रस्यावगन्तव्यम् । ततः सामायिकच्छेदोपस्थापनपरिहारविशुद्धिकसूक्ष्मसंपराययथाख्यातचारित्रसिद्धा इति पञ्चकसिद्धाः संख्येयगुणाः २, तेभ्यः च्छेदोपस्थापनसूक्ष्मसंपराययथाख्यातचारित्रत्रिकसिद्धा असंख्यातगुणाः ३, ततोऽपि सामायिकच्छेदोपस्थापनसूक्ष्मसंपराययथाख्यातरूपचतुष्कसिद्धाः संख्येयगुणाः ४, शेषचारित्रभङ्गे ॥४३॥ ततः सामायिकसूक्ष्मसंपराययथाख्यातचारित्रसिद्धाः संख्यातगुणाः ५।७। बुद्धद्वारे 'सं' इति स्वयंबुद्धसिद्धाः स्तोकाः १, तेभ्यःप्रत्येकबुद्धसिद्धाः २ तेभ्योऽपि बुद्धीबोधिताः सिद्धाः ३ तेभ्योऽपि बुद्धबोधिताः सिद्धाः ४ क्रमेण त्रयोऽपि

1 'अतीर्थे मुनिसिद्धाः' इत्येवंरूप कचित् । कचित्तु 'तेभ्यस्तत्तीर्थ एव मुनिसिद्धाः' इत्येवंरूपेण ॥

संख्यातगुणाः ८। ज्ञानद्वारे मतिश्रुतज्ञानसिद्धाः मनःपर्यायज्ञानयुक्ताः स्तोकाः मतिश्रुतमनःपर्यायज्ञानसिद्धाः सर्वस्तोकाः १ तत आ आवृत्त्या 'मइसुअ' इति पदमेव व्याख्यायते, तेभ्यो मतिश्रुतज्ञानसिद्धाः संख्येयगुणाः, २ 'चउ' इति तेभ्योऽपि मतिश्रुतावधिमनःपर्यायज्ञानसिद्धाः असंख्येयगुणाः ३ ततो मतिश्रुतावधिज्ञानत्रयसिद्धाः संख्येयगुणाः ४। ९॥ ४४॥

इत ऊर्ध्वं गाथाबन्धानुलोम्यात् द्वाराणां व्यत्ययेन व्याख्यानमाह—

अडसमयसिद्ध थोवा, संखिज्जगुणा उ सत्तसमयाई १३। अचुअ चुअतीसु थोवा, असंख संखा असंखा य ११

अनुसमयद्वारे सर्वस्तोका अष्टसमयसिद्धाः, अष्टौ समयान् यावन्निरन्तरं सिध्यतां जीवानां स्तोकानामेव लभ्यमानत्वात्। ततः सप्तसमयसिद्धाः संख्येगुणाः। एवं समयसमयहान्या तावद्वाच्यं, यावद्विसमयसिद्धाः संख्येयगुणाः। एकसमयस्य तु नैरन्तर्याभावात् अत्रासंभवः १३। उत्कृष्टद्वारे 'अचुअ' इति अच्युतसम्यक्त्वसिद्धाः स्तोकाः 'चुअतीसु' इति त्रिषु च्युतसम्यक्त्वेषु संख्यातकालच्युतसम्यक्त्वेष्वसंख्यातकालच्युतसम्यक्त्वेष्वनन्तकालच्युतसम्यक्त्वेषु च यथोत्तरं असंख्यातसंख्यातासंख्यातगुणत्वं वाच्यम्। अत्रायमर्थः—सर्वस्तोका अप्रतिपतितसम्यक्त्वसिद्धाः, ततः संख्येयकालप्रतिपतितसम्यक्त्वसिद्धा असंख्येयगुणाः, तेभ्योऽसंख्येयकालप्रतिपतितसम्यक्त्वसिद्धाः संख्येयगुणाः, तेभ्योऽप्यनन्तकालप्रतिपतितसम्यक्त्वसिद्धा असंख्येयगुणाः ११॥ ४५॥

एगो जा जवमज्झं, संखगुण परा उ संखगुणहीणा। छम्मासंता १२ लहु गुरु, मज्झ तणू थोव दुअसंखा १०। ४६

अन्तरद्वारे षण्मासान्तरसिद्धाः स्तोकाः, तत एकसमयान्तरसिद्धाः संख्येयगुणाः। ततो द्विसमयान्तरसिद्धाः संख्ये-

यगुणाः । एवं तावद्वाच्यं यावद्यवमध्यम् । ततः परं संख्यातगुणहानिः संख्यातगुणहानिः तावद्वाच्या यावदेकसमयहीनषण्मासान्तरसिद्धेभ्यः षण्मासान्तरसिद्धाः संख्येयगुणहीनाः । अत्रायमाशयः—यवमध्यात्परतः संख्यातगुणहीनसंख्यातगुणहीनास्तावद्वाच्या यावदेकसमयहीनषण्मासान्तरसिद्धाः संख्यातगुणहीनाः १२ । अवगाहनाद्वारे लघुतनुसिद्धाः स्तोकाः, ततो गुरुतनुसिद्धा असंख्येयगुणाः, ततो मध्यतनुसिद्धा असंख्येयगुणाः । अत्रायं विशेषः–सर्वस्तोकाः सप्तहस्तावगाहनाः सिद्धाः, ततः पञ्चधनुःशतप्रमाणावगाहनाः सिद्धा विशेषाधिकाः ॥ १० ॥ ४६ ॥

अट्ठसयसिद्ध थोवा, सत्तहिअ अणंतगुणिअ जा पन्ना। जा पणवीसमसंखा, एगंता जाव संखगुणा १४॥४७

गणनाद्वारे अष्टशतसिद्धाः स्तोकाः, तेभ्यः सप्ताधिकशतसिद्धा अनन्तगुणाः; एवमेकैकहान्याऽनन्तगुणास्तावद्वाच्या यावदेकपञ्चाशत्सिद्धेभ्यः पञ्चाशत्सिद्धा अनन्तगुणाः । ततस्तेभ्यः एकोनपञ्चाशत्सिद्धा असंख्येयगुणाः, ततोऽप्यष्टचत्वारिंशत्सिद्धा असंख्येयगुणाः; एवमेकैकहान्या तावद्वाच्यं यावत् षड्विंशतिसिद्धेभ्यः पञ्चविंशतिसिद्धा असंख्येयगुणाः । ततस्तेभ्यश्चतुर्विंशतिसिद्धाः संख्येयगुणाः; एवमेकैकहान्या तावद्वाच्यं यावद्द्विकसिद्धेभ्य एकैकसिद्धाः संख्येयगुणाः १४ ॥४७॥

संप्रत्यत्रैवाल्पबहुत्वद्वारे यो विशेषस्तमाह—

उम्मंथिअ उद्धट्ठिअ, उक्कडि वीरासणे निउंजे अ। पासिल्लग उत्ताणग, सिद्धा उ कमेण संखगुणा १५॥४८॥

सर्वस्तोका उन्मन्थितसिद्धाः अधोमुखसिद्धाः । ते च पूर्ववैरिभिः पादेनोत्पाट्य नीयमाना अधोमुखकायोत्सर्गस्था वा वेदितव्याः १ । तेभ्य ऊर्ध्वस्थितकायोत्सर्गसिद्धाः २, तेभ्यः उत्कटिकासनसिद्धाः ३, तेभ्यो वीरासनसिद्धाः ४ तेभ्यो-

ऽपि न्युब्जासनसिद्धाः न्युब्ज उपविष्ट एवाधोमुखो द्रष्टव्यः ५, तेभ्यः पार्श्वस्थितसिद्धाः ६ तेभ्योऽप्युत्तानकस्थितसिद्धाः ७। एते क्रमेण यथोत्तरं संख्येयगुणाः १५ ॥ ४८ ॥ तदेवमुक्तमल्पबहुत्वद्वारम्, संप्रति सर्वगताल्पबहुत्वविशेषोपदर्शनाय संनिकर्षद्वारमुच्यते। तत्र संनिकर्षो नाम संयोगो ह्रस्वदीर्घयोरिव विवक्षितं किञ्चित्प्रतीत्य विवक्षितस्याल्पत्वेन बहुत्वेन वाऽवस्थानरूपः संबन्धः—

पणवीस पन्न अडसय, पण दस वीसा य ति पण दसगं च। संख असंख अणंत य, गुणहाणि चउट्ठआइं ता ॥ ४९

इग दुग इग दुग चउ बहुणंत बहु असंखणंतगुणहीणा। इय सिद्धाण सरूवं, लिहिअं देविंदसूरीहिं ॥ ५० ॥

यत्र यत्राष्टशतं सिद्धादुपलभ्यते, तत्र तत्रेयं व्याप्तिः। सर्वबहव एककसिद्धाः, ततो द्विकद्विकसिद्धाः संख्येयगुणहीनाः, ततस्त्रिकत्रिकसिद्धाः संख्येयगुणहीनाः, एवं तावद्वाच्यं यावत्पञ्चविंशतिसिद्धाः संख्येयगुणहीनाः। ततोऽपि षड्विंशतिसिद्धा असंख्येयगुणहीनाः, ततः सप्तविंशतिसिद्धा असंख्येयगुणहीनाः, एवमेकैकवृद्ध्या असंख्येयगुणहानिस्तावद्वक्तव्या यावत्पञ्चाशत्। तेभ्योऽपि एकपञ्चाशत्सिद्धा अनन्तगुणहीनाः, ततोऽपि द्विपञ्चाशत्सिद्धाः, एवमेकैकवृद्ध्या अनन्तगुणहानिस्तावद्वक्तव्या यावदष्टाधिकशतसिद्धा अनन्तगुणहीनाः। यत्र यत्र पुनर्विंशतिसिद्धास्तत्र तत्रेयं व्याप्तिः—एककसिद्धाः सर्वबहवः, तेभ्यो द्विकद्विकसिद्धाः संख्यातगुणहीनाः, एवं तावद्वाच्यं यावत्पञ्च। ततः षडादिसिद्धा असंख्यातगुणहीनाः, यावद्दश। तत एकादशादयः सर्वेऽप्यनन्तगुणहीनास्तावद्वाच्या यावद्विंशतिसिद्धा अनन्तगुणहीनाः। एवमधोलोकादिष्वपि। विंशतिपृथक्त्वसिद्धौ प्रथमचतुर्थभागे संख्येयगुणहानिः, द्वितीयचतुर्थभागेऽसंख्येयगुणहानिः, तृतीयस्माच्चतुर्थभागादारभ्य

पुनः सर्वत्राप्यनन्तगुणहानिः। यत्र पुनर्दश दश सिद्ध्यन्ति, तत्रैवं व्याप्तिः—एककसिद्धाः सर्वबहवः, ततो द्विकद्विकसिद्धाः संख्येयगुणहीनाः, ततस्त्रिकत्रिकसिद्धाः संख्यातगुणहीनाः, तेभ्यश्चतुष्कचतुष्कसिद्धाः असंख्यातगुणहीनाः, ततः पञ्च पञ्च सिद्धा असंख्यातगुणहीनाः, ततः षडादयः सर्वेऽप्यनन्तगुणहीना वाच्याः। 'संख असंख अणंत य गुणहाणि' इति भावितमेव। तथा 'चउट्ठआई' इति यत्र यत्र यवमध्यादावष्टौ सिध्यन्ति तत्र तत्र चतुष्कं यावदाद्या संख्यातगुणहानिः, ततः परं पञ्चकादावन्त्यानन्तगुणहानिर्वाच्या। अत्र मध्या संख्येयगुणहानिर्न विद्यते। एतदुक्तं भवति—एककसिद्धाः सर्वबहवः, ततो द्विकद्विकसिद्धाः संख्यातगुणहीनाः, ततस्त्रिकत्रिकसिद्धाः संख्यातगुणहीनाः, ततश्चतुष्कचतुष्कसिद्धाः संख्यातगुणहीनाः, ततः पञ्चादयोऽष्टपर्यन्ताः सर्वेऽप्यनन्तगुणहीनाः ॥ ४९ ॥ 'इग' अत्रैवमक्षरघटना—यत्र लवणादौ द्वयं द्वयं सिध्यति, तत्र सर्वबहव एककसिद्धाः, ततो द्विकद्विकसिद्धा अनन्तगुणहीनाः। यत्र पुनरूर्ध्वलोकादौ चत्वारः सिध्यन्ति, तत्रैवं व्याप्तिः तत्र सर्वबहव एककसिद्धाः, ततो द्विकद्विकसिद्धाः असंख्येयगुणहीनाः, तेभ्यस्त्रिकत्रिकसिद्धा अनन्तगुणहीनाः, तेभ्योऽपि चतुश्चतुःसिद्धा अनन्तगुणहीनाः। तदेवमिह संनिकर्षो द्रव्यप्रमाणे सप्रपञ्चं चिन्तितः। शेषेषु द्वारेषु सिद्धासिद्धप्राभृतटीकातो भावनीयाः। इत्येवं पूर्वोक्तप्रकारेण सिद्धानां मुक्तिपदप्राप्तानां स्वरूपं लिखितं अक्षरन्यासीकृतं श्रीसिद्धप्राभृतादिति शेषः। कैः श्रीदेवेन्द्रसूरिभिः ॥ ५० ॥ ॥ इति श्रीसिद्धपञ्चाशिकावचूरिः समाप्ता ॥

॥ समाप्तेयं श्रीमद्देवेन्द्रसूरिविरचिता सावचूरिका सिद्धपञ्चाशिका ॥

श्रीआत्मानन्द–ग्रन्थरत्नमाला–सप्तदशं रत्नम् (१७)

श्रीमदानन्दविजयविरचितवृत्तिसहितं

अन्नायउंछकुलकम् ।

सुसाध्वीश्रीमतीज्ञानश्रीसदुपदेशेनाणहिलपुरपत्तनवास्तव्यश्रीमालिज्ञातीयश्रेष्ठि–
महोकमचन्द्रात्मजभोगिलालस्मरणार्थं श्राविका फदीबाईसमर्पितद्रव्यसाहाय्येन
प्रकाशयित्री–श्रीआत्मानन्दसभा–भावनगर ।

इदं पुस्तकं मुम्बय्यां वल्लभदास–त्रिभुवनदास गांधी सेक्रेटरी जैनआत्मानन्दसभा भावनगर इत्यनेन
निर्णयसागरमुद्रणालये कोलभाटवीथ्यां २३, तमे गृहे रामचन्द्र यशवन्त शेडगेद्वारा मुद्रयित्वा प्रकाशितम् ।

वीरसंवत् २४३९. आत्मसंवत् १९. विक्रमसंवत् १९६९.

॥ प्रस्तावना ॥

'इह हि संक्षेपेणाहारशुद्ध्यादियत्याचारविचारप्रतिपादकस्य भोजनाद्यवसरे पर्यावर्तनार्थचिन्तना प्रायः प्रतिदिनं साधूपयोगिनः' अस्यैकत्रिंशद्गाथात्मकस्य 'अन्नायउंछ'—कुलकस्य, सङ्ग्रहकर्त्तारः के मुनिनेतारः ? इति न ज्ञायते, अभिधानाद्यनभिधानात् ।

अनेकागमविचारकैष्टीकाकारकैस्तु—"कोविदविजयविमलगणिशिष्येण नन्दविजयसञ्ज्ञेन । एकत्रिंशत्पद्यार्थो लिखितः कोऽपि समयोक्तः ॥" एतदन्तिमानवद्यपद्येन स्वस्य गुरोश्च श्रुतरत्नत्रयनिधान पावनाभिधानं स्वयं सूचितमेव । श्रीमद्विजयविमलगणयस्तपागच्छनायकश्रीमदानन्दविमलसूरीश्वराणामन्तेवासिन आसन् । तैः कोविदकुलावतंसैर्गच्छाचार—तन्दुलवैचारिकाद्यनेकग्रन्थानां वृत्तयो विहिताः, तथा विचारपञ्चाशिका—भावप्रकरणाद्यनेकानि रहस्यपूर्णप्रकरणरत्नानि प्रणीतानि च । तेषां सत्तासमयः, अस्यामात्मानन्दग्रन्थरत्नमालायामेव प्रकटीभूतानां भावप्रकरणादिग्रन्थरत्नानामुपोद्घाते (प्रस्तावनायां) तत्संशोधकविद्वद्वरैः श्रीमच्चतुरविजयमुनिवर्यैः सम्यग् निर्णीतः । तेषामेव विबुधानां विनेयाः श्रीमदानन्दविजया अस्य प्रकरणस्य वृत्तिविधायिनः, अत येषामपि सत्तासमयः स एव. यो गुरूणाम् ।

अस्य प्रकरणस्य शोधनसमये त्रीणि पुस्तकानि समासादितानि । तेष्वेकं पूज्यप्रवर्तकश्रीमत्कान्तिविजयमुनिपानां समीपतः, द्वितीयं पत्तनपुरस्थसङ्घसत्कभाण्डागारात्, तृतीयं पुनः सागरगच्छ—पुस्तकसङ्ग्रहात् । पुस्तकत्रयावलोकनेन सम्भाव्यते यत्, द्वितीयपुस्तकादेवाद्यतृतीय पुस्तकं लिपिकृतम् । अत एतत्प्रत्याधारेण शोधितेऽप्यत्र प्रकरणे यत्र कुत्र यानि सन्देहस्थानानि भवेयुस्तानि विशोधयन्तु श्रुतधरमुनिप्रवरा इति निवेदयति नम्रीभूतः—

श्रीमद्विजयानन्दसूरिमन्तानीयः—**जिनविजयो मुनिः ।**

॥ अर्हम् ॥

॥ सवृत्तिकं अन्नायउंछकुलकम् ॥

प्रणम्य भक्तितो वीरजिनं सिद्धार्थनन्दनम् । 'अन्नायउंछ' इत्यादिपद्यार्थः कोऽपि लिख्यते ॥ १ ॥

इह हि संक्षेपेणाहारशुद्ध्यादियत्याचारविचारप्रतिपादकस्य भोजनाद्यवसरे परावर्तनार्थचिन्तनाप्रायः प्रतिदिनं साधूपयोगिनः, 'अन्नायउंछगहणे' इत्यादिकुलकस्य स्वपरहितहेतवे व्याख्यामाख्यातुं किञ्चिदुपक्रम्यते । तत्रेयं प्रथमगाथा—

अन्नायउंछगहणे कयचित्तो निक्खमिज्ज वसहीए । को नाम नाणपमुहे रयणे विक्किज्ज पिंडत्थी ॥ १ ॥

परिचयाकरणेनाज्ञातस्य सतः साधोर्यदुञ्छस्य भुक्तवत्सु गृहस्थेषूद्धरितभक्तादेर्ग्रहणं, अटित्वाऽऽदानं तदज्ञातोञ्छग्रहणम् । अथवा, अज्ञातोञ्छस्य अनावर्जनादिना भावपरिशुद्धस्य, स्तोक-स्तोकस्य ग्रहणं, अज्ञातोञ्छग्रहणम् । तस्मिन् 'कृतचित्तो' विहितमना व्युच्छिनजिनकल्पपरिकर्मकारि-श्रीस्थूलभद्रस्वामि-शिष्य-श्रीमदार्यमहागिरिरिव । यतिरिति शेषः । 'वसतेः' उपाश्रयात्, 'निष्क्रामेत्' भिक्षाचर्यार्थं निर्गच्छेत् । अज्ञातोञ्छग्रहणे कारणमाह—'नाम' इति संभावनायां, 'को' दक्षः पुमान् 'पिण्डार्थी' आहारार्थी, आहारनिमित्तमित्यर्थः । 'ज्ञानप्रमुखानि' ज्ञान-दर्शन-चारित्र-तपःप्रभृतीनि रत्नानीव 'रत्नानि' । सूत्रे पुंस्त्वं प्राकृतत्वात् । 'विक्रीणीयात्' आहारग्रहणार्थं ज्ञानादीनि प्रयुज्य को विफलीकुर्यादित्यर्थः । अत्र श्रीमहागिरिकथानकं यथा—भविकाननुगृह्णन्तौ कुर्वाणौ धर्मदेशनाम् । महीं विहरतः स्मार्यौ महागिरि—सुहस्तिनौ ॥१॥

कालक्रमेण भगवान् जगद्बन्धुर्महागिरिः । शिष्यान्निष्पादयामास वाचनाभिरनेकशः ॥ २ ॥ महागिरिर्निजं गच्छमन्यदा- ऽदात् सुहस्तिने । विहर्तुं जिनकल्पेन त्वेकोऽभून्मनसा स्वयम् ॥ ३ ॥ व्युच्छेदाज्जिनकल्पस्य गच्छनिश्रास्थितोऽपि हि । जिनकल्पार्हया वृत्त्या विजहार महागिरिः ॥ ४ ॥ ते धर्मदेशनावारि वर्षन्तो वारिदा इव । विहरन्तोऽन्यदा जग्मुः पाट- लीपुत्रपत्तनम् ॥ ५ ॥ वसुभूतिरिति श्रेष्ठी तत्राचार्य-सुहस्तिना । संबोधितः श्रावकोऽभूज्जीवाजीवादितत्त्ववित् ॥ ६ ॥ सुहस्त्याख्यातधर्मानुवादेन स्वजनानपि । प्रतिबोधितुमारेभे वसुभूतिर्दिवानिशम् ॥ ७ ॥ प्रबोध्यमाना अपि ते सादरं वसु- भूतिना । नाबुध्यन्त विना धर्माचार्यमत्यल्पमेधसः ॥ ८ ॥ वसुभूतिर्गुरोराख्यद् भगवन् ! स्वजना मया । न पारिता बो- धयितुं तान् बोधयितुमर्हसि ॥ ९ ॥ इति तत्प्रतिबोधाय सुहस्ती तद्गृहं ययौ । सुधातरङ्गिणीप्रायां चारेभे धर्मदेशनाम् ॥ १० ॥ प्राविशत्तत्र भिक्षार्थं तदाचार्य-महागिरिः । तमभ्युदस्थादाचार्यः सुहस्ती वन्दते स्म च ॥ ११ ॥ श्रेष्ठ्यप्युवाच युष्माकमपि कोऽप्यस्ति किं गुरुः ? । युष्माभिर्वन्द्यते विश्ववन्द्यैर्यदयमागतः ॥ १२ ॥ सुहस्ती स्माह भो श्रेष्ठिन् ! ममैते गुरवः खलु । त्यागार्हभक्तपानादिभिक्षामाददते सदा ॥१३॥ ईदृग् भिक्षाशना ह्येतेऽपरथा स्युरुपोषिताः । सुगृहीतं च नामैषां वन्द्यं पादरजोऽपि हि ॥ १४ ॥ एवं महागिरिं स्तुत्वा प्रतिबोध्याखिलांश्च तान् । पुनरेव निजं स्थानं सुहस्ती भग- वान् ययौ ॥ १५ ॥ श्रेष्ठ्यपि स्वजनानूचे दृढभक्तिर्विशेषतः । ईदृशं पश्यत मुनिं यदा भिक्षार्थमागतम् ॥ १६ ॥ त्यज्य- मानं दर्शयित्वा भक्तपानादिकं तदा । तस्मै देयं तदा दत्तं तद्वचः स्यान्महाफलम् ॥ १७ ॥ स्वजनैर्वसुभूतेस्तु प्रत्यपद्यत

१ 'तद्धि वः' इत्यपि ॥

तद्वचः। भिक्षार्थं च द्वितीयेऽह्नि तेष्वेवागान्महागिरिः ॥ १८ ॥ महागिरिं समायान्तं दृष्ट्वा ते श्रेष्ठिबन्धवः। तथैवारेभिरे कर्तुं तस्मै तद्दातुमिच्छवः ॥ १९ ॥ उपयोगेन विज्ञाय तदशुद्धं महागिरिः। अनादायैव वसतिं गत्वा चोचे सुहस्तिनम् ॥ २० ॥ त्वया ह्यो विनयं कृत्वा ऽनेषणा महती कृता। ते हि त्वदुपदेशेन भिक्षां मह्यमसज्जयन् ॥ २१ ॥ नैवं भूयः करिष्येऽहमिति जल्पन् सुहस्त्यपि। क्षमयामास पादाग्रे लुठन्नार्यमहागिरिम् ॥ २२ ॥ इति ॥ १ ॥ आदावाहारशुद्धेः सदृष्टान्तां दुर्लभतामाह—

आहारे खलु सुद्धी दुलहा समणाण समणधम्मंमि। ववहारे पुण सुद्धी गिहिधम्मे दुक्करा भणिआ ॥२॥

'श्रमणानां' साधूनां, 'श्रमणधर्म्मे' श्रामण्ये, 'खलु' निश्चितं, 'आहारः' इति चतुर्विधाहारविषया 'शुद्धिः' शुद्धता, निर्दोषता 'दुर्लभा'। 'गृहिधर्म्मे' श्रावकधर्म्मे, 'पुनर्व्यवहारे' व्यवहारविषया 'शुद्धिः' 'दुष्करा' कर्तुमशक्या 'भणिता' तीर्थकर–गणधरैः। अयं भावः। यथा गृहिधर्म्मे व्यवहारशुद्धिर्दुष्करा, तथा श्रमणधर्म्मे आहारशुद्धिर्दुर्लभेति ॥ २ ॥ अथ येनानीतानि साधोः पिण्डादीनि न कल्पन्ते तद्दर्शनायाह—

अणहीआ खलु जेणं पिंडेसण-सिज्ज-वत्थ-पाएसा। तेणाणिआणि जइणो कप्पंति न पिंडमाईणि ॥ ३ ॥

अत्र 'पाएसण' इति स्थाने 'पाएस' इति, आर्षत्वात्, ततो 'येन' साधुना 'खलु' निश्चितं 'पिण्डैषणा १, शय्यैषणा २, वस्त्रैषणा ५, पात्रैषणा ६,' आचाराङ्ग–द्वितीयश्रुतस्कन्धे प्रथम–द्वितीय–पञ्चम–षष्ठाध्ययनरूपा, 'अनधीता' न सम्यगभ्यस्ता, 'तेनामीतानि' सूत्रे ह्रस्वः पानीयादित्वात्। 'यतिना' यतेर्वा. साधोर्न 'कल्पन्ते'। 'पिण्डमाईणि' इति माका-

रस्य प्राकृतप्रभवत्वात्। 'पिण्डादीनि' आहारादीनि, भोक्तुमिति शेषः ॥ ३ ॥ अथाकल्पिकं पिण्डादिकं नेच्छेदित्याह—

पिंडं सिज्जं च वत्थं च चउत्थं पायमेव य। अकप्पिअं न इच्छिज्जा पडिगाहिज्ज कप्पिअं ॥ ४ ॥

'पिण्डं' अशनाद्याहारं १। 'शय्यां च' उपाश्रयं २। 'वस्त्रं च' वसनं ३। 'चतुर्थं पात्रमेव च' ४। 'अकल्पिकं' आधाकर्मादिदोषदुष्टं, बालत्वे श्रीवज्रस्वामीव 'न इच्छेत्' साधुरिति शेषः। किन्तु 'प्रतिगृह्णीयात्', 'कल्पिकं' निर्दोषम्। श्रीमहावीरादिष्ट–रेवतीश्राविका–गृहस्थितनिर्दोषौषधग्राहि–सिंहानगारवदिति। तत्र श्रीवज्रस्वामिसम्बन्धलेशो यथा—अन्यदा वज्रगुरवः प्रत्यवन्तीं प्रतस्थिरे। धाराधरोऽखण्डधारमन्तराले ववर्ष च ॥ १ ॥ यक्षमण्डपिकाप्राये स्थाने क्वाप्यस्रवज्जले। आचार्या वज्रगुरवस्ते तस्थुः सपरिच्छदाः ॥ २ ॥ प्राग्जन्मसुहृदो वज्रस्यामरा जृम्भकास्तदा। सत्त्वं परीक्षितुं तत्र वणिग्मूर्त्तीर्विचक्रिरे ॥ ३ ॥ उत्पर्याणितबद्धाश्ववृषभं चरदौष्ट्रकम्। मण्डलीकृतशकटं संनिवेशितकेणिकम् ॥ ४ ॥ जयनच्छन्नविक्रेयवस्तुगोणीपरम्पराम्। राद्धान्नोत्तीर्णपात्राकं भुञ्जानजनसंकुलम् ॥ ५ ॥ तृणप्रावरणच्छन्नसंचरत्कर्मकृज्जनम्। आवासं ते दिविषदो वणिग्रूपा विचक्रिरे ॥ ६ ॥ त्रिभिर्विशेषकम् ॥ वारिदे विरतप्राये तानाचार्यान् दिवौकसः। न्यमन्त्रयन्त भिक्षार्थं ह्रस्ववन्दनपूर्वकम् ॥ ७ ॥ निवृत्तामिव विज्ञाय वृष्टिमाचार्यपुङ्गवाः। वज्रमादिदिशुर्भिक्षानयने विनयोज्ज्वलम् ॥ ८ ॥ वज्रोऽप्यावश्यकीं कृत्वा द्वितीयमुनिना सह। विहर्त्तुं निरगादीर्याशुद्धिमध्वनि चिन्तयन् ॥ ९ ॥ तुषारान् पततो दृष्ट्वा त्रसरेणुनिभानपि। वज्रो निववृते च द्राग् भीतोऽप्कायविराधनात् ॥१०॥ तुषारमात्रमप्यम्बुवृष्टिं देवा निरुध्य ताम्। आह्वामत पुनर्वज्रं वृष्टिर्नास्तीति भाषिणः ॥११॥ वज्रस्तदुपरोधेन वृष्ट्यभावेन चाचलत्। जगाम च तदावासं

भक्तपानादिसुन्दरम् ॥ १२ ॥ ससंभ्रमेषु देवेषु तेषु भक्तादिदित्सया । द्रव्य-क्षेत्र-काल-भावैरुपयोगमदत्त सः ॥ १३ ॥ कूष्माण्डकादिकं द्रव्यं कुतो राद्धमसम्भवम् । इदं चोज्जयनीक्षेत्रं स्वभावादपि कर्कशम् ॥ १४ ॥ प्रावृषि प्रथमायां च द्रव्यस्यास्य कथापि का ? । दातारोऽप्यनिमेषाक्षाऽभूस्पृशश्चरणा इति ॥ १५ ॥ नियतं देवपिण्डोऽयं साधूनां नहि कल्पते । तस्मादनात्तपिण्डोऽपि व्रजामि गुरुसंनिधौ ॥१६॥ त्रिभिर्विशेषकम् । इत्यनादाय तद्-भिक्षां वज्रस्वामी न्यवर्तत । प्रत्यक्षीभूय तैश्चाथो जगदे विस्मितैः सुरैः॥१७॥ वयं वि(हि)जृम्भका देवाः प्राग्जन्मसुहृदस्तव । त्वां द्रष्टुमागमामेह (?) त्वमद्यापि हि नः सुहृत् ॥ १८ ॥ अथ वैक्रियलब्ध्याख्यां विद्यां तोषभृतोऽमराः । निष्क्रयं कूष्ममायाया इव वज्राय ते ददुः॥ १९ ॥ ज्येष्ठे मास्यन्यदा वज्रो विहरंश्च बहिर्भुवि । नैगमीभूय तैर्देवैर्घृतपूरैर्न्यमन्त्र्यत ॥ २० ॥ वज्रो गत्वा तदावासे देवपिण्डं च पूर्ववत् । ज्ञात्वा न खलु जग्राहोपयोगविदुरो हि सः ॥ २१ ॥ वज्राय पूर्वसुहृदे विद्यामाकाशगामिनीम् । प्रददुस्तोषभाजस्ते स्वं स्वं स्थानमथो ययुः ॥ २२ ॥ इति ॥ सिंहानगारवृत्तान्तस्तु श्रीभगवतीसूत्रतो ऽवमेय इति ॥ ४ ॥

अथ पिण्डविशुद्धिमकुर्वन्नचारित्री स्यादित्याह—

पिंडं असोहयंतो अचरित्ती इत्थ संसओ नत्थि । चारित्तंमि असंते सव्वा दिक्खा निरत्थिआ ॥ ५ ॥

'पिण्डं' अशनाद्याहारं, 'अशोधयन्' अशुद्धं गृह्णन् भुञ्जानश्च 'अचरित्री' अचारित्री भवतीति शेषः। 'अत्रार्थे' 'संशयः' सन्देहो नास्ति । 'चारित्रे चासति सर्वा दीक्षा निरर्थिका' निष्फलेति । इदं केवलोत्सर्गापेक्षया द्रष्टव्यम् । उत्सर्गापवादद्वयापेक्षया त्वेवमुक्तमागमे-"संथरणंमि असुद्धं दुण्हवि गिण्हित दिंतयाणऽहिअं । आउरदिट्ठंतेणं तं चेव हियं असंथरणे त्ति"५

अथैवंविधं शय्यादिविषयं गाथात्रयमाह—

सिज्जं असोहयंतो अचरित्ती इत्थ संसओ नत्थि । चारित्तंमि असंते सव्वा दिक्खा निरत्थिआ ॥ ६ ॥

वत्थं असोहयंतो अचरित्ती इत्थ संसओ नत्थि । चारित्तंमि असंते सव्वा दिक्खा निरत्थिआ ॥ ७ ॥

पत्तं असोहयंतो अचरित्ती इत्थ संसओ नत्थि । चारित्तंमि असंते सव्वा दिक्खा निरत्थिआ ॥ ८ ॥

'शय्यां' उपाश्रयमशोधयन्, आधाकर्म्मादिदोषदुष्टं गृह्णन् व्यापारयंश्चेत्यर्थः । शेष व्याख्यानमुत्सर्गापवादभावना च पूर्ववदिति ॥ ६ ॥ 'वस्त्रं' वसनं कार्पास–कम्बलादिरूपम् । शेषं पूर्ववदिति ॥ ७ ॥ 'पात्रं' पतद्–ग्रहादि तुम्बक–दारु–मृन्मयरूपम् । शेषं पूर्ववदिति ॥ ८ ॥ अथ भिक्षाचर्यायां यः खिद्यते स मन्दसंवेग इत्याह—

समणत्तणस्स सारा भिक्खायरिआ जिणेहिं पन्नत्ता । इत्थ परितप्पमाणं तं जाणसु मंदसंवेगम् ॥ ९ ॥

इह क्वचिद् "द्वितीयादेः' इति प्राकृतसूत्रेण सप्तमीस्थाने षष्ठीविधानात् 'समणत्तणस्स' इति 'श्रमणत्वे' श्रामण्ये 'सारा' संयमनिर्वाहनिमित्तनिरवद्याहारलाभहेतुत्वेन प्रधानका, 'भिक्षाचर्या' भिक्षायै भक्तादेः परेभ्यो याचनाय 'चर्या' भ्रमणं; भिक्षाचर्या,'जिनैः' तीर्थकरैः 'प्रज्ञप्ता' कथिता। अतः 'अत्र' भिक्षाचर्यायां 'परितप्यमानं' वैयावृत्यकरे पितरि कालगतेऽर्हन्नकमुनिमित्र 'तं' श्रमणं 'जानीहि मन्दसंवेगं' इति ॥ ९ ॥ अथ यो भिक्षाचर्योद्यतः स तीव्रसंवेग इत्याह—

नाण–चरणस्स मूलं भिक्खायरिया जिणेहिं पन्नत्ता । इत्थ य उज्जममाणं तं जाणसु तिव्वसंवेगम् ॥ १० ॥

ज्ञानं च चरणं चेति समाहाराद्वन्द्वादेकत्वे 'ज्ञान-चरणं,' तस्य 'मूलं' कारणं 'भिक्षाचर्या जिनैः प्रज्ञप्ता'। तल्लभ्यनिरवद्याहारावष्टम्भेनैव ज्ञान-चरणयोः साधुभिर्निर्वाह्यमाणत्वात्। अतो 'ऽत्र च' भिक्षाचर्यायामुद्यच्छन्तं, 'उद्यमं कुर्वाणं, वक्ष्यमाणं धर्मरुच्यनगारमिव, नन्दिषेणश्रमणमिव वा, 'तं' साधुं 'जानीहि तीव्रसंवेगं' इति ॥ १० ॥

अथैषणाशुद्ध्युद्यमे कथानके सूचयन्नाह—

धम्मरुई अणगारो सो नंदउ नंदिसेणसमणोऽवि। जे एसणाइ समिआ पसंसिआ सक्कपमुहेहिं ॥ ११ ॥

'स धर्मरुचिरनगारो नन्दतु' समृद्धिं प्राप्नोतु। तथा 'स नन्दिषेणश्रमणोऽपि नन्दतु'। 'यौ एषणायां समितौ' सम्यक्प्रवृत्तौ 'शक्रप्रमुखैः' इन्द्रादिभिः 'प्रशंसितौ'। तत्र धर्मरुचेरनगारस्य कथानकमोघनिर्युक्तिगतम्। यथा—

धर्मरुचिरनगारो ज्येष्ठमासे आतापयत्यष्टमं च करोति। स च पारणके स्वग्रामे न हिण्डते। अन्यं ग्रामं व्रजति। तं दृष्ट्वैका देवता कुङ्कणरूपे विकुर्वति। भक्त्या आरनालभृताऽलाबुः क्षितिरुहाधस्तिष्ठति। ततः समीपागतं साधुं प्रेक्ष्यैको वक्ति—इदं काञ्जिकं पिब। स उवाचालमनेन। ततः परो वक्ति—क इदं वहति, साधोर्दीयते। पर आह—देहि वा, त्यज्य वा। ततस्तेन साधुर्निमन्त्रितो भणितश्च यूयमिदं गृह्णीत। ततः स भगवान् द्रव्यतः क्षेत्रतः कालतो भावतश्च गवेषयति। द्रव्यत इदं काञ्जिकं शीतलं सुरभि च, क्षेत्रतोऽस्यामटव्यां को दत्ते ? कालतो ज्येष्ठमासो ऽत्रापि दुःखं दातुं, भावतो हृष्ट-तुष्टचित्तो निमन्त्रयति। ततोऽत्र कारणेन भाव्यं तदोपयुज्यते, न तस्य पादौ भूमावलगन्तौ, नयन अनिमेषे च दृष्ट्वा, देव इति ज्ञात्वा, वर्जितमिति ॥

अथ वसुदेव-पूर्वभव-नन्दिषेणश्रमणकथानकमावश्यक-लघुवृत्त्युक्तम् । यथा—

मगधेषु नन्दिग्रामे गोतमः कणवृत्तिकः । तत्पत्नी धारिणी तस्या गर्भे षाण्मासिके ऽपि सः ॥ १ ॥ मृतो माताऽपि जाते च मातुलेन स वर्द्धितः । नन्दिषेणाभिधस्तस्य गृहे कर्म चकार सः ॥ २ ॥ प्रतारितः स लोकेन मातुलेन स्थिरीकृतः । मा श्रौषीर्लोकवाक्यानि तिस्रः सन्ति सुता मम ॥ ३ ॥ दास्यामि तव नैषुस्ताः कुरूपमिति तं पुरम् । निर्विण्णः सोऽथ निर्गत्य मुमूर्षुर्वीक्ष्य कुत्रचित् ॥ ४ ॥ नन्दिवर्द्धनसूरीणां संनिधौ व्रतमग्रहीत् । स षष्ठक्षपकः ख्यातयशःकीर्तिरभून्मुनिः ॥ ५ ॥ वैयावृत्त्येऽभिगृही च बाल-ग्लानादिसाधुषु । शक्रोऽशंसत् तमेको ऽथाश्रद्दधानः सुरोऽभ्यगात् ॥ ६ ॥ चक्रे श्रमणरूपे द्वे बहिरेकोऽतिसारकी । स्थितोऽगाद्परो मध्ये साधूनान्ते ब्रवीदिदम् ॥ ७ ॥ ग्लानर्षिः पतितोऽस्त्येको वैयावृत्त्यकरो ऽस्ति चेत् । स उत्तिष्ठतु तच्छ्रुत्वा षष्ठपारणकेऽपि हि ॥ ८ ॥ सहसा नन्दिषेणर्षिर्मुक्त्वा कवलमुत्थितः । ऊचेऽर्थः केन ? सोऽवादीज्जलेनागात् स तत्कृते ॥ ९ ॥ अनेषणं सुरश्चक्रेऽनेषणीयं न सोऽगृहीत् । भ्रान्त्वा शुद्धिः स शुद्धाम्भो गृहीत्वागात्तदन्तिके ॥ १० ॥ आचुक्रोश स तं ग्लानो मुनिं निष्ठुरया गिरा । त्वं वैयावृत्त्यकारीति मुने ! नाम्नैव वर्त्तसे ॥ ११ ॥ स तद्गिरं सुधासारां मन्यमानः क्षमाधृतिः । अशूकः क्षालयामास तं विष्ठालिप्तमप्यृषिम् ॥ १२ ॥ अथाहोत्तिष्ठ यामोऽन्तर्नीरुजं त्वां करोमि यत् । ग्लानोऽवग् न क्षमः सो ऽवक् पृष्ठमारोह तर्हि मे ॥ १३ ॥ पृष्ठमारोप्य तं गच्छंस्तेन देवेन मायया । नन्दिषेणः पुरीषेण लिप्तोऽतीव विगन्धिना ॥ १४ ॥ आकुश्य(?)कथं वेगभङ्गान्मे मृतमारणम् । करोषि भोक्तुकामस्त्वं व्रजन्नध्वनि रंहसा ॥ १५ ॥ मुनिश्चन्दनलेपं तं मन्वानोऽमेध्य लेपनम् । आक्रोशं चाशिषं दध्यौ

कथं स्यादस्य निर्वृतिः ॥ १६ ॥ देवस्तुष्टो ऽथ संहृत्य मायां नत्वा च तं मुनिम् । शक्रप्रशंसां चावेद्य स्वविमानं जगाम सः ॥ १७ ॥ वसतौ मुनिरप्यगाद् गुरोरालोच्य भुक्तवान् । एषणासमितिः पाल्या सदैवं मुनिपुङ्गवैः ॥ १८ ॥ इति ॥ ११ ॥

अथ शुद्धेनैव पिण्डेन धीराः पिण्डं पोषयन्तीत्याह—

पिंडेण अकप्पेणवि पोसिज्जइ अहह एरिसो देहो । सुद्धेणं चिअ धीरा पिंडं पिंडेण पोसंति ॥ १२ ॥

'अकल्पेनापि' आधाकर्मादिदोषदुष्टेनापि 'पिण्डेन' आहारेण, 'अहह' इति खेदे, 'ईदृशो' ऽशुचित्व-विनश्वरत्वादिधर्म्मोपेतो 'देहः', कैश्चित् संसारानुरक्तचित्तैस्तथाविधद्रव्यलिङ्गधारिभिरिति शेषः। 'पोष्यते' पुष्टीक्रियत इति, समीक्ष्येति शेषः। 'धीरा' महात्मानो धन्यानगारादय इव 'शुद्धेनैव पिण्डेन' आहारेण 'पिण्डं' शरीरं 'पोषयन्तीनि' ॥ १२ ॥

अथ यदर्थं साधुराहारमाहारयति तत् सदृष्टान्तमाह--

जह अब्भंगणलेवा सगडक्खवणाण जुत्तिओ हुंति । इअ संजमभरवहणट्ठयाए साहुण आहारो ॥१३॥

'यथा अभ्यङ्गनलेपौ' यथासङ्ख्येन 'शकटाक्षस्य' अनोधुरो, 'व्रणस्य' च क्षतस्य, 'युक्तितो भवतः' । एतदुक्तं भवति । यथा—अभ्यङ्गनं लोकोक्त्या "उंगण" इति प्रसिद्धं;शकटाक्षे तावन्मात्रमेव दीयते, यावता शकटमनायासेन भारमुद्वहति। न चातिबहु न चातिस्तोकम् । तथा व्रणे लेपोऽपि तावानेव दीयते, यावता पूयादिनिर्हरणं संरोहणे भवतः, न पुनरतिबहुरतिस्तोको वा इति । एवं संयम भरवहनार्थनायै तल्-प्रत्ययस्य प्राकृतशैलीप्रभवत्वेन स्वार्थिकत्वात् । संयमभरवहनप्रयोजनाय । अथवा संयम एव भरः संयमभरस्तस्य वहनं पालनं तदेवार्थः प्रयोजनं यस्याहारस्य स संयमभरवहनार्थ-

स्तस्य भावस्तत् ता; तस्यै उपलक्षणत्वात् क्षुद्-व्रण-संरोहणाय च 'साधूनामाहारो' युक्तितो भवति । नातिस्तोको नातिबहुरिति भाव इति ॥ १३ ॥ अथ योऽशुद्धमाहारादि गृह्णाति स संसारप्रवर्द्धक इत्याह—

जो जहव तहव लद्धं गिण्हइ आहार-उवहि-माईअं । समण-गुण-मुक्कजोगी संसारपवड्ढओ भणिओ ॥१४॥

'यः' साधुः, 'यथा वा तथा वा लब्धं' सदोषमित्यर्थः । 'आहार-उवहि-माईअंति' मकारस्य प्राकृतप्रभवत्वात् । आहारोपध्यादिकं गृह्णाति' । स 'श्रमण-गुण-मुक्तयोगी' यतिगुणरहितव्यापारवान्, षष्ठाष्टमादिषण्मासान्ततपः-कारि-सचित्तजलादिपरिभोगि-श्रीमहानिशीथोक्त-सुसढ इव 'संसारप्रवर्द्धको भणितः' । तीर्थकरादिभिरिति ॥ १४ ॥

अथ निरवद्याहारिणां विशेषगुणमाह—

निरवज्जाहारेणं साहूणं निच्चमेव उववासो । उत्तरगुणवुड्ढिकए तहवि उववासमिच्छंति ॥ १५ ॥

'निरवद्याहारेण' निर्दोषाहारेणाभ्यवह्रियमाणेनापि, 'साधूनां नित्यमेवोपवासः' स्यात् । अयं भावः—यथा ह्युपवासिनां त्रिकरणशुद्धानामाहारोत्थाः पूर्वोत्तरे दोषा न लगन्ति, तथा निरवद्याहारकारिणामपि त्रिकरणशुद्धानां सर्वथाऽऽहारोत्था दोषा न लगन्तीति । तेषामुपवासिनामिवाहारदोषरहितत्वेन सदैवोपवास इवोपवास इति । यत उच्यतेऽन्यत्रापि—"अकृताकारितं शुद्धमाहारं धर्म्महेतवे । अश्नतोऽपि मुनेर्नित्योपवासफलमुच्यते ॥ १ ॥" अत्र च "विरयाविरयसहोयर उदगस्स भरेण भरिअ सरिआए । भणिआइ साविआए दिन्नो मग्गुत्ति भाव वसा ॥" इति भाविनीकुलकसूचितं भ्रातृद्वयकथानकं भाव्यम् । निरवज्जाहाराणमिति पाठे तु-निरवद्य आहारो येषां ते निरवद्याहारास्तेषामिति साधूनामित्यस्य

भवति । 'तच्चैकेनानेकैर्वा' बहुभिर्भोक्तव्यम् । 'वर्जयित्वा धूमाङ्गारं' रागद्वेषौ वर्ज्जयित्वेत्यर्थः ॥ २१ ॥

अथ भोक्तुकामः साधुः कथमात्मानमनुशास्त इत्याह—

बायालीसेसणसंकडंमि गहणंमि जीव नहु च्छलिओ । इण्हिं जह न च्छलिज्जसि भुंजंतो रागदोसेहिं ॥२२॥

इह एषणाग्रहणेनैषणागता दोषा अभिधीयन्ते । ततोऽयमर्थः द्विचत्वारिंशत्संख्या ये एषणादोषा गवेषणाग्रहणैषणा-दोषास्तैः 'सङ्कटे' विषमे 'ग्रहणे' भक्तपानादीनामादाने हे 'जीव ! त्वं नैव च्छलितः'। तत 'इदानीं' संप्रति 'भुञ्जानो राग-द्वेषाभ्यां यथा न छल्यसे' तथा कर्तव्यमिति शेषः इति ॥ २२ ॥ अथ साधोर्भोजनगृद्धित्यागोपदेशमाह—

अइ इच्छसि भो साहु बारसविहतवफलं महाविउलं । तो मण–वय–काएहिं भोअणगिद्धिं विवज्जेसु ॥२३॥

'भोः साधो ! यदित्वं महाविपुलं' अतिविस्तीर्ण्णं 'द्वादशविधतपः फलमिच्छसि, ततो मनो–वचः–कायैर्भोजनगृद्धिं' आहारलाम्पट्यं 'विवर्ज्जय' सर्वथा त्यज । भोजनगृद्ध्या तपःफलस्य हीनतापत्तेर्यत उक्तं मरणसमाधिप्रकीर्ण्णके—"कलं कलंपिवरं आहारो परिमिओ अ पंतो अ । नवखवणापारणए बहु बहुतरो बहुविहो अ ॥ १ ॥ " इति ॥ २३ ॥

अथ वदनप्रक्षेपणशुद्धिमाह—

असुरसुरं अचवचवं अदुअमविलंबिअं च आहारं । रागद्दोसविमुक्को जिमिज्ज सायं अगिण्हं तो ॥ २४ ॥

'असुरसुरं' इति तक्रान्वितघृष्टिभोजने; रब्बादिभोजने वा सरड–सरडेति शब्दवर्जितं, 'अचवचवं' इति वटक–रोट्ट-कादिचर्वणे चव–चवेति शब्दवर्जितं, 'अद्रुतं' अत्वरितं, 'अविलम्बितं च' अमन्थरं, यथा स्यात्तथा 'रागद्वेषविमुक्तः स्वाद-

धारं 'कुर्यात्' । तथा 'द्वौ भागौ द्रवस्य' पानीयस्य षष्ठं तु भागं 'वायुप्रविचारणार्थमूनं कुर्यात्' ॥ १८ ॥

इह कालापेक्षया तथाहारस्य प्रमाणं भवति । कालश्च त्रिधा तथाचाह—

सीओ उसिणो साहारणो य कालो तिहा मुणेअव्वो । साहारणंमि काले तत्थाहारे इमा मत्ता ॥१९॥

'त्रिधाकालो ज्ञातव्यः' तद् यथा—'शीत उष्णः साधारणश्च' । तत्र तेषु कालेषु मध्ये 'साधारणे काले आहारे' आहारविषया इयमनन्तरोक्ता 'मात्रा' प्रमाणं ॥ १९ ॥

सीए दव्वस्स एगो भत्ते चत्तारि अह व दो पाणे । उसिणे दव्वस्स दोन्नि उ तिन्नि व सेसा उ भत्तस्स ॥२०॥

'शीते' अतिशयेन शीतकाले 'द्रवस्य' पानीयस्य 'एको' भागः कल्पनीयः । 'चत्वारो भक्ते' भक्तस्य मध्यमे तु शीतकाले द्वौ भागौ पानीयस्य कल्पनीयौ । त्रयस्तु भागा भक्तस्य 'वा' शब्दो मध्यमशीतलसंसूचनार्थः । तथा 'उष्णे' मध्यमोष्णकाले द्वौ भागौ 'द्रवस्य' पानीयस्य कल्पनीयौ 'शेषास्तु त्रयो' भागा 'भक्तस्य' अत्युष्णे च काले त्रयो भागा द्रवस्य, शेषौ द्वौ भागौ भक्तस्य । 'वा' शब्दोऽत्रात्युष्णकालसूचनार्थः । सर्वत्र च षष्ठो भागोवायुप्रविचारणार्थमुत्कलो मोक्तव्य इति ॥ २० ॥ अथ भोजनं कुर्वतां साधूनां पात्रादन्नग्रहणविधिमाह—

कडपयरच्छेएणं भोत्तव्वं अहव सीहखइएणं । एगेण अणेगेहिव वज्जित्ता धूम इंगालं ॥ २१ ॥

'कटच्छेदेन भोक्तव्यं' । यथा किलिञ्जस्य खण्डकं छित्त्वा, अपनीयते । एवमसावपि भुङ्क्ते । तथा 'प्रतर'—च्छेदेन वा-भोक्तव्यम् । तरिकाच्छेदेनेत्यर्थः। 'अथवा सिंहखादितेन' सिंहो हि किल एकदेशादारभ्य तावद्भुङ्क्ते यावत्सर्वं भोजनं निष्ठितं

कवला ॥ १ ॥ इत्तो किणाइ हीणं अद्धं अद्धद्धगं च आहारं । साहुस्स विंति धीरा जाया मायं च ओमं च ॥२॥ पगामं च निगामं च पणीअं भत्तपाणमाहारे । अइबहुअ अइबहुसो पमाणदोसो मुणेअव्वो ॥ ३ ॥" यः प्रकामं निकामं प्रणीतं वा भक्तपानमाहरयति । तथा अतिबहुकमतिबहुशश्च तस्य प्रमाणदोषो ज्ञातव्यः । प्रकामादिस्वरूपमाह—"बत्तीसाइ परेणं पगामं १ निच्चं तमेव उ निकामं २ । जं पुण गलंतनेहं पणीअमिति तं बुविंति ॥ ४ ॥ " द्वात्रिंशदादिकवलेभ्यः परेण परतो भुञ्जानस्य यद्भोजनं तत्प्रकामभोजनम् । तमेव प्रमाणातीतमाहारं प्रतिदिवसमश्नाता निकामभोजनम् । शेषं सुगमम् । "अइबहुअं ४ अइबहुसो ५ अइप्पमाणे ६ भोजणं भुत्तं । हादिज्जव वामिज्जमारिज्जवतं अजीरंतं ॥ ५ ॥" अतिबह्वादिस्वरूपमाह—"बहुआइमइबहुअं अइबहुसो तिन्नि तिन्नि च परेणं । तं चिअ अइप्पमाणं भुंजइ जं वा अतिप्पंतो ॥६॥" बहुकातीतमतिशयेन बहु, अतिशयेन निजप्रमाणाभ्यधिकमित्यर्थः । ४ । तथा दिवसमध्ये यस्त्रीन् वारान् भुङ्क्ते । यद्वा त्रिभ्यो वारेभ्यः परतस्तद्भोजनमतिबहुशः । ५ । तदेव वारत्रयातीतमिति प्रमाणमुच्यते । भुङ्क्ते यद्वा अतृप्यन्निति ॥१७॥

अथ "हिआहारा मिआहारा अप्पाहाराय जेनरा । न ते विज्जा विगिच्छंति *अप्पाणं ते विगिच्छगा ॥" इति वचनाद् गाथात्रयेण मिताहारं दर्शयन्नाह—

अद्धमसणस्स सव्वंजणस्स कुज्जा दवस्स दो भाए । वाउपविआरणट्ठा च्छब्भागं ऊणगं कुज्जा ॥ १८ ॥ ॥ ७ ॥

इह किल सर्वमुदरं षड्भिर्भागैर्विभज्यते । तत्र च 'अर्द्धं' भागत्रयरूपं 'अशनस्य सव्यञ्जनस्य' तक्र–शाकादिसहितस्या-

* आत्मनैवात्मनस्ते चिकित्सकाः ॥

विशेषणम्। यद्येवं ततः कथं साधूनामुपवासकरणमित्यत आह—'तथापि चोत्तरगुणवृद्धिकृते' उत्तरगुणानां विवर्द्धनाय, 'उपवासमिच्छन्ति' मुनय इति शेषः ॥ १५ ॥ अथाऽशुद्धाहारस्य त्याग–भोगयोर्गुण–दोषौ दर्शयन्नाह—

गहिअमसुद्धं केणवि कारणजाएण भोअणावसरे। तं चयमाणो सुद्धो भुंजंतो लिप्पए नियमा ॥१६॥

'केनापि' लोभाज्ञानादिरूपेण 'कारणजातेनाशुद्धं' सदोषमशनादि 'गृहीतं'। पश्चात् 'भोजनावसरे' 'तद्' अशुद्धं 'त्यजन्' परिष्ठापयन् परलब्धिलब्धाहारनिषेधाभिग्रहिढण्ढणर्षिरिव 'शुद्धो' निर्दोषः स्यात्। 'भुञ्जानः' तथाविधहीयमान-चारित्रपरिणाम इव 'नियमात्' निश्चयेन 'लिप्यते' पापेनेति शेष इति ॥१६॥ अथ साधोराहारप्रमाणं किञ्चिज्जेमनविधिं चाह—

अविकिअवयणपमाणे कवले बत्तीस साहुमाहारं। भणिऊण नमोक्कारं पयासदेसट्ठिओ जिमइ ॥१७॥

अत्र गाथायां विभक्तिलोपादि प्राकृतप्रभवम्। ततः 'अविकृत–वदनप्रमाणान्' अनतिविकासितमुखप्रवेशयोग्यान्। 'द्वात्रिंशतं कवलान् साधुराहारं प्रकाशदेशस्थितः' सोद्योतस्थानेऽवस्थितो 'नमस्कारं भणित्वा जेमति'। अत्र प्रस्तावा-द्भाजनेऽपि प्रकाशमुखे जेमतीतिज्ञेयम्। यत उक्तमोघनिर्युक्तौ—"मक्खिअ कंटऽट्ठाईण जाणणट्ठा पगास भुंजणया। अट्ठिअ लग्गणदोसा वग्गुलिदोसा जहा एवं ॥ १ ॥ जे चेव अंधयारे दोसा ते चेव संकडमुहंमि। परिसाडीबहुलेवाडणं च तम्हा पगासमुहे ॥२॥" गाथाद्वयं सुगमम्। नवरं प्रथमगाथाया उत्तरार्द्धे गलादौ कण्टकास्थिगलनदोषास्तथा मक्षिका-भक्षणजनितवल्गुलिव्याधिदोषास्त्यक्ता भवन्तीति ज्ञेयम्। तथा द्वात्रिंशत्कवलेभ्योऽधिकस्तु आहारः प्रमाणातिक्रान्तः स्यात्। यत उक्तं पिण्डनिर्युक्तौ—"बत्तीसं किरकवला आहारो कुच्छिपूरओ होई। पुरिसस्स महिलिआए अट्ठावीसं भवे

मगृह्णन्' साधुरिति शेषः । 'आहारं जेमेदिति' ॥ २४ ॥ अथ कथं स्वादमगृह्णन् जेमतीत्याह—

णो दाहिणाओ वामं न वामहणुआउ दाहिणं नेइ। पन्नगमिव आहारं जावणमित्तं जई जिमइ ॥ २५ ॥

नो दक्षिणाद् हनुकाद् वामं हनुकं नयति । न वामहनुकाद्दक्षिणं हनुकं नयत्याहारम् । उक्तं चाचाराङ्गप्रथमश्रुतस्कन्धगतविमोक्षाध्ययनषष्ठोद्देशकेऽपि—"से भिक्खु वा भिक्खुणी वा असणं वा पाणं वा खाइमं वा साइमं वा आहारेमाणे नो वामाओ हणुआओ दाहिणं हणुअं संचारिज्जा आसाएमाणे दाहिणाओ वा हणुआओ वामं हणुअं नो संचारिज्जा आसाएमाणे" इति । तर्हि किं करोतीत्याह—'यापनामात्रं' शरीरसन्धारणासमर्थं 'आहारं पन्नगमिव' इति विभक्तिव्यत्ययस्य प्राकृतप्रभवत्वात् । 'पन्नग इव' सर्प इव 'यतिर्जेमति' । पन्नगो हि भक्ष्यं ग्रसित्वा न चर्वणमाचरति ग्रसने एव गिलत्येव । तथा साधुरपि जिनकल्पिकादिर्भुञ्जानो न चर्वणं करोतीत्यर्थः । अथवा यथा पन्नगः पार्श्वासंस्पर्शेनात्मानं बिले प्रवेशयति, तथा साधुरप्याहारं मुखेनासंस्पर्शन्निव रागादिरहितत्वाज्जेमति ॥ २५ ॥ अथ रसत्यागिश्रमणलक्षणमाह—

सरसरसेहिं न तूसइ विरसविगंधेहिं जाइ न पओसं। सो रसचाइसमणो सुमणो सिद्धिं समल्लिअइ ॥२६॥

'सरसरसेहिं' इति "रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे । बोले रागे देहधातौ तिक्तादौ पारदेऽपि च ॥ १ ॥' इत्यनेकार्थसंग्रहवचनात्, सह रसेन स्वादेन वर्तन्ते ये, ते, सरसाः । एवंविधा रसा मधुरादयो येषु, ते, सरसरसाः। सिंहकेसरमोदक–घृतपूर–परमान्न–प्रभृतय आहारास्तैर्यो न तुष्यति न हर्षमुपयाति । तथा विरसगन्धैर्विगतरसविरुद्धगन्धैरतिपुराणौदनादिभिराहारैर्यो न प्रद्वेषं याति । 'स रसत्यागी श्रमणः सुमना सिद्धिं' मुक्तिं 'समालीयते' समाश्रयतीत्यर्थ

इति ॥ २६ ॥ अथ जेमन्तः साधवः परिसाटिं न पातयन्तीत्याह—

तह परिसाडिविमुक्कं जिमंति जइणो जिइंदिया निच्चं। जह जिमिआजिमिआणं ठाणविसेसो न लक्खिज्जा

'तथा परिशाटिविमुक्तं' उदनमुद्गादिसित्थु१मोदकादिकणिका२मण्डकादिलग्नलोट्टचूर्ण३शाकवघार४घृतादिबिन्दु५-तक्रादिच्छटानां ६ भूमावपातनेन 'जितेन्द्रिया यतयो जेमन्ति नित्यं' 'यथा जिमिताजिमितानां' यतीनां 'स्थान-विशेषः' स्थानकभेदो 'न लक्ष्येत' न ज्ञायेत श्राद्धादिभिरिति॥२७॥ सांप्रतं संयतोऽनिष्टमप्याहारमिष्टमिव भुञ्जीतेत्याह—

तित्तगं च कडुअं च कसायं अंबिलं च महुरं लवणं वा।एअ लद्ध मन्नट्ठ पउत्तं महुघयं व भुंजिज्ज संजए ॥२८

'तिक्तकं वा' एलुकवालुकादि,'कटुकं वा' आर्द्रकतीमनादि,'कषायं' वल्लादि,'आम्लं वा' तक्रारनालादि,'मधुरं' क्षीरदध्यादि,'लवणं वा' प्रकृतिक्षारं तथाविधशाकादि, लवणोत्कण्टं वाऽन्यदेतत् तिक्तकादि लब्धागमोक्तेन विधिना प्राप्तम्।अन्यार्थमक्षोपाङ्गन्यायेन परमार्थतो मोक्षार्थं प्रयुक्तं तत्साधकमिति कृत्वा'मधुघृतमिव भुञ्जीत संयतो'न वर्णाद्यर्थम्॥२८॥किञ्च—

अरसं विरसं वावि सूइअं वा असूइअं। उल्लं वा जइ वा सुक्कं मंथुकुम्मासभोअणं ॥ २९ ॥

'अरसं' असंप्राप्तरसं हिङ्ग्वादिभिरसंस्कृतमित्यर्थः। 'विरसं वापि' विगतरसमतिपुराणौदनादि, 'सूचितं वा' व्यञ्जनादियुक्तम्। 'असूचितं वा' तद्रहितम्। 'आर्द्रं वा' प्रचुरव्यञ्जनम्। 'यदि वा शुष्कं' स्तोकव्यञ्जनम्। किं तदित्याह—'मन्थुकुल्माषभोजनम्' मन्थु बदरचूर्णादि, कुल्माषाः सिद्धमाषाः ॥ २९ ॥ एतद्भोजनं किमित्याह—

उप्पन्नं नाहीलिज्जा अप्पं वा बहुफासुअं। मुहालद्धं मुहाजीवी भुंजिज्जा दोस वज्जिअं ॥ ३० ॥

'उत्पन्नं' विधिना प्राप्तं 'नातिहीलयेत्' सर्वथा न निन्देत्। 'अल्पं' एतन्न देहपूरकमिति किमनेन 'बहु वा' आसारप्रायमिति। 'वा' शब्दस्य व्यवहितः संबन्धः। किंभूतं तदित्याह—'प्रासुकं' प्रगतासु निर्जीवमित्यर्थः। नातिहीलयेदिति। किन्त्वेवं भावयेद् यदेव इह लोका ममानुपकारिणः प्रयच्छन्ति तदेव शोभनमिति। एवं 'मुधालब्धं' मन्त्रवादादि विना प्राप्तं, 'मुधाजीवी' सर्वथा अविदानजीवी, जात्याद्यनाजीवको वा, 'भुञ्जीत दोषवर्जितं' संयोजनादिरहितमित्यर्थः ॥३०॥

एतद्दुरापमित्याह—

दुल्लहाओ मुहादाई मुहाजीवीवि दुल्लहा। मुहादाई मुहाजीवी दोवि गच्छंति सुगइं तिबेमि ॥३१॥

॥ इति 'अन्नायउंछ' इति कुलकं समाप्तं ॥

दुर्लभा मुधादातारस्तथाविधभागवतवत्। मुधाजीविनोऽपि दुर्लभास्तथा विधचेल्लकवत्। अमीषां फलमाह—'मुधादातारो मुधाजीविनश्च द्वावप्येतौ गच्छतः सुगतिं' सिद्धिगतिम्। कदाचिदनन्तरमेव, कदाचिद्देवलोकसुमानुषप्रत्यागमनपरम्परया। इति ब्रवीमि न स्वमत्या किन्तु तीर्थकृदुपदेशेन। तत्र भागवतोदाहरणं यथा—

"एगो परिव्वायगो सो एगं भागवतं उवट्ठिओ अहं तव गिहि वरिसारत्तं करेमि मम उदंतं वहाहि तेण भणिओ जइ मम उदंतं ण वहसि एवं होउत्ति, तो सो भागवओ सेज्ज-भत्त-पाणाइणा उदंतं वहइ, अण्णया य तस्स घोडओ चोरेहिं हिओ अतिप्पभायंति काऊणं जालीए वद्धो सो अ परिव्वायगो तलाए ण्हायओ गओ तेण सो घोडओ दिट्ठो आगंतुं भणति मम पाणियतडे पुत्ती विस्सरिआ गोहो विसज्जिओ तेण घोडओ दिट्ठो आगंतुं कहिअं तेण भागवएण णायं जहा परिव्वा-

यमेण कहिअं तेण परिवायगो भण्णइ जाहि नाहं तव णिविट्ठं उदंतं वहामि णिविट्ठं अप्पफलं भवइ एरिसो मुहादाइ ॥
अथ मुधाजीव्युदाहरणं यथा—

एगोराया धम्मं परिक्खइ को धम्मो जो अणिविट्ठं भुंजइ तो तं परिक्खामित्ति काऊणं मणूसा संदिट्ठा राया भोअए देइ, तत्थ बहवे कप्पडिआदयो आगया पुच्छिज्जंति तुब्भे केण भुंजइ एगो भणति अहं मुहेण, अण्णो भणति अहं पाएहिं, अण्णो भणति अहं हत्थेहिं, अण्णो भणति अहं लोगाणुग्गहेण, चेलओ भणति अहं मुहियाए, रण्णा पुच्छिअं कहं चेअं एगेण भणिणं अहं कहओ अओ मुहेण, अण्णेण भणिअं अहं लेहवाहओ, अओ पाएहिं, अण्णेण भणिअं अहं लेहओ अतो हत्थेहिं, भिक्खुणा भणिओ अहं पवइओ अतो लोगाणुग्गहेण, चेलएण भणिअं अहं संजायसंसारविरागो अतो मुहियाए, ताहे सो राया एस धम्मुत्ति काऊण आयरीयसमीवं गतो पडिबुद्धो पवइओ अ एसो मुहाजीवित्ति ॥ ३१ ॥

कोविदविजयविमलगणिशिष्येणानन्दविजयसञ्ज्ञेन । एकत्रिंशत्पदार्थो लिखितः कोऽपि समयोक्तः ॥ १ ॥ सूत्रेणामा गणनया ग्रन्थमानं विनिश्चितम् । अनुष्टुभामुभे एव षण्णवत्यधिके शते ॥ २ ॥

इति 'अन्नायउंछग्रहणे' इति कुलकवृत्तिः समाप्ता ॥ पण्डितश्रीआनन्दविजयगणिकृता सुविहितयतिततिवाचनाकृते लिखिता प्रथमादर्शे बुद्धिविमलगणिना ॥ इति शुभम् ॥ श्रीः ॥

Printed by R. Y. Shedge at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay, and Published by Vallabhadas Tribhuvandas Gandhi, Secretary, Jaina Atmananda Sabha, Bhavanagar.

श्रीआत्मानन्द–ग्रन्थरत्नमाला–अष्टादशं रत्नम् (१८)

श्रीमन्महेन्द्रसूरिसङ्कलिता विचारसप्ततिका।

(श्रीमद्विनयकुशलविरचितवृत्तिसमेता)

पूज्यपादप्रवर्त्तकश्रीमत्कान्तिविजयविनेयचतुरविजयोपदिष्टसुरतनगरवास्तव्य–
श्रीओशवालज्ञातीय प्राणजीवनात्मज–धर्मचन्द्रभार्या–रूबलबाई–द्रव्यसाहाय्येन
प्रकाशयित्री–श्रीआत्मानन्दसभा–भावनगर।

इदं पुस्तकं मुम्बय्यां **वल्लभदास–त्रिभुवनदास गांधी** सेक्रेटरी **जैन आत्मानन्दसभा भावनगर** इत्यनेन
निर्णयसागरमुद्रालये कोलभाटवीथ्यां २३, तमे गृहे रा. य. शेडगे द्वारा मुद्रयित्वा प्रकाशितम्।

वीरसंवत् २४३९. आत्मसंवत् १९. विक्रमसंवत् १९६९.

वि० १

Printed by R. Y. Shedge at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay, and Published by Vallabhadas Tribhuvandas Gandhi, Secretary, Jaina Atmananda Sabha, Bhavanagar.

॥ प्रस्तावना ॥

इदं विचारसप्ततिकाख्यं चिरत्नप्रकरणरत्नं जिनप्रवचनपारावारपारीणैः अञ्चलगच्छापरपर्यायविधिपक्षभट्टारकसुरसूरिभिः श्रीमहेन्द्रसूरिभिः संदृब्धम्, तच्च "महिंद" इति प्रान्तगाथागतपदावलोकनेन स्फुटमेव विज्ञायते। वृत्तिकारैस्तु—"महेन्द्रसिंहसूरिभि." इत्युल्लेखितम्, परमेभिरेवाचार्यैर्विनिर्मितान्यप्रकरणेषु महेन्द्रसूरिरित्येवोपलभ्यतेऽतो मयापि तथैव लिखितम्, इत्येतद्विषयस्त्वग्रे स्फुटीभविष्यति। अस्य रचयितारोऽञ्चलगच्छीयश्रीधर्मघोषसूरिविनेयावतंसतां धर्तारो गुणभूरयो महेन्द्रसूरयो विक्रमार्कीयत्रयोदशशताब्द्यामभूवन्। एतेषां धर्मघोषसूरिशिष्यत्वं सत्तासमयश्च मनःस्थिरिकरणप्रकरण—आयुःसंग्रह—परिग्रहप्रमाणगतानां क्रमेण —

"सिरिधम्मसूरिसुगुरूवएसओ सिरिमहिंदसूरीहिं। मणथिरिकरणपयरणं संकलिअं बारचूलसीए ॥ १६६ ॥"

"इय धम्मसूरिसुगुरूवएसओ सिरिमहिंदसूरीहिं। कइवयथूलपयाऊ संकलिअ बारचूलसीए ॥ ८२ ॥"

"सिरिजयसिंहमुणीसरसरवरकमलाण धम्मसूरीण। तच्चरणमहुयराणं महिंदसूरीण पासंमि ॥ ९८ ॥ बारसतेयासीए"

इत्येतासां सपादत्रयगाथानां निर्वर्णनेन प्रकटमेवावगम्यते। एतत्प्रकरणप्रणेतृभिरुक्तव्यतिरिक्ता अन्येऽपि ग्रन्थाः कृता भवेयुः परं कति किंविषयाः? इति नाद्यापि निर्णयपथमवतीर्णम्।

प्रकरणस्यास्य के वृत्त्याः प्रणेतार इत्येतद्विषयनिर्णयस्तु—

"श्रीतपगणगगनाङ्गणसूरिश्रीविजयदेवसूरीणाम्। विनियोगाद्वृत्तिरियं विनिर्मिता विनयकुशलेन ॥ १ ॥"

इति वृत्तिप्रान्तवर्त्तिना पद्येन श्रीमद्विनयकुशला इति प्रकटमेवावबुध्यते। यद्यपि वृत्तिकारकैरत्र स्वसत्तासमयः स्वगुरोरभिधेयश्च क्वापि नोपनिबद्धस्तथापि एतन्मुनिपुङ्गवविनिर्मितमण्डलप्रकरणस्य स्वोपज्ञवृत्तिप्रशस्तिगताभ्याम्—

"गुरुतमतपगणपुष्करसूर्याः श्रीविजयसेनसूरीन्द्राः। श्रीमदकब्बरनरवरविहितप्रबलप्रमोदा ये ॥ १ ॥

तेषां शिशुना वृत्तिः स्वोपज्ञा व्यरचि विनयकुशलेन। मूलत्राणपुरे करबाणरसेन्दु १६५२ मिते वर्षे ॥ २ ॥"

इत्येताभ्यां पद्याभ्यां तपगणगगनाङ्गणगभस्तिमालिश्रीमद्विजयसेनसूरीन्द्राणामन्तेवासित्वं विक्रमार्कीयसप्तदशशताब्द्यां सत्तासमयश्च प्रकटमेव प्रतिभाति।

प्रकरणेऽस्मिन् प्रकरणकारैः "पडिमा" इत्याद्याद्यगाथागतद्वादशविचाराणां स्वरूपं प्रकटतया प्रपञ्चितमस्ति, तत्तु स्वयमेवावभोत्स्यते विचारचतुरैरिति नास्माकमत्रातिकथनीयम्।

अस्य संशोधनसमये पुस्तकमेकं पन्न्यासश्रीमद्वीरविजयमुनिसत्कम्, द्वितीयं पुनः पूज्यपादप्रवर्तकश्रीमत्कान्तिविजयान्तेवासिमुनिश्रीभक्तिविजयसत्कम्, एते द्वे एव पुस्तके समुपलब्धे। ततः पुस्तकप्रेषणेन साहाय्यं वितन्वनोरेनयोर्मन्येऽहं महान्तमुपकारम्।

एतत्पुस्तकद्वितयनिरीक्षणेनैव संशोधितेऽप्यत्र निबन्धे यत्र क्वचनाशुद्धिः कृता जाता वा भवेत्तत्र संशोधनीयं विपश्चिदपश्चिमैरिति प्रार्थ्यते—

प्रकल्पिताञ्जलिः प्रवर्त्तकपादपाथोजपरागः

चतुरविजयो मुनिः।

॥ अर्हम् ॥

न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरिभ्यो नमः

श्रीमहेन्द्रसूरिविरचिता विचारसप्ततिका ।

(श्रीविनयकुशलरचितवृत्तिसमेता)

सर्वज्ञं श्रीजिनं नत्वा विश्वस्थितिविचारकम् । विचारसप्ततेः किञ्चित्संक्षेपार्थो विधीयते ॥ १ ॥

इह सार्वज्ञे प्रवचनेऽनेके विचाराः सन्ति । परमत्राञ्चलगच्छश्रृङ्गारहारश्रीमहेन्द्रसिंहसूरिभिर्द्वादश विचाराः संगृहीताः। तत्र प्रथमं द्वारगाथामाह—

पडिमा[1] मिच्छा[2] कोडी[3] चेईअ[4] पासाय[5] रविकरप्पसरो[6]। पज्जत्ति[7] किन्हं[8] वलया[9] नंदी[10] गिहिकिरिअ[11] गुणठाणा[12]॥१॥

शाश्वतप्रतिमानां संख्याविचारः १ । ईर्यापथिकीमिथ्यादुष्कृतविचारः २ । कोटिशिलास्वरूपविचारः ३ । चैत्याना शाश्वतसिद्धायतनानां संख्याविचारः ४ । प्रासादानां देवविमानानां आकारविचारः ५ । षट्सु दिक्षु सूर्यकिरणानां प्रसारविचारः ६ । औदारिकवैक्रियाहारकदेहत्रिके षट्पर्याप्तिविचारः ७ । पञ्चमस्वर्गस्थकृष्णराजीविचारः ८ । मानुषोत्तरकुण्डलरुचकाभिधवलयाकारपर्वतत्रयविचारः ९ । नन्दीश्वराभिधानस्याष्टमद्वीपस्य विचारः १० । गृहस्थानामिति श्रावकाणां धर्मक्रियावक्तव्यताविचारः ११ । चतुर्दशगुणस्थानकानां विचारः १२ । एभिर्द्वादशभिर्द्वारैर्विचारसप्ततिकाभिधानो ग्रन्थो-

ऽयमभिधीयते ॥ १ ॥ अथाद्य प्रतिमाद्वारमाह—

उसभाईजिणपडिमं इक्कं पि न्हवंतपूअयंतेहिं । चिंतेअव्वं एयं भवेहिँ विवेगमंतेहिं ॥ २ ॥

ऋषभाद्यनेकजिनप्रतिमानां मध्यादेकामपि जिनप्रतिमां स्नपयद्भिः पूजयद्भिर्विवेकवद्भिर्भव्यैरेतच्चिन्तयितव्यम् ॥ २ ॥

यच्चिन्तयितव्यं तद्गाथापञ्चकेनाह—

भवणवईभवणेसुं कप्पाइविमाण तह महीवलए। सासयपडिमा पनरस कोडिसय बिचत्त कोडिओ ॥३॥
पणपन्नलक्ख पणविस सहसा पंच य सयाइं चालीसा। तह वणजोइसुरेसुं सासयपडिमा पुण असंखा ॥४॥

भवनपतिभवनेषु तथा कल्पादिविमानेषु तथा महीवलये इति तिर्यग्लोके पञ्चदशशतकोटयो द्विचत्वारिंशत्कोटयः पञ्चपञ्चाशल्लक्षाः पञ्चविंशतिः सहस्राश्चत्वारिंशदधिकाः पञ्चशतप्रतिमाः १५ ४२ ५५ २५ ५ ४० । तथा व्यन्तरज्योतिष्कभवनेषु शाश्वत्यः प्रतिमाः पुनरसंख्याताः, तेषां निवासस्थानानामसंख्यातत्वात् । यत्तु ग्रन्थान्तरे व्यन्तरज्योतिष्कातिरिक्ताः शाश्वत्यः प्रतिमाः—"पनरस कोडिसयाइं दुचत्त कोडीऽडवन्न लक्खाइं । छत्तीस सहस असिआ तिहुअणबिंबाणि पणमामि॥१॥" इत्युक्ता दृश्यन्ते तद्ग्रन्थमते तथैव, एतद्ग्रन्थकर्तृमते चैतावत्यः ॥ ३–४ ॥ अथाशाश्वतीः प्राह—

तह चेव जंबुदीवे धायइसंडे य पुक्खरद्धे अ । भरहेरवयविदेहे गामागरनगरमाईसु ॥ ५ ॥ ॥ १ ॥

तथा चैव जम्बूद्वीपे धातकीखण्डे पुष्करार्द्धे च भरतैरावतविदेहेषु ग्रामाकरनगरादिषु ॥ ५ ॥ एतेषु किमित्याह—

सुरमणुएहिँ कयाओ चेइअगिहचेइएसु जा पडिमा। उक्कोस पंच धणुसय जाव य अंगुट्ठपवसमा ॥६॥

एतेषु पूर्वोक्तस्थानकेषु काश्चन सुरकृता विद्युन्मालिसुरकृतश्रीमहावीरजीवितस्वामिमूर्त्यादयः, काश्चन भरतचक्र्यादिमनुष्यकारिताष्टापदपर्वतस्थितचतुर्विंशतितीर्थकरमूर्त्यादयः। तथा "चेइअ" इति चैत्येषु श्रावककारितजिनायतनेषु। तथा गृहचैत्येषु देवतावसथेषु या या जिनप्रतिमाः सन्ति तासां प्रमाणं उत्कृष्टतः पञ्च धनुःशतानि, जघन्यतो यावदङ्गुष्ठपर्वसमाः ॥६॥

ताः कियत्यः ? इत्याह—

बहुकोडिकोडिलक्खा ताओ चिय भावओ अहं सवा। समगं चिय पणमामि न्हवेमि पूएमि झाएमि ॥७॥

अशाश्वतीः प्रतिमा बहुकोटिकोटिलक्षाः शाश्वतीश्च ताः सर्वा अपि समकं समकालमेव शिरसा प्रणमामि, सुगन्धोदकैः स्नपयामि, चन्दनपुष्पादिभिः पूजयामि, मनसा ध्यायामीति चिन्त्यम् ॥ ७ ॥

व्याख्यातं प्रथमं प्रतिमाद्वारम्। अधुना ईर्यापथिकीमिथ्यादुष्कृतद्वारं द्वितीयमाह—

चउदस पय अडचत्ता तिगहिअतिसई सयं च अडनउअं।

चउगइ दसगुण मिच्छा पण सहसा छ सय तीसा य ॥ ८ ॥

चतुर्दश पदानि नरकेषु, अष्टचत्वारिंशच्च तिर्यक्षु, त्रिकाधिका त्रिशती मनुष्येषु, अष्टनवत्यधिकं शतं च देवेषु, एवं चतुर्गतिसंभवजीवभेदात्त्रिषष्ट्यधिकपञ्चशतसंख्याकान् ५६३ संमील्येर्यापथिकीदण्डकसप्तमसंपद्गताभिहतादिभिर्दशपदैर्गुणितानि मिथ्यादुष्कृतानि पञ्च सहस्राणि षट् शतानि त्रिंशदधिकानि जातानीति ५६३० संक्षेपेणोक्तानि ॥ ८ ॥

तानि कथं भवन्तीति विस्तरेणाह—

नेरइआ सत्तविहा पज्जअपज्जत्तणेण चउदसहा । अडचत्ताईसंखा तिरिनरदेवाण पुण एवं ॥ ९ ॥

नैरयिकाः सप्तविधाः रत्नप्रभादिसप्तनरकभेदेन । ते च पर्याप्तापर्याप्तभेदाभ्यां चतुर्दशधा । तथा 'अडचत्त' इति अष्टचत्वारिंशदादयः संख्याः पुनः तिर्यग्नरदेवानां, 'एवं' अमुना वक्ष्यमाणेन प्रकारेण ज्ञेयाः ॥ ९ ॥ ता आह—

भूदग्गिवाउणंता वीसं सेसतरु विगल अट्ठेव। गब्भेयर पज्जेयर जलथलनहउरभुआ वीसं ॥ १० ॥

'भूदग्गि' इति भूजलानलानिलानन्तकायवनस्पतयो मूलभेदेन पञ्च, ते सूक्ष्मबादरभेदाभ्यां दश भेदाः । दशापि पर्याप्तापर्याप्तभेदाभ्यां विंशतिः। 'सेसतरु' इति शेषवनस्पतिः प्रत्येकवनस्पतयः द्वित्रिचतुरिन्द्रियलक्षणविकलेन्द्रियत्रयमिलिताश्चत्वारो भेदाः,ते पर्याप्तापर्याप्तभेदाभ्यां अष्टौ। 'गब्भेयर' इति गर्भजसंमूर्छनजपर्याप्तापर्याप्तभेदैश्चतुर्विधा अपि पञ्चेन्द्रियाः पञ्च; ते के ? जलचर-स्थलचर-खेचर–उरःपरिसर्प-भुजपरिसर्पाः। पञ्चैते चतुर्भेदगुणिता विंशतिः । एवमेकेन्द्रियाः पूर्वोक्ता विंशतिः, प्रत्येकवनस्पतिविकलेन्द्रिया अष्टौ, पञ्चेन्द्रिया विंशतिः, मिथः संमिलिता अष्टचत्वारिंशत्तिर्यग्भेदाः ४८ ॥ १० ॥ अथ मनुष्यभेदानाह—

पनरस तीस छपन्ना कम्माकम्मा तहंतरद्दीवा । गब्भा पज्ज अपज्जा मुच्छ अपज्जा तिसय तिन्नि ॥११॥

पञ्चभरतपञ्चैरावतपञ्चमहाविदेहसंभवाः पञ्चदश कर्मभूमिजाः । तथा भरतैरावतान्तरालवर्तिषु पञ्चहैमवतपञ्चहरिवर्षपञ्चरम्यकपञ्चहैरण्यवतपञ्चदेवकुरुपञ्चोत्तरकुरुषु त्रिंशदकर्मभूमिजा युगलिनः। तथा क्षुल्लहिमवच्छिखरिनाम्नोः पर्वतयोः पर्य-

न्तालवणोदधौ पूर्वस्यां पश्चिमायां (च) द्वे द्वे गजदन्ताकारे दंष्ट्रे विनिर्गते, एवमष्टौ दंष्ट्राः, एकैकस्यां सप्त सप्त द्वीपाः, एवं षट्पञ्चाशदन्तरद्वीपेषु, युगलिनः । ततः पञ्चदश, त्रिंशत्, षट्पञ्चाशत् (च) मिलितेषु एकोत्तरशतक्षेत्रेषु गर्भसमुत्पन्ना मनुष्याः । ते च पर्याप्तापर्याप्तभेदाभ्यां द्व्यधिकं द्विशतं भवन्ति। एतेष्वेव पूर्वोक्तस्थानकेषु संमूर्छनजा मनुष्या एकाधिकं शतं भवन्ति, ते चापर्याप्ता एव, तेषां पर्याप्तत्वभवनाभावात् । एवं सर्वे त्र्यधिका त्रिशती भेदा मनुष्यस्य ॥ ११ ॥

अथ देवभेदानाह—

भवणा परमा जंभय वणयर दस पनर दस य सोलसगं। गइ ठिइ जोइस दसगं किब्बिस तिग नव य लोगंता

कप्पा गेविजणुत्तर बारस नव पण पजत्तमपजत्ता। अडनउ अ सयं अभिहयवत्तियमाईहिँ दसगुणिआ।१३।

भवनपतयोऽसुरादयो दश प्रसिद्धाः । तथा परमाधार्मिकाः पञ्चदश असुरनिकायजातीयाः । यथा—"अंबे १ अंबरिसी चेव २ सामए ३ सबले विय ४ । रुद्दो ५ वरुद्द ६ काले अ ७ महाकालत्ति ८ आवरे ॥ १ ॥ असिपत्ते ९ धणुं १० कुंभे ११ वालूं १२ वेअरणी १३ तहा । खरस्सरे १४ महाघोसे १५ पन्नरस परमाहम्मिआ ॥ २ ॥" एतेषां नामान्वर्थः समवायाङ्गवृत्त्यादिभ्यो ज्ञेयः । तथा जृम्भका दशधा, यथा—"अन्नजृम्भकः १ पानजृम्भकः २ लयनजृम्भकः ३ वसुजृम्भकः ४ शयनजृम्भकः ५ पुष्पजृम्भकः ६ फलजृम्भकः ७ विद्याविद्याजृम्भकः ८ पुष्पफलजृम्भकः ९ अव्यक्तजृम्भकः १०" । एते व्यन्तरजातीया दीर्घवैताढ्यवासिनः । तथा व्यन्तराः षोडश, यथा—रत्नप्रभायां शतयोजनानन्तरनिवासिनः । के ते ?—"वंतर पुण अट्ठविहा पिसाय १ भूआ २ तहा जक्खा ३ । रक्खस ४ किंनर ५ किंपुरिस ६ महोरग ७ अट्ठमा

य गंधवा ८ ॥ १ ॥ ” इति । द्वितीयव्यन्तरा दशयोजनानन्तरं वसन्ति । यथा—“अणपन्नी १ पणपन्नी २ इसिवाइ अ ३ भूअवाइए ४ चेव । कंदी अ ५ महाकंदी ६ कोहंडे ७ चेव पयए य ८ ॥ १ ॥ ” इत्यष्टौ । एवं षोडशभेदाः । दशेत्यादीनि पदानि प्रत्येकं योज्यानि । “गइ” इति चन्द्रसूर्यग्रहनक्षत्रतारकालक्षणाः चर ५ स्थिर ५ भेदाज्ज्योतिष्का दश । तथा सौधर्मेशानयोरधस्त्रिपल्यायुषः १, सनत्कुमाराधस्त्रिसागरायुषः २, लान्तकाधस्त्रयोदशसागरायुषः ३, किल्बिषास्त्रयः । तथा लोकान्तिका नव, यथा—“सारस्सय १ माइच्चा २ वण्ही ३ वरुणा य ४ गद्दतोया य ५ । तुसिआ ६ अव्वाबाहा ७ अग्गिच्चा ८ चेव रिट्ठा य ॥ १ ॥ ” इत्यादि ॥ १२ ॥ तात्स्थ्यात्तद्व्यपदेशात् कल्पा ग्रैवेयका अनुत्तराः (च) देवाः । एवं द्वादशनवपञ्चभेदैः षड्विंशतिः । एते पूर्वोक्तैर्दशपञ्चदशदशषोडशदशत्रिकनवकैर्मिलिता नवनवतिर्भेदा देवानाम् । ग्रन्थान्तरे च—“इंद १ सम २ तायतीसा ३ पारसिया ४ रक्ख ५ लोगपाला य ६ । अणि अ ७ पइन्न ८ अभिओगा ९ किब्बिस १० दस भवणवेमाणी ॥ १ ॥ ” इत्यादि देवभेदा अनेके सन्ति, परमेतद्ग्रन्थकर्त्रा नवनवतिरेव विवक्षिताः । ते च पर्याप्तापर्याप्ताभ्यां द्विगुणिता अष्टनवत्यधिकं शतं १९८ भवन्ति । ततः सर्वे चतुर्गतिका जीवाः ५६३ ॥ १३ ॥

‘अभिहया’ इत्यादिदशपदैर्गुणिता यद्भवति तदाह—

अभिहयपयाइ दह गुण पण सहसा छ सय तीसई भेआ । ते रागदोसदुगुणा इक्कारस सहस दोसया सट्ठी १४
मणवयकाए गुणिआ तित्तीस सहस्स सत्तसयसीया । करकारणानुमइए लक्खं सहसो तिसय चाला ॥१५॥
कालतिगेणं गुणिआ तिलक्ख चउ सहस वीसमहिआ य । अरिहंत[1]सिद्ध[2]साहू[3]देव[4]गुरु[5]अप्प[6]सक्खीहिं॥१६॥

अट्ठारस लक्खाइं चउवीस सहस्स एगवीसहिआ । इरिआमिच्छादुक्कडपमाणमेअं सुए भणियं ॥१७॥

अभिहतपदादिभिः ५६३ दशभिर्गुणिताः पञ्च सहस्राः षट् शतानि त्रिंशदधिकानि जायन्ते ५६३० । तेऽपि रागद्वेषाभ्यां द्विगुणिता एकादश सहस्राः षष्ठ्यधिके च द्वे शते स्युः ११२६० ॥ १४ ॥ ते च मनोवचःकायैर्गुणितास्त्रयस्त्रिंशत्सहस्राण्यशीत्यधिकानि सप्त शतानि भवन्ति ३३७८० । तेऽपि च करणकारणानुमतिलक्षणत्रिकैर्गुणिता एकं लक्षं एकः सहस्रश्चत्वारिंशदधिकानि त्रीणि शतानि च १०१३४० ॥ १५॥ ते च कालत्रिकेण "अतीतं निन्दामि, अनागतं प्रत्याख्यामि, प्रत्युत्पन्नं संवरामि" इति वचनादतीतानागतवर्तमानलक्षणेन गुणिताः तिस्रो लक्षाश्चत्वारः सहस्रा विंशत्यधिकाः ३०४०२०। ते चार्हत्सिद्धसाधुसम्यग्दृष्टीन्द्रादिदेवगुर्वात्मसाक्षिकैः षड्भिर्गुणिता अष्टादश लक्षाश्चतुर्विंशतिः सहस्रा विंशत्यधिकशतं १८२४१२० इतीर्यापथिकीमिथ्यादुष्कृतप्रमाणं श्रुते भणितम् । क्वचिदाभोगानाभोगभेदद्वयगुणिताः षट्त्रिंशल्लक्षा अष्टचत्वारिंशत्सहस्राश्चत्वारिंशदधिके द्वे शते ३६४८२४० ॥ १६–१७ ॥ इति मिथ्यादुष्कृतद्वारं द्वितीयम् ॥

अथ कोटिशिलाख्यं तृतीयं द्वारमाह—

जोयणपिहुलायामा दसन्नपव्वयसमीव कोडिसिला । जिणछक्कतित्थसिद्धा तत्थ अणेगा उ मुणिकोडी ॥१८

उत्सेधाङ्गुलनिष्पन्नैकयोजनपृथुलायामा एकयोजनोच्चा भरतक्षेत्रमध्ये मध्यखण्डे मगधदेशे दशार्णपर्वतसमीपे वृत्ता कोटिशिला नाम शिला आस्ते । तत्र तस्यां कोटिशिलायां श्रीशान्त्यादिजिनषट्कतीर्थसिद्धा अनेका मुनिकोटयो ज्ञेयाः ॥१८॥

कथं सिद्धास्तदाह—

पढमं संतिगणहरो चक्काउहणेगसाहुपरियरिओ। बत्तीसजुगेहिँ तओ सिद्धा संखिज्जमुणिकोडी॥१९॥
संखिज्जा मुणिकोडी अडवीसजुगेहिँ कुंथुनाहस्स। अरजिण चउवीसजुगा बारसकोडीओ सिद्धाओ॥२०॥
मल्लिस्सवि वीसजुगा छ कोडि मुणिसुव्वयस्स कोडितिगं। नमितित्थे इगकोडी सिद्धा तेणेव कोडिसिला २१

प्रथमं श्रीशान्तिनाथजिनेश्वरस्य चक्रायुधनामा प्रथमो गणधरोऽनेकसाधुगणपरिवृतः सिद्धिं गतः। ततो द्वात्रिंशद्युगैरिति द्वात्रिंशत्पट्टप्रतिष्ठितपुरुषपरम्पराभिः संख्येयमुनिकोटयः सिद्धाः। तत्र शिलायामिति शेषः १ ॥ १९ ॥ संख्येयमुनिकोटयोऽष्टाविंशतियुगैः श्रीकुन्थुनाथतीर्थसंबन्धिन्यस्तत्र सिद्धाः २। तथा श्रीअरनाथजिनस्य द्वादश कोटयो मुनीनां चतुर्विंशतियुगान् यावत् सिद्धाः ३ ॥ २० ॥ श्रीमल्लिनाथस्यापि विंशतियुगान् यावत् षट् कोटयः साधवः सिद्धाः ४। तथा श्रीमुनिसुव्रतजिनस्य तिस्रः कोटयः सिद्धाः ५। तथा श्रीनमिनाथतीर्थङ्करस्य एका कोटिः सिद्धा मुनीनामिति शेषः ६। अन्येऽपि बहवः साधवः सिद्धास्तेन कारणेनैषा कोटिशः सिद्धभवनात्कोटिशिलेत्यभिधीयते ॥२१॥ अथ सा शिला कैरुत्पादिता तदाह—

छत्ते सिरम्मि गीवा वच्छे उयरे कडीइ ऊरूसु। जाणू कहमवि जाणू नीया सा वासुदेवेहिं ॥ २२ ॥

नवभिर्वासुदेवैः सा शिला उत्पाटनावसरे एतेषु स्वाङ्गस्थानकेषु आनीता। यथा—प्रथमेन त्रिपृष्ठवासुदेवेन वामहस्तेनोत्पाट्य छत्रस्थाने शिरस्यूर्ध्वं समानीता १। द्वितीयेन द्विपृष्ठेन तथैवोत्पाट्य शीर्षं यावदानीता २। तृतीयेन स्वयंभुवा ग्रीवां यावदानीता ३। चतुर्थेन पुरुषोत्तमेन वक्षस्यानीता ४। पञ्चमेन पुरुषसिंहेन उदरं यावदानीता ५। षष्ठेन पुरुषपुण्डरीकेण कटीं यावदानीता ६। सप्तमेन दत्तनाम्ना ऊर्वोर्नीता ७। अष्टमेन लक्ष्मणेन जान्वोर्नीता ८। नवमेन कृष्णेन

कथमपि जान्वोः किञ्चिदधः समानीता ९ ॥ २२ ॥ कोटिशिलाद्वारं तृतीयम् ॥ अथ शाश्वतचैत्यद्वारं चतुर्थमाह—

इक्कारअहिअपणसय सासयचेइअ नमामि महिवलए।तीसं वासहरेसु वेयड्ढेसुं च सयरिसयं ॥ २३ ॥

एकादशाधिकानि पञ्च शतानि ५११ शाश्वतानि चैत्यानि सिद्धायतनानि महीवलये तिर्यग्लोके नमामि। यतो यान्यूर्ध्वलोके ८४९७०२३ चैत्यानि। अधोलोके च ७७२००००० चैत्यानि। व्यन्तरज्योतिष्केष्वसंख्यातानि, तानि ग्रन्थान्तरसुगम्यानि। अत्र तु तिर्यग्लोकगतचैत्यस्थानान्येवाह—'तीसं' इति वर्षधरपर्वतेषु त्रिंशत् चैत्यानि, प्रतिपर्वतमेकैकचैत्यसद्भावात्। तथा दीर्घवैताढ्येषु सप्तत्यधिकं शतं १७० ॥ २३ ॥ तथा चाह—

वीसं गयदंतेसुं कुरुदुमदसगे तहेव नउई अ। वक्खारगिरिसु असिई पणसीई मेरुपणगम्मि ॥ २४॥

इसुमणुकुंडलरुअगे चउ चउ वीसं च नंदिसरिदीवे।अडवीस नंदिकुंडलिरुअगे सयपन्नबासयरी ॥२५॥

विंशतिर्गजदन्तपर्वतेषु २०। तथा जम्बूवृक्षादिदशवृक्षेषु नवतिः ९०। यत एकमूर्ध्वशाखायां वृक्षादिग्विदिकूस्थेष्वष्टसु कूटेषु चैकैकचैत्यसद्भावात् प्रतिवृक्षं नवैव, तेन दशवृक्षेषु नवतिः ९०। तथाऽशीतिसंख्येषु वक्षस्कारगिरिषु अशीतिश्चैत्यानि ८०। तथा मेरुपञ्चके पञ्चाशीतिः। यतश्चतुर्षु वनेषु चतुर्दिक्षु चतुश्चैत्यसद्भावात् १६, चूलिकायां चैकम् एवं प्रतिमेरु १७ ॥ २४ ॥ इषुकारमानुषोत्तरकुण्डलरुचकाभिधेषु प्रत्येकं चत्वारि चत्वारि। तथा नन्दीश्वरद्वीपे विंशतिश्चैत्यानि। अथैतेषां चैत्यानामुच्चत्वादिप्रमाणमाह—नन्दीश्वरसत्का विंशतिः, कुण्डलरुचकयोरष्टौ, सर्वाण्यष्टाविंशतिः। 'सयपन्न' इति पूर्वपश्चिमयोः शतयोजनदीर्घाणि, दक्षिणोत्तरतः पञ्चाशदायामानि, द्वासप्ततिरुच्चानि, चतुर्द्वाराणि ॥ २५ ॥

अथ तदर्धमानान्याह—

अट्ठाराहिय दुसई पनद्ध छत्तीस दीहपिहुउच्चा । माणसइसुगयदंतयवक्खारवासहरमेरुसुं ॥ २६ ॥
पणसट्ठिअहिअ सयदुग संपुण्णं कोसमद्ध देसूणं । दीहे पिहु उच्चत्ते कुरुदुमवेअड्ढचूलासु ॥ २७ ॥

अष्टादशाधिकानि शतद्वयप्रमितानि चैत्यानि 'पन' इति पञ्चाशद्दीर्घाणि । 'अद्ध' इति पञ्चविंशतिरायामानि । षट्त्रिंशदुच्चानि । कानि तानि चैत्यानि ? मानुषोत्तर ४ इषुकार ४ गजदन्त २० वक्षस्कार ८० वर्षधर ३० चूलिकापञ्चवर्जमेरुषु ८० गतानि सर्वाण्यष्टादशाधिकानि शतद्वयचैत्यानि ज्ञेयानि ॥ २६ ॥ पञ्चषष्ट्यधिकानि शतद्वयमितानि चैत्यानि दीर्घत्वे संपूर्णक्रोशानि, पृथुलत्वे देशोनक्रोशानि, उच्चत्वेऽर्धक्रोशानि सन्ति । कानि तानि ? कुरुक्षेत्रदशकगतजम्बूवृक्षादिषु नवतिः ९० । विजयभरतैरावतगतदीर्घवैताढ्येषु सप्ततिशतं १७० । मेरुचूलासु पञ्च ५ । सर्वाणि २६५ पूर्वोक्तचैत्यैः सह सर्वाणि ५११ ज्ञेयानि । यत्तु श्रीदेवेन्द्रसूरिप्रमुखकृतशाश्वतजिनस्तोत्रेषु द्वात्रिंशच्छतान्येकोनषष्ट्यधिकानि तिर्यग्लोकगतान्युक्तानि तत्तु मतान्तरमवसेयम् । यदुक्तं वीरं जय सेहरेति क्षेत्रसमासे—"जिणभवणविसंवाओ जो तं जाणंति गीअत्था" ॥ २७ ॥ व्याख्यातं चैत्यद्वारं चतुर्थम् ॥ अथ पञ्चमं प्रासादद्वारमाह—

पासाया ईसाणे सुहमा सिद्धोववाय हरए अ । अभिसेअ अलंकारा ववसाए नंदि बलिपीढं ॥ २८॥

देवसंबन्धिनो मूलप्रासादावतंसकादीशानकोणे एवास्थानसभातुल्या जिनदाढोपेतमाणवकचैत्यस्तम्भादियुता सुधर्मा नाम सभा वर्तते १ । तत्पुरत एवेशानकोणे सिद्धायतनं जिनगृहं २ । तत्पुरत उपपातसभा, यस्यां निजनिजविमानगता

देवा उत्पद्यन्ते ३ । तदग्रे ह्रदो निर्मलजलभृतः, यत्र देवाः स्नानं कुर्वन्ति ४। तदग्रेऽभिषेकसभा, यत्र निजनिजविमानाधिपतीनामभिषेको देवैर्विधीयते ५ । तदग्रेऽलङ्कारसभा, यत्राभिषेकानन्तरमागत्यालङ्कारादि परिदधति ६ । तदग्रे व्यवसायसभा, यस्यां तत्रस्थपुस्तकादिकं वाचयित्वा धार्मिकं व्यवसायादिकं गृह्णन्ति ७ । तदग्रे नन्दा पुष्करिणी, यत्र पाणिपादौ प्रक्षाल्य तन्मध्योत्पन्नानि कमलानि लात्वा जिनायतने समागत्य सप्तदशादिभेदैः पञ्चशतधनुर्मानानां गर्भगृहस्थाष्टोत्तरशतसंख्यजिनप्रतिमानां पूजां स्तुतिं नतिं च शक्रस्तवं यावद्वितन्वन्ति । तदनु सर्वं विमानं चन्दनच्छटाक्षेपादिना पूजयित्वा नन्दापुष्करिणीतोऽग्रे बलिपीठं वर्तते, तत्रागत्य बलिमुञ्चन्ति ९ । जीवाभिगमवृत्तौ विजयदेवाधिकारेऽष्टमस्थाने बलिपीठं दृश्यते, नवमस्थाने च वापी, तन्मतान्तरमवसीयते । प्रतिविमानमेतानि त्रिद्वाराणि नवप्राकाराणि मूलप्रासादावतंसकादीशानकोण एवानुक्रमेण वर्तन्ते । जीवाभिगमराजप्रश्नीयोपाङ्गादिग्रन्थेष्वपीत्युक्तत्वात् ॥ २८ ॥

एषां नवानां मध्ये षट्सु स्थानकेषु प्रत्येकं त्रिषु द्वारेषु यद्वर्तते तदाह—

मुहमंड[1] पिच्छमंडव[2] थूभं[3] चेइअ[4] झओ[5] अ पुक्खरिणी[6]। जम्मुत्तरपुव्वासुं जिणभवणसभासु पत्तेअं ॥२९॥

पश्चिमां वर्जयित्वा याम्योत्तरपूर्वासु प्रतिदिशं प्रथमं मुखमण्डपः १ । तदग्रे प्रेक्षामण्डपः २ । तदग्रे स्तूपं तत्स्तूपस्योपरि अष्टौ मङ्गलानि, स्तूपाच्चतसृषु दिक्षु मणिपीठिकाः, तन्मणिपीठिकासु प्रत्येकमेकैका स्तूपाभिमुखा जिनप्रतिमा ऋषभ-१ वर्धमान २ चन्द्रानन ३ वारिषेणा ४ ऽभिधाः सन्ति ३ । तदग्रे चैत्यमिति चैत्यवृक्षः ४। तदग्रे इन्द्रध्वजः ५। तदग्रे पुष्करिणी वापी जलपूर्णा ६। एतानि षट् प्राकाराणि जिनभवने पञ्चसु सभासु च त्रिद्वारेषु प्रत्येकं सन्ति। जिनभवनसभादि-

नवानां प्रमाणं षण्णां मुखमण्डपादीनां प्रमाणं च राजप्रश्नीयोपाङ्गादिभ्यो ज्ञेयम् ॥ २९ ॥ अथमूलप्रासादावतंसकः क्वास्तीत्याह—

ओआरियलयणंमि अ पहुणो पणसीइ हुंति पासाया। तिसय इगचत्त कत्थय कत्थवि पणसट्ठि तेरसया ३०

सौधर्मविमानेषु समन्तात् प्राकारः । स च योजनानां त्रीणि शतानि उच्चत्वेन, मूले चैकं योजनशतं पृथुलः, मध्यभागे पञ्चाशत्, सर्वोपरितनभागे पञ्चविंशतियोजनानि । भवनपतिनिकायभवनेषु प्राकारः तदर्धमान उच्चत्वपृथुत्वादिषु । तस्य सर्वत्रापि मध्ये 'उपकारिकालयनं' पीठिकेत्यर्थः । तस्यां सर्वमध्ये प्रभोः पञ्चाशीतिः प्रासादाः १ । कुत्रापि उपकारिकालयने एकचत्वारिंशदधिकानि त्रीणि शतानि प्रासादाः २ । कुत्रापि पञ्चषष्ठ्यधिकानि त्रयोदश शतानि प्रासादाः ३ । एवं भेदत्रयम् ३० ॥

कथं वर्त्तन्ते ते प्रासादाः ? इत्याह—

मुहपासाओ चउदिसि चउहिं ते सोलसेहिँ सोलावि। चउसट्ठीए सावि य छप्पन्नेहिं दुहि सएहिं ॥ ३१ ॥

तेऽवि अ पुण सहसेणं चउवीसहिएण हुंति परिअरिआ। मूलुच्चत्तपुहुत्ता अद्धद्धे पणवि पंतीओ ॥ ३२ ॥

मुख इति सर्वमध्यवर्त्तिमूलप्रासादावतंसकः, स चतसृषु दिक्षु चतुर्भिः प्रासादावतंसकैः परिवृत इति प्रथमा पङ्क्तिः । सर्वे पञ्च । तेऽपि चत्वारः प्रासादा अन्यैः षोडशभिः प्रासादैश्चतसृषु दिक्षु परिवृताः प्रत्येकं चत्वार एवेति द्वितीया पङ्क्तिः, सर्वे २१ भवन्ति । तेऽपि च षोडश प्रासादाश्चतुःषष्ट्या प्रासादैः परिवृता इति तृतीया पङ्क्तिः, सर्वे ८५ । तेऽपि चतुःषष्टिः प्रासादाः षट्पञ्चाशदधिकेन शतद्विकेन परिवृता इति चतुर्थी पङ्क्तिः, सर्वे ३४१ ॥ ३१ ॥ तेऽपि षट्पञ्चाशदधिकशतद्वयप्रासादाश्चतुर्विंशत्यधिकेन सहस्रेण परिवृता भवन्तीति पञ्चमी पङ्क्तिः, सर्वे १३६५ । पञ्चापि पङ्क्तयो मूलप्रासादा-

वतंसकस्योच्चत्वपृथुत्वदीर्घत्वेभ्योऽर्धार्धमाना ज्ञेयाः । किमुक्तं भवति ? यत्र मूलप्रासादावतंसः पञ्चशतयोजनमान उच्चत्वपृथुत्वाभ्यां, तस्मादाद्या चतुःप्रासादरूपा या पङ्क्तिः सा सार्धद्विशतीयोजनमाना । ततो द्वितीयपङ्क्तिगतप्रासादा अर्धमाना । ततोऽप्यर्धा तृतीया पङ्क्तिः । एवमनुक्रमेण पञ्चापि भावनीयाः॥ ३२॥ अथ प्रतिविमानं कति प्रासादा भवन्तीत्याह—

तेरससय पणसट्ठाइअ पणपंतीहिँ हुंति पासाया । पणसी पंतितिगेणं तिसई इगचत्त चउहिं तु ॥३३॥

तावद्विमानेषु पङ्क्तिविषयं भेदत्रयमेवास्ति । यथा केषुचिद्विमानेषु पङ्क्तिपञ्चकं भवति। केषुचित् पङ्क्तिचतुष्कं। केषुचित् पङ्क्तित्रयं । अतो हीनं चतुर्निकायेषु विमानं न भवति, तत्र पञ्चभिः पङ्क्तिभिस्त्रयोदश शतानि पञ्चषष्ठ्यधिकानि प्रासादा भवन्ति । पङ्क्तित्रिकेण च पञ्चाशीतिः प्रासादाः सन्ति। चतसृभिः पङ्क्तिभिरेकचत्वारिंशदधिकानि त्रीणि शतानि। व्यत्ययो गाथाबन्धवशाज्ज्ञेयोऽत्र ॥ ३३ ॥ अथ प्रतिदिशं भेदत्रयेऽप्येकैकस्मिन् भेदे कियन्तः प्रासादा भवन्तीत्याह—

पणसीई एगवीसा पणसी पुण एगचत्त तिसईए । तेरससय पणसट्ठा तिसई इगचत्त पइककुहं ॥३४॥

प्रतिदिशमेकविंशत्या प्रासादैः पङ्क्तित्रिकेण पञ्चाशीतिः प्रासादाः । तथा चतसृभिः पङ्क्तिभिः प्रतिदिशं पञ्चाशीत्या प्रासादैरेकचत्वारिंशदधिकानि त्रीणि शतानि प्रासादा भवन्ति । तथा प्रतिदिशं एकचत्वारिंशदधिकया त्रिशत्या प्रासादैः सर्वमध्यवर्तिसहितैः पञ्चपङ्क्तिविमानेषु पञ्चषष्ठ्यधिकानि त्रयोदशशतानि भवन्तीति स्थापनयाऽवगन्तव्यम् ॥ ३४ ॥ व्याख्यातं पञ्चमं प्रासादद्वारम्॥ अथ किरणप्रसरद्वारं षष्ठमाह। तत्र प्रथमं सूर्यस्य पूर्वपश्चिमदक्षिणोत्तरदिग्विभागं दर्शयति—

पिट्ठे पुवा पुरओ अवरा वलए भमंत सूरस्स । दाहिणकरम्मि मेरु वामकरे होइ लवणोही ॥ ३५ ॥

मेरुं परितः प्रदक्षिणावर्तेन सूर्यस्य भ्रमतः पृष्ठे पूर्वा दिक्, पुरतोऽपरा पश्चिमा भवति । सूर्यस्य दक्षिणकरे मेरुः, वामकरे लवणोदधिः । एताः सूर्यस्य दिशः, न तु लोकदिशः, लोकानां सूर्यापेक्षया दिशो भवन्ति । निखिलक्षेत्रेषु तास्तापदिश उच्यन्ते । स्वाभाविकास्तु क्षेत्रदिशः, ता मेरुरुचकप्रभवा भवन्ति । रुचका अपि मेरुसर्वमध्यस्थिता अष्टौ आकाशप्रदेशाः समभूतलस्थाने गोस्तनाकाराः । तत्र चतस्रो द्विप्रदेशादयो द्व्युत्तराः शकटोद्धिसंस्थानाः पूर्वाद्या महादिशश्चतस्र एव । एकप्रदेशादयो मुक्तावलीनिभा विदिशः द्वे च चतुःप्रदेशात्मिके ऊर्ध्वाधोदिशाविति । तेन जम्बूद्वीपजगत्यां विजयद्वारि पूर्वा दिक्, एवं वैजयन्तद्वारि दक्षिणा, जयन्तद्वारि पश्चिमा, अपराजिते उत्तरा इति क्षेत्रदिग्निर्णयः ॥ ३५ ॥

अथ षट्सु दिक्षु प्रतिवासरं जम्बूद्वीपगतसूर्यकिरणप्रसारं गाथाषट्केनाह—

सगचत्तसहस दुसई तेवट्ठा तहिगवीससट्ठंसा । पुव्वावरकरपसरो कक्के सूरा अहुत्तरउ ॥ ३६ ॥

कर्कसंक्रान्त्याद्यदिने योजनानां सप्तचत्वारिंशत्सहस्राणि द्वे च शते त्रिषष्ठ्यधिके, योजनस्यैकविंशतिः षष्टिभागाः ४७-२६३$\frac{२१}{६०}$ । एतावान् सूर्यात् पूर्वस्यां करप्रसरः एतावानेव च सूर्यादपरस्यां । पूर्वापरमीलने तद्दिने उदयास्तान्तरजातं ९४५-२६$\frac{४२}{६०}$ । 'अहुत्तर' इति मेरुदिशि करप्रसर उच्यते ॥ ३६ ॥ तदाह—

असिईसऊण सहसा पणयालीसाऽह जम्मओ दीवे।असिइसयं लवणेऽवि अ तित्तीससहस्स सतिभागा३७

सर्वाभ्यन्तरे मण्डले सूर्यः सन् कर्काद्यदिनेऽशीत्यधिकं योजनशतं जगतीतो द्वीपान्तः प्रविशति, तेन तदूनानि पञ्चचत्वारिंशद्योजनसहस्राणि ज्ञेयानि । एतावता चतुश्चत्वारिंशत्सहस्राणि अष्टौ शतानि विंशत्यधिकानि ४४८२० उत्तरस्यां

मेरुं यावत्करप्रसरः। यद्यपि मण्डलसमश्रेणेर्मेरोर्विष्कम्भो योजनदशसहस्रात्मको न लभ्यते, किंतु किञ्चिन्न्यूनस्तथापि व्यवहारेणैतावान् ग्राह्यः। 'अह जम्मओ' इति अथ याम्यतो दक्षिणदिशि तत्र द्वीपसंबन्ध्यशीत्यधिकं शतम् १८०। लवणे च त्रयस्त्रिंशत्सहस्राणि 'सतिभागा' सहस्रतृतीयांशयुतानि। कोऽर्थः? त्रीणि शतानि त्रयस्त्रिंशदधिकानि तृतीयभागो$\frac{१}{३}$योजनस्य च। उभयमीलने जातम् ३३५१३$\frac{१}{३}$। एवं जम्बूद्वीपगतद्वितीयस्यापि सूर्यस्य करप्रसरो भावनीयः॥ ३७॥

अथ मकरसंक्रान्तौ यदवशिष्यते तदाह—

इगतीससहस अडसय इगतीसा तह य तीससट्ठंसा। मयरे रविरस्सीओ पुव्ववरेणं अह उदीणे॥३८॥

सर्वाभ्यन्तरान्मण्डलाद्बहिर्निष्क्रामन् सूर्यः क्रमेण करप्रसरेण हीयमानः सर्वबाह्यमण्डलमागच्छति, तत्र चैकत्रिंशत्सहस्राण्यष्टौ शतान्येकत्रिंशदधिकानि, त्रिंशच्चैकषष्टिभागा योजनस्य ३१८३१$\frac{३०}{६१}$। एतावत्प्रमाणो मकरे पूर्वस्यामपरस्यां च करप्रसरो भवति। पूर्वापरमीलने तद्दिनोदयास्तान्तरं जातं ६३६६३। अत्र प्रतिदिनं साधिकं द्विसप्ततिशतं योजनानां हानिः १७२ $\frac{१०}{६०}$ $\frac{१४४}{१८३}$ प्रतिपूर्वपश्चिमयोश्च तदर्धं साधिका षडशीतिर्योजनानां ८६$\frac{५}{६०}$ $\frac{७२}{१८३}$॥ ३८॥

अथ मकरे उदीच्यां दक्षिणस्यां चाह—

लवणे तिसई तीसा दीवे पणचत्तसहस अह जम्मे। लवणम्मि जोअणतिगं सतिभाग सहस्स तित्तीसा ३९

सर्वबाह्ये मण्डले सूर्यो लवणसमुद्रे त्रिंशद्योजनाधिकां त्रिशतीमागतः, तेन लवणसंबन्धीनि त्रीणि शतानि त्रिंशदधिकानि ३३० द्वीपसंबन्धीनि पञ्चचत्वारिंशत्सहस्राणि ४५०००। उभयमीलने ४५३३० उदीच्यां करप्रसरः। 'अह जम्मे'

अथ याम्ये लवणदिशि त्रयस्त्रिंशत्सहस्राणि एकयोजनस्य तृतीयभागयुतयोजनत्रयाधिकानि ३३००३$\frac{1}{3}$ करप्रसरः ॥ ३९ ॥

अथोर्ध्वाधस्तेजःप्रसरस्वरूपमाह—

मयरम्मिवि कक्कम्मिवि हिट्ठा अट्ठारजोअणसयाइं । जोयणसयं च उड्ढं रविकर एवं छसु दिसासु॥४०॥

मकरे इति मकरादिषु षट्सु संक्रान्तिषु । 'कक्कम्मि' इति कर्कादिषु षट्सु संक्रान्तिषु अर्थात् सर्वेष्वपि मण्डलेषु वर्तमानस्य सूर्यस्याधोऽष्टादश योजनशतानि तेजो भवति । यतः सूर्यादष्टयोजनशतेषु समभूतलम् । समभूतलापेक्षया चाधो योजनसहस्रमधोग्रामाः, ते हि जम्बूद्वीपापरविदेहे मेरोरारभ्य जगत्यभिमुखं प्रदेशप्रदेशहान्या क्षेत्रस्यातिनिम्नीभवनादन्तिमविजयद्वयस्थाने द्विचत्वारिंशद्योजनसहस्रैः सन्ति । यदुक्तं लघुक्षेत्रविचारे—"जोयणसयदसगंते समधरणीओ अहे अहोगामा । बायालीससहस्सेहिं गंतुं मेरुस्स पच्छिमओ ॥ १ ॥" ततः परं योजनसहस्रत्रयं समभूतलतुल्यतया समभूभागो वर्तते । शीतोदायाः प्रवेशस्तु जयन्तद्वाराधो भूत्वा लवणाब्धावनेकयोजनसहस्राणि गत्वा च भवति । इदं चाधःकरप्रसरमानं जम्बूद्वीपगतसूर्यापेक्षया एव ज्ञेयम् । द्वीपान्तरसूर्यास्त्वधोऽष्टशतानि तपन्ति, तत्क्षेत्रस्य समत्वादिति । ऊर्ध्वं तु सर्वत्र सर्वेषां सूर्याणां शतमेकं करप्रसरः । यदुक्तं भगवत्यामष्टमशतेऽष्टमोद्देशके—"जम्बूदीवेणं भंते सूरिया केवइअं खित्तं उड्ढं तवेंति ? केवइअं खित्तं अहो तवेंति ? केवइअं खित्तं तिरिअं तवेंति ? गोयमा ! एगं जोअणसयं उड्ढं तवेंति, हेट्ठा अट्ठारस जोअणसयाइं तवेंति इत्यादि" । एवममुना प्रकारेण षट्सु दिक्षु रविकरप्रसरः ॥ ४० ॥ अथ जम्बूद्वीपे एव दक्षिणोत्तरयोः सर्वदा सर्वाग्रमाह—

पइदिणमवि जम्मुत्तर अडसत्तरिसहस सहसतइअंसो। उड्ढह गुणवीससया अठिया पुव्वावरा रस्सी॥४१॥

प्रतिदिनमपि याम्योत्तरयोः करप्रसरमीलने अष्टसप्ततिसहस्राणि त्रीणि योजनशतानि त्रयस्त्रिंशदधिकानि योजनतृतीयांशश्च ७८३३३$\frac{१}{३}$। तथोर्ध्वाधश्च एकोनविंशतिशतानि १९००। तथा सूर्यात्पूर्वस्यां अपरस्यां च रश्मयो रवेरभीषवोऽस्थिराः, सर्वमण्डलेषु हानिवृद्धिभावात्। अयं रवितेजःप्रसरो जम्बूद्वीपे एव ज्ञेयः। लवणधातकीकालोदपुष्करार्धगतसूर्याणां तेजःप्रसरोऽधिकाधिकतरो वर्तते। तेन तत्स्वरूपं मत्कृतमण्डलप्रकरणादवसेयम्। मनुष्यलोकाद्बहिः चन्द्रसूर्याः स्थिराः सन्ति ॥ ४१ ॥ व्याख्यातं रविकरप्रसरद्वारं षष्ठम् ॥ अथ सप्तमं पर्याप्तिद्वारमाह—

[1]आहार[2]सरीरिं[3]दिय[4]ऊसास[5]वओ[6]मणो छ पज्जत्ती। [1]चउ [2]पंच [3]पंच [4]छप्पिअ [1]इगविग[2]लाऽमण[3]सं[4]मणतिरिए॥४२॥

गब्भयमणुआणं पुण छप्पि अ पज्जत्ति पंच देवेसु। जं तेसिं वयमणाण दुवेऽवि पज्जत्ति समकालं॥४३॥

पर्याप्तिराहारादिपुद्गलग्रहणपरिणमनहेतुरात्मनः शक्तिविशेषः। सा च पुद्गलोपचयादुपचीयते। ताश्च षट्। तत्र यया शक्त्या करणभूतया जन्तुः आहारमादाय खलरसरूपतया परिणमयति सा आहारपर्याप्तिः १। यया रसीभूतमाहारमौदारिकवैक्रियाहारकशरीरत्रययोग्यपुद्गलरूपं रसासृग्मांसमेदोऽस्थिमज्जशुक्र (रूप) सप्तधातुतया यथासंभवं परिणमयति सा शरीरपर्याप्तिः २। यया धातुरूपतया परिणमितादाहारादेकस्य द्वयोस्त्रयाणां चतुर्णां पञ्चानां चेन्द्रियाणां योग्यान् पुद्गलानादाय स्वस्वेन्द्रियरूपतया परिणमय्यालम्ब्य च स्वस्वविषयं परिज्ञातुं प्रभुर्भवति सेन्द्रियपर्याप्तिः ३। ययोच्छ्वासनिःश्वासयोग्यं दलिकमादाय तथा परिणमय्यालम्ब्य च निःस्रष्टुं समर्थो भवति सा पुनः प्राणपर्याप्तिः ४। यया भाषा-

योग्यं दलिकमादाय भाषात्वेन परिणमय्यालम्ब्य च मुञ्चति सा भाषापर्याप्तिः ५। यया मनोवर्गणादलिकमादाय मनस्त्वेन परिणमय्यालम्ब्य च मनःसमर्थो भवति सा मनःपर्याप्तिः ६ । एतास्वेकेन्द्रियाणामाद्याश्चतस्रः । विकलेन्द्रियाणां भाषासहिताः पञ्च । अमनस्कानामिति संमूर्छिमपञ्चेन्द्रियतिरश्चां ता एव पञ्च । समनस्कानामिति गर्भजतिरश्चां मनःसहिताः षट् ॥ ४२ ॥ गर्भजमनुष्याणां पुनः षडपि पर्याप्तयः । संमूर्छिममनुष्याणां त्वपर्याप्तत्वेन मरणं भवति, (ततः) तेषामाद्यत्रिकं संभवति, करणापर्याप्तत्वेन सर्वेषां अपर्याप्तानां जीवानां मरणासंभवात् । देवनारकेषु पञ्च, यतस्तेषां वचोमनःपर्याप्ती द्वे अपि समकालं भवतस्तेन पञ्च ॥ ४३ ॥ अथाद्य त्रिषु शरीरेषु सर्वपर्याप्तिकालप्रमाणं विवक्षुराह—

उरालविउवाहारे छन्हऽवि पज्जत्ति जुगवमारंभो । तिन्हऽवि पढमिगसमए बीआ पुण अंतमोहुत्ती ॥४४॥

औदारिकवैक्रियाहारकशरीरेषु प्रत्येकं प्रत्येकं युगपत्समकालं षण्णां पर्याप्तीनां प्रारम्भो भवतीति स्थितिः निष्ठां च क्रमादुपयान्ति । यथा—प्रथममाहारपर्याप्तिस्ततो द्वितीया शरीरपर्याप्तिः,तत इन्द्रियपर्याप्तिरित्यादयः सर्वा ज्ञेयाः। तासां मध्ये प्रथमैकाहारपर्याप्तिः शरीरत्रिकेऽप्येकसामयिकी भवति । एकसमयेनौज आहाररूपपर्याप्तिः समाप्तिं यातीत्यर्थः । द्वितीया शरीरपर्याप्तिः त्रिष्वेव शरीरेष्वन्तर्मुहूर्तप्रमाणा ॥ ४४ ॥

अथ शेषपर्याप्तीनामौदारिकशरीरे एव गाथापूर्वार्धेन, अन्त्यार्धेन च वैक्रियाहारकयोः कालप्रमाणमाह—

पिहु पिहु असंखसमइअ अंतमुहुत्ता उराल चउरोऽवि। पिहु पिहु समया चउरोऽवि हुंति वेउवियआहारे ४५

तृतीया चतुर्थी पञ्चमी षष्ठी चैताश्चतस्रोऽपि पर्याप्तयः पृथक् पृथक् औदारिके शरीरे ऽसंख्यातसमयात्मकान्तर्मौहूर्तिक्यो

भवन्ति। सर्वा अपि वृद्धान्तर्मुहूर्तेन परिपूर्णा भवन्तीति पूर्वार्धार्थः। तथा 'चउरोऽवि' इति वैक्रियाहारकशरीरयोस्तु तृतीयाप्रमुखाश्चतस्रोऽपि पृथक् पृथक् एकैकसमयेन एकैका पूर्णा भवतीत्यर्थः। यथा एकेन समयेन इन्द्रियपर्याप्तिः, द्वितीयेनोच्छ्वासपर्याप्तिः, तृतीयेन समयेन वचनपर्याप्तिः, चतुर्थेन समयेन च मनःपर्याप्तिः ॥ ४५ ॥

एवं मनुष्यतिरश्चोः प्रोक्ता अथ देवनैरयिकेष्वाह—

छन्हऽवि सममारंभे पढमा समएऽवि अंतमोहुत्ती। ति तुरिअ समए समए सुरेसु पण छट्ठ इगसमए॥४६॥

सुरनैरयिकेषु षण्णां पर्याप्तीनां युगपत्प्रारंभेऽपि प्रथमा ओजाहाररूपा एक पर्याप्तिरेकेन समयेन परिपूर्णा भवति। द्वितीया शरीरपर्याप्तिरप्यान्तर्मौहूर्तिकी। तृतीया चतुर्थी च पर्याप्तिः पृथक् पृथक् एकैकेन समयेन भवति। तथा पञ्चमी वचनपर्याप्तिः षष्ठी मनःपर्याप्तिश्चोभे अप्येकस्मिन् समये एव भवतस्तथास्वाभाव्यात्। उत्तरवैक्रियं देवनारकाणामपीत्थमेव४६

गतं पर्याप्तिद्वारं सप्तमम् ॥ अथ कृष्णराजिस्वरूपमष्टमं द्वारमाह—

बंभे रिट्ठे तइअंमि पत्थडे अट्ठ कण्हराईओ। इंदय चउसु दिसासुं अक्खाडगसंठिआ दिग्घे॥४७॥

ब्रह्मलोकनामकः पञ्चमः कल्पः। तत्रापि तृतीये रिष्टाभिधाने प्रस्तटेऽष्टौ कृष्णराज्यो भवन्ति। सचित्ताचित्तपृथ्वीपरिणामरूपा भित्त्याकारव्यवस्थिताः। किमाकारा इत्याह—तृतीयरिष्टाभिधानप्रस्तटगतेन्द्रकविमानाच्चतसृषु दिक्षु द्वे द्वे कृष्णराज्यौ स्तः। तथाहि—पूर्वस्यांदक्षिणोत्तरायते तिर्यग्विस्तीर्णे। एवं हि दक्षिणस्यां पूर्वापरायते। अपरस्यां दक्षिणोत्तरायते। उत्तरस्यां पूर्वापरायते। सर्वा अष्टौ। कीदृश्यः? आखाटकसंस्थानसंस्थिताः आखाटको नाम प्रेक्षास्थाने आसन-

विशेषः प्रज्ञप्तिटीकायां तथैव व्याख्यानात्। दीर्घे इति दीर्घत्वे ताः कियत्प्रमाणाः? ॥ ४७ ॥ तदाह—

जोअणअसंख पोहत्ति संख ईसाणि अच्चि अच्चिमाली। वइरोअणं पहंकर चंदाभं सूरिअ सुकाभं ॥ ४८ ॥

सुपइट्ठाभं रिट्ठं मज्झे वट्टं वहिं विचित्तट्ठं। तेसिं पहू सारस्सयपमुहा तद्दुदुगपरिवारा ॥ ४९ ॥

सत्तसय सत्त चउदस सहसा चउदहिअ सगसहसतत्त। नव नवसय नव नवहिअ अव्वाबाहागिच्चरिट्ठेसु ५०

दीर्घे इति लम्बत्वेऽसंख्यातयोजनसहस्रा भवन्ति। "पोहत्ति" पृथुलत्वे विष्कम्भत्वे तु संख्यातयोजनसहस्राः। परिक्षेपे त्वसंख्यातयोजनसहस्राः। महत्त्वं चासां यो देवो महर्द्धिको यया गत्या तिसृभिश्चपुटिकाभिरेकविंशतिवारान् सकलमपि जम्बूद्वीपं समवृत्त्या गच्छेत्, स एव देवस्तया गत्याऽर्द्धमासेनैकां व्यतिव्रजेत् नेतरामिति। तासां कृष्णराजीनामन्तराले किमस्तीत्याह—'ईसाणि' इति एतासां कृष्णराजीनामीशानादिषु दिक्षु विदिक्ष्वष्टस्वप्यन्तरेषु राजीद्वयमध्यलक्षणेष्वाकाशान्तरेष्वष्टौ विमानानि भवन्ति, तासां बहुमध्यदेशभागे चैकं विमानम्। तद्यथा—अभ्यन्तरोत्तरपूर्वयोः कृष्णराज्योरन्तरेऽर्चिर्नाम विमानम् १। एवं पूर्वयोरर्चिर्माली २। अभ्यन्तरपूर्वदक्षिणयोर्वैरोचनम् ३। दक्षिणयोः प्रभङ्करम् ४। अभ्यन्तरदक्षिणपश्चिमयोश्चन्द्राभम् ५। पश्चिमयोः सूराभम् ६। अभ्यन्तरपश्चिमोत्तरयोः सुकाभम् ७। उत्तरयोः सुप्रतिष्ठाभम् ८। सर्वकृष्णराजीमध्यभागे रिष्टाभम् ९। तच्च वृत्तं। शेषाण्यष्टौ विचित्राकाराणि, अनावलिकाप्रविष्टत्वात्। तेभ्योऽसंख्यातयोजनसहस्रैरलोकः। 'तेसिं पहू' इति तेषां प्रभवः सारस्वतप्रमुखा देवाः। 'तद्दुदुग' इति तद्द्विकद्विकपरिवाराः तेषां विमानानां युगलं त्रिकेषु वक्ष्यमाणपरिवारदेवा भवन्तीत्यर्थः ॥ ४८-४९ ॥ सारस्वतादित्ययोः समुदितयोः

सप्ताधिकानि सप्तदेवशतानि सन्तीति परिवारः । एवं वह्निवरुणयोश्चतुर्दशाधिकाश्चतुर्दश सहस्राः । गर्दतोयतुषितयोः सप्ताधिकाः सप्त सहस्राः । शेषेषु त्वव्याबाधाग्नेयरिष्टेष्वेतद्ग्रन्थकर्तृमते प्रत्येकं नवाधिकानि नव शतानि सन्ति । तत्र सर्वविमानगताः सर्वे देवास्तज्जातीयाः २४४५५ । प्रवचनसारोद्धारादिबहुषु ग्रन्थेषु त्वन्त्यत्रिषु तेषु समुदितेषु नवाधिकानि नव शतान्येव, तन्मते सर्वे देवाः २२६३७७ ज्ञेयाः ॥ ५० ॥ अथ तेषां देवानां नामान्याह—

सारस्स य माइच्चा वण्ही वरुणा य गद्दतोया य । तुसिआ अव्वाबाहा अग्गिच्चा चेव रिट्ठा य ॥ ५१ ॥

सारस्वताः १, मकारोऽलाक्षणिकः । आदित्याः २ । वह्नयः ३ । वरुणाः ४ । गर्दतोयाः ५ । तुषिताः ६ । अव्याबाधाः ७ । आग्नेयाः ८ । रिष्टाश्चेति, तात्स्थ्यात्तद्व्यपदेश इति रिष्टविमानाधारा देवा रिष्टाः ९ । एते च सारस्वतादयो लोकान्तिका लोकस्य ब्रह्मलोकस्यान्ते समीपे भवा लोकान्तिकाः । ते च सुराः संवत्सरेणार्वाक् स्वयंबुद्धमपि जिनेन्द्रं जितमिति कृत्वा प्रव्रज्यासमये समागत्य "भगवन् ! सर्वजगज्जीवहितं तीर्थं प्रवर्तय" इति बोधयन्ति । ते देवा अजघन्योत्कृष्टाष्टसागरायुषः, तथा सप्ताष्टभिर्भवैर्मुक्तिगामिनः ॥ ५१ ॥ अथ कृष्णराजीनां परस्परं स्पर्शनस्वरूपं दर्शयति—

पुव्वंतर जम्मबाहिं पुट्ठा जम्मंतरा बहिं वरुणं । तम्मज्झुत्तरबाहिं उईणमज्झा बहिं पुव्वं ॥ ५२ ॥

पौरस्त्याभ्यन्तरा दक्षिणबाह्यां स्पृशति १ । दक्षिणाभ्यन्तरा "बहिं वरुणं" इति पश्चिमबाह्यां स्पृशति २ । "तम्मज्झ" इति तत्पश्चिमाभ्यन्तरा उत्तरबाह्यां स्पृशति ३ । "उईणमज्झा" इति उत्तराभ्यन्तरा पूर्वबाह्यां स्पृशति ४ ॥ ५२ ॥ अथैतासां कोणविभागानाह—

पुव्वावरा छलंसा तंसा पुण दाहिणुत्तरा बज्झा । अब्भंतर चउरंसा सव्वाविअ कण्हराईओ ॥ ५३ ॥

पौरस्त्यपाश्चात्ये द्वे बाह्ये कृष्णराज्यौ (षडस्रे षट्कोणे । दक्षिणोत्तरे द्वे बाह्ये) त्र्यस्रे त्रिकोणे । अभ्यन्तराश्चतस्रोऽपि कृष्णराज्यश्चतुरस्राश्चतुष्कोणा इत्यर्थः ॥ ५३ ॥ व्याख्यातं कृष्णराजिद्वारमष्टमम् ॥ ८ ॥ साम्प्रतं वलयद्वारं नवममाह—

पुक्खरिगारस तेरेव कुंडले रुअगि तेर ठारे वा । मंडलिआचलतिन्निउ मणुउत्तर कुंडलो रुअगो ॥५४॥

कालोदसमुद्राद्बहिर्वलयाकारः षोडशलक्षयोजनविस्तीर्णः पुष्करवरद्वीपोऽस्ति, तस्यापि(र्धे) बाह्ये दले प्रथमः १ । तथा जम्बूद्वीपादेकादशो मतान्तरेण त्रयोदशो वा कुण्डलद्वीपोऽस्ति, तस्यार्धे द्वितीयः २ । तथा "जम्बूधायइपुक्खर" इति संग्रहणीदर्शितक्रमप्रमाणेन त्रयोदशो मतान्तरेणाष्टादशो वा (रुचकद्वीपोस्ति) तत्र तृतीयः ३ । एवं मण्डलाचला वलयाकारपर्वतास्त्रयः पुष्करकुण्डलरुचकद्वीपेषु अर्धार्धभागेषु च प्राकाराकाराः सन्ति । तेषां नामानि च मानुषोत्तरः कुण्डलो रुचक इति ॥ ५४ ॥ गाथाप्रथमार्धेनैतेषामुच्चत्वमाह—

सत्तरसय इगवीसा बायालसहस्स चुलसिसहसुच्चा । चउसय तीसा कोसं सहस्सं सहसं च ओगाढा ॥५५॥

सप्तदशशतान्येकविंशत्यधिकानि मानुषोत्तराचलः उच्चः १ । तथा कुण्डलाचलो द्विचत्वारिंशत्सहस्राण्युच्चः २ । तथा रुचकश्चतुरशीतिसहस्राण्युच्चः ३ । गाथान्त्यार्धेन तेषां भूमाववगाढत्वं निर्दिशति—प्रथमो मानुषोत्तर उच्चत्वचतुर्थांशं पृथिव्यामवगाढो भूमौ प्रविष्ट इत्यर्थः । यथा क्रोशोत्तराणि त्रिंशदधिकानि चतुःशतयोजनानि ४३० क्रोश १ । शेषौ कुण्डलरुचकपर्वतौ योजनानां सहस्रं सहस्रं भूमाववगाढौ स्तः ॥५५॥ अथैतेषां पर्वतानामधोमध्योर्ध्वभागेषु विष्कम्भमानमाह—

भुवि दससय बावीसा मज्झे सत्त य सया उ तेवीसा। सिहरे चत्तारि सया चउवीसा मणुअकुण्डलगा॥५६॥

प्रथमपर्वतद्वयस्य विष्कम्भं कथयति 'भुवि' इति समभूभागापेक्षया द्वाविंशत्यधिकं सहस्रं योजनानि १०२२ विस्तारः। सर्वमध्ये त्रयोविंशत्यधिकानि सप्त शतानि विस्तारः ७२३। तथा शिखरे इनि सर्वोपरितनभागे चत्वारि शतानि चतुर्विंशत्यधिकानीति मानुषोत्तरकुण्डलयोर्विस्तारः॥ ५६॥ अथ रुचकस्य त्रिधापि विस्तारमेताभ्यामन्यमेवाह—

दससहसा बावीसा भुवि मज्झे सगसहस्स तेवीसा[2]। सिहरे चउरो सहसा [3]चउवीसा रुअगसेलंमि॥ ५७॥

द्वाविंशत्यधिका दश सहस्राः १००२२ 'भुवि' इति समभूभागे विस्तारः। सर्वमध्ये सप्त सहस्रास्त्रयोविंशत्यधिकाः ७०२३। शिखरे सर्वोपरितनभागे चत्वारः सहस्राश्चतुर्विंशत्यधिका योजनानां ४०२४ विस्तारो रुचकशैले। एतेन पूर्वोक्तपर्वतद्विकयोः शतस्थानेऽत्र सहस्रमवसेयम्॥ ५७॥ अथ पूर्वोक्तद्वितयाभ्यां रुचकपर्वतशिखरे विशेषमाह—

रुअगे सिहरे चउदिसि बिअसहसेगिगचउत्थअट्ठट्ठ। विदिसिचऊ इअ चत्ता दिसिकुमरी कूड सहसंका ५८

वलयाकारस्य रुचकशैलस्य चतुर्विंशत्यधिकचतुःसहस्रविस्तीर्णे शिखरे चत्वारो भागा विधीयन्ते। तत्रैकैकस्मिन् भागे षड्योजनाधिकः सहस्रो भवति। तत्र प्रथमं भागं मुक्त्वा द्वितीये भागे पूर्वादिचतुर्दिक्ष्वेकैकं कूटमस्ति सहस्राङ्कम्। तथा रुचकशैलशिखरस्य षडधिकसहस्रमिते चतुर्थे भागेऽष्टावष्टौ कूटानि सन्ति, परं तानि दिक्कुमारीणां संबन्धीन्येव ज्ञेयानि। अन्यथा तन्मध्यवर्तिसिद्धकूटयुतानि प्रतिदिशं नव नव कूटानि सन्तीति वृद्धाः। सिद्धकूटे च सिद्धायतनं जिनप्रतिमालङ्कृतम्। तथा तस्मिन्नेव चतुर्थे भागे विदिक्षु चत्वारि कूटानि सन्ति सर्वाणि सहस्राङ्कानि। कोऽर्थः? एकसहस्रयोजन-

मूलविस्ताराणि, सप्तशतं मध्यविस्ताराणि, पञ्चशतं शीर्षविस्ताराणि, एकसहस्रोच्चानि । तेषु सर्वेषु कूटेषु भवनपतिजातीयचत्वारिंशद्दिक्कुमार्यः सपरिवारा वसन्ति । तत्र पूर्वस्यामष्टौ यानि कूटानि, तेषां नामानि स्थानाङ्गोक्तान्यमूनि । यथा—रिट्ठ १ तवणिज्ज २ कंचण ३ रयदिसा ४ सोत्थिए ५ पलंबेय ६ । अंजण ७ अंजणपुलए ८ रूयगस्स पुरच्छिमे कूडा ॥ १ ॥" तेष्वेतन्नाम्यो दिक्कुमार्यो वसन्ति । यथा—"नन्दोत्तरा १ तथा नन्दा २ सुनन्दा ३ नन्दिवर्धिनी ४ । विजया ५ वैजयन्ती च ६ जयन्ती ७ चापराजिता ८॥२॥" दक्षिणस्यामष्टौ कूटानि । यथा—"कणए १ कंचण २ पउमे ३ नलिणे ४ ससी ५ दिवायरे ६ । वेसमणे ७ वेरुलिए ८ रुअगस्स य दाहिणे कूडा ॥ ३ ॥" तत्रेमा देव्यः—"समाहारा १ सुप्रदत्ता २ सुप्रबद्धा ३ यशोधरा । लक्ष्मीवती ५ शेषवती ६ चित्रगुप्ता ७ वसुन्धरा ८ ॥" पश्चिमायामष्टौ कूटानि, यथा—"सुत्थिए १ अ सुहए २ हिमवंते ३ मन्दरे ४ तहा रुअगे ५ रुअगुत्तमे अ ६ चंदे ७ अट्ठमे अ सुदंसणे ८ ॥ ५ ॥" तत्र देव्यो यथा—"इलादेवी १ सुरादेवी २ पृथ्वी ३ पद्मावती ४ तथा । एकनाशा ५ नवमिका ६ भद्रा ७ ऽशोका ८ च नामतः ॥ ६ "अथोत्तरस्यामष्टौ कूटानि, यथा—"रयणे १ रयणुच्चयए २ सव्वरयणे ३ रयणसंचए ४ विजए ५ वेजअंते ६ अ जयंते ७ अपराजिए ८ ॥ ७ ॥" तत्र देव्यो यथा—"अलम्बुसा १ मितकेशी २ पुंडरीका ३ च वारुणी ४ । हासा ५ सर्वप्रभा ६ श्री ७ ह्रीं ८ ह्यष्टावुत्तरसंस्थिताः ॥ ८ ॥" तथा—चित्रा १ चित्रकनका २ सुतेजाः ३ सुदामिनी ४ एताश्चतस्रोपि विदिक्कूटनिवासिन्यः । तथा—रूपा १ रूपांशिका २ सुरूपा ३ रूपकावती ४ चेति चतस्रो रुचकमध्यवासिन्यः ॥ ५८ ॥ अथैतेषां पर्वतानां पुनर्विशेषमाह—

पढमो सीहनिसाई अद्धजवनिभो अ चउदिसिं सिहरे। पन्नाई चउ जिणगिहो सयाइ चउचेइआ दुन्नि ५९

प्रथमो मानुषोत्तराभिधः सिंहवन्निषीदतीत्येवंशीलः सिंहनिषादी। यथा सिंहोऽग्रेतनं पादयुग्ममुत्तभ्य पश्चात्तनं पादयुगं संकोच्य युताभ्यां मनाग् लग्नो निषीदति, तथा निषण्णश्च शिरःप्रदेशे उन्नतः, पश्चाद्भागे तु निम्नो निम्नतरः। एवं मानुषोत्तरोऽपि जम्बूद्वीपदिशि च्छिन्नटङ्कः सर्वोन्नतः समभित्त्याकारः पश्चाद्भागे तूपरितनभागादारभ्य प्रदेशप्रदेशहान्या निम्नो निम्नतरः। अथवाऽर्धयवनिभश्च, अपगतं अर्धं यस्यासौ अपार्धः, स चासौ यवो राशिश्च अपार्धयवराशी, तयोरिव यत्संस्थानं तेन संस्थितः। यथा यवो यवराशिर्वा धान्यानामपान्तराल ऊर्ध्वाधोभागेन च्छिन्नो मध्यभागे छिन्नटङ्क इव भवति। बहिर्भागे तु शनैः शनैः पृथुत्वबुद्ध्या निम्नो निम्नतरः। तद्वदेष शैलोऽपि। पुनः किंलक्षणः? चतुर्दिक्षु शिखरे पञ्चाशदादिचतुर्जिनगृहः। कोर्थः? पञ्चाशद्दीर्घाणि पञ्चविंशतियोजनपृथुलानि षट्त्रिंशदुच्चानि चत्वारि शाश्वतानि जिनगृहाणि यत्र स तथा। तथा "सयाइ" इति शतादिचतुश्चैत्यकौ शतयोजनदीर्घाणि पञ्चाशत्पृथुलानि द्वासप्ततियोजनोच्चानि चतुर्दिक्षु प्रत्येकं चत्वारि चैत्यानि यत्र तौ जिनभवनालङ्कृतौ इत्यर्थः। "दुन्नि" इति प्राकृतत्वात् द्वौ कुण्डलरुचकाह्वौ शिखरिणौ स्तः॥५९॥

व्याख्यातं वलयद्वारं नवमं॥ अथ नन्दीश्वरद्वारं दशममाह—

तेवट्ठं कोडिसयं लक्खा चुलसीइ वलयविक्खंभो। नंदिसरट्ठमदीवो चउदिसि चउअंजणा मज्झ ॥६०॥

एकं कोटिशतं त्रिषष्टिकोट्यश्चतुरशीतिलक्षाश्च १६३८४००००० इत्येतावद्योजनप्रमाणवलयविष्कम्भो जम्बूद्वीपादष्टमः सकलसुरासुरविसरानन्दी उदारजिनमन्दिरोद्यानपुष्करिणीपर्वतप्रभृतिपदार्थसार्थसमुद्भूतया विभूत्या चेश्वरः सान्वयनामा

नन्दीश्वरद्वीपोऽस्ति । तस्य वलयसर्वमध्यभागे पूर्वादिदिक्षु एकैकस्यां दिशि एकैकभागेन चत्वारोऽञ्जनगिरयः सन्ति । तन्नामानि यथा—पूर्वस्यां देवरमणाभिधः १, दक्षिणस्यां नित्योद्द्योतः २, अपरस्यां स्वयंप्रभः ३, उत्तरस्यां रमणीय इति ४ ॥ ६० ॥ अथाञ्जनगिरीणां स्वरूपमाह—

गोपुच्छा अंजणमय चुलसीसहसुच्च सहसमोगाढा॥समभुवि दससहसपिहू सहसुवरिं तेसिं चउदिसिसु६१

ऊर्ध्वीकृतगोपुच्छसंस्थानसंस्थिताः । यथा धेनोः पुच्छं मूले स्थूलं तदनु लघु लघुतरं, तथैतेऽपि चत्वारोऽञ्जनपर्वता मूले सविस्तरा उपरि च स्तोका इत्यर्थः । सर्वात्मनाऽञ्जनरत्नमयाः । तथा ते चत्वारोऽपि चतुरशीतियोजनसहस्राण्युच्चा बहिः । एकं योजनसहस्रं भूमाववगाढाः । तथा समभूमौ योजनदशसहस्रविष्कभाः । तदनन्तरं च परिहीयमाणा उपर्येकसहस्रविस्तीर्णाः । तेषां परिधिर्मूले एकत्रिंशद्योजनसहस्राणि षट् च शतानि त्रयोविंशत्यधिकानि ३१६२३ किञ्चिन्न्यूनानि । शिखरे च परिधिस्त्रीणि सहस्राणि द्विषष्ट्यधिकं योजनशतं ३१६२ । "तेसिं इति" प्राकृतत्वात् पञ्चम्यर्थे षष्ठी, तेभ्यश्चतसृषु दिक्षु ॥ ६१ ॥ किमस्ति ? इत्याह—

लक्खंतरिआ चउ चउ वावीदस दस य जोअणुव्विद्धा। लक्खं दीहपिहुच्चे तम्मज्झे दहिमुहा सोल ॥ ६२॥

लक्षान्तरिता इति तेभ्योऽञ्जनगिरिभ्यश्चतुर्दिक्षु प्रत्येकं योजनलक्षं गत्वा चतस्रश्चतस्रो वाप्यः सन्ति । तन्नामान्यमूनि—पूर्वदिग्भागी योऽञ्जनगिरिस्तस्माल्लक्षयोजनानि गत्वा पूर्वस्यां नन्दोत्तरा १, दक्षिणस्यां नन्दा २, अपरस्यामानन्दा ३, उत्तरस्यां नन्दिवर्धना ४ । तथा दक्षिणस्यां योऽञ्जनगिरिस्तस्माच्च पूर्वस्यां भद्रा ५, दक्षिणस्यां विशाला ६, अपरस्यां

कुमुदा ७, उत्तरस्यां पुण्डरीकिणी ८। तथा पश्चिमदिग्भागेऽञ्जनगिरिस्तस्मात्पूर्वस्यां नन्दिषेणा ९, दक्षिणस्याममोघा १०, अपरस्यां गोस्तुभा ११, उत्तरस्यां सुदर्शना १२। तथोत्तराञ्जनगिरेः पूर्वस्यां विजया १३, दक्षिणस्यां वैजयन्ती १४, अपरस्यां जयन्ती १५, उत्तरस्यां अपराजिता १६। एता षोडश वाप्यः प्रत्येकं दश दशयोजनोद्वेधा उण्डा इत्यर्थः। निर्मलशीतलसुस्वादुजलसंपूर्णाः प्रायो मत्स्यादिजलचररहिताः। दीर्घपृथुत्वाभ्यामिति विष्कम्भायामाभ्यां योजनलक्षप्रमाणा वृत्ता जम्बूद्वीपपरिधियुताः प्रत्येकं चतसृषु दिक्षु वाप्यो नानामणिमयसोपानमणिमयानेकस्तम्भसंनिविष्टैर्विविधशालभञ्जिकाविलासोत्तुङ्गतोरणैर्युक्ताः। तथा पूर्वादिदिक्क्रमेणाशोक १ सप्तच्छद २ चम्पक ३ चूतवनैः ४ प्रत्येकं परिक्षिप्ताः। सर्वाणि चतुःषष्टिवनानि। तासां सर्वासां षोडशानां वापीनां मध्ये बहुमध्यदेशभागे दधिमुखनामानो महीधराः षोडश सन्ति ॥६२॥

ते च दधिमुखाः कीदृशाः? इत्याह—

सहसोगाढा चउसट्ठिसहस्सुच्चा दससहस्स पिहुला य। सव्वत्थ समा पल्लयसरिसा रुप्पामया सव्वे ॥ ६३ ॥

ते च दधिमुखपर्वता एकैकं योजनसहस्रं भूमावधोऽवगाढाः। बहिश्चतुःषष्टियोजनसहस्राणि उच्चाः। दशसहस्रयोजनानि सर्वत्र पृथुलाः। तेनोर्ध्वमध्याधस्तुल्यविस्ताराः। अत एव पल्यसदृशाः पल्यको धान्यकोष्ठकः तत्संस्थानसंस्थिताः। तथा रूप्यात्मकाः सर्वात्मना श्वेता इत्यर्थः। वापीनामनुसारेण तेषां षोडशदधिमुखानां नामान्यप्यत्रसेयानि ॥ ६३ ॥

अथाञ्जनदधिमुखपर्वतेषु विशेषमाह—

अंजणदहिमुहचेइअ वीसं चउदार दीहपिहुउच्चा। सयपन्ना बावत्तरि जोअण ठाणंगि जिअभिगमे ॥ ६४ ॥

अञ्जनपर्वतेषु दधिमुखेषु च षोडशसु प्रत्येकमेकैकचैत्यसद्भावात् सर्वाणि चतुर्द्वाराणि विंशतिश्चैत्यानि सन्ति । अन्येषां तु मते द्वात्रिंशद्रतिकरपर्वतेष्वेकैकचैत्यसद्भावात् द्वापञ्चाशच्चैत्यानि तानि सिद्धायतनानि पूर्वपश्चिमतः शतयोजनदीर्घाणि दक्षिणोत्तरतः पञ्चाशद्योजनविस्तीर्णानि द्वासप्ततियोजनोच्चानि । प्रतिद्वारं च मुखमण्डप १ प्रेक्षामण्डप २ चैत्यस्तूप ३ चैत्यवृक्ष ४ महेन्द्रध्वज ५ पुष्करिण्यः ६ एते षट् पदार्थाः सन्ति । मुखमण्डपप्रेक्षामण्डपौ शतयोजनदीर्घौ, पञ्चाशदा(द्द्योजना) यामौ, षोडशयोजनोच्चौ । चैत्यस्तूपं षोडशयोजनायामविस्तारम् । चैत्यवृक्षमहेन्द्रध्वजयोः पीठिके अष्टयोजनायामविस्तारे । ता अपि पुष्करिणीवाप्यो योजनशतायामविस्ताराः, दशयोजनोद्वेधाः । तासूपरितनवापीषु प्रज्ञापनातृतीयपदवृत्त्युक्तत्वेन मत्स्याद्याः सन्ति । चैत्यवृक्षेन्द्रध्वजयोः प्रमाणं जीवाभिगमोपाङ्गादवधार्यम् । इति विंशतिसिद्धायतनस्वरूपं स्थानाङ्गे जीवाभिगमे चोक्तमस्ति ॥ ६४ ॥ अथ रतिकरपर्वतवक्तव्यतामाह—

नंदी विदिसिं चउरो दसिगसहस्सापिहुच्चपाओहे । झल्लरिसरिस अचेइअ रइकर ठाणंगि सुत्तंमि ॥६५॥

नन्दीश्वरद्वीपे विदिक्षु चत्वारः एव रतिकराः सन्ति । तेऽपि चैत्यरहिताः सिद्धायतनवियुक्ताः । प्रवचनसारोद्धारादिग्रन्थमते तु चतसृणां वापीनां अन्तरालेषु द्वौ द्वौ रतिकरौ स्तः । यादृशमेकस्यां दिशि तादृशं शेषासु तिसृषु दिक्षु सर्वे द्वात्रिंशद्रतिकराः सिद्धायतनसंयुक्ताश्च । अथ चतुर्णां द्वात्रिंशतो वा प्रमाणमेकमेवाह—"दसि" इति दशसहस्रं पृथुलाः, दशसहस्रं विस्ताराः वृत्ता एकसहस्रमुच्चाः, सहस्रस्य पादो भूमाववगाढाः, सार्धशतद्वययोजनानि भूमौ प्रविष्टा इत्यर्थः । अथ उपरि च दशसहस्रयोजनानां पृथुलत्वेन सर्वत्र समाः । ततो झल्लरीवादित्रविशेषस्तत्तुल्याकारा वृत्ता इत्यर्थः । इति सर्वे

स्थानाङ्गसूत्रे प्रोक्तम् ॥ ६५ ॥ अथोक्तस्थानादन्येषामूर्ध्वाधोलोकस्थसिद्धायतनानामुच्चत्वादिप्रमाणमाह—

नंदीसर व्व उड्ढं पन्नासाई य असुरजिणभवणा । तयअद्धं नागाइसु वंतरनगरेसु य तय अद्धं ॥ ६६ ॥

नन्दीश्वरचैत्यवत् देवलोकसिद्धायतनानि शतयोजनदीर्घाणि, पञ्चाशद्विस्तीर्णानि, द्वासप्ततिरुच्चानि, परं त्रिद्वाराणि । तथाऽसुरनिकाये जिनभवनानि तदर्धप्रमाणानि ५०–२५–३६ । तथा नागादिषु नवनिकायेषु ततोऽप्यर्धमानानि, यथा–२५–१२॥–१८ । तथा व्यन्तरनगरेषु ततोऽप्यर्धमानानि १२॥–६।–९ । तथा ज्योतिष्केषु तिर्यग्लोकेषु च विविधप्रमाणानि ॥ ६६ ॥ इत्युक्तं नन्दीश्वरद्वीपद्वारं दशमम् ॥ १० ॥ अथ गृहिक्रियाद्वारमेकादशम्—

मन्नह जिणाण आणं[१] मिच्छं परिहरह[२] धरह सम्मत्तं[३] । छव्विहआवस्सयंमि अ उज्जुत्ता होइ पइदिअहं ॥६७॥

पव्वेसु पोसहवयं[५] दाणं[६] सीलं[७] तवो[८] अ भावो[९] अ । सज्झायं[१०] नमुक्कारो[११] परोवयारो[१२] अ जयणा[१३] य ॥ ६८ ॥

जिणपूआ[१४] जिणथुणणं[१५] गुरुथुइ[१६] साहंमिआण वच्छल्लं[१७] । ववहारस्स य सुद्धी[१८] रहजत्ता[१९] तित्थजत्ता[२०] य ॥६९॥

संघोवरि बहुमाणो[२१] धम्मिअमित्ती[२२]* पभावणा तित्थे[२३] । नवखित्ते धणववणं[३०]+ पुत्थयलिहणं विसेसेणं[३३] ॥७०॥

परिगहमाणा[३४]ऽभिग्गहे[३५] इक्कारससड्ढपडिमफासणया[३६] । सव्वविरई मणोरह[३७] एमाई सड्ढकिच्चाइं ॥ ७१ ॥

स्पष्टम् ॥ ६७–६८–६९–७०–७१ ॥ अथ चतुर्दशगुणस्थानद्वारं द्वादशमाह—

---

* “पुत्थयलिहणं’ इति प्रत्यन्तरे । + इतः परं “सामाइयमुभयकालंमि” इति पुस्तकान्तरे ॥

अह चउदससु गुणेसुं कालपमाणं भणामि दुविहंपि १।न मरइ मरइ २ व जेसुं सह परभवु जेहिं ३ नो जेहिं

तत्रापि प्रतिद्वाराणि चत्वारि। तद्यथा—अथ चतुर्दशगुणस्थानकेषु "दुविहंपि" इति द्विविधमपि जघन्यमुत्कृष्टं च स्थितिकालप्रमाणम् १। तथा येषु गुणस्थानकेषु वर्तमानो जीवो म्रियते न म्रियते वेति तत्स्वरूपम् २। तथा यैर्गुणस्थानैः सह जीवः परभवगामी स्यात्, यैश्च न स्यात् ३। तथा गुणस्थानकानामल्पबहुत्वम् ४। एतद्गुणस्थानप्रतिद्वारचतुष्कं भणिष्यामि ॥ ७२ ॥ तत्र प्रथमं प्रतिद्वारं व्याचिख्यासुर्मिथ्यात्वस्थितिकालभेदानाह—

मिच्छं अणाइऽनिहणं अभव्वे भव्वे वि सिवगमाजुग्गे।सिवगइ अणाइसंतं साईसंतंपि तं एवं ॥ ७३ ॥

अनाद्यनन्तः १, अनादिसान्तः २, साद्यनन्तः ३ सादिसान्तः ४ एतेषु चतुर्षु भेदेषु मिथ्यात्वमनाद्यनिधनमित्यनाद्यनन्तं अभव्ये भवति। भव्येऽपि शिवगमायोग्ये मुक्तिगमनानर्हे। एतावता भव्याभव्येऽप्यनाद्यनन्तमिति प्रथमो भङ्गः१। तथा मोक्षगमने च योग्यस्य भव्यस्यानादिसान्तं आदिरहितमन्तसहितमित्यर्थः। यथा कश्चिज्जीवः सम्यक्त्वं प्राप्यावान्त्वैव मोक्षं याति, मरुदेवीभगवतीवदिति द्वितीयो भङ्गः २। कस्यचिन्मिथ्यात्वं सादिसान्तमपि, यथा यः सम्यक्त्वं लब्ध्वा पुनर्मिथ्यात्वे याति, पुनरपि सम्यक्त्वं प्राप्य मोक्षं गच्छति. श्रीमहावीरादिवदिति चतुर्थो भङ्गः ३। साद्यनन्ताभिधस्तृतीयो भङ्गो मिथ्यात्वे नास्ति ॥ ७३ ॥ तत्र सादिसान्ताभिधस्तृतीयो भङ्गो मिथ्यात्वे कियत्कालं तिष्ठतीत्याह—

लहु अंतमुहु गुरुअं देसूणमवड्ढपुग्गलपरट्टं। सासाणं लहु समओ आवलिछक्कं च उक्कोसं ॥ ७४ ॥

लघु इति सर्वथा जघन्यं तदान्तर्मुहूर्तं तिष्ठति। गुरुकमुत्कृष्टं देशोनमपार्धपुद्गलपरावर्तं यावन्मिथ्यात्वं तिष्ठति १।

तथा सास्वादनं नाम द्वितीयं गुणस्थानं जघन्यं समयः, उत्कृष्टं त्वावलिकाषट्कं यावत्तिष्ठति नाधिकम् २ ॥ ७४ ॥

अजहन्नमणुक्कोसं अंतमुहू मीसगं अह चउत्थं । ममहिअतित्तीसयरे उक्कोसं अंतमुहु लहुअं ॥ ७५ ॥

तृतीयं मिश्रगुणस्थानं अजघन्योत्कृष्टमसंख्यातसमयात्मकमेकमन्तर्मुहूर्तं तिष्ठति ३ । अथ चतुर्थं गुणस्थानमविरताख्यमुत्कृष्टं समधिकत्रयस्त्रिंशत्सागरोपमस्थितिकम् । भावनात्र मनुष्यायुरधिकमर्वार्थसिद्धविमानस्थित्यपेक्षयाऽवधार्यम्(र्या) । यत्तु क्षायोपशमिकस्य सम्यक्त्वस्य "साहिअतित्तीसायर खइअं दुगुणं खउवसम्मं" इत्यत्र षट्षष्टिसागराधिकस्थितिरुक्ता, तत् सति सम्यक्त्वेऽपि देशविरत्यादिगुणस्थानान्तरसंक्रमणेन भाव्यम् । चतुर्थगुणस्थानकस्य जघन्या स्थितिरन्तर्मुहूर्तप्रमाणा ४ ॥ ७५ ॥

देसूणपुव्वकोडी गुरुअं लहुअं च अंतमुहु देसं । छट्ठाइगारसंता लहु समया अंतमुहु गुरुआ ॥ ७६ ॥

तथा पञ्चमदेशविरतिगुणस्थानकस्योत्कृष्टा स्थितिरष्टाभिर्वर्षैर्न्यूना पूर्वकोटिः । कश्चित्पूर्वकोट्यायुरष्टवर्षानन्तरं देशविरतिं प्रतिपद्यते । जघन्या चान्तर्मुहूर्तमाना ५ । तथा षष्ठाद्यानि एकादशान्तानि प्रमत्ता ६ प्रमत्त ७ निवृत्त्य ८ निवृत्ति ९ सूक्ष्मसंपरायो १० पशान्तमोहनामकानि ११ जघन्यतः समयस्थितिकानि । स च समयो भवपरावृत्त्या लभ्यते । यदेतेषामेकसमयं श्रेण्यारोहावरोहयोः प्रतिपद्यानन्तरं मरणसंभवात् । उत्कृष्टतश्चैतान्यन्तर्मुहूर्तप्रमाणानि ॥ ७६ ॥

अंतमुहुत्तं एगं अलहुक्कोसं अजोगिखीणेसु । देसूणपुव्वकोडी गुरुअं लहु अंतमुहु जोगी ॥ ७७ ॥

जघन्योत्कृष्टमन्तर्मुहूर्तमेकमयोगि १४ क्षीणमोहयोः १२ स्थितिः । तथा सयोगिकेवलिगुणस्थानं १३ उत्कृष्टतो नवभि

वर्षैर्न्यूना पूर्वकोटिः जघन्यतश्चान्तर्मुहूर्तम् ॥ ७७ ॥ अथ द्वितीयं प्रतिद्वारमाह—

मीसे खीणसजोगी न मरंत मरंतेगारसगुणेसु। तह मिच्छसाणअविरइ सहपरभवगा न सेसट्ठा ॥७८॥

मिश्रे तृतीये गुणस्थाने, द्वादशे क्षीणमोहे, त्रयोदशे सयोगिनि च वर्तमानो जीवो न म्रियते। अपरेष्वेकादशसु मिथ्यात्व १ सास्वादना २ ऽविरति ३ देशविरति ४ प्रमत्ता ५ ऽप्रमत्त ६ निवृत्त्य ७ ऽनिवृत्ति ८ सूक्ष्मसंपरायो ९ पशान्तमोहा १० योगिकेवलिगुणस्थानकेषु वर्तमानो जीवो म्रियते। अथ गाथान्त्यार्धेन तृतीयं द्वारमाह—"तह" इति तथा मिथ्यात्वसास्वादनाविरतिगुणस्थानत्रयेण सह जीवाः परभवगामिनो भवन्ति जीवेन सहितानि परभवं गच्छन्तीत्यर्थः। उक्तव्यतिरेकशेषगुणस्थानस्था जीवा न परभवगामिनः मिश्रदेशविरतिप्रमत्ताप्रमत्तनिवृत्त्यनिवृत्तिसूक्ष्मसंपरायोपशान्तमोहक्षीणमोहसयोग्ययोगिगुणस्थानकानि लात्वा परभवं न व्रजन्तीत्यर्थः ॥ ७८ ॥ अथ चतुर्थमल्पबहुत्वाख्यं द्वारमाह—

उवसंतिजिणा थोवा संखिज्जगुणा उ खीणमोहिजिणा।सुहुम निअट्टिअनिअट्टि तिन्नि वि तुल्ला विसेसहिआ

गुणस्थानस्थाने तद्वर्तिन एव ग्राह्याः, आधाराधेयोपचारात्। सर्वस्तोका उपशान्तिजिना उपशान्तमोहवर्तिनः, उत्कर्षत एकसमयप्रतिपद्यमानकाश्चतुष्पञ्चाशतो लभ्यमानत्वात्। तेभ्यः क्षीणमोहाः संख्येयगुणाः तेषां प्रतिपद्यमानकानामेकसमयेऽष्टोत्तरशतसंख्यत्वात्। एतदुत्कृष्टपदापेक्षं, अन्यथा विपर्ययोऽपि, यथा—सर्वस्तोकाः क्षीणमोहाः, तेभ्य उपशान्तमोहाः संख्येयगुणा इत्यपि। तेभ्यः सूक्ष्मानिवृत्त्यपूर्वकरणास्त्रयोऽपि विशेषाधिकाः। स्वस्थाने मिथस्तुल्याः ॥ ७९ ॥

जोगि अपमत्त इयरे संखगुणा देस सासणा मिस्सा। अविरय अजोगि मिच्छा चउर असंखा दुवे णंता ८०॥

एतेभ्यः सयोगिकेवलिनः संख्येयगुणाः, कोटीपृथक्त्वेन तेषां प्राप्यमाणत्वात् । तेभ्योऽप्रमत्ताः संख्येयगुणाः, कोटीसहस्रपृथक्त्वेन प्राप्यमाणत्वात् । तेभ्य इतरे प्रमत्ताः संख्येयगुणाः, प्रमादवतां बहूनां बहुकालं च लभ्यमानत्वात् । तेभ्यो देशविरताः सास्वादनाः मिश्रा अविरताश्च प्रत्येकमसंख्येयगुणाः, देशविरतिभाजां तिरश्चामसंख्येयत्वात् । सास्वादनास्तु-कदाचिन्न भवन्त्येव । यदि च स्युस्तदा जघन्यत एको द्वौ वा उत्कर्षतो देशविरतेभ्योऽसंख्येयगुणाः । तेभ्यो मिश्रा असंख्येयगुणाः, सास्वादनस्य षडावलिकारूपाद्धाया आन्तर्मौहूर्तिकमिश्राद्धायाः प्रभूतत्वात् । तेभ्योऽविरता असंख्येयगुणाः-तेषां चतुर्गतिकानामपि भावात् । "अजोगि" इति अविरतेभ्योऽयोगिनो भवस्थाभवस्थभेदभिन्ना अनन्तगुणाः, सिद्धानां, मानन्त्यात् । तेभ्यो मिथ्यादृष्टयोऽनन्तगुणाः, तत्रानन्तवनस्पतिकायप्रक्षेपात्, तेषां मिथ्यादृष्टित्वात् । गतं चतुर्थं प्रतिद्वारं, तेन कथनेन द्वादशं गुणस्थानद्वारं व्याख्यातम् ॥ ८० ॥ अथोपसंहारमाह—

चउदसगुणसोवाणे इअ दुहरोहे कमेण रुहिऊणं । नरसुरमहिंदवंछियसिवपासाए सया वसह ॥ ८१ ॥

इत्यमुना प्रकारेण अहो भव्याश्चतुर्दशगुणस्थानरूपसोपानानि गुरुकर्मभिर्दुरारोहाणि अनुक्रमेणारुह्य नरसुरमहेन्द्रैर्वाञ्छिते समीहिते शिवप्रासादे मोक्षमन्दिरे सदा वसत निवासं कुरुत । अथवा नरसुरैः श्रीमहेन्द्रसिंहसूरिभिश्च वाञ्छिते । एतेन ग्रन्थकर्त्रा स्वं नामापि सूचितम् ॥ ८१ ॥

• श्रीतपगणगगनाङ्गणसूरिश्रीविजयदेवसूरीणाम् । विनियोगाद्वृत्तिरियं विनिर्मिता विनयकुशले ॥ १ ॥

॥ समाप्तेयं सवृत्तिका श्रीविचारसप्ततिका ॥

श्रीआत्मानन्द-ग्रन्थ-रत्नमाला-एकोनविंशं रत्नम् (१९)

श्रीसमयसुन्दरगणिविरचितस्वोपज्ञावचूरिसहितं

अल्पबहुत्वगर्भितं श्रीमहावीरस्तवनम्।

तथा

सावचूरिकं महादण्डकस्तोत्रापरपर्यायाल्पबहुत्वविचारस्तवनम्।

श्रीमतीसाध्वीज्ञानश्रीसदुपदिष्ट-श्रीअणहिल्लपुरपत्तनवास्तव्य-श्राविका-चंचलबाई-

तथा-श्रीमालिज्ञातीय-मोहनलालात्मज-मणिलालभार्या-बाई रुक्ष्माणी द्रव्यसाहाय्येन

प्रकाशयित्री-श्रीआत्मानन्दसभा-भावनगर।

इदं पुस्तकं मुम्बय्यां **वल्लभदास-त्रिभुवनदास गांधी** सेक्रेटरी **जैन आत्मानन्दसभा भावनगर** इत्यनेन

निर्णयसागरमुद्रालये कोलभाटवीथ्यां २३, तमे गृहे रा. य. शेडगे द्वारा मुद्रयित्वा प्रकाशितम्।

वीरसंवत् २४४०. आत्मसंवत् १८. विक्रमसंवत् १९७०.

अ० १

Printed by R. Y. Shedge at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay, and Published by Vallabhadas Tribhuvandas Gandhi, Secretary, Jaina Atmananda Sabha, Bhavanagar.

॥ प्रस्तावना ॥

इदमल्पबहुत्वगर्भितं त्रयोदशगाथात्मकं श्रीमन्महावीरस्वामिविज्ञप्तिरूपस्तवनं जैनागमपारावारपारीणपूज्यपादश्रीमच्छ्यामाचार्याचार्यपुङ्गवसङ्कलितप्रज्ञापनोपाङ्गतृतीयपदप्रथमद्वारात्समुद्धृत्य संदृब्धमिति पीठिकावलोकनेन स्फुटमवगम्यते । अस्य प्रणेतारोऽष्टलक्षीकल्पलतादिभूरितरग्रन्थग्रथनपटुतरमतिविभवाः श्रीबृहत्खरतरगच्छाधीशश्रीमज्जिनचन्द्रसूरिशिष्यसकलचन्द्रगणिशिष्यवाचनाचार्यश्रीसमयसुन्दरगणयः, इत्यस्यावसानगाथातदवचूरिनिरीक्षणेन प्रकटमेव प्रतिभाति । एभिरेव वाचंयमचूडामणिभिरेतत्करणे प्रयोजनमप्यस्य प्रान्ते प्रदर्शितमेव । एतेषां सत्तासमयस्तु जिनशासनेऽस्मिन् विक्रमार्कीयसप्तदशशताब्द्यां सुप्रसिद्ध एव, इत्यतस्तत्तद्ग्रन्थप्रशस्तिगतानि प्रमाणान्यपि नोपन्यस्तानि ।

अस्मिन्नल्पबहुत्वविचारगर्भितवीरस्तुतौ सिद्धान्तस्वापतेयसारैः स्तुतिकारैः प्रथमतो नवसु गाथासु सामान्येन सप्तदशभेदभिन्नानां जीवानां पूर्वादिदिशः समाश्रित्याल्पबहुत्ववर्णनम्, दशमैकादशगाथयोस्तु पुद्गलानां षट्सु दिक्ष्वल्पबहुत्वनिरूपणम्, द्वादशत्रयोदशगाथयोः पुनः श्रीमन्महावीरजिनविज्ञप्त्यादिकरणं इत्येते विषयाः सप्रपञ्चं प्रपञ्चिताः सन्ति ।

एतदल्पबहुत्वगर्भितश्रीमहावीरस्तवनपुस्तकगवेषणपरायणेन मया भूयो भूयः प्रायतिषि परं केवलं पत्तनस्थतपगच्छचित्कोषसत्कं श्रेष्ठि-लेहेरचन्द्र-हालाभाई-द्वारा नातिशुद्धमेकं पुस्तकं समुपलब्धम्, एतदाधारेणैव संशोधितं च ।

द्वितीयस्यास्य महादण्डकस्तोत्रापरपर्यायाल्पबहुत्वविचारस्तवनस्य अवचूर्याश्च के परोपकृतिकर्मकर्मठाः व्रतिनेतारः प्रणेतारः? इत्येतद्विषयनिर्णयस्तु कर्तुं न पार्यते, अत्र क्वापि तेषामभिधेयादिकस्यानुपलम्भात्। परं "संव० १४८६ सोमवारे" इति लिखितपुस्तकादर्शदर्शनेन नार्वाचीनमिति निश्चीयते।

संशोधितेऽप्यत्र निबन्धे मतिमान्द्यादक्षरयोजकदोषाद्वा यत्र क्वचनाशुद्धिः कृता जाता वा भवेत् तत्र संशोधनीयं विपश्चिदपश्चिमैरिति प्रार्थयते प्रकल्पिताञ्जलिः—

प्रवर्तकश्रीमत्कान्तिविजयपादपाथोजपरागः

चतुरविजयो मुनिः।

॥ अर्हम् ॥

॥ न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरिभ्यो नमः ॥

श्रीसमयसुन्दरोपाध्यायविरचितस्वोपज्ञावचूरिसहितं

अल्पबहुत्वगर्भितं श्रीमहावीरस्तवनम् ।

श्रीप्रज्ञापनातृतीयपदप्रथमद्वारं हृदि निधाय सामान्यजीवादिसप्तदशभेदभिन्नानां जीवानां दिश आश्रित्य स्वोपज्ञाल्पबहुत्वस्तवस्य वृत्तिर्विधीयते । तत्रादौ येन भगवता इदं जीवानामल्पबहुत्वं प्ररूपितं तं श्रीवर्द्धमानं स्तुवन्नाह—

जेण परूवियमेयं दिसाणुवाएण अप्पबहुठाणं । जीवाण बायराण य थुणामि तं वद्धमाणजिणं ॥१॥

अहं तं वर्द्धमानजिनं श्रीवीरतीर्थङ्करं स्तवीमि । तं कं ? येन भगवता एतद्वक्ष्यमाणं जीवानामल्पबहुत्वस्थानं प्ररूपितम् । केन प्रकारेण? "दिसाणुवाएण" दिशामनुपातो दिगनुसरणं तेन दिशोऽधिकृत्य च । तात्पर्यार्थः—इह दिशः प्रथमे आचाराख्येऽङ्गेऽनेकप्रकारा व्यावर्णितास्तत्रेह क्षेत्रदिशः प्रतिपत्तव्याः, तासां नियतत्वादितरासां च प्रायोऽनवस्थितत्वादनुपयोगित्वाच्च क्षेत्रदिशां च प्रभवस्तिर्यग्लोकमध्यगताद्दष्टप्रदेशकाद्रुचकाद्विज्ञातव्याः । किंविशिष्टानां जीवानां ? बादराणां नतु सूक्ष्माणां, सूक्ष्माणां सर्वलोकापन्नानां प्रायः सर्वत्रापि समत्वात् । बादरेष्वपि मध्ये सर्वबहवो वनस्पतिकायिका अनन्तसं-

ख्याततया तेषां प्राप्यमाणत्वात् । ततो यत्र ते बहवस्तत्र बहुत्वं जीवानां, यत्र स्वल्पे तत्राल्पत्वम् । वनस्पतयश्च तत्र बहवो यत्र प्रभूता आपः, "जत्थ जलं तत्थ वणं" इति वचनात् । तत्रावश्यं पनकसेवालादीनां भावात् । ते च पनकसेवालादयो बादरनामकर्मोदये वर्तमाना अपि अत्यन्तसूक्ष्मावगाहनत्वादतिप्रभूतपिण्डाभावाच्च सर्वत्र सन्तोऽपि न चक्षुषा ग्राह्याः । यदुक्तमनुयोगद्वारेषु—"तेणं वालग्गा सुहुमपणगजीवस्स सरीरोगाहणाहिंतो असंखेज्जगुणा" इति । ततो यत्रापि नैते दृश्यन्ते, तत्रापि ते सन्तीति प्रतिपत्तव्या इति । उदकं च प्रभूतं समुद्रेषु द्वीपादिगुणविष्कम्भत्वात् । तेष्वपि च समुद्रेषु प्रत्येकं प्राचीप्रतीचीदिशोर्यथाक्रमं चन्द्रसूर्यद्वीपा यावति च प्रदेशे चन्द्रसूर्यद्वीपा अवगाढास्तत्रोदकाभावः, उदकाभावाच्च वनस्पतिकायिकाभावः । इयं वक्तव्यताऽग्रे सोपयोगिनी ज्ञेया। चशब्दात् पुद्गलानामल्पबहुत्वमपि प्ररूपितम् । इति प्रथमगाथार्थः ॥ १ ॥ अथ सामान्यजीवादिसप्तजीवभेदानां पश्चिमदिश आश्रित्याल्पबहुत्वं गाथयाह—

सामन्नेणं जीवा[१] आउ[२] वणे[३] विगल[४] तिरियँपंचिंदी[५]। पच्छिम थोवा अहिया पुवदिसिं दाहिणुत्तरयो ॥ २ ॥

सामान्येन पृथिव्यादिव्यपदेशं विना सर्वस्तोका जीवाः "पच्छिम" इति प्राकृतत्वेन विभक्तिलोपात् पश्चिमायां दिशि । एवमग्रेऽपि अर्थवशाद्विभक्तिव्यत्ययश्च ज्ञेयः । कथं पश्चिमायां सर्वस्तोकाः ? उच्यते, यतो हि प्रतीच्यां दिशि लवणसमुद्राधिपसुस्थितनामदेवावासभूतो गौतमद्वीपो लवणसमुद्रेभ्योऽधिको वर्तते, तत्र च उदकाभावाद्वनस्पतिकायिकानामभावात्सर्वस्तोका जीवाः पश्चिमायां दिशि । तेभ्यः "अहिया" इति विशेषाधिकाः सामान्यजीवाः पूर्वदिशि । तत्र हि गौतमद्वीपो न विद्यते, ततस्तावता विशेषेणातिरिच्यन्त इति । तेभ्योऽपि दक्षिणस्यां दिशि सामान्यजीवा विशेषाधिकाः,

यतस्तत्र चन्द्रसूर्यद्वीपा न विद्यन्ते, तदभावात्तत्र उदकं प्रभूतं, तत्प्राभूत्याच्च वनस्पतिकायिका अपि प्रभूता इति विशेषाधिकाः । एवमिदमधिकपदमग्रेऽपि योज्यम् । तेभ्योऽप्युदीच्यां दिशि सामान्यजीवा विशेषाधिकाः । किं कारणं ? इति चेदुच्यते, उदीच्यां हि दिशि संख्येययोजनेषु द्वीपेषु मध्ये कस्मिंश्चिद्द्वीपे आयामविष्कम्भाभ्यां संख्येययोजनकोटीकोटीप्रमाणं मानसं नाम सरः समस्ति ततो दक्षिणदिगपक्षेया अस्यां प्रभूतमुदकम्, उदकबाहुल्याच्च प्रभूता वनस्पतयः,। प्रभूता द्वीन्द्रियाः शंखादयः । प्रभूतास्तटलग्नशंखादिकलेवराश्रितास्त्रीन्द्रियाः पिपीलिकादयः । प्रभूताः पद्मादिषु चतुरिन्द्रिया भ्रमरादयः । प्रभूताः पञ्चेन्द्रिया मत्स्यादय इति विशेषाधिकाः । इति सामान्यजीवानां दिगनुपातेनाल्पबहुत्वमुक्तम् । एवं पश्चिमादिदिगनुपातेनाबादिषट्कस्य ज्ञेयम् । तथाहि—सर्वस्तोका अप्कायिकाः पश्चिमायां दिशि, गौतमद्वीपस्थाने तेषामभावात् । तेभ्योऽप्कायिकाः पूर्वस्यां दिशि विशेषाधिकाः, तत्र गौतमद्वीपाभावात् । तेभ्योऽपि विशेषाधिका अप्कायिका दक्षिणस्यां दिशि, चन्द्रसूर्यद्वीपाभावात् । तेभ्यो विशेषाधिका अप्कायिका उत्तरस्यां दिशि, तत्र मानससरःसद्भावात् । तथा यत्र प्रभूता आपस्तत्र प्रभूताः पनकादयोऽनन्तकायिका वनस्पतयः। प्रभूताः शंखादयो द्वीन्द्रियाः। प्रभूताः पिण्डीभूताः सेवालाद्याश्रिताः कुन्थ्वादयस्त्रीन्द्रियाः । प्रभूताः पद्माद्याश्रिता भ्रमरादयश्चतुरिन्द्रियाः । प्रभूता मत्स्यादयः पञ्चेन्द्रियाः । इति हेतोः "वण" इति वनस्पतिकायिकाः १ । "विगल" इति विकला द्वित्रिचतुरिन्द्रियाः ४ तिर्यक्पञ्चेन्द्रियाश्च ५ । एते पञ्चापि जीवाः सर्वस्तोकाः पश्चिमायां दिशि । ततः पूर्वस्यां दिशि विशेषाधिकाः । ततो दक्षिणस्यां दिशि विशेषाधिकाः । ततोऽपि उत्तरस्यां दिशि विशेषाधिकाः । इति अप्कायिकवद्भावनीयाः । इति द्वितीयगाथार्थः ॥ २ ॥

अथ मनुष्यसिद्धतैजसकायिकानामल्पबहुत्वमग्रेतनगाथयाह—

मणुया सिद्धा तेऊ सवत्थोवा य दाहिणुत्तरयो। पुविं संखा पच्छिम अहिया कहिया तुमे नाह! ॥३॥

हे नाथ! "तुमे" त्वया "मनुजाः" मानवा दक्षिणोत्तरयोर्दिशोः सर्वस्तोकाः कथिताः। कथम्? दक्षिणस्यामुत्तरस्यां च दिशि पञ्चानां भरतक्षेत्राणां पञ्चानामैरावतक्षेत्राणामल्पत्वात्। तेभ्यः "पुविं संखा" इति पूर्वस्यां दिशि संख्येयगुणाः, क्षेत्रस्य संख्येयगुणत्वात्। तेभ्योऽपि पश्चिमायां दिशि विशेषाधिकाः, स्वभावत एवाधोलौकिकग्रामेषु मनुष्यबाहुल्यभावात् ८। एवं च पुनः हे नाथ! त्वया सिद्धा दक्षिणोत्तरयोर्दिशोः सर्वस्तोकाः कथिताः। कथम्? इति चेदुच्यते, इह मनुष्या एव सिध्यन्ति, नान्ये। मनुष्या अपि सिध्यन्तो येषु आकाशप्रदेशेषु इह च चरमसमयेऽवगाढास्तेष्वेवाकाशप्रदेशेषु ऊर्ध्वमपि गच्छन्ति, तेष्वेव चोपर्यवतिष्ठन्ते न मनागपि वक्रं गच्छन्ति सिध्यन्ति वा। तत्र दक्षिणस्यां दिशि पञ्चसु भरतेषु, उत्तरस्यां दिशि पञ्चस्वैरावतेषु मनुष्या अल्पाः क्षेत्रस्याल्पत्वात् सुषमसुषमादौ च सिद्ध्यभावादिति तत्क्षेत्रसिद्धाः सर्वस्तोकाः। तेभ्यः पूर्वस्यां दिशि संख्येयगुणाः, पूर्वविदेहानां भरतैरावतक्षेत्रेभ्यः संख्येयगुणतया तद्गतमनुष्याणामपि संख्येयगुणत्वात्, तेषां सर्वकालं सिद्धिभावात्। तेभ्यः पश्चिमायां दिशि विशेषाधिकाः, अधोलौकिकग्रामेषु मनुष्यबाहुल्यात् ९। तथा "तेऊ" इति तेजस्कायिकाः, उक्तिः पूर्ववत्। सर्वस्तोका दक्षिणोत्तरयोर्दिशोः, यतो मनुष्यक्षेत्रे एव बादरास्तेजस्कायिकाः, नान्यत्र। तत्रापि यत्र बहवो मनुष्यास्तत्र ते बहवो बाहुल्येन पाकारम्भसंभवात्। यत्र त्वल्पे तत्र स्तोकाः। तत्र दक्षिणस्यां दिशि पञ्चसु भरतेषु, उत्तरस्यां दिशि पञ्चस्वैरावतेषु क्षेत्रस्याल्पत्वात् स्तोका मनुष्याः, तेषां

स्तोकत्वेन तेजस्कायिका अपि स्तोका, अल्पपाकारम्भसंभवात् । ततः सर्वस्तोका दक्षिणोत्तरयोर्दिशि तेजस्कायिकाः । स्वस्थाने तु प्रायः समानाः । तेभ्यः पूर्वस्यां दिशि संख्येयगुणाः, क्षेत्रस्य संख्येयगुणत्वात् । ततोऽपि पश्चिमायां दिशि विशेषाधिकाः, अधोलौकिकग्रामेषु मनुष्यबाहुल्यात् १० ॥ ३ ॥ अथ वायुकायिकानां साधिकपदद्वयेन अल्पबाहुल्यमाह—

वाऊ थोवा पुव्विं तत्तो अहिया य पच्छिमुत्तरयो। दाहिण ११ नारय थोवा पुव्वुत्तरपच्छिमासु समा ॥ ४ ॥ दाहिण असंख १२

इह यत्र शुषिरं तत्र वायुर्यत्र च घनं तत्र वाय्वभावः, ततः पूर्वस्यां दिशि प्रभूतं घनमिति सर्वस्तोका वायुकायिकाः त्वया कथिता इति पूर्ववदुक्तिः । ततः पश्चिमायां दिशि विशेषाधिकाः, अधोलौकिकग्रामसंभवात् । ततोऽपि उत्तरस्यां दिशि विशेषाधिकाः, भवननरकावासबाहुल्येन शुषिरबाहुल्यात् । ततोऽपि दक्षिणस्यां दिशि विशेषाधिकाः, उत्तरदिगपेक्षया दक्षिणस्यां दिशि भवनानां नरकावासानां चातिप्रभूतत्वात् ११ । अथ साधिकपदद्वयेन नारकाणामल्पबहुत्वमाह—"नारय" इति हे देव ! नारकाः सर्वस्तोकास्त्वया पूर्वोत्तरपश्चिमादिक्षु कथिताः । कथम् ? पुष्पावकीर्णनरकावासानां तत्राल्पत्वात् बहूनां प्रायः संख्येययोजनविस्तृतत्वाच्च । किंविशिष्टा नारकाः ? समाः स्वस्थाने तुल्याः । तथा तेभ्यो दक्षिणस्यां दिशि असंख्येयगुणाः, पुष्पावकीर्णनरकावासानां तत्र बाहुल्यात् तेषां च प्रायोऽसंख्येययोजनविस्तृतत्वात् कृष्णपाक्षिकाणां तस्यां दिशि प्राचुर्येणोत्पादाच्च । तथाहि—द्विविधा जन्तवः, शुक्लपाक्षिकाः कृष्णपाक्षिकाश्च । तेषां लक्षणमिदं—किंचिदूनपुद्गलपरावर्तार्धमात्रं संसारस्ते शुक्लपाक्षिकाः । अधिकतरसंसारभाजिनस्तु कृष्णपाक्षिकाः । उक्तं च—"जेसिम-

बहो पुग्गलपरियट्टो सेसओ य संसारो । ते सुक्कपक्खिया खलु अहिए पुण कण्हपक्खीओ १ ॥" अत एव च स्तोकाः शुक्लपाक्षिकाः, अल्पसंसारिणां स्तोकत्वात् । बहवः कृष्णपाक्षिकाः, प्रभूतसंसारिणामतिप्रचुरत्वात् । कृष्णपाक्षिकाश्च प्राचुर्येण दक्षिणस्यां दिशि समुत्पद्यन्ते, न शेषासु दिक्षु; तथास्वाभाव्यात् । तच्च तथास्वाभाव्यं पूर्वाचार्यैरेवं युक्तिभिरुपबृंह्यते । तद्यथा—कृष्णपाक्षिका दीर्घतरसंसारभाजिन उच्यन्ते; दीर्घतरसंसारभाजिनश्च बहुपापोदयाद्भवन्ति; बहुपापोदयाच्च क्रूरकर्माणश्च प्रायस्तथास्वाभाव्यात् । तद्भवसिद्धिका अपि दक्षिणस्यां दिशि समुत्पद्यन्ते न शेषासु सर्वासु दिक्षु । यत उक्तम्—"पायमिह कूरकम्मा भवसिद्धीयावि दाहिणल्लेसु । नेरइतिरियमणुया सुराइठाणेसु गच्छंति १ ॥" ततो दक्षिणस्यां दिशि बहूनां कृष्णपाक्षिकाणामुत्पादसंभवात् पूर्वोक्तकारणद्वयाच्च संभवन्ति। पूर्वोत्तरपश्चिमदिग्विभाविभ्यो दाक्षिणात्या असंख्येयगुणाः । इति नारकाणां सामान्येनाल्पबहुत्वमुक्तम् । अथ प्रसङ्गात्सोपयोगित्वेन सप्तापि पृथिवीरधिकृत्य दिग्विभागेन नारकाणामल्पबहुत्वं प्रोच्यते । तथाहि—सप्तमपृथिव्यां पूर्वोत्तरपश्चिमदिग्विभाविभ्यो नारकेभ्यो ये सप्तमपृथिव्यामेव दाक्षिणात्यास्तेऽसंख्यातगुणाः । तेभ्यः षष्ठपृथिव्यां तमःप्रभाभिधानायां पूर्वोत्तरपश्चिमदिग्विभाविनोऽसंख्येयगुणाः । कथम् ? इति चेदुच्यते, इह सर्वोत्कृष्टपापकारिणः संज्ञिपञ्चेन्द्रियतिर्यङ्मनुष्याः सप्तमनरकपृथिव्यामुत्पद्यन्ते; किंचिद्धीनहीनतरपापकर्मकारिणश्च षष्ठ्यादिषु पृथिवीषु । सर्वोत्कृष्टपापकर्मकारिणश्च सर्वस्तोका बहवश्च यथोत्तरं किंचिद्धीनहीनतरादिपापकर्मकारिणः । ततो युक्तमसंख्येयगुणत्वं सप्तमपृथिवीदाक्षिणात्यनारकापेक्षया षष्ठपृथिव्यां पूर्वोत्तरपश्चिमनारकाणाम् । एवमुत्तरोत्तरपृथिवीरप्यधिकृत्य भावयितव्यम् । तेभ्योऽपि तस्यामेव षष्ठपृथिव्यां दक्षिणस्यां दिशि

नारका असंख्येयगुणाः, युक्तिरत्र प्रागेवोक्ता। तेभ्योऽपि पञ्चमपृथिव्यां धूमप्रभाभिधानायां पूर्वोत्तरपश्चिमदिग्विभाविनोऽसंख्येयगुणाः। तेभ्योऽपि तस्यामेव पञ्चमपृथिव्यां दाक्षिणात्या असंख्येयगुणाः। एवं सर्वास्वपि क्रमेण वाच्यम् १२ ॥ ४ ॥ अथ किंचिन्न्यूनगाथया जिनस्तुतिपूर्वं पृथिवीकायिकानामल्पबहुत्वमाह—

पुढवी दाहिण थोवा कमेण अहियाओ। उत्तरपुव्वावरदिसि तुज्झ नमो जेण निद्दिट्ठा १३ ॥५॥

हे वीर! इति शेषः तस्मै तुभ्यं नमः। तस्मै कस्मै? येन त्वया "पुढवी" इति पृथिवीकायिका दक्षिणस्यां दिशि सर्वस्तोकाः, तत उत्तरादिदिक्षु च क्रमेणाधिका निर्दिष्टाः केवलज्ञानेन विलोक्य गणधराणामग्रे वाचा प्रकाशिताः। कथं दक्षिणस्यां दिशि सर्वस्तोकाः? उच्यन्ते, इह यत्र घनं तत्र बहवः पृथिवीकायिकाः, यत्र शुषिरं तत्र स्तोकाः, दक्षिणस्यां दिशि बहूनि भवनपतीनां भवनानि बहवो नरकावासाः, ततः शुषिरं प्राभूत्यसंभवात् सर्वस्तोका दक्षिणस्यां दिशि पृथिवीकायिकाः। तेभ्य उत्तरस्यां दिशि विशेषाधिकाः, यत्रोत्तरस्यां दिशि दक्षिणदिगपेक्षया स्तोकानि भवनानि स्तोका नरकावासाः, ततो घनप्राभूत्यसंभवात् बहवः पृथिवीकायिका इति विशेषाधिकाः। तेभ्योऽपि पूर्वस्यां दिशि विशेषाधिकाः, रविशशिद्वीपानां तत्र भावात्। तेभ्योऽपि पश्चिमायां दिशि विशेषाधिकाः। किंकारणम्? इति तदुच्यते, यावन्तो रविशशिद्वीपाः पूर्वस्यां दिशि तावन्तो द्वीपाः पश्चिमायामपि, तत एवैतावता साम्यम्; परं लवणसमुद्रे गौतमद्वीपः पश्चिमायामधिकोऽस्ति तेन विशेषाधिकाः। अत्रापर आह—ननु यथा पश्चिमायां दिशि गौतमद्वीपोऽभ्यधिकोऽस्ति, तथा तस्यां पश्चिमायां दिशि अधोलौकिकग्रामा अपि योजनसहस्रावगाढाः सन्ति, ततः खातधूलिपूरितन्यायेन ते तुल्या एव पृथिवीका-

यिकाः प्राप्नुवन्ति न विशेषाधिकाः। नैतदेवं यतोऽधोलौकिकग्रामावगाहो योजनसहस्रं, गौतमद्वीपस्य पुनः षट्सप्तत्यधिकयोजनसहस्रमुच्चैस्त्वं विष्कम्भस्तस्य द्वादशयोजनसहस्राणि, यच्च मेरोरारभ्याधोलौकिकग्रामेभ्योऽर्वाग् हीनत्वं हीनतरत्वं, तत्पूर्वस्यामपि दिशि प्रभूतगर्त्तादिसंभवात् समानम्। ततो यद्यधोलौकिकग्रामच्छिद्रेषु बुद्ध्या गौतमद्वीपः प्रक्षिप्यते तथापि समधिक एव प्राप्यते न तु तुल्य इति, तेन समधिकेन विशेषाधिकाः पश्चिमायां दिशि पृथिवी कायिकाः १३ ॥ ५ ॥

अथ भवनपतीनां दिगनुपातेन पदत्रयेणाल्पबहुत्वमाह—

भवणवइ पुव्वपच्छिम थोवा तुल्ला य उत्तर असंखा। दाहिण तओ असंखा १४

"भवणवइ" इति भवनपतिदेवाः सर्वस्तोकाः "पुव्वपच्छिम" इति पूर्वस्यां पश्चिमायां च दिशि, कथम्? तत्र भवनानामल्पत्वात्। तेभ्यः "उत्तर" इति उत्तरस्यां दिशि "असंखा" असंख्यातगुणाः, स्वस्थानतया तत्र भवनानां बाहुल्यात्। ततस्तेभ्योऽपि दक्षिणस्यां दिशि असंख्येयगुणाः, तत्र भवनानामतीवबाहुल्यात्। तथाहि—निकाये निकाये चत्वारि चत्वारि भवनशतसहस्राण्यतिरिच्यन्ते, कृष्णपाक्षिकाश्च बहवस्तत्रोत्पद्यन्ते ततो भवन्त्यसंख्येयगुणाः १४ ॥

अथ व्यन्तराणां दिगनुपातेन साधिकपदद्वयेनाल्पबहुत्वमाह—

विंतर थोवा य पुव्वदिसि ॥ ६ ॥ पच्छिम उत्तर दाहिण अहिया १५

"विंतर" इति हे वीर! व्यन्तराः पूर्वदिशि त्वया सर्वस्तोका निर्दिष्टा उक्तिर्विशेषोक्त्यभावे एवमेव सर्वत्र कार्या। कथं पूर्वस्यां दिशि सर्वस्तोकाः? इत्याह—यत्र शुषिरं तत्र व्यन्तराः प्रचरन्ति, यत्र घनं तत्र न, ततः पूर्वस्यां दिशि घनत्वात्

स्तोका व्यन्तराः । च पुनस्तेभ्यः पश्चिमदिशि विशेषाधिकाः, अधोलौकिकग्रामेषु शुषिरं संभवति । तेभ्योऽपि उत्तरस्यां दिशि विशेषाधिकाः स्वस्थानतथा नगरावासबाहुल्यात् । तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः, अतिप्रभूतनगरावासबाहुल्यात् ॥१५॥ अथ ज्योतिष्कानां दिगनुपातेन किंचिन्न्यूनपदत्रयेणाल्पबहुत्वमाह—

थोवा य जोइसा तुल्ला । पुवावरदिसि दाहिण उत्तर अहिया कमा भणिया १६ ॥ ७ ॥

"थोवा" इति हे वीर ! त्वया ज्योतिष्काः "पुवावरदिसि" इति पूर्वस्यां दिशि पश्चिमायां दिशि च सर्वस्तोकाः परस्परं तुल्याश्च भणिता निर्दिष्टाः, चन्द्रादित्यद्वीपेषु उद्यानकल्पेषु कतिपयानामेव तेषां भावात् । ततस्तेभ्योऽपि क्रमात् दक्षिणस्यां दिशि विशेषाधिकाः, विमानबाहुल्यात् कृष्णपाक्षिकाणां दक्षिणदिग्भावित्वाच्च । तेभ्योऽप्युत्तरस्यां दिशि विशेषाधिकाः, यतो मानसे सरसि बहवो ज्योतिष्काः क्रीडास्थानमिति क्रीडनव्यावृत्त्या नित्यमासते मानससरसि च ये मत्स्यादयो जलचरास्ते आसन्नविमानदर्शनतः समुत्पन्नजातिस्मरणा किञ्चित् व्रतं पतिपद्य अशनादिः च कृत्वा कृतनिदानास्तत्रोत्पद्यन्ते, ततो भवन्त्यौत्तरा दक्षिणेभ्यो विशेषाधिकाः १६ ॥ ७ ॥ अथ वैमानिकानां विभागेन दिगनुपातेनाल्पबहुत्वमाह—

पढमचउकप्पदेवा सवत्थोवा य पुवपच्छिमओ । उत्तरअसंख दाहिण अहिया तुह मयविऊ बिंति ॥८॥
बंभाइकप्पचउगे पुवुत्तरपच्छिमासु थोव समा । दाहिण संखा तत्तो उवरिमदेवा य सम सवे १७॥९॥

हे वीर ! तव मतविदः सिद्धान्तिकाः प्रथमचतुष्ककल्पदेवाः सौधर्मेशानसनत्कुमारमाहेन्द्रकल्पभाविनः सुराः पूर्वस्यां पश्चिमायां च दिशि सर्वस्तोकाः, चशब्दात्परस्परं तुल्याश्चेति ब्रुवन्ति । एवमुक्तिरग्रेऽपि सर्वत्र लापनीया । कथम् ? इति

चेदुच्यते, यानि आवलिकाप्रविष्टविमानानि तानि चतसृष्वपि दिक्षु तुल्यानि; यानि पुनः पुष्पावकीर्णानि तानि प्रभूतानि असंख्येययोजनविस्तृतानि तानि च दक्षिणस्यामुत्तरस्यां च दिशि नान्यत्र, ततः सर्वस्तोकाः पूर्वस्यां दिशि पश्चिमायां च दिशि । तेभ्य उत्तरस्यां दिशि असंख्येयगुणाः, पुष्पावकीर्णविमानानां बाहुल्यात् असंख्येययोजनविस्तृतत्वाच्च । तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः, कृष्णपाक्षिकाणां प्राचुर्येण तत्र गमनात् ॥ ८ ॥ तथा ब्रह्मलोकादिदेवलोकचतुष्के देवाः पूर्वोत्तरपश्चिमासु दिक्षु सर्वस्तोकाः परस्परं तुल्याश्च, यतो बहवः कृष्णपाक्षिकास्तिर्यग्योनयो न दक्षिणस्यां दिशि समुत्पद्यन्ते, शुक्लपाक्षिकाश्च स्तोका इति पूर्वोत्तरपश्चिमासु देवाः सर्वस्तोकाः । तेभ्यो दक्षिणस्यां दिशि असंख्येयगुणाः, कृष्णपाक्षिकाणां बहूनां तत्रोत्पादात् । ततः "उवरिमदेवा" उपरितनदेवा आनतादिसर्वार्थसिद्धिपर्यन्ता देवास्ते मनुष्या एवोत्पद्यन्ते, तेन प्रतिकल्पं प्रतिग्रैवेयकं प्रत्यनुत्तरविमानं चतसृषु दिक्षु प्रायो बहुसमा वेदितव्याः । तथा चाह—"तेण परं बहुसमोववन्नगा समणाउसो" १७ ॥९॥ सप्तदशभेदभिन्नानामपि जीवानां दिगनुपातेन सहेतुकमल्पबहुत्वं प्ररूपितम् । अथ पुद्गलानां दिगनुपातेन श्रीमहावीरेणाल्पबहुत्वमुक्तं तथाह—

थोवा पुग्गल उड्ढं अहिय अहे तह असंख तुल्ला य। उत्तरपुरच्छिमेणं दाहिणपच्चच्छिमेण तओ ॥१०॥
दाहिणपुरच्छिमेणं उत्तरपच्चच्छिमेण अहिय समा। पुव्विं असंख अहिया पच्छिम तह दाहिणुत्तरयो ॥११॥

दिगनुसारेण चिन्त्यमानाः पुद्गलाः सर्वस्तोकाः "उड्ढं" इति ऊर्ध्वदिशि । इह रत्नप्रभासमभूमितलमेरुमध्येऽष्टप्रादेशिको रुचकस्तस्माद्विनिर्गताश्चतुःप्रदेशा ऊर्ध्वा दिग् यावल्लोकान्तस्ततस्तत्र सर्वस्तोकाः पुद्गलाः । तथा "अहे" इति अधोदिशि

तेभ्यो "अहिया" इति विशेषाधिकाः । अधोदिगपि रुचकादेवं भवति, चतुःप्रदेशा यावल्लोकान्तस्तत्र तस्या विशेषाधिकत्वात्तत्र पुद्गला विशेषाधिकाः । ततस्तेभ्य उत्तरपूर्वस्यां दक्षिणपश्चिमायां च द्वयोरपि दिशोरसंख्येयगुणाः । च पुनः स्वस्थाने परस्परं तुल्याश्च, यतस्ते द्वेऽपि दिशौ रुचकाद्विनिर्गते मुक्तावलिसंस्थिते तिर्यग्लोकान्तमध्ये लोकान्तमूर्ध्वलोकान्तं च पर्यवसिते तेन क्षेत्रस्यासंख्येयगुणत्वात् तत्र पुद्गला असंख्येयगुणाः । क्षेत्रं तु स्वस्थाने सममिति पुद्गला अपि स्वस्थाने तुल्याः ॥ १० ॥ तेभ्यो दक्षिणपूर्वस्यां उत्तरपश्चिमायां च प्रत्येकं विशेषाधिकाः स्वस्थाने परस्परं तुल्याश्च । कथं विशेषाधिकाः ? इति चेदुच्यते, इह सौमनसगन्धमादनेषु सप्त सप्त कूटानि, विद्युत्प्रभामाल्यवतोर्नवनव, तेषु च कूटेषु धूमिकाऽवश्यायादिसूक्ष्मपुद्गलाः प्रभूताः संभवन्ति, ततो विशेषाधिकाः । स्वस्थाने तु क्षेत्रस्य पर्वतादेश्च समानत्वात्तुल्याः । तेभ्यः पूर्वस्यां दिशि असंख्येयगुणाः, क्षेत्रस्यासंख्येयगुणत्वात् । तेभ्यः पश्चिमायां विशेषाधिकाः, अधोलौकिकग्रामेषु शुषिरभावतो बहूनां पुद्गलानामवस्थानभावात् । तथा तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः, बहुभवनशुषिरभावात् । तेभ्योऽपि उत्तरस्यां दिशि विशेषाधिकाः, यत्रोत्तरस्यामायामविष्कम्भाभ्यां संख्येययोजनकोटीप्रमाणं मानसं सरः समस्ति, तत्र ये जलचराः पनकसेवालादयश्च सत्त्वास्तेऽतिबहव इति तेषां ये तैजसकार्मणपुद्गलास्तैरधिकाः प्राप्यन्ते इति पूर्वोक्तेभ्यो विशेषाधिकाः ॥ ११ ॥ अथ जीवानां पुद्गलानां चाल्पबहुत्वमुक्त्वा विज्ञप्तिमाह—

अप्पबहुत्तसरूवं इय दिट्ठं केवलेण नाह ! तुमं । अह तह कुणसु पसायं अहमवि पासेमि जह सक्खं ॥१२॥

हे नाथ ! इदं पूर्वोक्तमल्पबहुत्वस्वरूपं त्वया केवलज्ञानेन दृष्टं नान्येन हरिहरादिदेवेन । अथ तथा मम प्रसादं कुरु,

यथाऽहमपि पूर्वोक्तमल्पबहुत्वं साक्षात्पश्यामि ॥ १२ ॥ अथ प्रार्थनां कुर्वन् स्तवनकर्ता स्वनामगर्भितामन्तिमगाथामाह—

इय चउदिसासु भमिओ तुह आणा वज्जिओ य वीर ! अहं । गणिसमयसुंदरेहिं थुणिओ संपइ सिवं देसु १३

॥ इत्यल्पबहुत्वविचारगर्भितं श्रीमहावीरस्तवनं संपूर्णम् ॥

हे वीर ! इति पूर्वोक्तप्रकारासु चतसृषु दिक्षु अहं तवाज्ञारहितो भ्रान्तः । संप्रति शिवं देहि । किंविशिष्टस्त्वम् ? "गणिसमयसुंदरेहिं थुणिओ" गणय आचार्याः समयसुन्दराः सिद्धान्तविचारविशारदाः, ततो गणयश्च समयसुन्दराश्च गणिसमयसुन्दराः, तैः स्तुतः । पक्षे समयसुन्दरेति कर्तुर्नाम ॥ १३ ॥

इति श्रीअणहिलपत्तनवास्तव्यसिद्धान्तसूक्ष्मविचाररसिकचोपडागोत्रीयपरीक्षकदेवजीसमभ्यर्थनया श्रीबृहत्खरतरगच्छाधीश्वरयुगप्रधानश्री५जिनचन्द्रसूरिसूरीश्वरशिष्यमुख्यपण्डितसकलचन्द्रगणिशिष्यवाचनाचार्यश्रीसमयसुन्दरगणिविरचितमल्पबहुत्वविचारगर्भितं श्रीमहावीरदेवबृहत्स्तवनं संपूर्णम् ॥

समाप्तमिदं सावचूरिकमल्पबहुत्वविचारगर्भितं श्रीमहावीरस्तवनम् ।

॥ अर्हम् ॥

॥ महादण्डकस्तोत्रापरपर्यायाल्पबहुत्वविचारस्तवनम् ॥

(अवचूर्या समलङ्कृतम्)

भीमे भवंमि भमिओ जिणिंदआणाइवज्जिओ जाइं । जिअअप्पबहुट्ठाणाइं विन्नविस्सामि ताइं अहं ॥१॥
गब्भयमणुया थोवा १ संखगुणा थी २ असंखगुण दुन्नि । बायरपज्जग्गि ३ अणुत्तरा सुरा ४ सत्त संख इमे २॥

भीमे० ॥ १ ॥ स्तोका गर्भजमनुष्याः, संख्येयकोटाकोटीप्रमाणत्वात् १ । मनुष्यस्त्रियः संख्येयगुणाः, सप्तविंशतिगुणत्वात् सप्तविंशत्यधिकत्वाच्च । उक्तं च—"तिगुणा तिरूवअहिया सगवीसगुणा उ सत्तवीसहिया । बत्तीसगुणा बत्तीसअहिअ तिरिनरसुरत्थि कमा १ ॥" २ । बादराग्नयः पर्याप्ता असंख्येयगुणाः, कतिपयवर्गन्यूनावलिकाघनसमयप्रमाणत्वात् । इदमुक्तं भवति—असंख्येया आवलिकावर्गास्तावन्त एव ग्राह्या यावद्भिरावलिकाया घनो न पूर्यते, असत्कल्पनया आवलिकायां दश १० समयाः कल्प्यन्ते तद्वर्गे १०० एते चासंख्यातवर्गाः कल्पनया दशापि भवन्ति, परं तावन्तो न कल्प्यन्ते, घनस्य संपूर्णस्य संभवात् । तथा ह्यावलिकायां दश समयास्तेषां च घनः सहस्रं दशभिरपि तद्वर्गैः सहस्रं

---

१ "बायरपजग्गि ३ अणुत्तरसुरा य ४ कम सत्त संख इमे" इत्येवंरूपेण क्वचित् । २ "सप्तविंशत्यधिकसप्तविंशतिगुणत्वात्" इत्यपि क्वचित् । ३ इतोर्वाक्—"तावता" इत्यधिकं क्वचित् । ४ क्वचित् "संपूर्णतासंभवात्" इत्यपि ॥

संपद्यते इति घनसंपूर्णता । तस्मादष्टौ नव वावलिकागर्भा वर्गाः कल्प्यन्ते । तथा च सति ८००।९०० प्रमाणा वा सद्भावतस्त्वसंख्येया बादरपर्याप्ता अग्निकायिकाः सिद्धाः स्युः ३ । अनुत्तरोपपातिनोऽसंख्येयाः, प्रमाणाङ्गुलश्रेण्यसंख्येयभागप्रदेशराशिप्रमाणत्वात् क्षेत्रपल्योपमासंख्येयभागवर्तिनभःप्रदेशराशितुल्या इत्यर्थः ४ ॥ २ ॥

उवरिम ५ मज्झिम ६ हिट्ठिम ७ अचुया ८ रण ९ पाणया १० णय ११ सुराय ।
चउदस असंख माघवइ १२ मघा १३ सहसार १४ महसुक्का १५ ॥ ३ ॥

उपरितनग्रैवेयकत्रिकदेवाः संख्येयगुणाः, बृहत्तराङ्गुलश्रेणिसंख्येयभागप्रदेशराशिप्रमाणत्वात् । यतोऽनुत्तरसुराणां पञ्च, उपरितनग्रैवेयकत्रिके शतं विमानानां, प्रतिविमानं चासंख्येया देवा यथा चाधोऽधोविमानानि तथा तथा देवा अपि प्राचुर्येण लभ्यन्त इति । एवमुत्तरत्रापि भावना यावदानतः ५ । मध्यमग्रैवेयकदेवाः संख्येयगुणाः ६। अधस्तनग्रैवेयकदेवाः संख्येयगुणाः ७ । अच्युतदेवाः संख्येयगुणाः ८ । आरणदेवाः संख्येयगुणाः ९ । यद्यपि आरणाच्युतौ समश्रेणीकौ समविमानसंख्याकौ च; तथापि कृष्णपाक्षिकास्तथास्वाभाव्यात्प्राचुर्येण दक्षिणस्यामुत्पद्यन्ते नोत्तरस्याम् । बहवश्च कृष्णपाक्षिकाः स्तोकाः शुक्लपाक्षिका इति । येषां किंचिदूनपुद्गलपरावर्तार्धमात्रसंसारस्ते शुक्लपाक्षिकाः, अन्ये तु कृष्णपाक्षिकाः । तथास्वाभाव्यं च पूर्वाचार्यैरेवमवर्ण्यत[1]—कृष्णपाक्षिका दीर्घसंसारिणः; ते च बहुपापोदयाद्भवन्ति, ते च क्रूरकर्माणः, प्रायस्तथास्वाभाव्यात् । भवसिद्धिका अपि दक्षिणस्यामुत्पद्यन्ते, न शेषासु दिक्षु । उक्तं च—"पायमिह कूरकम्मा भवसिद्धी-

१ "—रेवं वर्ण्यते" इत्यपि क्वचित् ॥

आवि दाहिणल्लेसु । नेरइयतिरियमणुया सुराइठाणेसु गच्छंति १ ॥ ” प्राणतदेवाः संख्येयगुणाः १० । आनतदेवाः संख्येयगुणाः ११ । सप्तमपृथिवीनारका असंख्येयगुणाः, घनीकृतलोकैकप्रादेशिकीश्रेण्यसंख्येयभागवर्तिनभःप्रदेशराशितुल्याः; परं श्रेण्यसंख्येयभागोऽसंख्येयभेदभिन्नस्तेन यथोत्तरमसंख्येयगुणाः १२ । षष्ठ्यामसंख्येयगुणाः १३ । सहस्रारेऽसंख्येयगुणाः १४ शुक्रेऽसंख्येयगुणाः, यतः सहस्रारे ६ शुक्रे ४० सहस्राणि विमानानामधोऽधोविमानेषु देवानां बहुबहुतरत्वाच्च १५॥३॥

रिट्ठा १६ लंतक १७ अंजण १८ बंभय १९ वालुय २० महिंद २१ सणकुमरा २२ ।
सक्करपह २३ मुच्छिमनर २४ ईसाणसुरा य २५ अह तिन्नि[१] ॥ ४ ॥

ततः पञ्चम्यां नरकपृथिव्यामसंख्येयगुणाः १६ । ततो लान्तकदेवा असंख्येयगुणाः १७ । ततश्चतुर्थ्यां नैरयिका असंख्येयगुणाः १८ । ततो ब्रह्मदेवलोके देवा असंख्येयगुणाः १९ । ततस्तृतीयस्यां नरकपृथिव्यां नैरयिका असंख्येयगुणाः २० । ततो माहेन्द्रदेवा असंख्येयगुणाः २१ । ततः सनत्कुमारदेवा असंख्येयगुणाः २२ । ततो द्वितीयस्यां नारका असंख्येयगुणाः २३ । ततः संमूर्च्छिममनुष्या असंख्येयगुणाः २४ । तत ईशानदेवा असंख्येयगुणाः २५ । अङ्गुलमात्रक्षेत्रप्रदेशराशेः संबन्धिनि द्वितीयवर्गमूले तृतीयवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु घनीकृतलोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाण ईशानदेवदेवीसमुदायः । तद्गतकिञ्चिदूनद्वात्रिंशत्तमभागकल्पा ईशानदेवाः । इदमुक्तं भवति—प्रतरस्याङ्गुलप्रमाणं यत् क्षेत्रं तत्र सद्भावतोऽसंख्याताः प्रदेशाः, ते च २५६ परिकल्प्यन्ते ।

१ “अह संखा” इत्यपि ॥

अस्य च राशेः प्रथमं द्वितीयं तृतीयं च वर्गमूलं गृह्यते, तानि च क्रमात् १६ । ४ । २ प्रमाणानि परिकल्प्यन्ते । द्वितीयं ४ तृतीयेन २ गुणितं ८ प्रदेशा एतावतीषु प्रतरश्रेणिषु यावन्त आकाशप्रदेशास्तावन्त्य ईशानदेवदेव्यः । प्रस्तुतसूत्रे सामान्येनेशानादिव्यन्तरपर्यन्ता असंख्येयश्रेणिसमा उक्ताः । स्वस्वस्थाने किञ्चिद्विशेषोऽपि दर्शयिष्यते ॥ ४ ॥

ईसाणदेवि २६ सोहंमजुअल २७।२८ संखा असंख भवणवई २९ ।
तद्देवी संखगुणा ३० असंख रयणपह ३१ खगपुरिसा ३२ ॥ ५ ॥

ईशानदेव्यः संख्येयगुणाः २६ । सौधर्मदेवाः संख्येयगुणाः । माहेन्द्रापेक्षया सनत्कुमारदेवा असंख्येयगुणा उक्ताः, इहापि दक्षिणस्यां कृष्णपाक्षिकोत्पत्त्यादिपूर्वोक्तयुक्तेः समानत्वेऽप्यत्र संख्येयगुणत्वं, वचनप्रामाण्यात् २७ । सौधर्मदेव्यः संख्येयगुणाः २८ । भवनवासिनो देवा असंख्येयगुणाः यतोऽङ्गुलमात्रक्षेत्रप्रदेशराशेः संबन्धिनि प्रथमवर्गमूले द्वितीयवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु लोकश्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाणो भवनपतिदेवदेवीवर्गः; तद्गतकिञ्चिदूनद्वात्रिंशत्तमभागकल्पाश्च देवाः २९ । संख्येयगुणाभवनपतिदेव्यः ३० । ततो रत्नप्रभानारका असंख्येयगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशेः प्रथमवर्गमूले द्वितीयवर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावत्प्रमाणासु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाणत्वात् ३१ । ततः खगपञ्चेन्द्रियतिर्यग्पुरुषा असंख्येयगुणाः, प्रतरासंख्येयभागवर्त्यसंख्येयश्रेणिनभःप्रदेशराशिप्रमाणत्वात् ॥ ३२ ॥ ५ ॥

---

१ "सोहमसुर २७ देवि २८ तओ" इत्येवंरूपेण क्वचित् ॥

संखा खयरी ३३ थल ३४ । ३५ जलयर ३६ । ३७ वंतर ३८ । ३९ जोइसाण ४०।४१ चउ जुअलं ।
कीवा नह ४२ थल ४३ जलयर ४४ पजत्त चउरिंदिया ४५ तेर ॥ ६ ॥

ततः खगपञ्चेन्द्रियस्त्रियः संख्येयगुणाः, त्रिगुणत्वात् ३३ । स्थलचरपञ्चेन्द्रियतिर्यग्पुरुषाः संख्येयगुणाः, बृहत्तरप्रतरासंख्येयभागवर्त्यसंख्येयश्रेणिगतनभःप्रदेशराशिप्रमाणत्वात् ३४ । तेषां स्त्रियः संख्येयगुणाः, त्रिगुणत्वात् ३५ । जलचरपञ्चेन्द्रियपुरुषाः संख्येयगुणाः, बृहत्तरप्रतरासंख्येयश्रेणिप्रदेशप्रमाणत्वात् ३६ । तेषां स्त्रियः संख्येयगुणाः, त्रिगुणत्वात् ३७ । ततो व्यन्तरदेवाः संख्येयगुणाः,यतः संख्येययोजनप्रमाणानि सूचिरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति, तावान् व्यन्तरदेवदेवीगणः; तद्गतकिंचिदूनद्वात्रिंशत्तमभागकल्पा व्यन्तरपुरुषाः ३८ । व्यन्तर्यः संख्येयगुणाः ३९ । ज्योतिष्कदेवाः संख्येयगुणाः, ते हि सामान्यतः २५६ अङ्गुलप्रमाणसूचीखण्डतुल्या यावन्त्य एकस्मिन् प्रतरे श्रेणयो भवन्ति तावत्प्रमाणाः, तद्गतकिंचिदूनद्वात्रिंशत्तमभागकल्पा ज्योतिर्देवाः ४० । ततो ज्योतिर्देव्यः संख्येयगुणाः ४१ । ततः खगपञ्चेन्द्रियतिर्यग्षण्ढाः संख्येयगुणाः ४२ । स्थलचरा नपुंसकाः संख्येयगुणाः ४३ । ततो जलचरा नपुंसकाः संख्येयगुणाः ४४ । ततः पर्याप्तचतुरिन्द्रिया संख्येयगुणाः ४५ ॥ ६ ॥

पज्ज पण ४६ बिय ४७ तिइंदिय ४८ अहिआ अस्संखऽपज्ज पंचिंदी ४९ ।
अहिया अपज्ज चउ ५० तिय ५१ बिइंदि ५२ बारस असंखइमे ॥ ७ ॥

ततः पञ्चेन्द्रियाः पर्याप्ताः संज्ञ्यसंज्ञिभेदेन विशेषाधिकाः ४६ । पर्याप्ता द्वीन्द्रिया विशेषाधिकाः ४७ । पर्याप्तास्त्रीन्द्रिया

विशेषाधिकाः । यद्यपि पर्याप्तचतुरिन्द्रियादित्रीन्द्रियपर्यन्तानामङ्गुलासंख्येयभागमात्राणि सूचिखण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणत्वेऽपि अङ्गुलसंख्येयभागस्य संख्येयभेदत्वात् इत्थं विशेषाधिकत्वं न विरुद्धम् ४८ । अपर्याप्ताः पञ्चेन्द्रिया असंज्ञिनोऽसंख्येयगुणाः, अङ्गुलासंख्येयभागमात्राणि सूचीरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवति तावत्प्रमाणत्वात् ४९ । अपर्याप्ताश्चतुरिन्द्रिया विशेषाधिकाः ५० । ततोऽपर्याप्तास्त्रीन्द्रिया विशेषाधिकाः ५१ । ततो द्वीन्द्रिया अपर्याप्ता विशेषाधिकाः । अपर्याप्तपञ्चेन्द्रियादीनां चतुर्णां समानसंख्याप्रकारत्वेऽप्यङ्गुलासंख्येयभागस्य विचित्रत्वाद् इत्थं विशेषाधिकत्वमदुष्टम् ५२ ॥ ७ ॥

बायरपज्जपरित्ता ५३ निगोअ ५४ भू ५५ दग ५६ समीर ५७ तह अपजा ।
थूलग्गि ५८ परित्त ५९ निगोअ ६० पुढवि ६१ जल ६२ पवण ६३ सुहुमग्गी ६४ ॥ ८ ॥

प्रत्येकबादरवनस्पतयः पर्याप्ता असंख्येयगुणाः, द्वीन्द्रियादिवदेषामपि वक्ष्यमाणबादरपर्याप्तनिगोदपृथिव्यप्कायिकानामपि च एकप्रतरगताङ्गुलासंख्येयभागमात्रसूचीरूपखण्डप्रमाणत्वस्यान्यत्राविशेषेणोक्तावप्यङ्गुलासंख्येयभागस्यासंख्येयभेदत्वादसंख्येयगुणत्वाभिधानेऽपि न दोषः ५३ । बादरनिगोदाः अनन्तकायिकशरीररूपाः पर्याप्ता असंख्येयगुणाः ५४ ततो बादरपृथिवीकायिकाः पर्याप्ता असंख्येयगुणाः ५५ । बादराप्कायिकाः पर्याप्ता असंख्येयगुणाः ५६ । ततो बादरवायुकायिकाः पर्याप्ता असंख्येयगुणाः, घनीकृतलोकासंख्येयभागवर्त्यसंख्येयप्रतरगतनभःप्रदेशराशिप्रमाणत्वात् लोके सप्तरज्ज्वायामविष्कम्भा एकप्रदेशप्रमाणपिण्डाः सर्वात्मना त्वसंख्येयनभःप्रदेशप्रमाणा उपर्युपरिव्यवस्थितप्रभूतमण्डका इवासंख्येयाः

प्रतराः सन्ति ५७। ततो बादराग्नयोऽपर्याप्ता असंख्येयगुणाः, असंख्येयलोकाकाशप्रदेशराशिप्रमाणत्वात् ५८। ततः प्रत्येकबादरवनस्पतयोऽपर्याप्ता असंख्येयगुणाः ५९। ततो बादरनिगोदा अपर्याप्ता असंख्येयगुणाः ६० । बादरपृथिव्योऽपर्याप्ता असंख्येयगुणाः ६१। बादरा अप्कायिका अपर्याप्ता असंख्येयगुणाः ६२। बादरवायवोऽपर्याप्ता असंख्येयगुणाः ६३ । सूक्ष्माग्नयोऽपर्याप्ता असंख्येयगुणाः ६४ ॥ ८ ॥

सुहुमा अपज्जभू ६५ वारि ६६ वाउ ६७ अहिआ पजग्गि ६८ संखगुणा ।
भू ६९ जल ७० निल ७१ अहिअ निगोअ अपज्ज ७२ असंख पज संखा ७३ ॥ ९ ॥
अभविय ७४ परिवडिया ७५ सिद्ध ७६ पज्जवायरवणा ७७ अणंतगुणा ।
बायरपज्जत्तहिया ७८ अपज्जबायरवण ७९ असंखा ॥ १० ॥

सूक्ष्मपृथिव्योऽपर्याप्ता विशेषाधिकाः ६५ । सूक्ष्माप्कायिका अपर्याप्ता विशेषाधिकाः ६६ । सूक्ष्मवायवोऽपर्याप्ता विशेषाधिकाः ६७ । सूक्ष्माग्नयः पर्याप्ताः संख्येयगुणाः ६८ । सूक्ष्मपृथिवीकायिकाः पर्याप्ता विशेषाधिकाः ६९ । सूक्ष्माप्कायिकाः पर्याप्ता विशेषाधिकाः ७०। सूक्ष्मवायवः पर्याप्ता विशेषाधिकाः ७१। सूक्ष्मनिगोदा अपर्याप्ता असंख्येयगुणाः ७२। सूक्ष्मनिगोदाः पर्याप्ताः संख्येयगुणाः,यद्यपि पर्याप्ताग्निकायिकादिपर्याप्तसूक्ष्मनिगोदपर्यन्ता अविशेषेणान्यत्रासंख्येयलोकाकाशप्रदेशराशितुल्याः उक्ताः, तथापि लोकासंख्येयत्वस्यासंख्येयभेदभिन्नत्वादित्थमल्पबहुत्वमुपपन्नम् ७३ ॥ ९ ॥ अभवसि-

ड्रिका अनन्तगुणाः, जघन्ययुक्तानन्तकमानत्वात् ७४ । प्रतिपतितसम्यग्दृष्टयोऽनन्तगुणाः, मध्यमयुक्तानन्तकमानत्वात् ७५ । सिद्धा अनन्त गुणाः ७६ । बादरपर्याप्ता वनस्पतयोऽनन्तगुणाः ७७ । सामान्यतो बादरपर्याप्ता अधिकाः, बादरपर्याप्तपृथिव्यादीनां तत्र क्षेपात् ७८ । ततो बादरापर्याप्तवनस्पतयोऽसंख्येयगुणाः, एकैकबादरनिगोदपर्याप्तनिश्रया असंख्येयानां बादरापर्याप्तनिगोदानां संभवात् ७९ ॥ १० ॥

बायर अपज्ज ८० बायर ८१ अहिया अस्संख सुहुम अपज वणा ८२ ।
सुहुम अपजत्त अहिया ८३ संखा सुहुमवणपजत्ता ८४ ॥ ११ ॥

अहिआ पजसुहुमा ८५ सुहुम ८६ भविय ८७ णंत ८८ वणि ८९ गिंदि ९० तिरि ९१ मिच्छा ९२ ।
अविरय ९३ कसाय ९४ छउमा ९५ सजोगि ९६ संसारि ९७ सव्वजिया ९८ ॥ १२ ॥

ततः सामान्यतो बादरापर्याप्ता विशेषाधिकाः, बादरापर्याप्तपृथिव्यादीनां तत्र प्रक्षेपात् ८० । ततः सामान्यतो बादरा विशेषाधिकाः, पर्याप्तानां तत्र प्रक्षेपात् ८१ । ततः सूक्ष्मवनस्पतयोऽपर्याप्ता असंख्येयगुणाः ८२ । ततः सामान्यतः सूक्ष्मापर्याप्ता विशेषाधिकाः, सूक्ष्मापर्याप्तपृथिव्यादीनां तत्र प्रक्षेपात् ८३ । ततः सूक्ष्मवनस्पतयः पर्याप्ताः संख्येयगुणाः, सूक्ष्मेषु अपर्याप्तेभ्यः पर्याप्तानां स्वभावत एव संख्येयगुणत्वात् ८४ ॥ ११ ॥ ततः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः, पर्याप्तसूक्ष्मपृथिव्यादीनामपि तत्र प्रक्षेपात् ८५ । ततः सामान्यतः सूक्ष्मा विशेषाधिकाः, अपर्याप्तानामपि तत्र

१ "इतोऽग्रे—"मध्यमयुक्तानन्तकमानत्वात्" इत्यधिकं क्वचित् ॥

प्रक्षेपात् ८६। ततो भवसिद्धिका विशेषाधिकाः, जघन्ययुक्तानन्तकमात्राभव्यपरिहारेण सर्वजीवानां भव्यत्वात् ८७। ततः सामान्यतो। निगोदजीवा विशेषाधिकाः, प्रत्येकानां सर्वेषामपि मिलितानामसंख्येयलोकाकाशप्रदेशराशिप्रमाणत्वेनाल्पत्वात् शेषाणां भव्यानामभव्यानां च बादरसूक्ष्मनिगोदेष्वेवातिप्राचुर्येण लभ्यमानत्वात् ८८ ततः सामान्यतो वनस्पतयो विशेषाधिकाः, यतः प्रत्येकवनस्पतीनामपि तत्र प्रक्षेपात् ८९। ततः सामान्यत एकेन्द्रिया विशेषाधिकाः, बादरसूक्ष्मपृथिव्यादीनामपि तत्र प्रक्षेपात् ९०। ततः सामान्यतस्तिर्यञ्चो विशेषाधिकाः, द्वीन्द्रियादीनामपि तत्र प्रक्षेपात् ९१। ततो मिथ्यादृष्टयो विशेषाधिकाः, कतिपयाविरतसम्यग्दृष्ट्यादिव्यतिरेकेण सर्वजीवानां मिथ्यादृष्टित्वात् ९२। ततोऽविरता विशेषाधिकाः, अविरतसम्यग्दृष्टीनामपि तत्र क्षेपात् ९३। ततः सकषायिणो विशेषाधिकाः, देशविरतादीनामपि तत्र क्षेपात् ९४। ततः छद्मस्था विशेषाधिकाः, उपशान्तमोहादीनामपि तत्र क्षेपात् ९५। ततः सयोगिनो विशेषाधिकाः सयोगिकेवलिनामपि तत्र प्रक्षेपात् ९६। ततो भवस्था विशेषाधिकाः, अयोगिकेवलिनामपि तत्र प्रक्षेपात् ९७। सर्वजीवा विशेषाधिकाः, सिद्धानामपि तत्र प्रक्षेपात् ९८ ॥ १२ ॥

गुणतीसअंकतुल्ला मणुआ तेसि नरअट्ठवीसंसे। इगरूवूण जहन्ना सेसा इत्थी उ गब्भभवा ॥ १३ ॥

पर्याप्तस्थूलवणादिसर्वजीवान्ताः सर्वेमध्यमानन्तके वर्तन्ते। "जहन्नपए संखिज्जा" इति जघन्यपदं नाम यत्र सर्वस्तोका मनुष्याः प्राप्यन्ते किमत्र संमूर्छिमानां ग्रहणमुत गर्भव्युत्क्रान्तिकानाम्? गर्भजानां सदावस्थायितया तेषामेव ग्रहणं संमूर्छिमविरहे सर्वस्तोकतया प्राप्यमाणत्वात्। उत्कृष्टपदे तूभयेषामपि ग्रहणम्। एकं रूपं संस्थापयित्वा षण्णवतिवारान् द्विगुणद्विगुणीक्रियते, कृते चैकोनत्रिंशदङ्करूपा मनुष्यसंख्या जघन्यपदे समेति "इगरूवूणजहन्ना" इति ॥ १३ ॥

किंचूणावलिघणसमयरासितुल्ला उ बायरपजग्गी । णुत्तरसुराइ अट्ठ उ खित्तपलोवम असंखंसे ॥१४॥

आवलिकासमय १० वर्गस्य १०० कतिपयसमयन्यूनैरावलिकासमय ८ गुणितस्य ८० यावान् समयराशिस्तावत्प्रमाणा बादरपर्याप्ताग्निजीवाः । उक्तं च—"आवलिआ वग्गोणावलिआइ गुणिओ हि बायरा तेऊ" ॥ १४ ॥

माघवयाई तेरस कमसो सेढी असंखभागेणं । सतरस ईसाणाई असंखसेढिप्पएससमा ॥ १५ ॥

सप्तरज्वेकप्रादेशिकश्रेण्यसंख्येयभागप्रदेशराशितुल्या अङ्गुलमात्रक्षेत्रप्रदेशराशेः कल्पनया २५६ रूपस्य संबन्धेन द्वितीयवर्गमूले तृतीयवर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावन्मितश्रेणिप्रदेशप्रमाणाः १ । १५ ॥

तिगुणा तिरूवअहिआ सगवीसगुणा उ सत्तवीसहिया । बत्तीसगुणा बत्तीस अहिअ तिरिनरसुरत्थि कमा

षट्पञ्चाशदधिकशतद्वयाङ्गुलप्रमाणैकप्रादेशिकश्रेणिमात्राणि खण्डानि यावन्ति एकस्मिन् प्रतरे भवन्ति, येषां द्वात्रिंशत्तमो भागस्तावत्प्रमाणा देवपुरुषाः । तेभ्यो द्वात्रिंशत्तमे भागे प्रसारिते यावान् प्रदेशराशिः स्यात् तावत्प्रमाणाः सुरस्त्रियः १६

कीवखयराइसत्तसु अंगुलसंखं सपयरसेढिहरे । अपजपणिंदादट्ठसु अंगुलअस्संखभागो अ ॥ १७ ॥

एकस्मिन् प्रतरे यावन्त्यङ्गुलप्रमाणसंख्येयभागमात्राणि सूचीखण्डानि भवन्ति तावत्प्रमाणाङ्गुलासंख्येयभागमात्राणि सूचीरूपखण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणाः ॥ १७ ॥

१ चतुर्दशगाथातः समारभ्यामेतना सर्वाप्यवचूरिः एकस्मिन्नेव पुस्तके समुपलभ्यते, परं सोपयोगिनीति मूल आदृता ॥

अस्संखपयरतुल्ला बायरपज्जत्तवाउकाया य । बायरअपज्जजलणाइ सोल अस्संखलोगसमा ॥ १८ ॥
अभवियचउत्थणंते पंचमि सम्माइ परिवडिय सिद्धा। सेसा अट्ठमणंते पजथूलवणाइ बावीसं ॥ १९ ॥
इय महदंडमसइं भमिओणुत्तरपयत्थसिद्धि विणा । संपइ तुह आणठिओ सामि अणुत्तरपयं देसु ॥२०॥

॥ समाप्तमिदं महादण्डकस्तोत्रापरपर्यायाल्पबहुत्वविचारस्तवनम् ॥

समाप्तमिदं सावचूरिकमल्पबहुत्वविचारगर्भितं महादण्डकस्तोत्रम् ।

समाप्तमिदं सावचूरिकमल्पबहुत्वविचारगर्भितं
महादण्डकस्तोत्रम् ।

श्रीआत्मानन्द–ग्रन्थमाला–षड्विंशं रत्नम् (२६)

"श्रीमद्विजयलक्ष्मीसूरिविरचितम्"

। श्रीपर्युषणापर्वाष्टाह्निकाव्याख्यानम् ।

पूज्यपादजैनाचार्यश्रीमद्विजयानन्दसूरिप्रशिष्यमुनिमहाराजश्रीहंसविजयशिष्यमुनिश्रीदोलतविजयोपदिष्टजामनगरवास्तव्य
"शाह० सोमचंदहर्षचंद"द्रव्यसाहाय्येन प्रकाशयित्री भावनगरस्था

"श्रीजैनआत्मानन्दसभा"

इदं पुस्तकं मुम्बय्यां **वल्लभदास–त्रिभुवनदास–गांधी,** सेक्रेटरी–**श्रीजैन–आत्मानंदसभा–भावनगर** इत्यनेन
निर्णयसागरमुद्रणालये कोलभाटवीथ्यां २३, तमे गृहे रामचद्र येसु शेडगे द्वारा मुद्रयित्वा प्रकाशितम् ।

(प्रति ५००) (मूल्य भेट)

वीरनिर्वाणात् २४४०. आत्मसंवत् १९. विक्रमसंवत् १९७१. श्रावणशुक्ला पंचमी.

Published by Vallabhadas Tribhuvandas Gandhi, Secretary Jain Atmananda Sabha Bhavanagar
Printed by R. Y. Shedge, at the Nirnaya-sagar Press 23, Kolbhat Lane, Bombay

॥ श्रीवीतरागाय नमः ॥

॥ परमगुरुश्रीमद्विजयानन्दसूरिपादपद्मेभ्यो नमः ॥

॥ श्रीमद्विजयलक्ष्मीसूरिविरचितं पर्युषणाष्टाह्निकाव्याख्यानम् ॥

अथ सामायिकप्रमुखशिक्षाव्रतभृद्भिः नूनं षडष्टाह्निकपर्वाण्यासेव्यानीत्याह ॥ "अष्टाह्निकाः षडेवोक्ताः, स्याद्वाद्यभयदोत्तमैः ॥ तत्स्वरूपं समाकर्ण्य, ह्यासेव्याः परमार्हतैः ॥ १ ॥" स्पष्टः । नवरं अष्टाह्निकाः षट् ताश्चेमाः । एका चैत्रमाससत्का ॥ १ ॥ द्वितीया आषाढमासोद्भवा ॥ २ ॥ तृतीया पर्युषणवासरजा ॥ ३ ॥ चतुर्थी आश्विनमासजाता ॥ ४ ॥ पंचमी कार्तिकमासप्रसृता ॥ ५ ॥ षष्ठी फाल्गुनमाससंबंधिनी ॥ ६ ॥

अत्राष्टाह्निकासु उत्तराध्ययनबृहद्वृत्तौ द्वे शाश्वत्यावभिधीयेते । यदाहुः—

"दो सासय जत्ताओ, तत्थेगा होइ चित्तमासंमि ॥ अट्ठाईआई महिमा, बीआ पुण अस्सिणे मासे ॥ १ ॥ एआओ दोवि सासय–जत्ताओ करंति सव्वदेवावि । नंदीसरंमि खयरा, नरा य निअएसु ठाणेसु ॥ २ ॥ तह चउमासिअतिअगं, पज्जोसवणा य तहय इअ छक्कं ॥ जिण जम्म दिक्ख केवल–निव्वाणाइसु असासइआ ॥ ३ ॥"

जीवाभिगमे चोक्तं ॥ "तत्थणं बहवे भवणवइ–वाणमंतर–जोइस–वेमाणिआ देवा तिर्हि चउम्मासिएहिं पज्जोसवणाए अ अट्टाहिआओ महामहिमाओ करिंतीति" । अत्र चैत्राश्विनाष्टाह्निकयोः श्रीपालमयणादिवत् श्रीसिद्धचक्रयंत्राराधनं, बाह्यतो यंत्रस्वरूपं निर्द्धार्य मनसा ललाटादिदशस्थानेषु यंत्राकृतिं संस्थाप्य ध्यानं चिंत्यं भावतः । सामान्यतः सर्वासु अष्टाह्निकासु अमार्युद्घोषणं विस्तारतः जिनमंदिरेषु अष्टाह्निकमहोत्सवः कार्यः । खंडन–दलन–पेषण–भूमिखनन–वस्त्रधावन–स्त्रीसेवनादिकं करणकारणादिना निषध्यं । पर्युषणाष्टाह्निका तु वक्ष्यमाणपंचसाधनैः साध्येति । तत्राद्यं सर्वत्राऽमारिप्रवर्त्तनं विधेयं ॥ १ ॥ द्वितीयं कृत्यं साधर्मिकवात्सल्यं ॥ २ ॥ तृतीयं परस्परक्षामणं ॥ ३ ॥ चतुर्थमष्टमतप आराध्यं ॥ ४ ॥ पंचमं चैत्यपरिपाटिककरणं ॥ ५ ॥ तत्राद्यवर्णनमग्रे वक्ष्ये । साधर्मिकार्चनं सर्वेषां कियतां वा यथाशक्ति कार्यं, साम्यधर्माणो हि प्रायेण दुष्प्रापाः । यतः—"सर्वैः सर्वे मिथः सर्व–संबंधा लब्धपूर्विणः । साधर्मिकादिसंबंध–लब्धारस्तु मिताः क्वचित् ॥ १ ॥" तेषां संगमो हि महते पुण्याय किं पुनस्तदनुरूपा सेवा! यतः । "एगत्थ सव्वधम्मा, साहम्मिअवच्छलं तु एगत्थ । बुद्धितुलाए तुलिया, दोवि अ तुलाइं

भणिआई ॥ १ ॥" अत्र भरत-नरदेव-दंडवीर्य-कुमारपालादिभूभृतामवदाताः स्वयं अभ्यूह्याः । तथा पर्युषणायां परस्परं क्षामणं कार्यं । चंडप्रद्योतं प्रति श्रीमदुदायनभूपवदिति । अथ द्वयोर्मध्ये यद्येकः क्षमयति नाऽपरस्तदा य उपशाम्यति तस्याराधकत्वं नान्यस्य तस्मादात्मनोपशमितव्यम् । क्वचिच्च द्वयोरप्याराधकत्वं । तथाहि । अन्यदा कौशांब्यां सूर्याचंद्रमसौ स्वविमानेन श्रीवीरं वंदितुं समागच्छतः स्म, चंदना च दक्षाऽस्तसमयं विज्ञाय स्वस्थानं गता, मृगावती च सूर्यचंद्रगमनात्तमसि विस्तृते रात्रिं विज्ञाय भीता उपाश्रयमागत्येर्यापथिकीं प्रतिक्रम्य निद्राणां चंदनां प्रवर्त्तिनीं क्षम्यतां ममापराध इत्युक्तवती । चंदनापि भद्रे ! कुलीनायास्तवेदृशं न युक्तमित्युवाच । साप्यूचे भूयो नेदृशं करिष्ये इति पादयोः पतिता । तावता प्रवर्त्तिन्या निद्रागात्, तया च तथैव क्षामणेन केवलं प्राप्तं ! सर्प-समीपात् करापसारणव्यतिकरेण बोधिता यथा जातं विज्ञपिता प्रवर्त्तिन्यपि कथं महत्तमसि सर्पोऽज्ञायीति पृच्छंती तस्याः केवलं ज्ञात्वा मृगावतीं क्षमयंती केवलमाप । तेनेदृशं मिथ्यादुष्कृतं देयं, न पुनः कुंभकारक्षुल्लकज्ञातेन, तथाहि । कश्चित् क्षुल्लको भांडानि काणीकुर्वन् कुंभकृता निषिद्धो मिथ्यादुष्कृतं दत्ते, न पुनस्ततो निवर्त्तते, ततः सोऽपि कर्करैः क्षुल्लककर्णमोटनं कुर्वन् पुनः पुनः क्षुल्लेन पीड्येहमित्युक्तोऽपि मुधा मिथ्यादुष्कृतं ददौ इति ॥

तथा पर्युषणायामवश्यमष्टमतपो विधेयं । यतः-पाक्षिकतपस्तु एकोपवासमितं, चातुर्मासिकोचितं तपस्तु षष्ठ-मितं, वार्षिकपर्वणि तु अष्टमतपोऽभिहितं जिनैः । अष्टमतपोविधानाक्षमैः तत्तपःपूर्त्त्यर्थं षडाचाम्लानि विधेयानि,

तदशक्तौ सत्यां च नव निर्विकृतिकानि वा, द्वादश (१२) एकाशनानि वा, चतुर्विंशति (२४) द्यशनानि, अथवा षट् (६) सहस्रमितः स्वाध्यायो विधेयः, षष्टि (६०) जपमालिकाः (नवकारावलिकाः) गुण्याः। अनया रीत्यापि तपःपूर्त्तिः कार्या, अन्यथा जिनाज्ञोलंघनदोषः स्यात्।

अत्र प्रसंगात् 'नवकारसी' आदितपःफलानि दर्श्यंते "एकशतवर्षाणि यावन्नारकजीवोऽकामनिर्जरया यावंति कर्माणि क्षिपति तावन्मितकर्म्माणि पापजनितानि 'नवकारसी' प्रत्याख्यानेनाऽपनयति, 'पौरुषी' प्रत्याख्यानेन एकसहस्रवर्षदुरितं अपनयति। सार्द्धपौरुषीप्रत्याख्यानेन तु दशसहस्रवर्षमितं, एवं पुरिमार्द्धेन एकलक्षवर्षमितं, अचित्तजलसत्कैकाशनेन दशलक्षवर्षमितं पातकं हंति, निर्विकृतितपसा एककोटीवर्षमितं, 'एकलठाणुं' प्रत्याख्यानेन दश कोटीवर्षमितं। एकलदत्तेन शत (१००) कोटीवर्षमितं, एकसहस्रकोटीवर्षमितं कर्म आचाम्लतपसा, दशसहस्रकोटीवर्षमितमुपवासतपसा, एकलक्षकोटीवर्षमितं षष्ठतपसा, दशलक्षकोटीवर्षमितमष्टमाख्यतपसा दुरितं हंति, तदनु सर्वत्रैकैकोपवासवृद्ध्या क्रमेण दशगुणोऽङ्कः प्रवर्द्धनीयः"।

अष्टमपतसा नागकेतुरत्रैव भवे प्रत्यक्षं फलं प्रापेति। सर्वमपि तपः गतशल्यं कार्यं, स शल्यं तु दुष्करमपि तपो निरर्थकम्, तथाहि-इतोऽशीतितमचतुर्विंशतौ नृपस्य बहुसुतस्योपयाचितशतैर्जाता बहुमान्या पुत्री, स्वयंवरमंडपे वृतवरा, दुष्कर्मैतश्चतुरिकांतमृतपतिका, सुशीला, सतीषु प्राप्तरेखा, सुश्राद्धधर्मनिष्ठाऽन्यदाऽन्यार्हद्दीक्षिता लक्ष्मणार्या कदाचिच्चट- ॥ २ ॥

कयुग्मसुरतं वीक्ष्य दध्यौ । अर्हता किमेतन्नानुमतं ! अवेदोऽसौ वा न वेत्ति सवेददुःखमित्यादि ! क्षणान्तरे जातपश्चात्तापया तया ध्यातं, कथमालोचयिष्यामीति प्रोद्भूतत्रपापि सशल्यत्वे सर्वथा न शुद्धिरित्यालोचितुं स्वं प्रोत्साह्य यावद्याति तावदचिंतिते कंटके भग्नेऽपशकुनेन क्षुब्धा य ईदृग् दुर्ध्यायति तस्य किं प्रायश्चित्तमिति परव्यपदेशेन पंचाशद्वर्षं यावत् तीव्रं तपस्तेपे ॥ उक्तंच ॥ 'छट्टट्ठम दसम दुवालसेहिं. निव्विगइएहिं दस वरिसे । तहय खवणएहिं दुन्नि अ, दो चेव य भुज्जिएहिं च ॥ १ ॥ मासक्खमणेहिं सोलस, वीमं वासाइं अंबिलेहिं च । लक्खण अज्जा एवं, कुणइ तवं वरिस पन्नासं ॥ २ ॥'' एवं दुस्तपो विधानेऽपि सा न शुद्धा, प्रत्युतार्त्तध्यानान्मृता, दासाद्यसंख्यभवेष्वनुभूततीव्रतरदुःखा, श्रीपद्मनाभतीर्थकृत्तीर्थे सेत्स्यति, तदुक्तं–''ससल्लो जइवि कट्ठुग्गं घोरं वीरं तवं चरे । दिव्वं वास सहस्सं तु, तओ तं तस्स निप्फलं ॥ १ ॥'' इति ।

तथा वार्षिकप्रतिक्रमणे अष्टाधिकसहस्र (१००८) श्वासोच्छ्वासमितः कायोत्सर्गः ज्ञेयः, प्रतिचतुर्विंशतिस्तवं च 'चंदेसु निम्मलयरा' इति यावता पंचविंशति (२५) श्वासोच्छ्वासाः गुण्याः, चत्वारिंशत् (४०) लोगस्सध्यानैकनमस्काराधिके (१००८) 'पाय समा ऊसासा' इत्यत्र ज्ञेयं । चातुर्मासिकप्रतिक्रमणे पंचशत (५००) श्वासो० । पाक्षिकप्रतिक्रमणे त्रिशत (३००) श्वा० । अत्रैककश्वासोच्छ्वासमध्ये कियत्परिमितं देवायुर्बध्नाति तदुच्यते । ''द्विलक्षपंचचत्वारिंशत्सहस्रचतुश्शताष्टमितपल्योपमानि (२४५४०८) एकपल्योपमस्य नव भागाः क्रियंते तन्म-

ध्यगताश्चत्वारो भागाः ग्राह्याः । यतः—"लक्खदुग सहस्स पणचत्त—चउसया अट्ठ चेव पलियाइं । किंचूणा चउ भागा, सुराउबंधो इगुस्सासे ॥ १ ॥" समस्तनमस्कारात् (८) श्वासोच्छ्वासमध्ये एकोनविंशतिलक्षत्रिषष्टिसहस्रद्विशतसप्तषष्टिमितपल्योपमानि (१९६३२६७) सुरायूंषि बद्ध्यंते । तथैकोद्योतकरपंचविंशति (२५) श्वासोच्छ्वासमध्ये एकषष्टि (६१) लक्षं पंचत्रिंशत् (३५) सहस्रं द्विशतं (२१०) चोपरि दशेति संख्यायाः पल्यानि, देवलोकेषु येषां देवानां आयुः एतावत्पल्यमितं स्यात् तत्रोत्पद्यते ॥

तथा पर्युषणापर्वणि चैत्यपरिपाटी कार्या, चैत्यार्चादिभिः शासनोन्नतिर्विधेया । यथैकदा वज्रस्वामी दुर्भिक्षे प्रसृते संघं पट्टे संस्थाप्य सुभिक्षां पुरीं नीतवान्, तत्र बौद्धराज्ञा जिनचैत्येषु पुष्पनिषेधः कृतः, तदनु पर्युषणायां श्राद्धैर्विज्ञप्तो व्योमविद्यया माहेश्वरीपुर्यां पितृमित्रमारामिकं पुष्पप्रगुणीकरणार्थमादिश्य स्वयं हिमवदद्रौ श्रीदेवीगृहे गतः, ततश्च श्रियादत्तं महापद्मं हुताशनवनाद्विंशतिलक्षपुष्पाणि च लात्वा जृंभकामरविकुर्वितविमानस्थः समहोत्सवमागत्य श्रीजैनशासनं प्रभावयन् नृपमपि श्रावकं चक्रे इति ।

तथाऽष्टाह्निकपर्वसु अमारिप्रवर्त्तनं कार्यं श्रीकुमारपालसंप्रतिनृपादीनामिव । संप्रतिकालेऽपि श्रीहीरगुरूपदेशादकबरशाहिना स्वकीयाखिलदेशेषु षाण्मासिकामारिप्रवर्त्तनं कृतं । तथाहि समासतः, एकदा स्वप्रधानादिभ्यः श्रीहीरसूरिवर्णनं श्रुत्वा श्रीअकबरेण स्वनामांकितं आज्ञापत्रं (फुरमानं) प्रेष्यातिबहुमानेनाकारितास्ततः सूरयोपि गंधारतः संवत्

(१६३९) ज्येष्ठबहुलत्रयोदशीदिने तत्र संप्राप्ताः श्रीशाहिना समं मिलिताः । शाहिना सादरं पृष्टः सूरिः तथा धर्मोपदेशं ददे यथा आगराद्रंगतोऽजमेरपुरं यावदध्वनि प्रतिकोशं कूपकोपेतमनारादीन्विधाय स्वकीयाखेटकलाकुशलताप्रकटनकृते प्रतिमनारं शतशो हरिणविषाणारोपणविधानादिना प्राग् हिंसाकरणरनिरपि सः भूपो दयामतिः संजातः । ततः श्रीशाहिरवदत् यत् श्रीमंतो मयादर्शनोत्कंठितेन दूरदेशादाकारिता अस्मदीयं च न किमपि गृह्णते तेनास्मत्सकाशात् श्रीमद्भिरुचितं याच्यम् । ततो विचार्य सूरिभिस्तदीयाखिलदेशेषु पर्युषणापर्वसत्काष्टाह्निकायाममारिप्रवर्त्तनं,बंदीजनमोचनं चाऽयाचि । ततस्तद्गुणचमत्कृतमनसा श्रीशाहिनाऽस्मदीयान्यपि चत्वारि दिनानि समधिकानि भवंतु, इति कथयित्वा स्ववशीकृतदेशेषु (गुर्जर) श्रावणबहुलदशमीतःप्रारभ्य भाद्रपदशुक्लषष्ठीयावदऽमारिप्रवर्तनाय द्वादशदिनामारि सत्कानि स्वनामांकितानि षडाज्ञापत्राणि (फुरमानानि) त्वरितमेव श्रीगुरुभ्यः समर्पितानि । प्रथमं श्रीगुर्जरदेशीयं, द्वितीयं मालवदेशसत्कं, तृतीयं अजमेरदेशीयं, चतुर्थं दिल्लीफतेपुरसत्कं, पंचमं लवपुर (लाहोर) मुलतानदेशसत्कं, श्रीगुरुपार्श्वे रक्षणाय षष्ठं देशपंचकसंबंधि साधारणं चेति । तेन तत्तद्देशेष्वऽमारिपटहो विस्तृतः । तथा श्रीगुरूणां पार्श्वादुत्थाय तदैवाऽनेकगव्यूतमिते डाबरनाम्नि महासरसि गत्वा साधुसमक्षं स्वहस्तेन नानाजातीयानां देशांतरीयजनप्राभृतीकृतानां पक्षिणां मोचनं चक्रे । तथा कारागारस्थबहुजनानां बंधनभंजनमप्यकारि । ततः श्रीसूरिणा शाहिप्रार्थनया श्रीजंबूद्वीपप्रज्ञप्तिवृत्तिविधायकवाचकश्रीशांतिचंद्राः स्वपरशास्त्रज्ञाः पश्चिमाधीशवरुणसुरदत्तवरास्तत्र धर्मश्रा-

वणार्थं निहिताः । तैश्च स्वोपज्ञकृपारसकोशाख्यशास्त्रजलेन सिक्ता सती वृद्धिमती कृपालता श्रीशाहिहृदये बभूव । तथै-कदा शाहिपुर आमलकप्रमाणे द्वे मुक्ताफले केनचिदिभ्येन प्राभृतीकृते तं सन्मान्य स्वकोशाधिपं वालव्यजनकारकं द्वादशहजारीमुनसफविरुदबिभ्रतं च प्रति ते फले रक्षणाय प्रदत्ते । सोऽपि स्वगृहे गत्वा स्वभार्यां ददौ, सापि स्नानो-त्सुका स्ववस्त्रे बध्वा स्नानं चकार । तदनु सुरत्राणसत्के ते ज्ञात्वा खेट्टस्थले मुमोच, क्रमादामयार्दिता सा पंचत्वं प्राप ॥

अथान्यदा नृपेण ते मार्गिते, सः स्माह हे स्वामिन् ! मद्गृहात्समानयामि, ततस्तेन स्वमंदिरं सर्वत्रान्वेषितं परं क्वापि ते अप्राप्य चिंतार्दितः निस्तेजा व्याघुट्य आयाति नृपाभ्यर्णे । तदंतराले पुण्योदयेन वाचकेन्द्रा मिलिताः, तैश्चिंतास्वरूपं पृष्टं, जीवितमुक्तस्पृहेण तेन यथाजातं विज्ञप्तं । तदा ते प्राहुः त्वं गृहे गत्वा पूर्वं यत्र यस्यै दत्ते तत्रैव तस्याः समीपे मार्गणीये, सोऽपि गृहे गतः तथैव स्नानोद्यतां तां वीक्ष्य ते मार्गिते, तयापि स्वपटीयांचलग्रंथीमुन्मुद्र्य दत्ते, सोऽपि प्राप्ताश्चर्यः शाहिपार्श्वं समेतः तत्पुरः ते संस्थाप्य चामरवीजनोद्यतोऽभूत्, परं तदाश्चर्यमग्नः भूयो भूयः स्तिमितजडत्वं प्राप्नोति, तदा शाहिना पृष्टः, किमद्य चित्रलिखित इव त्वं भवसि ? इति निर्बंधेन पृष्टः सर्वं जातं स्माह । तदा शाहिनोदितं, किमत्र चित्रं ? स तु द्वितीयो विश्वेशोस्ति !

अथ प्रगे धर्मश्रावणार्थं सभामध्ये वाचकेंद्रः कांचनपादपीठमुपरि समेत्य स्थितः, ततो भूपः प्रणम्येति व्यजिज्ञ-पत्, हेपूज्य ! कमप्याश्चर्यमस्मान् दर्शय, सोऽप्याह कल्ये गुलाबपुष्पारामे त्वयागंतव्यं, प्रगे शाहिस्तत्र गतो, वाच-

केन्द्रोऽपि तत्रागात्, द्वौ परस्परं धर्मगोष्टीं यावत्तनुतां तावत् 'शाहिनौबत' गर्जारवो जातः, सहसा तदाकर्ण्य चकितः स्वसेवकान् पप्रच्छ, अस्मदाज्ञां विना कस्यापि ढकारवो द्वादशगव्यूतिमध्ये न जायते पश्यत यूयं, ततस्ते विलोक्य साधिपं प्राहुः, हे साधिप ! युष्मत्पिता 'हिमायुँ' सचमूः त्वां मिलनाय समेति ! इति कथनानंतरमेव समेत्य च पुत्रं परिरभ्य स्थितः, सर्वेषामकबरसैनिकानां मेवामिष्टान्नभृतरजतपात्राणि ददौ, शाहिं प्रति महत् सन्मानं दत्वा यथागतस्तथा ययौ, क्षणेनादृश्योऽभूत्! शाहिः साश्चर्यं दध्यौ च नेदं तांत्रिकं ! यतः अस्मदादिसमर्पितवस्तूनीमानि प्रत्यक्षं दृश्यंते, अतः नूनमिदं चेष्टितं गुरुणा निर्मितं ! ततः गुरवे नत्वा स्तुतिं चकार ।

अथैकदा शाहिः अटकदेशेशजयनार्थं द्वात्रिंशत् (३२) कोशमितं प्रयाणमकरोत्, तदा शाहिना स्वभक्तस्वांतिकसमागतजनान्वेषणं नामग्राहपूर्वं कारितं, तन्मध्ये वाचकचंद्रस्यापि नाम श्रुत्वा दध्यौ, अहो ! वाहनोपानहादिविमुक्ता अमी महद्दुःखं प्राप्ता अभविष्यन् ! ततस्तदाकारणाय स्वोपजीविन् प्राहिणोत्, ते तं प्राहुः त्वां शाहिः आकारयति । तदा च वाचकेंद्रावस्था ईदृशी जातास्ति—"शोफयुक्तचरणत्वात् पदमात्रमप्यग्रे चलनाक्षमाः टौप्परकस्थितप्रासुकजलेन वस्त्रांचलमार्द्रीकृतं स्वोरसि स्थापितमस्ति, द्वौ शिष्यौ वैयावृत्यं कुर्वतः"—सेवकैः एतत्स्वरूपं नृपाय निवेदितं, तदा शाहिः सुखासनमप्रेषयत् । तदा सः एकां काष्ठवलिकामानाय्य तदुपरि आरुरोह, द्वौ शिष्यौ काष्ठप्रांतौ स्कंधे न्यस्य चलितौ, शाहिना तथावस्थं तमागच्छंतं वीक्ष्य दध्यौ, अहो ! गुरुवाक्यभक्ता धन्याः इमे ये मद-

नुयायिनः संति ! अन्यथा मदभ्यर्णे न काप्येषां प्राप्तिः ! अहो क्षमानां क्षमा ! ततः शाहिः अभिमुखीभूय तत्पादयुग्मं चक्षुर्भ्यां पस्पर्श, प्राह च, स्वामिन् ! अतः परं मत्कृते महत्प्रयाणं युष्माभिर्न विधेयं, शनैः शनैः पश्चात् समेतव्यं । ततः शाहिः क्रमेणाटकदेशाधिपपुरं परिवेष्ट्य स्थितः, द्वादश वर्षाणि जातानि परं तद्वप्रः न स्वायत्तोभूत्।

एकदा शाहिपुरः म्लेच्छाः भूपं स्माहुः, त्वं प्रत्यहं कापुरुषश्वेतपटसंगं करोषि तेनायं च दुर्गः दुर्ग्रहोऽनुमीयते ! तद्वृत्तं भूपेन तस्मै ज्ञापितं, गुरुः प्राह यद्दिवसे दुर्गग्रहणेच्छा तव स्यात् तत्समये गृह्यते, परंत्वत्सैन्यं सर्वं स्कन्धावारे एव स्थाप्यं आवां द्वावेव व्रजावः, पुरांतर्बहिश्च कस्यापि केनापि हिंसा न विधेया ! ततः पटहोद्घोषेण हिंसां सर्वत्र निवार्य प्रभाते द्वावेव दुर्गसमीपमियतुस्तदा सर्वे निंदका ऊचुः, असौ कापुरुषः अकबरं शत्रुहस्ते समर्पिष्यति ! ततः वाचकेन एकया फूत्कृत्या सर्वा वप्रखातिका रजःपूर्णीकृता, द्वितीयया शत्रुसैन्यं स्थंभितं, तृतीयया च गोपुराणि फुल्लिकानीव स्फूटितानि, ततः शाहिः सोत्साहं साश्चर्यं पुरे स्वाज्ञामखंडां चकारेति च गुरुं प्राह । हे पूज्य ! मम किंचित् सानुग्रहं विधाय समादिशतु । तदा वाचकेंद्रेण चतुर्दश (१४) कोटिद्रव्यस्थानकं प्रतिवर्षं 'जीजीया' करमोचनं राज्ञो याचितं, सपादसेरचटकजिह्वाभक्षणं त्वया न कार्यं, सुवर्णटंकैकशत्रुंजयकरमोचनं याचितम्, षाण्मासिकामारिप्रवर्त्तनं च याचितम् । तथाहि—श्रीमत् शाहिजन्मसंबंधिमासः, श्रीपर्युषणापर्वसत्कानि द्वादश (१२) दिनानि, सर्वे रविवाराः, सर्वाः

संक्रांतितिथयः, नवकरोजसत्को मासः, सर्वे ईदवासराः, सर्वे मिहरवासराः, सोफीआनवासराश्चेति षाण्मासिकामारिसत्कफुरमानानि च श्रीशाहिपार्श्वात्समानीय श्रीगुरूणां प्राभृतीकृतानि वाचकेन्द्रेणेति ।

"अष्टाह्निकापर्वसु शासनोन्नतिं, नानाविधां धर्मविवृद्धिहेतवे ।
पूर्वोक्तयुक्त्या विदधत्त भावुकाः, सौभाग्यलक्ष्म्यंचितपुण्यसंस्पृहाः ॥ १ ॥

॥ इति पर्युषणाष्टाह्निकासत्कप्रथमाह्नो व्याख्यानम् ॥

॥ अथाष्टाह्निकपर्वद्वितीयदिनव्याख्यानम् ॥

॥ अथाष्टाह्निकपर्वाराधकैः वर्षकृत्यानि विधेयानीत्याह ॥

"संघार्चादिसुकृत्यानि, प्रतिवर्षं विवेकिना । यथाविधि विधेयानि, एकादशमितानिवै ॥ १ ॥"

स्पष्टः—नवरं—एकादश सुकृत्यानि पूर्वसूरिप्रणीतगाथाभिः प्रदर्श्यंते ।

"पइवरिसं संघच्चण (१), साहम्मिअंभत्ति (२) तइय जत्त तिगं (३) जिणगिहि ण्हवणं (४) जिणधण

हिका
६ ॥

वुड्ढि (५) महपूअ (६) धम्मजागरिआ (७) ॥ १ ॥ सुअपूआ (८) उज्जवणं (९) तहे व तित्थस्स पभावणा (१०) सोहि (१) ॥" व्याख्या—

प्रतिवर्षं जघन्यतोऽपि एकैकवारं संघार्चनं, चतुर्विधश्रीसंघपूजा, तत्र साधुसाध्वीभ्यो निर्दोषाहारपुस्तकादिकं दत्ते, श्रावकश्राविकाभ्यो यथाशक्ति परिधापनादिकं विधत्ते, संघार्चा त्रिधा, उत्कृष्टा, मध्यमा, जघन्या च, सर्वादरेणसंघपरिधापनेउत्कृष्टा, सूत्रमात्रादिना जघन्या, शेषा मध्यमा, तत्राधिकं व्ययितुमशक्तो गुरुभ्यः सूत्रमुखवस्त्रिकादिकं द्वित्रिश्राद्धश्राद्धीभ्यः पूगादिकं च दत्वा प्रतिवर्षं संघार्चाकृत्यं भक्त्या सत्यापयति, निर्द्धनस्य एतावदपि महाफलं पूणीयाश्राद्धस्येव—यतः—

"संपत्तौ नियमः शक्तौ, सहनं यौवने व्रतम् । दारिद्र्ये दानमप्यल्पं, महालाभाय जायते ॥ १ ॥" इति ॥ १ ॥

तथा साधर्मिकाणां निमंत्रणं, विशिष्टासनवसनादिदानं, आपन्निमग्नानां स्वधनव्ययेनाप्युद्धरणं—उक्तं च—

"न कयं दीणुद्धरणं, न कयं साहम्मिआण वच्छलं । हिअयंमि वीयराओ, न धारिओ हारिओ जम्मो ! ॥ १ ॥"

श्राविकास्वपि वात्सल्यं श्रावकवदन्यूनाधिकं विस्तार्यम् , ता अपि रत्नत्रयीवत्यः सुशीलाः सधवा विधवा वा साधर्मिकत्वेन ध्येयाः, अत्र शिष्यप्रश्नः—हेस्वामिन् ! स्त्रियो लोके लोकोत्तरे च दोषान्विताः प्रसिद्धाः, यतः—

"अनृतं साहसं माया, मूर्खत्वमतिलोभता । अशौचं निर्दयत्वं च, स्त्रीणां दोषाः स्वभावजाः ॥ १ ॥" अत्र सुकु-

मालिका–सुरीकांता–कपिला–अभया–नूपुरपंडिना–नागश्री प्रमुखाणामवदाता स्वयमभ्यूह्याः । आगमेऽपि–"अणंताओ पावरासिओ, जया उदयमागया । तया इत्थित्तणं पत्तं, सम्मं जाणाहि गोयमा ! ॥ १ ॥" अत्र रज्जार्यादीनामुदंताः, सर्वत्र तासां निंदा दृश्यते, अतः तासु दानमन्मानवात्सल्यं कथं युक्तम् ?

गुरुराह । नायमेकांतो यद्वनिता एव दोषबहुलाः, पुरुषा अपि केचित् 'अक्खाइराठोड'सदृशाः महाक्रूराशयाः नास्तिका देवगुरुवंचकाश्च भूयांसोपि दृश्यंते, एवं स्त्रीणामपि कासांचित् दोषबहुलत्वमुपलभ्यते, तथापि कासांचित् गुणबहुलत्वमप्यस्ति, अत्र सुलसा–रेवती–कलावती–मदनरेखादयः श्राविकाः श्रीतीर्थनाथैरपि अनेकधा स्तुताः ! अतस्तासां जननीनामिव भगिनीनामिव स्वपुत्रीणामिव वात्सल्यं युक्तियुक्तमेवेत्यलम् ॥ २ ॥

तथा प्रतिवर्षं जघन्यतोप्येकैका यात्रा कार्या, यात्रात्रिकं–यतः—

"अष्टाह्निकाभिधामेकां, रथयात्रामथापराम् । तृतीयां तीर्थयात्रां चे–त्याहुर्यात्रा त्रिधा बुधाः ॥ १ ॥"

तत्र सर्वासु अष्टाह्निकासु सर्वचैत्यपूजादिमहामहो विधयः (१) रथयात्रा तु कुमारपालभूपालेनैवं कृता–यतः—

"चित्तस्स अट्ठमीदिणे, चउत्थपहरे महाविभूईए । सहरिसमिलंतनायर–जणकयमंगलजयसद्दो ॥ १ ॥
सोवण्णजिणवररहो, णीहरइ चलंतसुरगिरिसमाणो । कणगोरुदंडधयछत्त–चमरराईहिं दिप्पंतो ॥ २ ॥
ण्हविय विलित्त कुसुमेहिं, पूइअे तत्थ पासजिणपडिमं । कुमरविहारदुवारे, महाजणो ठवइ रिद्धीए ॥ ३ ॥

तूररवभरियभुवणो, सरसणचंतचारुतरुणीगणा । सामंतमंतिसहिओ, वचइ णिवमदिरंमि रहो ॥ ४ ॥
राया रहत्थपडिमं, पट्टंसुअकणयभूसणाइहिं । सयमेव अचिउं कारवेइ विविहाइं णट्टाइं ॥ ५ ॥
तत्थ गमिऊण रयणीं, णीहरिउं सीहबार वाहिंमि । ठाई एवंचिअ धय—तंडवंमि पडमंडवंमि रहो ॥ ६ ॥
तत्थ पहाए राया, रहजिणपडिमाइ विरइउं पूअं । चउविहसंघसमक्खं, सयमेवारत्तिअं कुणइ ॥ ७ ॥
तत्तो णयरंमि रहो, परिसक्कइ कुंजरेहिं जुत्तेहिं । ठाणे ठाणे पडमंडवेसु विउलेसु दिट्ठंतो ॥ ८ ॥'' इत्यादि ॥

अथ तीर्थानि—श्रीशत्रुंजय—श्रीरैवतादीनि, तथा तीर्थकृज्जन्मदीक्षाज्ञाननिर्वाणविहारभूमयोऽपि प्रभूतभव्यसत्वशुभभावसंपादकत्वेन भवोदधितारणात्तीर्थानि कथ्यंते, तेषु दर्शनादिविशुद्धयर्थं विधिवत् यात्रा करणम् , यथा—श्रीसिद्धसेनार्कप्रतिबोधितविक्रमार्कस्य श्रीशत्रुंजययात्रासंघे एकोनसप्तत्यधिकशतं (१६९) सौवर्णाः देवालयाः, पंचशती (५००) दंतचंदनादिमयाः, श्रीसिद्धसेनाद्याः पंचसहस्राः (५०००) सूरयः, चतुर्दश (१४) भूपाः मुकुटबद्धाः, सप्ततिलक्षाणि (७००००००) श्राद्धकुटुंबानि, एका कोटिर्दश लक्षाणि नव सहस्री च (११००९०००) शकटानि, अष्टादश लक्षाणि (१८०००००) तुरंगमाः, षट्सप्ततिशतानि (७६००) गजाः, एवं करभवृषभा दयोऽपि ज्ञेयाः॥ ॥ ७ ॥

श्रीकुमारपालस्य स्वर्णरत्नादिमयाश्चतुस्सप्तत्यधिकाष्टादशशती (१८७४) देवालयाः ॥ आभूसंघपतेस्तु सप्त शतानि (७००) तद्यात्रायां द्वादश कोटि (१२०००००००) स्वर्णव्ययः ॥ साधु—पेथडस्यैकादशरूप्यटंकलक्ष-

व्ययः (११००००००) तीर्थदर्शने, संघे देवमंदिराणि द्वापंचाशत् (५२), मनुष्याः सप्त लक्षाः (७००००००)॥ मंत्रिवस्तुपालस्य सार्द्धद्वादश (१२ ॥) यात्राः प्रसिद्धा इति ॥ ३ ॥

तथा चैत्ये स्नात्रमहोऽपि विस्तरेण सर्वपर्वसु कर्त्तुमशक्तेनापि प्रतिवर्षमेकैकः कार्यः, श्रूयते हि सा० पेथडेन श्रीरैवतस्नात्रमहामहे षट्पंचाशद्धटीस्वर्णेनेन्द्रमाला परिदधे, श्रीशत्रुंजयरैवतयोश्चैक एव कांचनमयो ध्वजः प्रददे, तत्सुतेन सा० झांझणेन तु दुकूलमय इति ॥ ४ ॥

तथा देवद्रव्यवृद्ध्यर्थं प्रतिवर्षं मालोद्घट्टनं कार्यम्, तत्र च ऐन्द्री अन्या वा माला ग्राह्या, श्रीरैवते श्वेतांबरदिगंबरसंघयोः समं प्राप्तयोः तीर्थविवादे य इन्द्रमालां परिधत्ते तस्येदं तीर्थमिति वृद्धोक्तौ साधुपेथडेन षट्पंचाशद्धटीस्वर्णेनेन्द्रमाला परिदधे, चतुर्द्धटीस्वर्णं मार्गणेभ्यो ददे, तीर्थं स्वं चक्रे, इत्यादि शुभ विधिना देवद्रव्यस्य वृद्धिः कार्येति ।५।

तथा प्रतिवर्षं पर्वसु चैत्ये महापूजा विधेयेति ॥ ६ ॥

तथा रात्रिजागरणं तीर्थदर्शने च कल्याणकदिनेषु च गुरुनिर्वाणदिनादौ च कार्यं, श्रीवीतरागगुणगीतनृत्यादिमहैरिति।७।

तथा श्रुतज्ञानस्य भक्तिः प्रत्यहं कर्त्तुमशक्तेन प्रतिवर्षं प्रतिमासं च कार्येति ॥ ८ ॥

तथा नवपदसिद्धचक्रैकादशीपंचमीरोहिणीज्ञानदर्शनचारित्रादिविविधतत्तत्तपःसंबंधिषु उद्यापनेषु जघन्यतोऽपि एकैकमुद्यापनं वर्षे वर्षे यथाविधि कार्यम्—यतः—

"उद्यापनं यत्तपसः समर्थने,तच्चैत्यमौलौ कलशाधिरोपणम्। फलोपरोपोऽक्षतपात्रमस्तके, तांबूलदानं कृतभोजनोपरि १"

सर्वत्र शुक्लपंचम्यादिविविधतपसामपि तत्तदुपवासादिसंख्यानाणकवर्त्तुलिकानालिकेरमोदकादिनानाविधवस्तुढोकनादि यथाश्रुतसंप्रदायमुद्यापनानि विधेयानीति ॥ ९ ॥

तथा तीर्थप्रभावनादि जघन्यतोऽपि प्रतिवर्षमेकवारं कार्यम् , तत्र श्रीगुरुप्रवेशोत्सवः सर्वांगीणप्रौढाडंबरचतुर्विधश्रीसंघसंमुखगमनं श्रीगुर्वादिसंघसत्कारादिना यथाशक्ति कार्यः, श्रीवीरवंदनमहोत्सवे श्रीऔपपातिकसूत्रवर्णितकूणिकनृपवद्वा, प्रदेशिभूपवद्वा, उदायनक्ष्मापवद्वा, दशार्णभद्रमहीनाथवद्वा विधेयः । तथा साधु–पेथडेन श्रीधर्मघोषसूरीणां प्रवेशोत्सवे द्वासप्ततिसहस्र (७२०००) टंकक्व्ययश्चक्रे । न च संविग्नसाधूनां प्रवेशोत्सवोऽनुचित इति वाच्यम् , यतो व्यवहारभाष्ये प्रथमाधिकारे–"तिरिआ उब्भाम निओअ दरिसणं सण्णिसाहु मप्पाहे । दंडिअ भोइअ असई, सावगसंघो व सकारं ॥ १ ॥" तीरितायां समाप्तप्रतिमायां उत् प्राबल्येन भ्रमंत्युद्भ्रमा भिक्षवः तेषां नियोगो व्यापारो यत्र स उद्भ्रामकनियोगो ग्रामः तत्रागत्य स्वात्मानं दर्शयति, ततः संयतं, संज्ञितं वा श्रावकं संदेशयति, यथा 'समापिता मया प्रतिमा ततोऽहमागतः' ततो दंडिको राजा, भोगिको ग्रामाध्यक्षः, तदभावे श्रावकवर्गः संघश्च सत्कारं प्रवेशोत्सवादिकं करोति शासनोन्नतेस्तीर्थकृत्त्वादिफलत्वादिति ॥ १० ॥

तथा गुरुयोगे जघन्यतोऽपि प्रतिवर्षं आलोचना गुरुभ्य आदेया, यतः—

"जंबुदीवे जे हुंति, पवया ते चेव हुंति हेमस्स । दिज्जंति सत्तखित्ते, न छुट्टए दिवसपच्छित्तं ॥ १ ॥
जंबुदीवे जे हुज्ज, वालुआ ते चेव हुंति रयणाइं । दिज्जंति सत्तखित्ते, न छुट्टए दिवसपच्छित्तं ॥ २ ॥"

आलोचनां विना बहुवासरोपार्जितपापहानिः कथं स्यात्? विधिवदालोच्य गुरुदत्तं प्रायश्चितं विधत्ते तदा तद्भवेऽपि शुद्धयति, कथमन्यथा दृढप्रहारिप्रमुखानां तद्भवेऽपि सिद्धिरिति ॥ ११ ॥

"कृत्यान्यमूनि प्रतिवत्सरं हि ये, श्राद्धा वितन्वंति विवेकसंभृताः ।
तत्पुण्यपुष्ट्या कृतिनः कृतार्थिनः, ते द्यां लभंते प्रभुधर्मरागिणः ॥ १ ॥

॥ इति पर्युषणाष्टाह्निकासत्कद्वितीयाह्नो व्याख्यानम् ॥

॥ अथाष्टाह्निकपर्वतृतीयदिनव्याख्यानम् ॥

॥ अथ पर्वदिनेषु पौषधो न हेय इत्याह ॥ "ये पौषधोपवासेन, तिष्ठंति पर्ववासरे । अंतिम इव राजर्षि–र्धन्यास्ते गृहिणोऽपि हि ॥ १ ॥" स्पष्टः ॥ श्लोकसूचितसंबंधस्त्वयम्—

सिंधुसौवीरदेशे वीतभयादित्रिषष्ठ्यधिकत्रिशती (३६३) नगराधीश उदायननृपस्तस्य प्रभावती पट्टदेव्यस्ति, तयोरभीचिनाम्ना पुत्रस्तस्य 'केशी' इति नाम्ना भागिनेयोऽप्यस्ति ।

इतश्च चंपायामाजन्मस्त्रीलंपटः, कुमारनंदिस्वर्णकृत् यां यां सुरूपां कन्यां शृणोति तां स्वर्णपंचशतीं दत्वा गृह्णाति, एवं पंचशत (५००) स्त्रियो जाताः, ताभिः सहैकस्तंभसौधेऽरंसीत्, तस्य नागिलश्राद्धः मित्रमस्ति, एकदा पंचशैलाधिपव्यंतरदेव्यौ शक्राज्ञया नंदीश्वरे प्रास्थिषातां, तदानीं तत्पतिर्विद्युन्माली च्युतस्ततस्ते 'हासा' 'प्रहासा' नाम्न्यौ कामुकं तं स्वर्णकृतं दृष्ट्वा तत्रावातरतां, ते दृष्ट्वा परिरब्धुकामः स्वर्णकारः प्रोवाच, के युवाम् ? किमर्थमागते ? ते प्रोचतुः भवदर्थम् ! प्राप्तसंज्ञः स हेमकृत् प्रार्थनां चक्रे, ते ऊचतुः त्वं पंचशैले समागच्छेः, तत्रावयोः संगो भावीत्युक्त्वा ते उत्पतिते, सोपि स्वर्णकारः भूभुजे स्वर्णं दत्वा इति पटहमवादयत्, "यो मां पंचशैलद्वीपे नेता स द्रव्यकोटिं लप्स्यते" ! एकेन निर्यामकस्थविरेण पटहो धृतः, कोटिधनं चाददे, तेन यानपात्रं सज्जीकृत्य स्वर्णकृता साकं पोतस्थो वृद्धोऽब्धिवर्त्मनि सुदूरमागत्य तमित्यूचे, भोकुमार ! अब्धिकूले तच्छैलपादजातोऽयं वटो दृश्यते, यदा पोतोऽस्याधो याति तदाऽस्य शाखायां त्वं विलगेः, निश्यत्र भारंडाः समेष्यंति, तेषु सुप्तेषु कस्यचिदंघ्रौ पटेन स्वं वध्वा दृढमुष्टिना विलगेः, प्रातरुड्डीनास्ते त्वां पंचशैले नेष्यंति, यदि वटेऽविलग्नस्त्वं तदा एतद्यानपात्रमिव महावर्त्ते पतित्वा विनंक्ष्यसि ! तथाकृते सः पक्षिणा तत्र निन्ये, सः क्रमेण हासाप्रहासाभ्यां दृष्टः, तेनापि भोगार्थं प्रार्थिते, ताभ्यां प्रोचेऽनेनांगेनावयोः संगो न भवेत् ! किंतु अग्निप्रवेशादिना कृतनिदानेन त्वं पंचशैलेशो भव, स दध्यौ ! उभयतो भ्रष्टोऽहमिति चिंतार्त्तस्ताभ्यां स्वपुरे मुक्तस्ततः स देवांगनांगमोहितोऽग्निसाधनं प्रारेभे,

तदा नागिलश्राद्धेनोक्तम् , मित्र ! बालमरणं नार्हं तवेत्यादिना वार्यमाणोऽपि निदानेनाग्निशरणं कृत्वा पंचशैलशो जज्ञे, नागिलस्तद्वैराग्यात्प्रव्रज्याऽच्युते देवो जातः ॥

अन्यदा नंदीश्वरयात्रार्थं प्रस्थितानां देवानां पुरो गातुं तदाज्ञया हासाप्रहासे चलिते स्वपतिमूचतुः, स्वामिन् ! त्वं पटहं वादय, सोऽहंकारेण नोऽवादयत् , तदा दुष्कर्मणा पटहः कंठे ऽलगत् , तदानीं ताभ्यामुक्तं, भो प्राणेश ! कुलोचितं कुरु, मा त्वं लज्जस्व ! ततो विद्युन्माली देवो गायतीभ्यां ताभ्यां सह पटहं वादयन् त्रिदिवौकसां पुरतश्चचाल, तदानीं नागिलः स्वर्गी यात्रायां व्रजन् विद्युन्मालिनं निजपूर्वभवमित्रं अवधिना ददर्श, ततः स्वर्गिणा स भाषितः, भद्र ! त्वं मां जानासि ? स जगौ तेजस्विन्नाहं जाने त्वं कोऽसि ? ततस्तेन श्राद्धरूपं कृत्वा स्वस्य तस्य पूर्वभवस्वरूपं येन धर्मेण प्राप्तभवस्वरूपं चोक्तम् , तच्छ्रुत्वा एवमवदत् , भोमित्र ! किमहं करोमि ? अच्युतसुरेणोक्तं मित्र ! गार्हस्थ्येन चित्रगृहे कायोत्सर्गेण स्थितस्य भावसाधोर्वीरविभोर्मूर्त्तिं त्वं कारय, तव बोधिबीजमुत्पत्स्यते, तदुक्तमुररीकृत्य गृहे प्रतिमास्थं श्रीवीरमपश्यत् , ततो देवो हिमवति शैले गत्वा गोशीर्षचंदनं छित्वा यथादृष्टां मूर्त्तिं सविभूषणां चक्रे, जातिचंदनस्यैकां पेटां कृत्वा कपिलकेवलिपार्श्वे प्रतिष्ठाप्य तस्यां चिक्षेप । तदानीं एकस्य सांयात्रिकस्यांबुधौ पोतस्योत्पातयोगतो भ्रमतः षण्मासी गता, देवस्तं ददर्श, तस्य पीडां संहृत्य प्रतिमागर्भं समुद्गकमर्प्पयित्वा प्राह, त्वं वीतभयपत्तने गत्वा इत्युद्घोषणां कुर्वीथाः "इयं परमात्मप्रतिमा गृह्यतां गृह्यताम्" ततः स प्रतिमानुभावतः तन्न-

गरे गत्वा तामुद्घोषणां चक्रे, तत्र द्विजतापसनृपादयोऽनेके समाजग्मुः, ते स्वेष्टदेवान् स्मृत्वा स्मृत्वा उद्घाटयंति परं नोद्घटते ! एवं मध्याह्ने राज्ञी भोजनाय चेटीं संप्रेष्य नृपमाह्वयत्, राज्ञापि तथ्ये प्रोक्ते प्रभावती तत्रैत्य देवाधिदेवोऽर्हन् नत्वन्ये ब्रह्मादय इति मत्वा संपुटं चंदनादिभिः संपूज्य प्रोचे—

"प्रातिहार्याष्टकोपेतः, प्रास्तरागादिदूषणः । देयान्मे दर्शनं देवा–धिदेवोऽर्हंस्त्रिकालवित् ॥ १ ॥"

इत्युक्ते स्वयं संपुटात् जिनमूर्त्तिर्निर्गता, अथ सा तां चैत्यगृहे न्यस्य त्रिसंध्यमपूजयत् ॥

अन्यदा द्रव्यपूजानंतरं राज्ञी प्रीता जिनवरपुरो नृत्यति स्म, राजा च वीणामवादयत्, तदा नृपः शिरोहीनं नृत्यंत्याः प्रभावत्याः कबंधं ददर्श, तदनिष्टं वीक्ष्य क्षुभितनृपकरात् वीणाऽपतत्, तदा क्षुब्धा राज्ञी जगौ, हेप्राणेश ! किमेतज्जातम् ? नृपः स्त्रीकदाग्रहात् तथाख्यत्, सा प्राहाननानिष्टेन ममायुरल्पमेव ज्ञायते ! ॥

पुनरन्यदा कृतस्नाना राज्ञी देवार्चार्हाणि श्वेतानि वासांसि दास्याहस्तेनानाययत्, परं भाविविघ्नवशात् राज्ञा रक्तान्युदैक्षत् ! अनर्हाणि वीक्ष्य कोपात् आदर्शेन तां जघान, ततस्तानि, श्वेतान्येव दृष्ट्वाऽचिंतयत् ! धिग् ! मया व्रतं खंडितम्, एतत्पापक्षयार्थं प्रव्रजामि, वस्त्रवर्णान्यप्रेक्षणेन ममायुरल्पमेव ! ततः स्वाम्याज्ञया व्रतोत्सुका जाता, तदा नृप एवं प्राह, देवि ! देवत्वासया त्वयाऽहं धर्मे बोधनीयः, ! ततो राज्ञी सम्यक् चारित्रं प्रपद्यानशनं कृत्वा सौधर्मे कल्पे सुरोऽभूत्, ततस्तां मूर्त्तिं देवदत्ताख्या दासी कुब्जिकाऽपूजयत् ॥

अथ स सुरः तापसरूपधरः संसदि नृपं दिव्यफलामृतप्राभृतमकरोत् ! राजा तत्फलास्वादेन मोहितस्तं मुनिं जगौ, मुने ! एतत्फलोत्पत्तिस्थानं दर्शय, मुनिनोक्तं त्वं ममाश्रमे एहि, ततः स राजा तेन सह वेगेन गतः, स सुरो देवमायया तादृक्फलभरोपेतमारामं किंचिद्गत्वा विचक्रे, तं दृष्ट्वा नृपो दध्यौ ! अहं एषां भक्तोऽस्मि अतः फलाद-नेच्छां पूरयिष्यंतीति विचिंत्य राजा कपिवद्धावे, तावत्तैः क्रोधात्करे दंडं कृत्वा कुट्यमानस्तस्करवदनश्यत् ! नश्य-ताऽग्रे साधून् अवलोक्य तेषां शरणं कृतम् ! तैः साधुभिराश्वामितः क्ष्मापतिरचिंतयत्, अहो ! क्रूरैस्तापसैर्वंचि-तोऽहम् ! ततः प्रभावतीदेवः प्रत्यक्षीभूय प्रतिबोधाय कृतस्वरूपमुक्त्वा स्वर्गृहं जगाम, नृपोऽपि जिनधर्मैक-मनाः स्वं सभास्थितमैक्षत ॥

इतश्च गांधारश्राद्धोनित्यार्हत्प्रतिमां वित्रंदिषुर्वैताढ्यमूले तपसा तस्थौ, तुष्टा शासनसुरी तदीप्सितमपूरयत्, प्रस-न्ना कामदमष्टोत्तरगुटिकाशतं ददौ, एकां गुटिकामास्ये क्षिप्त्वा स दध्यौ, अहं वीतभयपत्तने देवाधिदेवमूर्त्तिं वंदि-तुं यामि, इति चिंतितमात्रेण मूर्त्त्यन्तिके देवेन नीतः, तां संपूज्य तत्र सुखेनास्थात् । अन्यदा स सुधीरासन्नां मृतिं मत्वा साधर्मिकाया देवदत्ताकुब्जायास्ता गुटिका दत्वा स्वयं दीक्षां ललौ ॥

सा रूपार्थिनी एकां गुटिकां मुखे क्षिप्त्वा क्षणेन दिव्याकारधरा जाता, अतो राज्ञा तस्याः 'सुवर्णगुलिका' इति नाम दत्तम्, पुनः सा एकां गुटिकामास्ये मुक्त्वा दध्यौ, "अनुरूपवराभावे मम रूपं वृथा ! अयं नृपस्तु मम पितै-

वातश्चंडप्रद्योतभूपो मम पतिरस्तु" तदा सा सुरी प्रद्योतपुरस्तद्रूपमवर्णयत्, नृपस्तस्याः प्रार्थनाकृते दूतमादिशत्, चरस्तत्र गत्वा तामर्थयामास, सा तं प्रत्याह नृपदर्शनानंतरमुभयोः समीहितं भविष्यति, सोऽपि गत्वा तथैव जगौ, तदा अनिलवेगगजारूढः निशि तत्रागात्, विपिने उभावपि मिलितौ, नृपेणोक्तं हे प्रिये! त्वं मत्पुरीमेहि कुब्जाह जिनमूर्त्तिं विनाऽहं न जीवामि, अतोऽस्याः प्रतिकृतिस्त्वया समानेतव्या, तामिह मुक्त्वा एषा सहैव नीयते, ओमित्युक्त्वा अवंतीशः स्वनगरे गत्वा जात्यचंदनमयीं वीरमूर्त्तिमकारयत्, ततोऽवंतीशेन पंचशतमुनियुतः प्रार्थितः कपिलर्षिर्वासनिक्षेपपूर्वं तां प्रत्यतिष्ठिपत्, ततो विधिना तां मूर्त्तिं संगृह्य करिराजारूढस्तत्रागत्य तां दास्यै समर्प्पयत्, सा चैत्यगृहे नूतनां प्रतिमां न्यस्य मूलमूर्त्तिं समादाय राज्ञा सह सौख्येनावंतीं प्राप ॥

इतश्च उदायननृपः प्रातर्देवायतनं ययौ, जिनं नत्वा सन्मुखं विलोकयति, तदा म्लानमालां मूर्त्तिं पश्यति, तथादृष्ट्वा दध्यौ "इयं मूर्त्तिः काप्यन्या म्लानमाल्यत्वात् सा न भवति, पुनः स्तंभलग्ना पांचालिका इव या देवदत्ता सापि न दृश्यते, ग्रीष्मे मवबुवत् करिणो मदो नष्टश्च दृश्यते, तन्नूनमनिलवेगेनेह चंडप्रद्योतः समागात् इति ज्ञायते स द्वयं गृहीत्वा गतः" ॥

ततः कुपितो नृपो दशभिर्मुकुटबद्धनृपैः सह सबलोऽवंतीं प्राप, ततो द्वयोर्मिथः संगरोऽभूत्, तत उदायनेन शिलीमुखैः प्रद्योतः कुंजरात् पातयित्वा हस्तेन धृत्वा बद्धस्तस्य ललाटपट्टे "मम दासीपतिः" इत्यक्षरावलीं तप्तलोहश-

लाकया लिलेख, गुप्तिगृहे चाक्षिपत्, तत उदायनः प्रद्योतस्य गृहे जिनालये गतः, जिनवरं नत्वा स्तुत्वा उपादातुमुपाक्रंस्त, सा स्थानतो न चचाल, नृपतिर्जगौ, हे नाथ! को मयाऽपराधः कृतो यतः परमेश्वरो मया सह नैषीत्? तदानीं तदधिष्टायकः प्राह, हे नृप! तव पत्तनं पांशुवृष्ट्या स्थलं भावि! अतो नाहं तत्र समेष्यामि, त्वं मा शोचीः, ततः स नृपोऽवंतीदेशान्न्यवर्त्तत, मार्गस्यांतराले चतुर्मासकं समागतं, राजा तत्रैव शिबिरं न्यधात्, तत्र दशपुरं जातम्॥

अन्यदा पर्युषणापर्वणि उदायने पौषधिके सूदः प्रद्योतमपृच्छत्, किमद्य नृप! भोक्ष्यसे? तच्छ्रुत्वाऽवंतीशः क्षोभादिति दध्यौ, अहो! अद्य पृष्टं तत् किं कारणम्? इति मत्वा सूदकारमपृच्छत्, हे सूद! अद्य पृष्टस्य हेतुर्वद, सूदेनोक्तम्, अद्य पर्युषणोत्सवो मम स्वामी उपोषितोऽस्ति अतस्त्वदर्थं रसवतीं करिष्यामि, नृपः स्माह त्वया पर्वदिनोक्तेन वरं कृतं, ममाप्युपवासोऽद्याऽस्तु! सूदोऽपि उदायनायाख्यत्, स दध्यौ अहो अस्मिन् कारागारे सति मम पर्युषणा साध्वी न स्यात्! एवमवधार्य तं निष्कास्य क्षमयामास, तस्य भालांकगोपनं स्वर्णरत्नमणिपट्टबंधेन विदधेऽवंतिदेशं च ददौ, वर्षारात्रे व्यतिक्रांते उदायनः स्वपुरीं प्राप, उदायनो मूलप्रतिमायै द्वादशग्रामसहस्रान् पूजार्थं प्रददौ, ततः प्रभावतीदेवाज्ञया तां नूतनां मूर्त्तिमपूजयत्॥

अन्यदा स्वपौषधागारे पौषधं जग्राह, मध्यरात्रे शुभध्यानस्थितस्येदृगध्यवसायोऽभूत्, "ते नृपादयो धन्या वंद्या ये श्रीवीरजिनांतिके दीक्षां प्रपेदिरे, यदि स्वामी मां पुनाति तर्हि तत्पादमूले प्रव्रज्यामादाय कृती स्याम्!" भग-

वान् तन्मनोगतं विज्ञाय तत्राऽगात्, नृपः कूणिकवद्वंदनाय निर्गतः विधिना स्वामिदेशनां श्रुत्वा गृहे गतः सन् एवं दध्यौ, "अहो ! अहं नरकांतं राज्यमभीचये सूनवे न ददामि" इति मत्वा केशिनि भागिनेये राज्यश्रियं चक्रे, ततः केशिकृतमहामहो नृपः प्रव्रज्यामुपात्तवान्, व्रतवासरात्तीव्रतपोभिः स्वात्मानमशोषयत् ॥ एकदा नीरसाहारैर्मुनेर्व्याधिरुत्पन्नः स मुनिर्वैद्येन दृष्टः कथितश्च त्वद्देहं दधिभक्षणेन रक्ष्यम्, गतस्पृहोऽपि स मुनिर्दध्यर्थं गोष्ठे विचरति ॥

अन्यदा भुवि विहरन् मुनिर्वीतभये गतः, तदामात्यः केशिनृपं जगौ, "एषस्तव मातुलस्तपसा निर्विण्णस्तव राज्यं ग्रहीष्यति, त्वमस्य विश्वासं माकार्षीः !" केशिनोक्तमस्यैवास्ति राज्यं सुखेन गृह्णातु ! मंत्री प्राह, राज्यं पुण्यैर्लभ्यते तल्लब्धं कथं दीयते ? अतोराजन्नस्य मुनेर्विषं देयम् ! ! मंत्रिणा प्रेरितः केशी मातुलाय पशुपालकया सविषं दधि दापयामास, तद्विषं देवेन संहृत्योक्तं सविषं दधि मा भुंक्ष्व, दधिस्पृहां मा कृथाः, तेन भक्षणं परिहृतम्, रोगो वार्द्धितः, रोगहते पुनर्दधि जग्राह, सा देवता त्रीन् वारान् विषं जहार, एकदा देवप्रमादेन राजर्षिमुनिः सविषं दधि अभोजयत्, विषवीचिभिरात्मनः शरीरं व्याप्तं ज्ञात्वाऽनशनं प्रपेदे, त्रिंशद्दिनानि अनशनं पालयित्वा उत्पन्नकेवलज्ञानो विपद्य शिवं गतः । ततः मन्युना देवेन एततपुरं पांशुवृष्ट्या पूरितम् ॥

इतश्च जनके गृहीतव्रते अभीचिसुतो दध्यौ, अहो ! मत्पितृणा मां त्यक्त्वा भागिनेयाय राज्यं दत्तम् ! धिक् पितुर्विवेकम् ! ततः केशिनः सेवां त्यक्त्वा पित्रापमानितः कूणिकासन्ने जगाम, वीरवाण्या बुद्धः श्राद्धधर्ममपालयत्

परमुदायने वैरं न तत्याज, प्रांते पाक्षिकानशनेन मृत्वा तदनालोच्य भवनपतिदेवो जातः, तत्रैकपल्यायुष्कतश्च्युत्वा महाविदेहे अभीचिजीवः शिवं गमिष्यति, श्रीवीरनिर्वाणतः षोडशशतनवषष्टि (१६६९) वर्षाणि यदा यास्यंति तदा पांशुपूरात् तां मूर्त्ति कुमरभूपः कर्षयिष्यति, पूर्ववच्च तां पूजयिष्यतीति ॥

"उत्सृज्य सावद्यमुदायनोऽसौ, श्रीपर्वघस्रेषु निरीहभक्त्या। जग्राह धर्मं शुभयोगसंयुतं तद्वद्विधेयो व्रतिभिर्गृहस्थैः ॥१॥"

श्रीपर्वपुण्यकृत्यानि, श्रीलक्ष्मीसूरिणा मुदा। श्रीप्रेमविजयाद्यर्थं, व्याख्यानाय स्तुतानि च ॥ १ ॥

॥ इति पर्युषणाष्टाह्निकासत्कतृतीयाह्नो व्याख्यानं समाप्तं, तत्समाप्तौ च समाप्तमिदं पर्युषणाष्टाह्निकाव्याख्यानं श्रीविजयलक्ष्मीसूरिविरचितम् ॥

॥ सूरिं श्रीविजयानन्दं, विजयानन्दकारकम् । "आत्माराम" इति ख्यातं, वन्दे सद्गुणलब्धये ॥ १ ॥

॥ श्रीपर्युषणापर्वाष्टाह्निकाव्याख्यानं समाप्तम् ॥

॥ वल्लभविजयस्त्वेष, शिष्यशिष्यस्य शिष्यकः । नित्यं स्मरति यं भक्त्या, स ददातु सदा सुखम् ॥ १ ॥

श्रीआत्मानन्द–ग्रन्थरत्नमालायां चतुश्चत्वारिंशत्तमम् (४४) रत्नम्

पण्डितावतंसश्रीमच्छीलरत्नसूरिकृतः

चतुर्विंशतिजिनस्तुतिसंग्रहः।

(चैत्यवन्दनचतुर्विंशतिकाः)

श्रीमद्वल्लभविजय-शिष्य-मुनिललितविजयोपदिष्टजलालपुरवास्तव्यश्राद्धवर्य्यशा० "उकाजीरामाजी" इत्यस्य द्रव्यसाहाय्येन

प्रकाशयित्री–भावनगरस्था–श्रीजैनआत्मानन्दसभा।

इदं पुस्तकं मुम्बय्यांवल्लभदास–त्रिभुवनदास गांधी सेक्रेटरी जैनआत्मानन्दसभा भावनगर इत्यनेन निर्णयसागरमुद्रणालये कोलभाटवीथ्या २३, तमे गृहे रामचन्द्र येसू शेडगेद्वारा मुद्रयित्वा प्रकाशितम्।

वीरसंवत्. २४४१ आत्मसंवत् २०. विक्रमसंवत्. १९७१.

Printed by Ramchandra Yesu Shedge, at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay.
Published by Vallabhadas Tribhuvandas Gandhi, Secretary, Jaina Atmananda Sabha, Bhavanagar.

॥ श्रीमच्छील–रत्नसूरिकृतस्तुतिसंग्रहः ॥

॥ अथ श्रीआदिनाथस्तुतिः[1] ॥

चिदानंदलीलारसास्वादलीनं,गुणैः सिद्धिभाजामनंतैरहीनं। मुदा सर्वदा श्रीयुगादीशदेवं,स्तुवे भद्रदायिक्रमाम्भोजसेवं॥१॥
गृहस्थो बभाषे कलाशिल्पसारं,क्रमात् केवली यश्च धर्मप्रकारं।स एव प्रभुः सर्वलोकोपकारी,न चान्यस्ततो ज्ञाननैर्मल्यधारी२
महाशुद्धसिद्धान्तमध्ये प्रसिद्धं,प्रतीतं पुराणेषु शोभासमृद्धं।गतं वेदवेदान्तशास्त्रेऽवदातं,यदीयं चरित्रं न च कापि मातं॥३॥
अनन्तं पुनन्तं जनं भक्तिमन्तं,हरन्तं दुरन्तं प्रमादं स्फुरन्तं। जिनं नाभिभूपालवंशावतंसं,श्रये तं शरण्यं शिवाम्भोजहंसं॥४॥
कलाकेलिसर्पप्रणाशे सुपर्णः, सुवर्णोपमानोल्लसद्देहवर्णः । वृषांकः सुखांकूरमेघः सुरम्यं,युगादीश्वरो मे प्रदत्तां सुसाम्यं॥५॥

॥ अथ श्रीअजितनाथजिनस्तुतिः[2] ॥

कुशलकाननपुष्टिबलांगकं, भवदवानलशान्तिबलाहकं। अजिततीर्थपतिं श्रितवत्सलं, भजत भव्यजना! विगतच्छलं ॥१॥
विमलकेवलबोधकलाधरं, भविकलोकचकोरकलाधरं । करिवरांकितपादपयोरुहं नम जिनं जितशत्रुतनूरुहं ॥ २ ॥

---

१ भुजङ्गप्रयातंवृत्तम्. २ द्रुतविलम्बितवृत्तम्

विजयिनी जननी ननु गर्भगे, व्यजनि यत्र बुधैःसदिदं जगे। मृगपतौ सबलेन्तरमाश्रिते, गिरिगुहा किल कैःपरिभूयते?॥३॥
अपि गदायुधचक्रिपुरंदर—स्थिरपराक्रमभंगकरः स्मरः। सुकृतिभिःकिल यस्य जगत्पतेर्झटिति नामबलादपि जीयते॥४॥
सततमक्षयमोक्षपदं श्रितः, स्फुरदनंतचतुष्टयशोभितः। अजिततीर्थकरो मम मंगलं, दिशतु शाश्वतसौख्यमलम्फलम्॥५॥

॥ अथ श्री संभवजिनस्तुतिः ॥

लोचनानंदविस्तारि चंद्राननं, मोहमातंगभेदाय पंचाननं। विश्वविख्यातनित्योदितप्राभवं, संभवं शंभवं स्तौमि भक्त्याभवं१
येन गर्भस्थितेनापि भूमंडले,शस्यवृद्ध्या सुभिक्षं विधायाखिले।केवलित्वे पुनर्बोधिबीजार्पणाद्धारी?वात्सल्यधीःसर्वसाधारणा
शोषितो येन संसारघोरार्णवश्चूर्णितश्च प्रमादाचलःसध्रुवः।मोहसेनापि सा दुर्जया निर्जिता,शक्तिमानं गुरूणां हि को वेदिता
देवदेवं दयावल्लरीमंडपं, दुष्कृतानोकहच्छेदकानेकपं। पापपंकापनोदाय चंडातपं, संस्तुवे तं तृतीयं तु तीर्थाधिपं ॥४॥
श्रीजितारिक्ष्मापालसेनांगजः, स्वर्णशैलद्युतिभ्राजिवाजिध्वजः।
तीर्थनाथस्तृतीयोऽस्तु रत्नत्रय—त्रायको मे त्रिलोकीशवंद्योदयः॥५॥

३ स्रग्विणीवृत्तम्.

॥ अथ श्रीअभिनंदनजिनस्तुतिः ॥

गुणौघमंदारनिवासनंदनं, मिथ्यात्वपापोपशमाय चंदनम् । श्रीसंवरक्ष्मारमणस्य नंदनं, मुदा स्तुवे तीर्थकराभिनंदनं॥१॥
यं संस्तुवानस्य दशातरंगिनी, सहस्रचंद्रांशुरयात् प्रसर्पिनी । क्षेत्रे नदीमातृकतागते हरेर्वृद्धिं ययौ भक्तिलतामनोहरे ॥२॥
भजन् वनौका अपि यस्यनिश्चलं,पादांबुजं नित्यमहोमहाफलं।जिनेंद्रवाच्यं हरितामसंगतः,स्यान्निष्फलं नो गुरुसेवनं ततः३
पराभवन् योगबलेन संवरद्विषं सुविस्तारितराजिसंवरः । ददातु देवो नवमं रसं वर–स्वजन्मसंतर्पितराजसंवरः ॥ ४ ॥
ध्यानं चतुर्थं समवाप्य विश्रुतं, योऽर्थं चतुर्थं भजतिस्म शाश्वतं।अरे चतुर्थे शुभितःशुभोदयश्चतुर्थतीर्थप्रभुरस्तु सश्रिये ॥५॥

॥ अथ श्रीसुमतिनाथस्तुतिः ॥

मंगलावलिनदीमहार्णवं, मंगलाप्रवरकुक्षिसंभवम् । मेघभूपतिसुतं दयालता–मेघमश्चत जिनं जना रताः ॥ १ ॥
मातुरुत्तमतमाभवन्मतिर्गर्भगेऽपि ननु यत्र जाग्रति । अत्र किं कुतुकमस्य संस्मृतेरप्यदोषधिषणाप्रजायते ॥ २ ॥
अंगुलीदलविराजिकोमलम् , स्मेरमुत्तमगुणालिकोमलम् । यस्य शस्यपदपद्मयामलम् , संश्रयन्नलभते नयामलम् ॥ ३ ॥
पंचबाणबलभंजनक्षमम् , पंचभेदिविषयछिदागमम् । पंचसारसमितिप्रपंचकम् , पंचमं नमत तीर्थनायकम् ॥ ४ ॥
कर्णिकारकुसुमासमप्रभः, क्रौंचलक्षितपदो हताशुभः । तीर्थनाथसुमतिर्मनोधृतिं, यच्छतान्मम तथा चनिर्वृत्तिम् ॥५॥

---

४ उपजातिवृत्तम् अथवा विभावरीवृत्तम्. ५ रथोद्धतावृत्तम् अथवा श्येनी ॥

॥ अथ श्रीपद्मप्रभजिनस्तुतिः[६] ॥

प्रशस्तपद्माकरवत्सुवृत्तः, श्रीसद्मपद्माङ्कपदोऽतिवित्तः । पद्मप्रभःपातु विभुर्विभाव–विभावरीयान् कृतकर्म्मलावः ॥ १ ॥
सरोरुहंराजगणेन वन्द्य–मानं यदंह्रिश्रयणेन सद्यः । पराभवं राजभवं निरास्य, प्रमाणमेतन्महदाश्रयस्य ॥ २ ॥
मूर्त्तौ विभान्त्यत्र विभातसन्ध्याः, सद्धर्मकर्मप्रकृतावबन्ध्या । मूर्तिर्यदीयाऽवसरं विवेका–दित्योदयार्थं ददते प्रवेका॥३॥
धराधिराजो धर एव धन्यः, सीमासुसीमारमणोनचान्यः । कुले यदीये कमले मराल–लीलां ललौ यःसुषमाविशालः॥४॥
प्रवालबालारुणपद्मराग–रम्याङ्गकान्तिः परिमुक्तरागः । षडन्तरारिक्षयकारशक्तिं, षष्ठो जिनो यच्छतु मे सुयुक्तिं ॥ ५ ॥

॥ अथ श्रीसुपार्श्वनाथस्तुतिः[७] ॥

श्रीप्रतिष्ठनरनाथतनूजम्, सुप्रतिष्ठनरनिर्मितपूजम् । देवदेवमभिनौमि सुपार्श्वम्, देवताऽधिपतिसेवितपार्श्वम् ॥ १ ॥
स्वस्तिकारणमनोहरदृष्टिम्, स्वस्तिकाङ्कितपदं कृततुष्टिम् । यं जनस्य भजतो ननु पृथ्वी–सूनुमृद्धिरिह राजति पृथ्वी ॥२॥
दुःखदुर्गतिविरोधिविकारा–स्तावदेव भविनां स्युरपाराः । यस्य यावदतुलं त्वभिधानं, स्मर्यते न शुभसिद्धिविधानम् ॥३॥
दर्शनश्रुतलघूरुचरित्रा–रागताःशिवफला इतिनेत्राः। येन जल्पितुमिवाचपताका, उच्छ्रिताः प्रकटपञ्चफणाङ्काः ॥ ४ ॥
हारिवारिजरजःकरणरङ्गत् पिञ्जरांजगसुभगःशुभचंगः । श्रीसुपार्श्वभगवानघसंग–च्छेदकोऽस्तु गुणगौरवतुंगः ॥ ५ ॥

---

६ उपजातिवृत्तम्. ७ स्वागतावृत्तम्.

॥ अथ श्रीचंद्रप्रभुजिनस्तुति ॥

चंद्रोपलप्रवरचंद्रमयूखचंद्र–गौरांगसंगतगुणाश्रममुक्ततंद्र ! ।
चंद्रप्रभ ! त्रिभुवनाधिपते ! प्रसीद सौभाग्यसुंदरविभो ! कुशलावलीद ! ॥ १ ॥
श्रीखंडपांडुरमुदारतनुं भवंतं, व्याख्यानसद्मनि सुधागमृतं किरंतं ।
दृष्ट्वा जनेऽजनिजनेति ननुप्रतीतिर्गंगागिरेर्हिमवतःप्रसरीसरीति ॥ २ ॥
विश्वेशशीतरुचिरेपकलालयोपि, पीयूषपात्रमपिऋक्षगणाधिपोपि ।
त्वांसेवतेऽधिकसमृद्धिकृते नु नित्यं, राजा न तृप्यति ततःकियतेति सत्यं? ॥ ३ ॥
उद्दामसेनमहसेनवसुंधरेश–श्रीलक्ष्मणासुतविवेककरोपदेश ! ।
चंद्रांक ! भव्यजनचंद्रकिधूमयोने, सौम्यां दृशं मयि निधेहि शुभश्रियोने ! ॥ ४ ॥
अष्टांगयोगकुशलेष्टगुणोष्टसिद्धि–दाताष्टकर्मबलनिर्दलनप्रसिद्धिः ।
अष्टासु मे श्रवणमातृषु वत्सलत्वमासोष्टमो दिशतु विश्रुतसत्यसत्वः ॥ ५ ॥

---

८ वसन्ततिलकावृत्तम्.

॥ अथ श्रीसुविधिजिनस्तुतिः[9] ॥

गुणराजिमनोहररत्ननिधिं, वरशान्तरसोर्मिसुधाजलधिं। परिणामहितोदितपुण्यविधिं, प्रणमामि जिनेन्द्रमहं सुविधिं॥१॥
मुदितामलसाधुलसच्चरितम्, विदिताऽखिललोकमिहादुरितं।
सुखमिच्छसि चेच्चतुर! त्वरितं, सुविधिं भज तत्सुखमाभरितं ॥ २ ॥
दधतं सततं सुमहानवमं, विगलन्मलजालमिहानवमम्। सदनं परमप्रशमं नवमं, जिनमञ्चत भव्यजना! नवमं ॥ ३ ॥
पुरुहूतपरंपरया महितम्, समधामहितं सुषधाम हितम्। विदलन्तमघं भविनाम हितम्, सुविधिं स्मर भव्यकलामहितम्॥४
कमलोपमदक्षिणवामकरम्, क्रमसेवनसोदरसन्मकरम्। अवदातयशोजितसोमकरम्, सुविधिं श्रयतानघधामकरम्॥५॥

॥ अथ श्रीशीतलनाथस्तुतिः[10] ॥

अमृतमसमतृष्ण–तापनिर्वापहेतुं, हितमगदमदभ्रं रागरोगं विनेतुम्।
कतकफलमशुद्धस्वान्तपानीयशुद्ध्यै, जिनपतिमहमीडे शीतलं पुण्यबुद्ध्यै ॥ १ ॥
दृढरथनृपनन्दानन्दनं नेत्रलीलां वुजविकसनभानुं विभ्रतं योगिलीलां।
भजत शुभजनाः। श्रीवत्ससश्रीकपादम्, जिनममुमकलङ्कम् सर्वदा निर्विषादम् ॥ २ ॥

---

९ तोटकवृत्तम्. १० मालिनीवृत्तम्.

विषमविषयकीलाघोरसंसारदावे, कथमहह !!! दुरंतक्लेशदायिस्वभावे ।
दधति रतिमधन्या मोहमूढापदेनं, तदुपशमकमासं नो भजन्ते यदेनम् ॥ ३ ॥
कलुषशिरसि भेदे जाज्वलद्वज्ररूपम् , निविडजडिमनाशे चंडभानुस्वरूपम् ।
कथमिह भजमानाः सत्यशब्दार्थदाक्ष्यम् , यमभिदधति देवं साधवः शीतलाख्यम् ॥ ४ ॥
अपि दशसु दिशासु स्पष्टबोधप्रकाशम् , सदशभिधसुधाभुक्शाखिवत्पूरिताशम् ।
दशविधयतिधर्म्मोल्लासवृद्ध्यै त्रिकालम् , दशमजिनवरेन्द्रम् नौमि भावादनालम् ॥ ५ ॥

॥ अथ श्रीश्रेयांसनाथस्तुतिः[११] ॥

श्रेयोलक्ष्मीराजमानारविन्दम् , पादद्वन्द्वोपास्तिकृद्देववृन्दम् ।
साधुश्रेणिकौमुदीशुक्लपक्षम् , श्रीश्रेयांसं संश्रयेस्तारिपक्षम् ॥ १ ॥
निर्वाणश्रीकंठमाणिक्यहार !—क्लेशध्वान्तच्छेदसूर्यावतार ! ।
वाच्यातीतस्फीतवृत्तप्रतीत !, त्रायेयाऽहं नत्वया पापभीतः ॥ २ ॥
तृष्णालोलोल्लोलमालाकरालम् , मोहाम्भोधिं प्रोच्छलत्पङ्कजालम् ।

---

११ शालिनीवृत्तम्.

उत्तीर्णास्ते ये मतं तेऽधिरूढाः, स्वामिन्! श्रीमन्! यानपात्रं ह्यमूढाः ॥ ३ ॥
दम्भोलोभोमोहमायाप्रमादाः, कामक्रोधभ्रान्तिमिथ्याविवादाः ।
देवासन्ना नैव तेस्युर्वराकाः, सिंहस्येव स्फूर्जतःफेरुपाकाः ॥ ४ ॥
माद्यन्मायासूर्यजाकामपाल !, श्रेयान् श्रेयःकल्पवृक्षालवाल ! ।
नेतश्चेत श्चोक्षभावेन युक्तम्, त्वत्सेवातो मेऽस्तु कालुष्यमुक्तम् ॥ ५ ॥

॥ अथ श्रीवासुपूज्यस्तुतिः[१२] ॥

वसुपूज्यराजकुलकीर्त्तिकरं, हरिपूज्यपादमतुलर्द्धिभरं । प्रभुवासुपूज्यभगवंतमहं, प्रणमामि भव्यजनदत्तमहं ॥ १ ॥
भुवनावतंसभविनोकुशला, भगवन्! सुखैकरसिकाःसकलाः। ननु तन्निमित्तमतुलार्त्तिहरं, न भवंतमीश्वरंभजंति परं॥२॥
विषयाविपाकविषभोगसमा, निखिलाःकषायरिपवो विषमाः।परिहृत्य तानिति कृती रमते, परिणामहारिणि तवेश !मते३
भववासिना सुखकलाविरला,विपुलापि राज्यकमला तरला।भवतःप्रभोरभिलषामि नतः, स्थिर(मेक)मेव शिवसौख्यमतः४
तरुणांशुमालिसमकांतिकलः,कलिताखिलत्रिभुवनो विमलः। विभुवासुपूज्यत्तभुपूज्यपद,द्वितयःप्रसीदतु स मेंसुखसंपदः५

१२ प्रमिताक्षरावृत्तम्.

॥ अथ श्रीविमलनाथस्तुतिः[13] ॥

यशसा सकलेंदुमंडलं, जितवंतं विकलंकमुज्वलं । मदमेघघटामहावलं, विमलं नौमि जिनं सुनिर्मलं ॥ १ ॥
भगवन् ! भववाससंकटं, विकटंनामविदन्नपिस्फुटं । निविडैर्ननु कर्मबंधनैः, स्थितवानस्मि सि तो हहा घनैः ॥ २ ॥
भुवनेश ! वनेऽथवाजने, नगरेसंवसथेऽथपत्तने । भवरागविपोर्मिविह्वलः, क्षणमात्रं न सुखं लभे किल ॥ ३ ॥
विमलोसि जिनाभिधानतः, परिणामादपि तादृशो मतः । अधुनापि तवाभिधापुनर्विमलं देव ? करोतु मे मनः ॥ ४ ॥
गिरिमंदरकांतिसुंदरः, प्रमदोदारनमत्पुरंदरः । विशदं दिशतु त्रयोदश, सुकृतोद्द्योतपदं जिनो यशः ॥ ५ ॥

॥ अथ श्रीअनंतजिनस्तुतिः[14] ॥

विवेककनकाचलोद्गतमरीचिकल्पद्रुमस्फुरच्छिवफलोल्लसत्सुखरसैकभोगोत्तमः ।
अनंतजिननायकःसकलसंपदां दायकः, प्रभुर्विजयतां नमद्भविकसंहतेस्त्रायकः ॥ १ ॥
कुबोधखरमारुतोपचितकोपदावानलप्रसर्पदशुभाशयप्रबलधूममालाकुलः ।
भवन्मतं सुधाःसरःशरणयामियावन्मतं, कुकर्मपिशुनःस मां नयति तावदेवेशतं ॥ २ ॥

---

१३ वैतालीयवृत्तम्. १४ पृथ्वीवृत्तम्.

अनीतिवनवेष्टितो ऽशुभविकल्पकूटोन्नतः सदाकठिनतान्वितः सुकृतमार्गरोधोद्यतः ।
तदैवनुभिद्यतेविषममानशैलस्ततस्तवशयदिशासनंकुलिशमाप्यतेभाग्यतः ॥ ३ ॥
कुबुद्धिविषवल्लरीघनमनःकुडंगस्थितिः प्रतारणमहाविषासुचपलातिगुप्तागतिः ।
विभोनिकृतिपन्नगीननुतदैवदूरंचरेद्भवद्वचनगारुडंयदिहृदिप्रकामंस्फुरेत् ॥ ४ ॥
भृतत्रिभुवनोदरप्रचुरपंकलोभार्णवः, प्रमापणघटोद्भवः सुकृतिलोकनेत्रोत्सवः ।
चतुर्दशजिनेश्वरः शिवफलंगुणस्थानकं, चतुर्दशमसौविभुर्दिशतुमेघपुत्रोऽधिकं ॥ ५ ॥

॥ अथ श्रीधर्मनाथस्तुतिः ॥ [१५]

धर्मोद्यमारामलसद्वसंतं, भव्यांगिनां चित्तगृहे वसंतं । श्रीधर्मनामानमधीशमीडे, लीनं शिवे सर्वनिवृत्तपीडे ॥ १ ॥
चंद्रप्रदीपद्युपतीनुदीतान्, सर्वानतीत्योल्लसता प्रतीतान् । केनापि नित्यं स्वपरावभासि-ज्ञानप्रकाशेन विभो ! विभासि२
आदर्शमध्ये मित एवतावद्धीनोधिकोवाप्रतिभातिभावः । त्रैलोक्यदर्शी निखिलांस्त्वमेव, भावानृतान् पश्यसि देवदेव ! ३
कर्मांकुरात्यंतभिदे लवित्रं, शुद्ध्यै महातीर्थजलं पवित्रं । विचारयंस्ते विमलं चरित्रं, को नाम चित्ते नदधाति चित्रं ?॥४॥
श्रीभानुवंशाम्बुजचंडभानुः, प्रभानुगामी कृतमेरुसानुः । धर्मो जिनः पातु निरस्तमारिः, श्रीसुव्रताकुक्षिदरीमृगारिः ॥५॥

१५ उपजातिवृत्तम्.

॥ अथ श्रीशांतिनाथस्तुतिः[16] ॥

जगत्त्रयीजीवनजागरूक !, प्रभावशांते ! गतलोभलूक ! । जय प्रभो ! मन्मथदंदशूक !, सुपर्णसंक्रंदनशस्यशूक ! ॥ १ ॥
वसुंधरावल्लभविश्वसेन–कुलप्रदीपक्षितमोहसेन ! । नमोऽस्तु ते श्रीअचिरांगजात !, सुजातरूपद्युतिदेह ! तात ! ॥२॥
स्थितस्य गर्भेपि तव प्रभावः, स्वयंभुविक्लेशहरःस्वभावः । समुल्लसावृतिमध्यगस्य, गंधो यथा जातिमणीवकस्य ॥ ३ ॥
त्वया यथारक्षि कपोतपोतः, संपन्नकष्टाद्व्यसनाब्धिपोत ! । तथैव मां रक्ष विभो ! प्रमाद–निषादबंधाद्विहितप्रसादः॥४॥
भवानभूःपंचमचक्रवर्त्ती, हरन् जनानां भुवि काममर्त्तीः । श्रुतस्तथा षोडश तीर्थनाथस्तनुष्व शांते ! समतां ममाथ ॥५॥

॥ अथ श्रीकुंथुनाथस्तुतिः[17] ॥

कल्याणकोटीकमलामहोत्पलं, कालत्रिकज्ञानलसत्कलाकुलं । आनम्य सम्यक्कमनीयभावतः, कुंथुं कृतार्थी भविताहमादृतः
जीवप्रदेशाःसमयापराणवः,प्रत्यर्थमंतातिगपर्यवोद्भवः । निःशेषमेतत्प्रतिभाति ते स्थिरं, ज्ञाने तदस्मात्परमस्तिकिंकरं?॥२॥
उत्फुल्लनेत्राःसुरराजराजयः, प्रोल्लासिरोमांचविवृद्धमूर्त्तयः । त्वां पूजयेयुः सुरपादपस्रजांपुंजेन दूरेभगवन्! पराःप्रजाः ॥३॥
पापादपायो नपरःपरोभवेदेको ह्युपायस्तदपासने भवे । यत्तेपदांभोजविलोकनं हितं, तत्तात्त्विकैर्देव ! तदेव संश्रितं ॥ ४ ॥
बिंदारसस्येवसुवर्णसंचयः, स्यादेकवाक्यादपि ते महोदयः । तत्त्वां भजे कुंथुविभो ! निरंतरं संपूर्णमूलातिशयैर्मनोहरं ॥५॥

---

१६ उपजातिवृत्तम्. (उपेन्द्रवज्रा) १७ इन्द्रवंशावृत्तम्.

ततश्च्युत्वा स्थूलेष्वहमिह निगोदेषु गतवानथ प्रत्येकद्रुक्षितिजलमरुद्वह्निषु भवाः ।
मया संख्यातीता घनतरमपूर्यंत विकलेष्वथो संख्यातामे जनिमरणकोटीचमिमिलो (?) ॥ ३ ॥
ततो लेभे पंचेंद्रियचरिगतौदुःखनिचयान्, क्षुधातृष्णाशीतातपवधनबंधादिविषयान् ।
अथप्राप्तःसप्तस्वपि नरकपृथ्वीषुयदहं, महाकष्टं वाचा जिनप ! ननुतद्वक्तुमसहं ॥ ४ ॥
इति भ्रांत्वा भ्रांत्वा भुवनहित ! लक्षाःसुविततास्तनूभृद्योनीनां चतुरधिगताशीतिकलिताः ।
मया भाग्याभोगाद्विभुरथभवानापि भगवन् ! नमे ! नेतस्तन्मे भवभवहरोऽचिंत्यबलवन् ! ॥ ५ ॥

॥ अथ श्रीनेमिनाथस्तुतिः[२२] ॥

ब्रह्माद्वैतप्रवरपदवीबोधने चंडभासं, शोभासंपत्तिलयमखिलश्रीविलासैकवासं ।
श्रीमन्नेमिं समरससुधावारपारावतारं, विश्वाधारंस्तवनविषयीकर्तुमिच्छाम्युदारं ॥ १ ॥
श्रेयःश्रेणीकुलयदुकुलोत्तंसवित्तावदात ! प्रेंखच्छंखांकितनरपतिश्रीसमुद्रांगजात ! ।
श्रीशैवेय ! प्रवरकरुणावल्लिवृद्ध्यै वसंत ! श्रीमन्नेमे जयजयविभो ! पादपूतोज्जयंत ! ॥ २ ॥
आगत्यापि श्वशुरसदनं बंधुवर्गानुरोधाद्दृष्ट्वाबद्धानशरणपशूनेव कारुण्यबाधात् ।

२२ मन्दाक्रान्तावृत्तम्.

तानामोच्य न्यवृतउदितात्त्वं स्ववीवाहकृत्यादेवंदेव ! प्रभवतिदयातावकीनैवसत्या ॥ ३ ॥
त्वय्येकस्मिन्नविजितवतिख्यातवीरावतारे, त्रैलोक्यस्याप्यविजयइवाभूज्जयःशंवरारेः ।
मत्तो हस्ती परवनचरांस्त्रासयन्नप्यरातेर्नश्यन् सिंहात्किमुबलवतांमुख्यतामत्र गाते ॥ ४ ॥
सौभाग्यश्रीसुभगभग वन्नुज्जयंताद्रिश्रृंग–प्राप्तप्रेंखद्व्रतनिरुपज्ञाननिर्वाणरंग ।
श्रीमन्नेमि (मे !) दुरितगहनच्छेदनोदारनेमे ! बुद्धिं शुद्धां वितनु नितरां पावनेदर्शनेमि (?) ॥ ५ ॥

॥ अथ श्रीपार्श्वनाथस्तुतिः ॥[२३]

विघ्नव्रातविवर्त्तकर्त्तनजगद्विख्यातवीरव्रतः, स्वस्तिश्रेणिसमृद्धिपूरणविधौ कल्पद्रुमो विश्रुतः ।
पुण्यप्रौढिपदप्रभावपटुताप्रत्यक्षपूषाप्रियं, श्रीपार्श्वः परमोदयं जिनपतिः पुष्णातु शास्यश्रियं ॥ १ ॥
श्रीवामारमणाश्वसेननृपतिश्रेष्ठान्वयश्रीकर ! प्रेंखत्पावनकायकांतिविजितप्रत्यग्रधाराधर ! ।
पुण्यप्राप्यपदप्रसादपरमश्रीमूलतासाधन–श्लाघ्यश्रीधरणेंद्रवंद्यचरण ! त्रायस्व मां पाप्मनः ॥ २ ॥
स्वावासात्सहसा समेत्य च भवान् कारुण्यतस्तात्त्विकादुद्दध्रे विषमाज्ज्वलंतमुरगं दीनं यथापावकात् ।
तां कारुण्यदृशं विधाय भगवन् ! मामप्यनन्याश्रयं, विश्वव्यापिकषायभीषणदवादाकर्ष देव ! स्वयं ॥३॥

२३ शार्दूलविक्रीडितम्.

किल कर्म पुमांस्तवरुच्यरवैरसदस्य सदस्य सदस्यति वै । वनवज्जलदस्य जलैःसुचिरं, समता समता समतापभरं ॥ ६ ॥
तव भक्तिरिहापि तमांसिगतेर्द्धिपराजपराज पराजयते । अत एव बुधैर्भवतोत्रकृतां जपराय पराय परायणता ॥ ७ ॥
भवते हरतिस्तवनाम्निममा, भवमा भवमा भवमालिसमा । शममुत्र भजेयभवचरणभ्रमरोहमरोहमरोहगुण ! ॥ ८ ॥
*इति चारुचंपककनककेतुककायकांतिकलाजुषः, सीमंधरस्य श्रीजिनस्य प्रणत सुकृतश्रीपुषः ।
यमकाष्टकं यः प्रातरशठः पापठीति स पापतः, शीघ्रं विमुक्तः श्रयति परमानंदमुन्नतिशोभितः ॥ ९ ॥

॥ अथ वीतरागाऽष्टकम् ॥

तुभ्यं नमः समयधर्म्मनिवेदकाय ! तुभ्यं नमस्त्रिभुवनेश्वरशेखराय !
तुभ्यं नमः सुरनरामरसेविताय ! तुभ्यं नमो जिन ! जनार्चितपङ्कजाय ! ॥ १ ॥
तुभ्यं नमो विलसिते हरिचन्दनाय ! तुभ्यं नमो वरकुलाम्बरभास्कराय !
तुभ्यं नमः प्रणतदेवनराधिपाय ! तुभ्यं नमःप्रवररूपमनोहराय ! ॥ २ ॥
तुभ्यं नमो हरिणनायकनायकाय ! तुभ्यं नमो यतिपतिप्रतिपालकाय !
तुभ्यं नमो विकचनीरजलोचनाय ! तुभ्यं नमः स्तनितनादविराजिताय ! ॥ ३ ॥

* हरिगीतवृत्तम्.

तुभ्यं नमः कुशलमार्गविधायकाय ! तुभ्यं नमो विकटकष्टनिषेधकाय ! ।
तुभ्यं नमो दुरितरोगचिकित्सकाय ! तुभ्यं नमस्त्रिजगतो हृदि भूषणाय ! ॥ ४ ॥
तुभ्यं नमो दलितमोहतमोभराय ! तुभ्यं नमः कनकसन्निभभूघनाय ! ।
तुभ्यं नमोऽप्यखिलसद्गुणमन्दिराय ! तुभ्यं नमो मुखकलाधिकचन्द्रिकाय ! ॥ ५ ॥
तुभ्यं नमोऽतिशयराजिविभूषिताय ! तुभ्यं नमः कुमतितापसुभञ्जनाय !
तुभ्यं नमो सुखपयोधिवहित्रकाय[1] ! तुभ्यं नमो विगतकैतवमत्सराय ! ॥ ६ ॥
तुभ्यं नमो विदितभव्यजनाशयाय ! तुभ्यं नमो निखिलसंशयवारकाय !
तुभ्यं नमः प्रथितकीर्त्तियशोन्विताय ! तुभ्यं नमो जितहृषीकमुनीश्वराय ॥ ७ ॥
तुभ्यं नमः प्रमितपुद्गलनिर्मिताय ! तुभ्यं नमः सकलवाङ्मयपारगाय !
तुभ्यं नमो भविकचातकनीरदाय ! तुभ्यं नमश्चरणवैभवदायकाय ! ॥ ८ ॥

---

१ यानपात्राय.

कामं कामठवारिवाहपटलोपज्ञप्रसर्पत्पयः–पूरःप्लावयति स्म लेशमपि नो त्वा ध्यानगं निर्भयः ।
तर्त्किं कौतुकमत्र मोहजलधिर्लोकत्रयव्यापकः, सोऽपि क्षोभयतिस्म नो जिनपते! त्वां संसृतेस्तारक !॥४॥
जीरापल्लि–फलर्द्धि–काशि–मथुरा–शंखेश्वर–श्रीपुर–त्रंबावत्यणहिल्लपत्तनमुखप्रख्याततीर्थेश्वर ! ।
चंचच्चित्रकमूलिकेवभगवन् ! पार्श्व त्वदीयाभिधा कुर्यान्मेगुणकोशमक्षयमसावाराध्यमाना त्रिधा ॥ ५ ॥

॥ अथ श्रीमहावीरदेवस्तुतिः[२४] ॥

श्रेयोमूलानुकूलागमशुचिवचसां जन्मभूःपावनानां, मिथ्यात्वप्राणपोपप्रदकुमतगिरां छेदकर्त्ताघनानां ।
त्रैलोक्यत्राणलीलानलसगुणलसद्धर्मसाम्राज्यहेतुर्नेता श्रीवर्द्धमानो मम नुतिविषयं भक्तिभाजः समेतु ॥ १ ॥
गर्वोखर्वोद्रिश्रृंगस्थिरदृढमनसां वादधीसादराणां, प्रौढानामैंद्रभूतिप्रमुखगणभृतां चातुरीसुंदराणां ।
गूढं संदेहजालं सुविषममभिनलीलया त्वं क्षणेन, छिंदानो ध्वांतराशिं लगयति किमु वा वत्सरंवासरेनः ? ॥२॥
ज्ञानं स्वार्थावभासि प्रमितिरभिमता तत्प्रमेयाश्चभावा, नित्यं चोत्पत्तिनाशध्रुवगुणसहसव्यक्तिसत्तास्वभावाः ।

२४ स्रग्धरावृत्तम्. ☞ नोट–विद्वद्वन्न ! सुज्ञमडल ! अनेक स्थलोंमें तलायशकरनेसेंभी शीलरत्नसूरिकृत–"चैत्यवंदनचौवीसा" की दूसरी प्रति उप. लब्ध नहीं हुई इसलिये केवल हमारे पासके एकही पुस्तकके आधारसें इसे मुद्रितकरायागया है, संभव है कि प्रथम सस्करणमें बहुत अशुद्धि रही होंगी आप विद्वान् महाशय सुधारकर वाचें और अगर शुद्धप्रति पास होवेतो उससें मिलान कर हमकों सूचना देनेकी कृपा करें द० ललितवि० १–८–१५–मुंबई.

नित्यानित्यं जगत्स्यात्सदसदथपराकर्तृकं कर्मवश्यं, धर्मः सम्यग्दयात्मा गदितुमिति भवानेव जानात्यवश्यं ॥३॥
तत्त्वालोकाय नेत्रं भवजलधितटाऽऽवासये यानपात्रं, चित्तोल्लासाय मित्रं कलुषतरु(भरो)च्छेदनायोग्रदात्रं ।
नानासत्तर्करत्नप्रकरगुरुनिधिः शासनं ते चिराय, त्रातर्जीयान्निमित्तं सकलसुकृतिनां पुण्यपुण्योदयाय ॥ ४ ॥
पुण्यद्धर्याभासमानः कनकगिरिगुरुप्रस्थशोभासमानः, स्फूर्जत्काकंपमानद्युतिरतिशयतः कल्पवृक्षोपमानः ।
नित्यं निर्लोभमानः परमसुखकलासंपदा शोभमानः, स्वामी श्रीवर्द्धमानः प्रदिशतु कुशलं सद्गुणैर्वर्द्धमानः ॥ ५ ॥

॥ इति श्रीशीलरत्नसूरिकृताः सर्वजिनानां स्तुतयः संपूर्णाः ॥

॥ अथ श्रीशीलरत्नसूरिकृतं श्रीसीमंधरस्वामिनोऽष्टकम्* ॥

कल्याणलतासुवसंतर्तुम्, सुरभासुरभासुरभावनतं । सीमंधरजिनमतिमधुरगिरं, नम काममकाममकामहरं ॥ १ ॥
क्रियते स्तवतस्तव येन समासमतारसतारसतारसना । सफलां तमवैमि महीवलया—समहं समहं समहं कलया ॥ २ ॥
गुरुगर्वमसौ हरतात्तपन—च्छविदेह विदेह विदेहजनः । जिनपं सुखयन्ननुमोहकिरा, सितया सितया सितया स्वगिरा॥३॥
रसना हि परत्र कृते रमते, मम नाममनाममनागपिते । इतरत्र पिकी तु धृतिं प्रणते, सुरसालरसालरसालभते ॥ ४ ॥
त्वरते मम हृद्भजनाय भवत् पदयोरुदयोरुदयोरु नच । त्वमुपायमधीश तदासिकरं, वद भावदभावदभाग्यहरम् ॥ ५ ॥

---

* उपस्थितावृत्तम्.

॥ पुरुषादानीपार्श्वदेवनाममाला ॥

पासजिनराजसुणिआजशंखेश्वरा, परमपरमेश्वराविश्वव्याप्यो ।
भीडभांगीजराजादवांनीजई, थिरथई "शंखपुरी" तामथाप्यो ॥ १ ॥ पास० ॥
सारिकरिसारमनोहारिमहाराज तुं, मानमुझवीनतीमन्नमाची ।
अवरदेवातणीआसकुणकामनी, स्वामीनी सेवनाएकसाची ॥ २ ॥ पास० ॥
तूंहीअरिहन्तभगवन्तभवतारणो, वारणोविषमभयदुःखवाटे ।
तूंहीसुखकारणो सारणोकाजसहु, तूंही मनोहारणो साचमाटे ॥ ३ ॥ पास० ॥

अंतरीक अमीझरा पासपंचासरा भोयरापास भाभा भटेवा । विजयचिन्तामणि सोमचिंतामणिस्वामीसिप्रातणी करोसेवा
फलवृद्धिपास मनमोहना मगसिया तारसला नमुंनांहितोटा । सकवलेचाप्रभु आसगुल अर्जिया बंभणा थंभणा पासमोटा ॥५॥
गैबी गोडी प्रभुनीलकंठा नमुं हलधरा सांमला पासप्यारा । सुरसरा कंकणा पास दादा वली सूरजमंडणनमुंतरणतारा ॥६॥
जगतवल्लभ कलिकुंड चिंतामणि–लोढणासेरिसा स्वामिनमिये।नाकोडन्हावला कलियुगा रावणा पोसीनापास नमिदुःखदमियें
स्वामीमणिक नमुंननाथ सारोडिया–नकोडा जोरवाडी जगेशा । कापली दौलती प्रसमिया मुंजपुरा गाडरीया प्रभुगुणगिरेश
हमीरपुरपास प्रणमुंवली नवलखा भीडभंजन प्रभुभीडभागे । दुःखभंजन प्रभु डोकरीया नमुंपास जीरावला जगतजागे ॥९॥

उज्जंती उज्जेणिये सहसफणा साहेबा "महिमदावाद" कोको कडेरा।
नारिंगा चंचू चल्ला चवलेसरा तवली फलविहार नार्गेद्रनेरा ॥ १० ॥
पासकल्याण गंगाणिया प्रणमिये पल्लविहार नार्गेद्रनाथा। कुर्कटईश्वरा पासछत्राअहि कमठदेवेनम्या शक्रसाथा ॥ ११ ॥
तिमिरगोगो प्रभु दूधिया वल्लभा शंखल प्रीतकल्लोल बूढा। ढींगडमल्ला प्रभुपास झोटिंगजीजासमहिमानहींजगतगूढा॥१२॥
चोरवाडी जिनराज उद्दामणि पास अज्झावरा नेवनंगा। कापडेरा वजेवो प्रभु छेछली सुखसागरतणाकरेसंगा ॥ १३ ॥
विज्जुला करकडुं मंडलीका वली मुहुरिया श्रीफलोधी अनिंदा। औआ कुलपाक कंसारिया डंबरा अनियला पासप्रणमुआनंदा
नवसारी नवपल्लवा पासजी श्रीमहादेववरकाणवासी। परोकल टांकल नवखंडा नमुं भवतणीजायजेहथीउदासी ॥ १५ ॥
मनवंछित प्रभुपासजीनेनमुं वलीनमुं नाथ साचानगीना । दुःखदोहगतजीसाधुमारगभजीकर्मनाकेसरीथीनबीना ॥१६॥
अश्वनृपनन्द कुलचन्द प्रभु अलवरा बीबडा पास कल्याणराया। होवेकल्याणजसनामथीजय हुवेजननीवामानेधनजेहजाया
एकशतआठप्रभुपासनामैंथुण्यासुखसंपतिलह्योसर्ववार्ते । ऋद्धियशसंपदासुखशरीरेसदानाहीमनांमाहिरेकोईवाते ॥ १८ ॥
साचजाणीस्तव्योमनमाहरे गम्योपास हृदयेरम्योपरमप्रीते। समीहितसिद्धिनवनिद्धिपाम्योसहुमुझथकीजगतमांकोनजीते १९
काजसहुसारजे शत्रुसंहारजेपासशंखेसरामौजपाउं। नित्यपरभातिउठीनमुंनाथजी!, तुझविनाअवरकुंणकाजे ध्याउं ? ॥ २० ॥
अठारएकासियेफालगुणमासिये, बीजकज्जलपखेछंदकरियो। गौतमगुरुतणाविजयखुशालने, उत्तमेसंपदासुखवरियो ॥२१॥

॥ इति चतुर्विंशतिजिनस्तुतिसंग्रहः ॥

श्रीआत्मानन्द-ग्रन्थरत्नमाला-त्रयोदशं रत्नम् (१३)

श्रीमद्रत्नसिंहसूरिविरचितवृत्तिसहिता

परमाणुखण्डषट्त्रिंशिका-पुद्गलषट्त्रिंशिका-निगोदषट्त्रिंशिका।

पूज्यपादप्रवर्तकश्रीमत्कान्तिविजयान्तिषच्चतुरविजयोपदिष्टसुरतनगरनिवासि-
ओशवालज्ञातीय-श्रेष्ठि-प्रेमचन्द्रतनुजतिलकचन्द्र-द्रव्यसाहाय्येन
प्रकाशयित्री-श्रीआत्मानन्दसभा-भावनगर।

इदं पुस्तकं मुम्बय्यां **वल्लभदास-त्रिभुवनदास गांधी** सेक्रेटरी **जैन आत्मानन्दसभा भावनगर** इत्यनेन
निर्णयसागरमुद्रालये कोलभाटवीथ्यां २३, तमे गृहे रा. ये. शेडगे द्वारा मुद्रयित्वा प्रकाशितम्।

वीरसंवत् २४३९. आत्मसंवत् १७. विक्रमसंवत् १९६९.

॥ प्रस्तावना ॥

इह हि प्रथितप्रथिमप्रभावपरमपवित्रार्हत्प्रवचने द्रव्यानुयोगस्यातिगहनत्वेन तत्तत्त्वजिज्ञासूनां मन्दमतीनां भव्याङ्गिनां परोपकृतये परमागमावगतावितथपरमार्थपारदृश्वभिः पूर्वसूरिभिः पारगतप्रणीतपरमागमपरतन्त्राणि प्रणीतानि दृश्यन्तेऽनेकानि प्रकरणरत्नानि । तेष्वन्यतमप्रकरणरूपा एवैताः परमाणुखण्डषट्त्रिंशिका–पुद्गलषट्त्रिंशिका–निगोदषट्त्रिंशिका वरीवृत्यन्ते । तासु प्रथमा पञ्चदशगाथात्मकत्वेन खण्डरूपा पञ्चमाङ्गस्य पञ्चमशते सप्तमोद्देशके पुद्गलवचनप्रस्तावे—"एयस्सणं भंते ! दव्वट्ठाणाउयस्स खेत्तट्ठाणाउयस्स ओगाहणट्ठाणाउयस्स भावट्ठाणाउयस्स कयरे कयरे जाव विसेसाहिया वा ?" इत्यस्य सूत्रस्य, द्वितीया पुनः तस्यैवाङ्गस्य तस्मिन्नेव शतेऽष्टमोद्देशके पुद्गलप्रदेशनिरूपणप्रसङ्गे—"एयस्सणं भंते ! दव्वादेसेणं खेत्तादेसेणं कालादेसेणं भावादेसेणं सप्पएसाणं अप्पएसाण य कयरे कयरे जाव विसेसाहिया वा ? " इत्यस्य सूत्रस्य, तृतीया च तस्यैवाङ्गस्यैकादशे शते दशमोद्देशके निगोदस्वरूपनिरूपणावसरे—"लोगस्सणं भंते ! एगंमि आगासपएसे जहन्नपए जीवपएसाणं उक्कोसपए जीवपएसाणं सव्वजीवाणं कयरे कयरे जाव विसेसाहिया वा ? " इत्यस्य सूत्रस्य व्याख्याने सूत्रोक्तार्थविवरणरूपा वृद्धोक्ता गाथा नवाङ्गीवृत्तिकृद्भिश्चन्द्रकुलाम्बरपार्वणेन्दुश्रीमदभयदेवाचार्यैर्लिखिताः किञ्चिद्विवृताश्च, तासामेव किञ्चिद्विशेषविवरणरूपा वृत्ती रचितेयं प्रतिभाप्रागल्भ्यविस्मायितसूरसूरिभिः श्रीरत्नसिंहसूरिभिः ।

एते श्रीरत्नसिंहसूरयः कदा कतमं महीमण्डलं मण्डयामासुः ? इति जिज्ञासायां जातायाम्—श्रीजैनश्वेताम्बरमहासभा (कॉन्फरेन्स) मुद्रितजैनग्रन्थावलीनामपुस्तकेऽनेके रत्नसिंहनामान आचार्या दरीदृश्यन्ते, परमासां वृत्तिप्रान्ते वृत्तिविधायिभिः स्वसमयगच्छगुर्वादीनामभिधानसा-

नुल्लिखितत्वात्तेषु कतमेऽस्या वृत्त्याः प्रणेतारः इति निर्णेतुं न शक्यते, किन्तु संवत्१५४६लिखितपुस्तकादर्शदर्शनेन न तेऽर्वाचीना आचार्या इत्येतावन्मात्रमवगम्यते । मूलग्रन्थकारा अपि ये केचनाचार्या अभयदेवसूरितः पुरातना एव ।

यद्यपि आसां षट्त्रिंशिकानामणहिल्लपुरपाटकादिपुस्तकभाण्डागारेष्वनेके आदर्शा वरीवृत्यन्ते; तथाप्यस्माभिस्तु महता प्रयासेन सप्तैव पुस्तकान्यधिगतानि । तेष्वाद्यं न्यायाम्भोनिधितपागच्छाचार्यश्रीमद्विजयानन्दसूरिपुरन्दरशिष्योपाध्यायधारेयश्रीमद्वीरविजयपूज्यानाम्, द्वितीयं तृतीयं पुनः पूज्यपादप्रवर्त्तकश्रीमत्कान्तिविजयमहर्षीणाम्, चतुर्थं पञ्चमं तु श्रीमद्विजयानन्दसूरिप्रशिष्यजैनशासनप्रभावकशान्तमूर्त्तिश्रीमद्हंस-विजयवाचंयमानाम्, षष्ठं पुनः मुनिल्लाभश्रीमन्मोहनलालमुनीनां सुरतनगरस्थज्ञानमन्दिरसत्कं शुद्धतमम्, सप्तमं च पत्तनसङ्घसंबन्धिभाण्डागार-सत्कम् । एतत्पुस्तकसप्तकाधारेण संशोधितेऽप्यत्र निबन्धे विषयस्यातिगहनत्वेन मतिमान्द्येन वा यत्र क्वचनाशुद्धिः कृता जाता वा भवेत्तत्र संशोधनीयं कृपयाऽनवगीतागमज्ञैरिति प्रार्थयते—

प्रकल्पिताञ्जलिः प्रवर्तकश्रीमत्कान्तिविजयपादसेवाहेवाकः

चतुरविजयो मुनिः

स्थितयः शेषास्तिस्रोऽपि प्रत्येकं क्रमेणाऽसंख्यगुणिताः कथं ज्ञेयाः? इति संक्षेपार्थः॥विस्तरार्थस्तु—स्थानायुरिति पदं क्षेत्रादीनां[1] प्रत्येकमभिसंबध्यते। तत्र क्षेत्रस्थानायुः, अवगाहनास्थानायुः, द्रव्यस्थानायुः, भावस्थानायुश्च। तत्र क्षेत्रस्थानायुः क्षेत्रे एकप्रदेशादौ स्थानं यत्पुद्गलानामवस्थानं तद्रूपमायुः क्षेत्रस्थानायुः, पुद्गलानामेकक्षेत्रेऽवस्थानमित्यर्थः १ अवगाहनाया नियतपरिमाणनभःप्रदेशव्यापित्वस्य पुद्गलानां स्थानमवस्थानं तद्रूपमायुरवगाहनास्थानायुः,पुद्गलानामेकयावगाहनयावस्थानकाल इत्यर्थः २ द्रव्यस्याणुत्वादिभावेन यदवस्थानं तद्रूपमायुर्द्रव्यस्थानायुः, पुद्गलानामेकस्कन्धपरिणामेनावस्थानकाल इत्यर्थः ३ भावस्य कृष्णत्वादिगुणकदम्बकस्य स्थानमवस्थानं तद्रूपमायुर्भावस्थानायुः, पुद्गलेषु विवक्षितकृष्णत्वादिगुणानामवस्थानकाल इत्यर्थः ४। ननु क्षेत्रस्यावगाहनायाश्च को भेदः ? उच्यते, क्षेत्रमवगाढमेव, अवगाहना तु विवक्षितात्क्षेत्रादन्यत्रापि पुद्गलानां तत्परिमाणक्षेत्राऽवगाहित्वमिति। अयमभिप्रायः—यदा विवक्षितक्षेत्रे कश्चित्पुद्गलस्कन्धोऽसत्कल्पनया नभःप्रदेशदशकावगाढो यावत्तिष्ठति, तावत्क्षेत्रस्थानायुरित्युच्यते। यदा तु विवक्षितक्षेत्रात्क्षेत्रान्तरेषु स एव पुद्गलस्कन्धो नभःप्रदेशदशकावगाढतयैव यावत्संचरति, तावदवगाहनास्थानायुरित्युच्यते। यस्तु स एव पुद्गलस्कन्धो विश्रसापरिणामेन पिण्डितरूतन्यायेन घनीभवन्नभःप्रदेशपञ्चकेऽपिण्डितरूत[2]न्यायेन स्फारीभवन्नभःप्रदेशपञ्चदशके वा यावत्तिष्ठति, तावद्द्रव्यस्थानायुरित्युच्यते। यदा तु स एव पुद्गलस्कन्धः स्वपरमाणुवियोजनेन अपरपरमाणुसंयोजनेन वा द्रव्यान्तरत्वमापन्नोऽपि[3] यावत्पूर्वपर्यायान् कृष्णत्वादीन्न मुञ्चति, तावद्भावस्थानायुरित्युच्यते। तेषां क्षेत्रावगाहनाद्रव्यभावस्थानायुषां परस्परेण

---

१ 'क्षेत्रादीनाम्' इति क्वचिन्नास्ति। २ 'रूत' इति पदं पुस्तकान्तरे नास्ति। ३ 'ऽपि' इति पद क्वचिन्नास्ति ॥

यदल्पबहुत्वं तस्मिन् विचार्ये पुद्गलानां क्षेत्रावस्थानायुः सर्वस्तोकं, शेषाण्यवगाहनास्थानायुःप्रभृतीनि त्रीणि यथोत्तरमसंख्यगुणानीति कथमिति शिष्यप्रश्नः ॥ १ ॥ इमामेव गाथामुत्तरगाथाभिः प्रपञ्चयन्नाह—

खित्तामुत्तत्ताओ, तेण समं बंधपच्चयाभावा । तो पोग्गलाण थोवो, खित्तावट्ठाणकालो उ ॥ २ ॥

क्षेत्रस्याकाशस्यामूर्त्तत्वेन तेन क्षेत्रेण सह पुद्गलानां विशिष्टबन्धप्रत्ययस्य विशिष्टबन्धकारणस्य स्नेहादेरभावान्नैकत्र क्षेत्रेऽतिचिरं तिष्ठन्तीति शेषः । अयमभिप्रायः—विवक्षितक्षेत्रे विशिष्टपरिणामवन्तः पुद्गलाश्चिरावस्थानकारणाभावात् कियन्तमपि कालं स्थित्वा तमेव परिणाममत्यजन्तोऽपरापराणि क्षेत्राणि स्पृशन्तीति यस्मादेवं ततः पुद्गलानां क्षेत्रावस्थानकालः 'थोवो' इति सर्वस्तोक इत्यर्थः ॥ २ ॥ अथावगाहनायुर्बहुत्वं भाव्यते[1]—

अन्नखित्तेगयस्सवि[2], तं चिअ माणं चिरंपि संचरइ । ओगाहणनासे पुण, खित्तन्नत्तं फुडं होइ ॥ ३ ॥

अन्यक्षेत्रगतस्यापि पुद्गलस्कन्धस्य तदेव प्रमाणं सैवावगाहना चिरमपि संचरति अवतिष्ठते । अयमाशयः—विवक्षितक्षेत्रे यावत्सु आकाशप्रदेशेषु परमाणुस्कन्धोऽवस्थित आसीत् , तावत्प्रदेशव्यापितयाऽन्यक्षेत्रगतोऽपि लभ्यत इति । अवगाहनानाशे पुनः क्षेत्रान्यत्वं स्फुटं भवति; अवगाहनानाशश्च परमाणुस्कन्धस्य संकोचेन स्तोकप्रदेशाऽवस्थायितायां विकाशेनाधिकप्रदेशावस्थायितायां वा संभवतीति । इह पूर्वार्द्धेन क्षेत्राद्धाया अधिकाऽवगाहनाद्धा, उत्तरार्द्धेनावगाहनाद्धातो नाधिका क्षेत्राद्धेति भावितम् ॥ ३ ॥ कथमेतदेवं ? इत्युच्यते—

---

१ 'भावयन्नाह' इति क्वचित् । एवं 'भाव्यते' इत्यवतरणिकापदे सर्वत्र ज्ञेयम् । २ ' खित्त ' इत्यपि क्वचित् ॥

ओगाहणावबद्धा, खित्तद्धा अकिआवबद्धा य । न उ ओगाहणकालो, खित्तद्धामित्तसंबद्धो ॥ ४ ॥

अवगाहनायां नियतप्रदेशव्यापितायां, अक्रियायां चागमनरूपायामवबद्धा नियता नियन्त्रिता क्षेत्राद्धा एकक्षेत्रावस्थानकालो विवक्षितावगाहनासद्भाव एव अक्रियासद्भाव एव च क्षेत्राद्धाया भावात् । उक्तव्यतिरेके चाभावात् । अवगाहनाद्धा तु न क्षेत्रमात्रे नियता, क्षेत्राद्धाया अभावेऽप्यवगाहनाद्धाया अभावादिति ॥ ४ ॥ अथ निगमनम्[1]—

जम्हा तत्थन्नत्थ य, सच्चिअ ओगाहणा भवे खित्ते । तम्हा खेत्तद्धाओऽवगाहणऽद्धा असंखगुणा ॥ ५ ॥

यस्मात्तत्र विवक्षितेऽन्यत्र च विवक्षितादितरस्मिँश्च क्षेत्रे सैव प्राक्तनक्षेत्रसंबद्धैवावगाहना भवेत्, तस्मात्क्षेत्राद्धायाः सकाशादवगाहनाद्धाऽसंख्यातगुणेति ॥ ५ ॥ अथ द्रव्यायुर्बहुत्वं भाव्यते—

संकोअविकोएण व, उवरमिआएऽवगाहणाएवि । तित्तिअमित्ताणं चिअ, चिरंपि दव्वाणऽवत्थाणं ॥६॥

संकोचेन विकोचेन वा अवगाहनायामुपरतायामपि यावन्ति द्रव्याणि यत्संख्याः पुद्गलाः स्कन्धरूपतामापन्नाः पूर्वमासंस्तावतामेव चिरमपि तेषामवस्थानं संभवति । अयमाशयः—विवक्षितक्षेत्रप्रदेशव्यापित्वं नाम परमाणूनामवगाहना, तेभ्योऽल्पतरेषु बहुतरेषु च क्षेत्रप्रदेशेषु तावतामेव पुद्गलानां सूक्ष्मीभवनं संकोचः, स्फारीभवनं विकोचः । ततश्च संकोचविकोचाभ्यामवगाहनाया उपरमो भवतीति । एतावताऽवगाहनानिवृत्तावपि द्रव्यं न निवर्त्तेत इत्युक्तम् ॥ ६ ॥

१ इतः परं 'आह' इत्यधिकं क्वचित् । अग्रेऽपीदृशे स्थाने एवमेव ज्ञेयम् ॥

अथ द्रव्यनिवृत्तिविशेषेऽवगाहना निवर्त्तत एवेत्युच्यते—

संघायभेयओ वा, दव्वोवरमे पुणाई संखित्ते । निअमा तद्दव्वोगाहणाइनासो न संदेहो ॥ ७ ॥

[2]परमाणुस्कन्धस्यापरपरमाणुभिः सह संगमः संघातः, [3]तस्यैव कतिपयपरमाणूनां विघटनं भेदः, ततः संघाताद्भेदाद्वा पुनः परमाणूनां यः संक्षिप्तः स्तोकावगाहन ([4]स्कन्धो न तु प्राक्तनावगाहन) स्तत्र सति यो द्रव्योपरमो द्रव्यान्य[5]त्वं लघुतया गुरुतया वा पूर्वपरिणामोच्छेद इत्यर्थः । तत्र सति ([6]न च सङ्घातेन न संक्षिप्तः स्कन्धो भवति, तत्र सति सूक्ष्मत-[7]रत्वेनापि तत्परिणतेः श्रवणात्) नियमात्तेषां द्रव्याणामवगाहनाया नाशो भवति ॥ ७ ॥ कस्मादेवं ? इत्यत्रोच्यते—

ओगाहद्धा दव्वे, संकोअविकोयओ अ अवबद्धा । न उ दव्वं संकोअणविकोअमित्तंमि संबद्धं ॥ ८ ॥

अवगाहनाद्धा अवगाहनावस्थानकालो द्रव्येऽवबद्धा नियतत्वेन संबद्धा, कथं ? संकोचाद्विकोचाच्च परमाणूनां सूक्ष्मपरिणामतयाऽन्योन्यानुप्रवेशः संकोचः, सूक्ष्मपरिणामपरिणतानां तु बादरपरिणामतया भवनं विकोचः, तौ संकोचविकोचौ समाश्रित्येत्यर्थः । अवगाहना हि द्रव्ये संकोचविकोचयोरभावे भवति संकोचविकोचसद्भावे च न भवतीत्येवं द्रव्येऽवगाहना नियतत्वेन संबद्धेत्युच्यते—द्रुमत्वे खदिरत्वमिव नहि यत्र द्रुमत्वं नास्ति तत्र खदिरत्वं प्राप्यत इति । उक्तविपर्ययमाह—न पुनर्द्रव्यं संकोचनविकोचनमात्रे सत्यपि अवगाहनायां नियतत्वेन संबद्धं संकोचनेन च । अव-

---

१ 'पुणो य' इति कचित् । २ इतः प्राक् 'इह विवक्षित' इत्यधिकं कचित् । ३ 'परमाणुस्कन्धस्य' इति कचित् । ४ एतत्कोष्ठान्तर्गतः पाठः कचिन्नास्ति । ५ 'द्रव्यान्यथात्वं' इति कचित् । ६ एतत्कोष्ठान्तर्गतः पाठः कापि नास्ति । ७ 'सूक्ष्मबादरत्वेन' इति कचित् । ८ 'मित्यत उ' इति कचित् ॥

गाहनानिवृत्तावपि द्रव्यं न निवर्त्तत इत्यवगाहनायां द्रव्यं नियतत्वेनासंबद्धमित्युच्यते खदिरत्वे द्रुमत्ववत्; खदिरत्वमन्तरेणापि द्रुमत्वस्य शिंशपादिष्वप्युपलम्भात् ॥ ८ ॥ अथ निगमनम्—

जम्हा तत्थन्नत्थ व, दव्वं ओगाहणाइ तं चेव । दव्वद्धासंखगुणा, तम्हा ओगाहणऽद्धाओ ॥ ९ ॥

यस्मात्तत्र विवक्षितावगाहनायां अन्यत्र संकोचविकोचकृतेऽवगाहनान्तरे द्रव्यं तदेव लभ्यते, चिरावस्थायित्वात्तद्व्यावष्टब्धपरमाणुसंख्यायास्तदवस्थत्वात् । तस्मादवगाहनाद्धातो द्रव्याद्धाऽसंख्यगुणेति ॥९॥ अथ भावायुर्बहुत्वं भाव्यते–

संघायभेअओ वा, दव्वोवरमेऽवि पज्जवा संति । तं कसिणगुणविरामे, पुणाइ दव्वं न ओगाहो ॥ १० ॥

संघातभेदौ पूर्ववत् । ततः संघातादिना द्रव्योपरमेऽपि द्रव्यान्यथात्वेऽपि पर्यवा वर्णगन्धादयः सन्ति, यथा घृष्टपटे शुक्लादिगुणाः सकलगुणोपरमे पुनर्न तद्द्रव्यं न द्रव्यावगाहोऽनुवर्त्तते, अनेन पर्यवाणां चिरस्थानं द्रव्यस्य त्वचिरमित्युक्तम् ॥ १० ॥ अथ कस्मादेवं? इत्युच्यते—

संघायभेयबंधाणुवत्तिणी निच्चमेव दव्वद्धा । न उ गुणकालो संघायभेयमित्तद्धसंबद्धो ॥ ११ ॥

इह विवक्षितपरमाणुस्कन्धस्यापरपरमाणुभिः सह संगमः संघातः, तस्यैव कतिपयपरमाणूनां विघटनं भेदः, ततः संघातभेदलक्षणाभ्यां धर्माभ्यां यो बन्धः संबन्धस्तदनुवर्त्तिनी तदनुसारिणी नित्यमेव द्रव्याद्धा । इह च संघातभेदबन्धानुवर्त्तित्वं द्रव्याद्धाया वैधर्म्यद्वारेण ज्ञेयम् , संघाताद्यभाव एव द्रव्याद्धायाः सद्भावात् संघातादिसद्भावे चाभावात् । न पुनर्गुणकालो

गुणावस्थानाद्धा संघातभेदमात्रकालसंबद्धः संघातादिसद्भावेऽपि गुणानामनुवर्त्तनादिति ॥ ११ ॥ अथ निगमनम्—

जम्हा तत्थन्नत्थ व, दव्वे खित्तावगाहणासुं च । ते चेव पज्जवा संति तो तदद्धा असंखगुणा ॥ १२ ॥

यस्मात् 'तत्थन्नत्थ व' इति प्रत्येकमभिसंबध्यते, बन्धानुलोम्याच्च द्रव्यादीनामन्यथोपन्यासः कृतः । ततश्च यस्मात्तत्रान्यत्र च क्षेत्रे तत्रान्यत्र चावगाहनायां, तत्रान्यत्र च द्रव्ये इति सर्वत्र चिरावस्थायित्वात्त एव पर्यवा लभ्यन्ते, तस्मात्तदद्धेति पर्यायावस्थानकालोऽसंख्यातगुणेति ॥ १२ ॥ अत्र शिष्यः पूर्वपक्षगाथामाह—

आह अणेगंतोऽयं, दव्वोवरिमे गुणाणऽवत्थाणं । गुणविप्परिणामंमि अ, दव्वविसेसो अणेगंतो ॥ १३ ॥

नायमेकान्तो यद्द्रव्योपरमे गुणानामवस्थानं विनाशस्यापि दर्शनाद्गुणविनाशे च द्रव्यविशेषो द्रव्यविपरिणामोऽवश्यंभावी विनष्टेष्वपि गुणेषु द्रव्यस्य तदवस्थस्य दर्शनात् ॥ १३ ॥ इदमेव दर्शयति—

विप्परिणयंमि दव्वे, कम्मिवि गुणपरिणई भवे जुगवं । कम्मिवि पुण तदवत्थेवि होइ गुणविप्परीणामो १४।

कस्मिन्नपि द्रव्ये स्वपरमाणुविघटनेनापरपरमाणुसंघट्टनेन वा विपरिणते द्रव्ये तुल्यकालं प्राक्तनपरिणामादीनां गुणानामपि विपरिणतिर्भवति । कस्मिन्नपि पुनर्द्रव्येऽपरपरमाणुसंगमस्वपरमाणुविगमाभावात्तदवस्थेऽपि गुणविपरिणामो गुणविनाशो भवति, घटद्रव्ये तदवस्थेऽपि पाकेन प्राक्तनश्यामरूपादिगुणनाशदर्शनात् ॥ १४ ॥ अत्रोत्तरम्—

भण्णइ सच्चं किं पुण, गुणबाहुल्ला न सव्वगुणनासो । दव्वस्स तदन्नत्तेवि बहुतराणं गुणाण ठिई ॥१५॥

॥ इति परमाणुविचारप्रतिबद्धा खण्डषट्त्रिंशिका समाप्ता ॥

द्रव्यान्यथात्वे गुणान्यथात्वं द्रव्यतादवस्थ्ये गुणान्यथात्वं च यदुक्तं तत् सत्यम्, अनयोरपि भङ्गकयोः कथंचिद्धट-नात्किं पुनर्गुणानां वर्णगन्धरसादीनां बाहुल्यादेकस्मिन् परमाणुस्कन्धे भूयसामवस्थानान्न सर्वेषां गुणानां विनाशो भवति। द्रव्यस्य तदन्यत्वेऽपि परमाणुसंगमविगमाभ्यां नाशोऽपि बहुतराणां वर्णगन्धरसादीनां नष्टेष्वपि केषुचित्परिणामादिषु गुणेषु गुणानां स्थितिरिति हेतोर्द्रव्यस्थानायुषो भावस्थानायुरसंख्यगुणमिति स्थितम् ॥ १५ ॥

॥ इति परमाणुविचारप्रतिबद्धा श्रीरत्नसिंहसूरिविवृता खण्डषट्त्रिंशिकावृत्तिः समर्थितेति ॥

॥ इति परमाणुखण्डषट्त्रिंशिका सवृत्तिका समाप्ता ॥

॥ अर्हम् ॥

सवृत्तिका पुद्गलषट्त्रिंशिका ।

अथ पञ्चम एव शतेऽष्टमोद्देशके पुद्गलप्रदेशनिरूपणस्वरूपे द्रव्यतः, क्षेत्रतः, कालतो, भावतश्च सप्रदेशानां पुद्गलानां सूत्रोक्ताल्पबहुत्वस्य भावनार्थं गाथाप्रपञ्चो वृद्धोक्तो विव्रियते स चायम्—

वुच्छं अप्पाबहुअं, दव्वाखित्तद्धभावओ वावि । अपएससपएसाण पुग्गलाणं समासेणं ॥ १ ॥

द्रव्यतः सप्रदेशानामप्रदेशानां च, क्षेत्रतः सप्रदेशानामप्रदेशानां च, 'अद्धा' इति कालतः सप्रदेशानामप्रदेशानां च, भावतः सप्रदेशानामप्रदेशानां च, पुद्गलानामेकाणुकादिद्रव्याणामल्पबहुत्वं संक्षेपेण वक्ष्य इति ॥ १ ॥ अथाप्रदेशस्वरूपमाह—

दव्वेणं परमाणू, खित्तेणेगप्पएसमोगाढा । कालेणेगसमइआ, अपएसा पुग्गला हुंति ॥ २ ॥

अप्रदेशाः पुद्गला भवन्तीति सर्वत्र योज्यम् । तत्र द्रव्यतः परस्परासंपृक्ताः परमाणवोऽप्रदेशाः पुद्गला भवन्ति १ क्षेत्रत एकनभःप्रदेशव्यापिनोऽप्रदेशाः पुद्गला भवन्ति २ कालत एकसमयस्थितयोऽप्रदेशाः पुद्गला भवन्तीति ३ ॥ २ ॥ भावाप्रदेशस्वरूपनिरूपणपूर्वकं तदल्पत्वमाह—

भावेणं अपएसा, एकगुणा जे हवंति वण्णाई । ते चिय थोवा जं गुणबाहुल्लं पायसो दव्वे ॥ ३ ॥

१ 'आहुः' इति क्वचित् ॥

भावत एकगुणाः 'वण्णाई' इति वर्णादिभिः पुद्गला अप्रदेशा भवन्ति ४। अयमर्थः—एकगुणकालकैकगुणपीतकादयो वर्णतः, एकगुणसुरभिप्रभृतयो गन्धतः, एकगुणतिक्तप्रभृतयो रसतः, एकगुणरूक्षैकगुणस्निग्धप्रभृतयः स्पर्शतश्च पुद्गला भावाप्रदेशा भवन्तीत्यर्थः। त एव 'थोवा' इति सर्वस्तोकाः। यतो द्रव्ये प्रायशो गुणाः प्राचुर्य्येण भवन्ति। अयमर्थः—द्रव्ये प्रायेण द्व्यादिगुणा अनन्तगुणान्ताः कालत्वादयः स्थानबाहुल्यादनन्तगुणा भवन्ति। एकगुणकालकत्वादयस्त्वेकैकस्थानवर्त्तित्वेनाल्पा इति भावः ॥ ३ ॥

इत्तो कालाएसेण अप्पएसा भवे असंखगुणा। किं कारणं पुण भवे, भण्णइ परिणामबाहुल्ला ॥४॥

इतो भावाप्रदेशेभ्यः कालाप्रदेशा असंख्यगुणा भवेयुः; कुतो हेतोः? उच्यते—परिणामानां बहुत्वात्। अयमर्थः—[1]यो हि यस्मिन्समये यद्वर्णगन्धरसस्पर्शसंघातभेदसूक्ष्मबादरत्वादिपरिणामान्तरापन्नः स तस्मिन्समये तदपेक्षया कालतोऽप्रदेश उच्यते। तत्र वर्णाः पञ्च, गन्धौ द्वौ, रसाः पञ्च, स्पर्शा अष्टौ, एतेषु च विंशतौ पदेषु प्रतिपदमेकगुणकालकादयोऽनन्तगुणकालकपर्यवसाना एकाद्येकोत्तरेणानन्ता भेदाः पुद्गलानां प्राप्यन्ते, तेषु च सर्वेषु भेदेषु प्रतिभेदं यदैकसमयस्थितिकास्तदा कालतोऽप्रदेशा भवन्ति। तथा विशकलितानां परमाणूनामेकपुद्गलस्कन्धतया परिणमनं संघातः। एकद्रव्यात्परमाणूनां विचटनं भेदः। एकस्मिन्नपि नभःप्रदेशे द्व्यादीनां परमाणूनामवस्थानं सूक्ष्मत्वम्, सूक्ष्मपरिणामपरिणतस्य द्रव्यस्य परमाणुसंख्यानतिक्रमेण प्रतिसमयमनेकनभःप्रदेशव्यापितया भवनं बादरत्वम्। एतेष्वपि

१ अस्मिन्वाक्ये संबध्यमानयोर्यत्तच्छब्दयोः क्रियायाश्च बहुत्वं क्वचित् ॥

परिणामान्तरेषु यदा यदा तदात्वेन पुद्गला एकसमयस्थितिकाः प्राप्यन्ते, तदा तदा कालतोऽप्रदेशा उच्यन्ते । इति प्रतिपरिणामं कालाप्रदेशसंभवात्तद्बहुत्वमिति ॥ ४ ॥ एतदेव भाव्यते—

भावेण अप्पएसा, जे ते कालेण हुंति दुविहाऽवि। दुगुणादओऽवि एवं, भावेणं जावणंतगुणा ॥ ५ ॥

भावतो येऽप्रदेशास्ते कालतो द्विविधा अपि भवन्ति, अप्रदेशा सप्रदेशाश्चेत्यर्थः । तत्र एकसमयस्थितिका अप्रदेशाः, द्व्यादिसमयस्थितयस्त्वेकाद्येकोत्तरेण यावदसंख्यातसमयस्थितयस्ते सर्वे सप्रदेशा इत्यभिप्रायः । तथा भावेन द्विगुणादयोऽनन्तगुणान्ताः, एवमिति द्विविधा, कालतः सप्रदेशा अप्रदेशा भवन्तीत्यर्थः ॥ ५ ॥ ततश्च—

कालापएसयाणं, एवं इक्किक्कओ हवइ रासी । इक्किक्के[1] गुणठाणंमि एगगुणकालयाईसु[2] ॥ ६ ॥

एकगुणकालकद्विगुणकालकादिषु गुणस्थानकेषु मध्ये एकैकस्मिन् गुणस्थानके कालाप्रदेशानामेकैकराशिर्भवति[3] । अयमर्थः—एकगुणकालकादय एकाद्येकोत्तरया गुणवृद्ध्याऽनन्तगुणकालकान्ताः प्रतिगुणस्थानमनन्ताः पुद्गलाः सन्ति । एवमेकगुणनीलकादयोऽपि लभ्यन्त इति । ततश्चानन्तत्वाद्गुणस्थानकराशीनामनन्ता एव कालाप्रदेशराशयो भवन्तीति ॥ ६ ॥ अथ प्रेरकः—

आहाणंतगुणत्तणमेवं कालापएसयाणंति। जमणंतगुणट्ठाणेसु हुंति रासी वि हु अणंता ॥ ७ ॥

---

१ 'इक्किक्कगुणट्ठाणंमि' 'इक्किक्कट्ठाणंमी' इत्यपि क्वचित् । २ 'गाईसु' इति क्वचित । ३ 'एकैको राशि.' इति क्वचित् ॥

एवमिति यदि प्रतिगुणस्थानकं कालाप्रदेशराशयोऽभिधीयन्ते, ततो भावाप्रदेशेभ्यः कालाप्रदेशा अनन्तगुणाः प्राप्नुवन्ति । यतोऽनन्तेष्वेकगुणकालकद्विगुणकालकत्रिगुणकालकादिष्वनन्तगुणकालकपर्यवसानेषु गुणस्थानकेषु राशयोऽप्यनन्ता भवन्ति, अथ चोऽसंख्यातगुणत्वमिष्यत इति ॥ ७ ॥ अत्रोत्तरम्—

भण्णइ एगगुणाणवि, अणंतभागंमि जं अणंतगुणा । तेणासंखगुणच्चिय, हवंति नाणंतगुणिअत्तं ॥ ८ ॥

एकगुणकालकत्वादीनामप्यनन्तगुणकालकत्वादयोऽनन्तभाग एव वर्त्तन्ते, तेन भावाप्रदेशेभ्यः कालाप्रदेशाः परमाणुस्कन्धा असंख्यातगुणा एव भवन्ति, न त्वनन्तगुणा इति । अयमभिप्रायः—एकगुणकालकात्प्रभृति[3] एकाद्येकोत्तरेण गुणवृद्ध्योत्कृष्टसंख्यातगुणकालं यावत्संख्यातानि गुणस्थानकानि लभ्यन्ते, ततः परमेकेनापि गुणेन वृद्धौ जघन्याऽसंख्यातगुणकालकपुद्गलस्कन्धो व्यपदिश्यते । ततः प्रभृत्येकाद्येकोत्तरेणगुणवृद्ध्योत्कृष्टासंख्यातगुणकालं यावदसंख्यातानि गुणस्थानकानि लभ्यन्ते, ततः परमेकेनापि गुणेन वृद्धौ जघन्यानन्तगुणकालकपुद्गलस्कन्धो व्यपदिश्यते । ततः प्रभृत्येकाद्येकोत्तरेण गुणवृद्ध्योत्कृष्टानन्तगुणकालं यावदनन्तानि लभ्यन्ते, तथा च सति यद्यप्यनन्तगुणकालकत्वादीनां पुद्गलस्कन्धानामनन्तराशयोऽभिहिताः । तथाप्यनन्तस्यानन्तभेदत्वाद्वक्ष्यमाणैकगुणद्रव्यराशि १ संख्यातगुणद्रव्यराशि २ असं-

१ 'भवन्ति' इति क्वचित् । २ 'वा' इति क्वचित् । ३ इतः परं 'एकाद्येकोत्तरेण गुणवृद्ध्योत्कृष्टसंख्यातगुणकालकपुद्गलस्कन्धो व्यपदिश्यते ततः प्रभृति' एतावानधिकः पाठ एकपुस्तकमात्राधारत्वान्मूले नादृतः ॥

ख्यातगुणद्रव्यराशि ३ अनन्तगुणद्रव्यराशि ४ रूपराशिचतुष्टये एकगुणकालकत्वादिद्रव्यराशेरपेक्षयाऽनन्तगुणकालकत्वादिद्रव्यराशेः समग्रस्याप्यनन्तभागवृद्धत्वेनाभिहितत्वात्तचेह लघ्वनन्तत्वं ज्ञेयम् । ततः कालाप्रदेशानां नानन्तगुणत्वम्, अपि तु असंख्यातगुणत्वमेवेति ॥ ८ ॥

एवं ता भावमिणं, पडुच्च कालापएसया सिद्धा । परमाणुपोग्गलाइसु, दव्वेऽवि हु एस चेव गमो ॥९॥

एवं तावद्भावं वर्णगन्धादिपरिणामं इममभिहितस्वरूपमेकाद्यनन्तगुणस्थानवर्त्तिनमित्यर्थः । प्रतीत्याश्रित्य कालतोऽप्रदेशाः पुद्गलाः सिद्धाः स्वरूपनिरूपणेन प्रतिष्ठिताः । द्रव्येऽपि द्रव्यपरिणाममप्याश्रित्य परमाण्वादिषु, एवं भावपरिणामाभिहित एव प्रकारो ज्ञेयः । अयमभिप्रायः—ये परमाणवः परस्परमसंपृक्तास्ते द्रव्यतोऽप्रदेशा उच्यन्त इति ॥ ९ ॥

अथ क्षेत्राप्रदेशस्वरूपमाह—

एमेव होइ खित्ते, एगपएसावगाहणाईसु । ठाणंतरसंकंतिं, पडुच्च कालेण मग्गणया ॥ १० ॥

एवमेव द्रव्यपरिणामवद्भवति, क्षेत्रे क्षेत्रमधिकृत्य एकप्रदेशावगाढादिषु पुद्गलभेदेषु स्थानान्तरगमनं प्रतीत्य कालेन कालाप्रदेशानां मार्गणा । अयमभिप्रायः—यथा द्रव्यपरिणाममाश्रित्य परमाणवो द्रव्यतोऽप्रदेशास्तथैकैकनभःप्रदेशावगाहितायां सत्यां स्वस्वक्षेत्रममुञ्चन्तः क्षेत्रतोऽप्रदेशाः पुद्गला उच्यन्ते । यदा यदा तु स्वस्वक्षेत्रं विमुच्य क्षेत्रान्तरेषु पुद्गलाः संचरन्ति, प्रतिस्थानं च समयमेकमवतिष्ठन्ते; तदा तदा कालतोऽप्रदेशाः पुद्गला व्यपदिश्यन्ते इति ॥ १० ॥ यथा क्षेत्रत एवमवगाहनादितोऽपीत्येतदुच्यते—

संकोअविकोअं पिहु, पडुच्च ओगाहणाइ एमेव । तह सुहुमबायरथिरेयरे य सद्दाइपरिणामं ॥ ११ ॥

अवगाहनायाः संकोचं विकोचं च प्रतीत्य कालाप्रदेशाः स्युः । अयमभिप्रायः—ये परमाणुसंख्यापेक्षया स्तोकनभःप्रदेशावगाहिनो भूत्वा समयमेकं स्थित्वा पुद्गलस्कन्धा बहुतरनभःप्रदेशावगाहिनो भवन्ति, समयमेकं वावतिष्ठन्ते; यदा च बहुतरनभःप्रदेशावगाहिनो भूत्वा समयमेकं स्थित्वा पुनरल्पनभःप्रदेशावगाहिनो भवन्ति, तदा संकोचे विकोचेऽपि सति पुद्गलस्कन्धाः कालतोऽप्रदेशाः स्युः । तथा सूक्ष्मबादरस्थिरास्थिरशब्दमनःकर्मादिपरिणामं च प्रतीत्य कालतोऽप्रदेशाः स्युः । अयमभिप्रायः—ये सूक्ष्मबादरादिपरिणाममापन्नाः पुद्गलस्कन्धा यदा समयमेकमवतिष्ठन्ते, तदा ते कालतोऽप्रदेशाः स्युः ॥ ११ ॥ ततश्च—

एवं जो सव्वोऽवि अ, परिणामो पुग्गलाण इह समए । तं तं पडुच्च एसिं, कालेणं अप्पएसत्तं ॥ १२ ॥

एवं उक्तप्रकारेण यः सर्वोऽपि च परिणामः पर्यायान्तरेण भवनं पुद्गलानामिति परमाणूनां स्कन्धानां चेहेति जिनप्रवचने वर्णितः; तं तं परिणाममाश्रित्य 'एसिं' इति पुद्गलानामेकसमयस्थितिकानां कालेनाप्रदेशत्वं ज्ञेयमिति ॥ १२ ॥ तथा च सति किं सिद्धम् ? इत्यत आह—

कालेण अप्पएसा, एवं भावापएसएहिं तो । हुंति असंखिज्जगुणा, सिद्धा परिणामबाहुल्ला ॥ १३ ॥

१ 'नया' इति क्वचित् ॥

ये भावतोऽप्रदेशा एकगुणकालकादयः, ये च द्विगुणकालकादयोऽनन्तगुणकालकान्तादीन् यावद्भावतः सप्रदेशास्ते सर्वे कालत एकसमयस्थितिका अप्रदेशाः । 'एवं' इति अनेन व्याख्यानेन भावाप्रदेशेभ्यः कालाप्रदेशा एकगुणकालकद्विगुणकालकादीनां परिणामानन्त्यात्पुद्गला असंख्यातगुणाः सिद्धा भवन्तीति ॥ १३ ॥

इत्तो दव्वाएसेण अप्पएसा हवंतऽसंखगुणा । के पुण ते परमाणू, कह ते बहुअत्ति तं सुणसु ॥ १४ ॥

इतोऽनन्तरोक्तेभ्यः कालाप्रदेशेभ्यो द्रव्यतोऽप्रदेशा असंख्यातगुणा भवन्ति । के पुनस्ते ? इत्याह—परमाणवः । कथं ते बहवः ? तदुच्यते ॥ १४ ॥

अणु-संखिज्जपएसिअ-असंखऽणंतप्पएसिआ चेव । चउरो च्चिअ रासी पुग्गलाण लोए अणंताणं ॥ १५ ॥

परस्परासंबन्धस्वभावानां परमाणूनामेको राशिः १, द्व्यणुकत्र्यणुकादीनामुत्कृष्टसंख्याताणुकान्तानां स्कन्धानां सर्वेषामपि संख्याताणुकव्यपदेशभाजां द्वितीयो राशिः २, जघन्यासंख्याताणुकादीनामेकाद्येकोत्तरगुणवृद्धानामुत्कृष्टासंख्याताणुकान्तानां सर्वेषामप्यसंख्याताणुकव्यपदेशभाजां तृतीयो राशिः ३, जघन्यानन्ताणुकादीनामेकाद्येकोत्तरगुणवृद्धानामुत्कृष्टानन्ताणुकान्तानां स्कन्धानां सर्वेषामप्यनन्ताणुकव्यपदेशभाजां चतुर्थो राशिः ४ । एत एव च राशयोऽनन्तानां पुद्गलानां लोके चतुर्दशरज्ज्वात्मके भवन्तीति ॥ १५ ॥

तत्थाणंतेहिंतो, सुत्तेणं तप्पएसिएहिंतो । जेण पएसट्ठाए, भणिआ अणवो अणंतगुणा ॥ १६ ॥

'तत्थ' इति तेषु चतुर्षु राशिषु यद्यप्यनन्तप्रदेशिकाः स्कन्धा अनन्ताः सन्ति, तथापि तेभ्योऽनन्तप्रदेशिकस्कन्धेभ्यः प्रदेशार्थतया परमाणवोऽनन्तगुणाः सूत्रे उक्ताः । सूत्रं चेदम्—"सव्वथोवा अणंतपएसिआ खंधा दव्वट्ठयाए, ते चेव पएसट्ठयाए अणंतगुणा । परमाणुपुग्गला दव्वट्ठपएसट्ठयाए अणंतगुणा । संखिज्जपएसिआ खंधा दव्वट्ठयाए संखिज्जगुणा, ते चेव पएसट्ठयाए संखिज्जगुणा । असंखिज्जपएसिआ खंधा दव्वट्ठआए असंखिज्जगुणा, ते चेव पएसट्ठयाए असंखेगुणत्ति ॥ १६ ॥

संखिज्जयमे[3] भागे, संखिज्जपएसिआण वट्टंति । नवरमसंखिज्जपएसिआण भागे असंखयमे ॥ १७ ॥

संख्याताः प्रदेशाः परमाणवो येषां स्कन्धानां ते तथा, तेषां संख्येयतमे भागे वर्त्तन्ते परमाणव इति । असंख्याताः प्रदेशाः परमाणवो येषां ते तथा[4], तेषां चासंख्येयतमे भागे वर्त्तन्ते, परमाणव इति उक्तसूत्रप्रामाण्यात् । अयमाशयः—यथा किल कल्पनया शतस्य संख्येयतमो भागो विंशतिः, शतस्यैवासंख्येयतमो दश, शतस्यैवानन्ततमो भागः पञ्च । एवमिहानया दिशा द्व्यणुकादिस्कन्धेभ्यः प्रभृति संख्याताणुकस्कन्धान् यावद् यः संख्याताणुकस्कन्धराशिस्तदपेक्षया परमाणवः संख्येयतमे भागे वर्त्तन्त इति । असंख्याताणुकस्कन्धराश्यपेक्षया त्वसंख्येयभाग इति । परमार्थतस्तु परमाणूनामप्यनन्तत्वं वक्ष्यत इति ॥ १७ ॥ अथ परमाणूनां बहुत्वं कथयन्नाह—

सइवि असंखिज्जपएसिआण तेसिं असंखभागत्ते । बाहुल्लं साहिज्जइ, फुडमवसेसाहिँ रासीहिं ॥ १८ ॥

सत्यप्यसंख्यातप्रदेशिकेभ्यः स्कन्धेभ्यः 'तेसिं' इति परमाणूनामसंख्येयभागत्वे बहुत्वं कथ्यते, निश्चितमेव शेष-

---

१ 'प्रा' इति क्वचित् । एवमग्रेऽपि । २ 'असंखिज्ज' इति क्वचित् । ३ 'इ' इति क्वचित् । एवमग्रेऽपि । ४ 'तथा' इति क्वचिन्न ॥

राशिभ्यां संख्यातप्रदेशिकानन्तप्रदेशिकाभिधानाभ्यामिति । अयमभिप्रायः—संख्यातप्रदेशिकराशेरपेक्षया सूत्रे संख्यातभागवृत्तित्वं परमाणूनामुक्तं ततोऽवसीयते तेषां बहुत्वम् । अन्यथा संख्यातप्रदेशिकराशेरपेक्षयाऽसंख्येयभागेऽनन्तभागे वा ते परमाणवोऽभविष्यन्निति ॥ १८ ॥ परमाणूनां स्वरूपतो बहुत्वं प्रसाध्य इदानीं कालाप्रदेशिकेभ्योऽसंख्यातत्वमाह—

जेणिक्करासिणो च्चिअ, असंखभागेण सेसरासीणं । तेणासंखिज्जगुणा, अणवो कालापएसेहिं ॥ १९ ॥

येनैकराशेरेवासंख्यातप्रदेशिकस्कन्धाभिधानस्यैवासंख्यातभागेऽणवो वर्तन्ते, न शेषराश्योः संख्यातप्रदेशिकानन्तप्रदेशिकाभिधानयोरिति । अयमर्थः—अनन्तप्रदेशिकस्कन्धराशेरनन्तगुणाः, संख्यातप्रदेशिकस्कन्धराशेस्तु संख्यातभागे वर्त्तन्ते; संख्यातभागस्य च विवक्षया पूर्वोक्तयुक्त्या च नात्यन्तमल्पतेति । तेन कालतः सप्रदेशेष्वप्रदेशेषु च वृत्तिमतामणूनां बहुत्वात् कालाप्रदेशानां च समयमात्रकालावस्थायित्वेनात्यन्तमल्पत्वात्कालाप्रदेशेभ्योऽसंख्यातगुणा द्रव्याप्रदेशा इति॥१९॥

इत्तो असंखगुणिआ, हवंति खित्तापएसिआ समए । जं ते ता सव्वे च्चिअ, अपएसा खित्तओ अणवो॥२०॥

इतो द्रव्याप्रदेशेभ्यः क्षेत्राप्रदेशिका असंख्यातगुणा भवन्ति । यस्मात्ते एव परमाणवः 'ता' इति तावदर्थे स च क्रमोपन्यासे । वक्ष्यमाणगाथोक्तद्विप्रदेशादिद्रव्यापेक्षया एकैकनभःप्रदेशावगाहितया सर्वेऽपि क्षेत्रतोऽप्रदेशा एवेति । नह्येकः परमाणुर्बादरपरिणामोऽपि द्व्यादीन्नभःप्रदेशान् व्याप्नोति ॥ २० ॥

दुपएसिआइएसुऽवि, पएसपरिवड्ढिएसु ठाणेसु । लब्भइ इक्किक्कोऽविअ, रासीखित्तापएसाणं ॥ २१ ॥

प्रदेशशब्दः परमाणुपर्याय इह गृह्यते। ततो द्विप्रदेशादिकेष्वपि स्कन्धेषु प्रदेशपरिवर्द्धितेषु स्थानेष्वेकाद्येकोत्तरेण परमाणुपरिवर्द्धितेषु क्षेत्राप्रदेशानामेकैक एव राशिर्लभ्यते। अयमर्थः—द्व्यणुकस्कन्धा बादरपरिणामतया केचिद् द्विद्विनभःप्रदेशावगाहिनः, केचित्तु सूक्ष्मपरिणामतयैकैकनभःप्रदेशावगाहिन इति। एवं त्र्यणुकस्कन्धाः केचिद्बादरपरिणामतया त्रित्रिनभःप्रदेशावगाहिनः, केचिद्बादरसूक्ष्मपरिणामतया द्विद्विनभःप्रदेशावगाहिनः, केचित्सूक्ष्मपरिणामतयैकैकनभःप्रदेशावगाहिनः। एवं चतुरणुकस्कन्धा अपि केचिच्चतुश्चतुर्नभःप्रदेशावगाहिनः, केचित्त्रित्रिनभःप्रदेशावगाहिनः, केचिद्द्विद्विनभःप्रदेशावगाहिनः, केचित्त्वेकैकनभःप्रदेशावगाहिन इति। अनया दिशा पञ्चाणुकषडणुकादयोऽनन्ताणुकान्ताः स्कन्धा एकैकनभःप्रदेशावगाहिनोऽपि लभ्यन्त इति। तथा च सति द्व्यणुकादीनामनन्ताणुकान्तानां[1] क्षेत्रतोऽप्रदेशानां प्रतिप्रदेशं परमाणुवृद्धिस्थानमेकैक एव राशिरिति ॥ २१ ॥ अथ क्षेत्रतः सप्रदेशानामसंख्यगुणतामाह—

इत्तो खित्ताएसेण चेव सपएसया असंखगुणा। एगपएसोगाढे, मोत्तुं सेसावगाहणया ॥ २२ ॥

एभ्यः क्षेत्राप्रदेशेभ्यः सकाशात् क्षेत्रतः सप्रदेशा असंख्यातगुणाः। यतः एकैकप्रदेशावगाढान् स्कन्धान्मुक्त्वा 'सेसावगाहणया' इति द्व्यादिनभःप्रदेशावगाहिनः स्कन्धाः सर्वेऽपीह गृह्यन्त इति। अयमर्थः—द्व्यणुकस्कन्धानां क्षेत्रावगाहनापेक्षया द्वौ राशी। एक एकैकनभःप्रदेशावगाढानां स्कन्धानां, द्वितीयस्तु द्विद्विनभःप्रदेशावगाढानां स्कन्धानाम्। तथा त्र्यणुकस्कन्धानां क्षेत्रावगाहनापेक्षया त्रयो राशयः। एक एकैकनभःप्रदेशावगाढानां, द्वितीयो द्विद्विनभःप्रदेशा-

१ इतः परं 'स्कन्धानां' इति क्वाप्यधिकं दृश्यते ॥

वगाढानां, तृतीयस्तु त्रित्रिनभःप्रदेशावगाढानां स्कन्धानाम्। तथा चतुरणुकस्कन्धानां[1] चत्वारो राशयः । एक एकैकनभःप्रदेशावगाढानाम्, द्वितीयो द्विद्विनभःप्रदेशावगाढानाम् , तृतीयस्त्रित्रिनभप्रदेशावगाढानाम्, चतुर्थस्तु चतुश्चतुर्नभःप्रदेशावगाढानां स्कन्धानाम्। एवं पञ्चाणुकस्कन्धानां पञ्च राशयो यावदसंख्याताणुकस्कन्धानां क्षेत्रावगाहनापेक्षयाऽसंख्याता[2] राशयः। अनन्ताणुकस्कन्धानां तु क्षेत्रावगाहापेक्षया नानन्ता राशयः, सकललोकाकाशप्रदेशाग्रस्यासंख्यातस्यैव सर्वत्र भणनादिति। एवं च सति ये द्व्यणुकादयोऽनन्ताणुकान्ताः स्कन्धा एकैकनभःप्रदेशावगाहि[3]स्कन्धराशिवर्जा द्व्यादिनभःप्रदेशावगाहिनो राशयस्ते सर्वे क्षेत्रतः सप्रदेशा इति ॥ २२ ॥ शेषत्वं भावयन्नाह—

ते पुण दुपएसोगाहणाइआ सव्वपुग्गला सेसा । ते अ असंखिज्जगुणा, अवगाहणठाण बाहुल्ला ॥२३॥

ते पुनर्द्विप्रदेशावगाहनादिकाः 'सव्वपुग्गला' इति समस्ता द्व्यणुकादयोऽनन्ताणुकान्ताः स्कन्धाः शेषा व्यतिरिक्ताः क्षेत्राप्रदेशपुद्गलेभ्य इत्यस्याध्याहारः। ते पुनः क्षेत्रतः सप्रदेशा असंख्यातगुणाः अवगाहनास्थानानां बाहुल्यात्। अयमाशयः—परमाण्वादीनामनन्ताणुकस्कन्धानामपि पुद्गलानामेकैकनभःप्रदेशलक्षणमेकमेवावगाहनास्थानम्। क्षेत्राप्रदेशानां क्षेत्रतः सप्रदेशानां द्व्यादिनभःप्रदेशप्रभृतीन्यसंख्यातनभःप्रदेशपर्यन्तान्यसंख्यातान्यवगाहनास्थानानीति ॥ २३ ॥ अथ द्रव्यतः कालतो भावतश्च सप्रदेशानां प्रमाणमाह—

दव्वेण हुंति इत्तो, सपएसा पुग्गला विसेसहिआ। कालेण य भावेण य, एमेव भवे विसेसहिआ ॥२४॥

---

१ 'क्षेत्रावगाहापेक्षया' इति क्वाप्यधिकम्। २ 'क्षेत्रावगाहा' इति क्वचित्। एवं क्वचिदग्रेऽपि ज्ञेयम्। ३ 'गाढ' 'गाह' इति क्वचित् ॥

एभ्यः क्षेत्रतः सप्रदेशेभ्यो द्रव्यतः सप्रदेशाः पुद्गला विशेषाधिकाः। तथा द्रव्यतः सप्रदेशेभ्यः कालतः सप्रदेशाः पुद्गला विशेषाधिकाः। एवं कालतः सप्रदेशेभ्यो भावतः सप्रदेशा विशेषाधिका इति ॥ २४ ॥ अमीषां विशेषाधिकत्वे युक्तिमाह—

भावाईआ वुड्ढी, असंखगुणिआ जमप्पएसाणं । तो सप्पएसयाणं, खित्ताइविसेसपरिवुड्ढी ॥ २५ ॥

यस्मादप्रदेशानां पुद्गलानां भावादिका भावमादौ कृत्वा वृद्धिरसंख्यगुणिता, आदिशब्दात्कालद्रव्यक्षेत्राणि गृह्यन्ते। अयमर्थः—भावाप्रदेशेभ्यः कालतोऽप्रदेशाः पुद्गला असंख्यगुणाः। कालाप्रदेशेभ्यो द्रव्याप्रदेशा असंख्यगुणाः। द्रव्याप्रदेशेभ्यः क्षेत्राप्रदेशा असंख्यगुणा इति। 'तो' इति तस्मात्सप्रदेशानां पुद्गलानां क्षेत्रादिका क्षेत्रमादौ कृत्वा वैपरीत्येन क्रमशो विशेषपरिवृद्धिर्बोद्धव्या। क्षेत्रतः सप्रदेशेभ्यो द्रव्यतः सप्रदेशा विशेषाधिकाः। द्रव्यतः सप्रदेशेभ्यः कालतः सप्रदेशा विशेषाधिकाः। कालतः सप्रदेशेभ्यो भावतः सप्रदेशा विशेषाधिका इति ॥ २५ ॥ अथ मिश्राल्पबहुत्वमाह—

मीसाण संकमं पइ, सपएसा खित्तओ असंखगुणा । भणिआ सट्ठाणे पुण, थोवच्चिअ ते गहेअव्वा ॥ २६ ॥

मिश्राणामित्यप्रदेशसप्रदेशानां मीलितानां संक्रमं प्रत्यप्रदेशेभ्यः सप्रदेशेष्वल्पबहुत्वविचारसंक्रमे क्षेत्रतोऽप्रदेशेभ्यः क्षेत्रतः सप्रदेशा असंख्येयगुणाः। स्वस्थाने पुनरप्रदेशान् विहाय केवलसप्रदेशचिन्तायां द्रव्यकालभावानां सप्रदेशानां क्रमशो विशेषाधिकानामपेक्षया स्तोका एव ते क्षेत्रतः सप्रदेशा इति ॥ २६ ॥ एतदेवोच्यते—

खित्तेण सप्पएसा, थोवा दव्वद्धभावओ अहिया । सपएसप्पाबहुअं, सट्ठाणे अत्थओ एवं ॥ २७ ॥

शेषसप्रदेशापेक्षया क्षेत्रतः सप्रदेशाः स्तोकाः, स्तोकत्वे च साध्ये युक्तिः पूर्वविचारितैव । 'दव्वद्धभावओ अहिया' इति द्रव्यतः कालतो भावतश्च सप्रदेशाः क्रमशो विशेषाधिकाः । अर्थत इति व्याख्यानापेक्षया इत्थं स्वस्थाने सप्रदेशानां पुद्गलानामल्पबहुत्वमवगन्तव्यमिति ॥ २७ ॥ अल्पबहुत्वसंख्यामाह—

पढमं अपएसाणं, बीयं पुण होइ सप्पएसाणं । तइयं पुण मीसाणं, अप्पबहू अत्थओ तिन्नि ॥२८॥

प्रथमं द्रव्याद्यप्रदेशानां चतुर्णां पुद्गलराशीनां परस्परमल्पबहुत्वमुक्तम् । द्वितीयं तेषामत्रे द्रव्यादितः सप्रदेशानाम् । तृतीयं मिश्राणामिति । सप्रदेशाप्रदेशानां[1] मिलितानामित्यर्थतो व्याख्यानद्वारेण त्रीण्यल्पबहुत्वानि भवन्ति । सूत्रे त्वेकमेवाल्पबहुत्वमुक्तमिति ॥ २८ ॥ सप्रदेशानामन्योन्यं ह्रासवृद्धिप्रमाणमाह—

ठाणे ठाणे वड्ढइ, भावाईणं जमप्पएसाणं । तं चिअ भावाईणं, परिभस्सइ सप्पएसाणं ॥ २९ ॥

भावादीनामादिशब्दात्कालद्रव्यक्षेत्राणामप्रदेशानां स्थाने स्थाने यद्वर्द्धते, तदेव सप्रदेशानां भावादीनां परिभ्रश्यते । यथा किल कल्पनया लक्षं पुद्गलास्तेषु भावतः कालतो द्रव्यतः क्षेत्रतश्चाप्रदेशाः क्रमेणैकद्विपञ्चदशसहस्रसंख्याः, सप्रदेशास्तु नवनवत्यष्टनवतिपञ्चनवतिनवतिसहस्रसंख्याः, ततश्च भावाप्रदेशेभ्यः कालाप्रदेशेषु सहस्रं वर्धते, तदेव भावतः सप्रदेशेभ्यः कालतः सप्रदेशेषु हीयते। तथा यदेव कालाप्रदेशेभ्यो द्रव्याप्रदेशेषु सहस्रत्रयं वर्धते, तदेव कालसप्रदेशेभ्यो द्रव्यसप्रदेशेषु

१ 'सप्रदेशाप्रदेशानां' इति पाठस्यैकपुस्तकमात्राधारतया मूले नोद्धृतः ॥

३

हीयते। तथा यदेव द्रव्याप्रदेशेभ्यः क्षेत्राप्रदेशेषु सहस्रपञ्चकं वर्धते, तदेव द्रव्यसप्रदेशेभ्यः क्षेत्रसप्रदेशेषु हीयते इति ॥ २९ ॥

स्थापना चेयम् ।

भावाप्र० १०००	कालाप्र० २०००	द्रव्याप्र० ५०००	क्षेत्राप्र० १००००
भावसप्र० ९९०००	कालसप्र० ९८०००	द्रव्यसप्र० ९५०००	क्षेत्रसप्र० ९००००

अहवा खित्ताईणं, जमप्पएसाण हायए कमसो । तं चिअ खित्ताईणं, परिवड्ढइ सप्पएसाणं ॥ ३० ॥

अथवा द्रव्यक्षेत्रादीनां यदप्रदेशानां हीयते, क्रमशस्तदेव सप्रदेशानां क्षेत्रादीनां परिवर्धत इति । अयमर्थः—क्षेत्राप्रदेशेभ्यो द्रव्याप्रदेशेषु पञ्च सहस्रा हीयन्ते । तत एव क्षेत्रतः सप्रदेशेभ्यो द्रव्यसप्रदेशेषु वर्धन्ते । तथा य एव द्रव्यतोऽप्रदेशेभ्यः कालाप्रदेशेषु त्रयः सहस्रा हीयन्ते । त एव द्रव्यसप्रदेशेभ्यः कालसप्रदेशेषु वर्धन्ते । तथा यदेकं सहस्रं कालाप्रदेशेभ्यो भावाप्रदेशेषु हीयते । तदेव कालसप्रदेशेभ्यो भावसप्रदेशेषु वर्धत इति ॥ ३० ॥

अवरुप्परप्पसिद्धा, वुड्ढी हाणी अ होइ दुह्णंपि । अपएससप्पएसाण पुग्गलाणं सलक्खणओ ॥ ३१ ॥

परस्परतोऽन्योन्यापेक्षया प्रकर्षेण सिद्धा प्रतिष्ठिता स्वलक्षणतः स्वस्वरूपतो वृद्धिर्हानिश्च भवति, द्वयोरपीति पुद्गलानां भावकालद्रव्यक्षेत्रविशिष्टानां क्रमोत्क्रमाभ्यां वृद्धिहानिमतामप्रदेशराशेः सप्रदेशराशेश्चेत्यर्थः ॥ ३१ ॥ अमुमेवार्थं व्यनक्ति—

ते चेव य ते चउहिवि, जमुवचरिज्जंति पुग्गला दुविहा। तेण उ वुड्ढी हाणी, तेसिं अन्नोन्नसंसिद्धा॥३२॥

यस्मात्पुद्गला द्विविधाः सप्रदेशा अप्रदेशाश्चेत्यर्थः । उपचर्यन्ते विशिष्यन्ते चतुर्भिरपि भावकालादिभिः परमार्थतस्तु

ते एव ते नान्ये । अयमर्थः—ये किल कल्पनया पुद्गला लक्षसंख्या उक्ताः परमार्थेन तु अनन्ताः सन्ति, तेषां मध्यात्केचित् द्रव्यतोऽप्रदेशाः शेषास्तु द्रव्यतः सप्रदेशाः । य एव द्रव्यतोऽप्रदेशाः सप्रदेशाश्च । त एव च कालादिभिरप्यप्रदेशाः सप्रदेशाश्च विचार्यन्ते, तेन तेषां पुद्गलानां वृद्धिर्हानिश्चान्योन्यसंसिद्धा, इतरेतराश्रयेति परस्परापेक्षयेत्यर्थः ॥ ३२ ॥

एएसिं रासीणं, णिदरिसणमिणं भणामि पच्चक्खं । बुद्धीए सव्वपुग्गल, जावं तावाण लक्खो उ ॥ ३३ ॥

इक्कं च दो अ पंच य, दस य सहस्साइँ अप्पएसाणं । भावाईणं कमसो, चउण्हवि जहोवइट्ठाणं ॥ ३४ ॥

कल्पनया यावन्तः सर्वपुद्गलास्तावतां लक्षमिति ॥ ३३ ॥ एकं द्वे पञ्च दश सहस्राणि अप्रदेशानां भावादीनां भावकालद्रव्यक्षेत्राणां चतुर्णामपि यथोपदिष्टानां क्रमेणावगन्तव्यानि ॥ ३४ ॥

नउई पंचाणउई, अट्ठाणउई तहेव नवनउई । एवइयाइँ सहस्साइँ सप्पएसाण विवरीअं ॥ ३५ ॥

वैपरीत्येन सप्रदेशानां नवतिः पञ्चनवतिरष्टनवतिर्नवनवतिश्च सहस्राणां क्रमेणावगन्तव्या । वैपरीत्यं चेदम्—क्षेत्रतः सप्रदेशानां नवतिसहस्राणि । द्रव्यतः सप्रदेशानां पञ्चनवतिसहस्राणि । कालतः सप्रदेशानामष्टनवतिसहस्राणि । भावतः सप्रदेशानां नवनवतिसहस्राणीति ॥ ३५ ॥

एएसि जहासंभवमत्थोवणयं करिज्ज रासीणं । सब्भावओ अ जाणिज्ज ते अणंते जिणाभिहिए ॥ ३६ ॥

॥ इति समासेयं पुद्गलषट्त्रिंशिका ॥

एतेषां पूर्वोक्तानां सप्रदेशाप्रदेशानां राशीनां यथासंभवमर्थोपनयमर्थभावनां कुर्यात्। अर्थभावना तु सप्रदेशाप्रदेशानामल्पबहुत्वविचाररूपा पूर्वव्याख्याने कृतैवेति नेह प्रतन्यते। अत्र लक्षसंख्यया पुद्गलानामल्पबहुत्वविचारणमव्युत्पन्नमतिशिष्यव्युत्पादनार्थम्। परमार्थतस्तु तान् पुद्गलाननन्तान् जिनाभिहितान् जानीयादिति ॥ ३६ ॥

इति श्रीरत्नसिंसूहरिविवृता पुद्गलषट्त्रिंशिकावृत्तिः समर्थितेति ॥

---

१ 'संख्यसंख्यया' इति कचित्।

॥ इति सवृत्तिका पुद्गलषट्त्रिंशिका समाप्ता ॥

॥ अर्हम् ॥

॥ सवृत्तिका निगोदषट्त्रिंशिका ॥

अथ पञ्चमाङ्ग एवैकादशशते दशमोद्देशके निगोदविचारः "लोगस्सणं भंते एगंमि आगासपएसे जहन्नपए जीवपएसाणं उक्कोसपए जीवपएसाणं सव्वजीवाणं कयरे कयरे अप्पा वा बहुआ वा तुला वा विसेसाहिया वा? गोयमा! सव्वथोवा लोगस्स एगंमि आगासपएसे जहन्नपए जीवपएसा, सव्वजीवा असंखिज्जगुणा। उक्कोसपए जीवपएसा विसेसाहिया" इति सूत्रम्। अत्र वृद्धोक्ताभिः षट्त्रिंशता गाथाभिरमूभिरभिधीयते। यथा—

लोगस्सेगपएसे, जहन्नयपयंमि जियपएसाणं। उक्कोसपए य तहा, सव्वजियाणं च के बहुया ॥ १ ॥

लोकाकाशस्यैकस्मिन्नभःप्रदेशे निर्विभागे क्षेत्रे जघन्यतः सूक्ष्मनिगोदादिजीवानां कति प्रदेशा अवगाढाः [१]स्युः? तथोत्कृष्टपदे उत्कर्षपदे च लोकाकाशस्यैवैकस्मिन्नभःप्रदेशे निर्विभागे क्षेत्रे कति जीवानां प्रदेशा अवगाढाः स्युः? तथा सर्वजीवानां समस्तलोकाकाशवर्तिनां सर्वभेदभिन्नानामुत्कृष्टप[२]देनैकनभःप्रदेशावगाढसूक्ष्मबादरादिभेदभि[३]न्नजीवप्रदेशानां च के बहवः?। इति सूत्र[४]वृत्तिः ॥ इह चतुर्दशरज्ज्वात्मकोऽपि लोकः प्रदेशगणितापेक्षयाऽसंख्यातप्रदेशात्मकोऽस्ति। एकैक-

१ 'स्युः' इति क्वचिन्न। एवमग्रे। २ 'पदैक' इत्यपि। ३ 'भिन्नानां' इत्यपि। ४ 'इति सूत्रवृत्तिः' इति क्वापि नास्ति ॥

निगोदावगाहना चाङ्गुलासंख्येयभागमात्रक्षेत्रप्रमाणा, यत्र चैको निगोदस्तत्रासंख्येया निगोदाः । अनन्तजीवानां चैकं साधारणं शरीरं निगोदः । एकैकजीवश्च स्वदेशेऽसंख्यातप्रदेशात्मको[1] लभ्यते, स च सूक्ष्मनिगोदेष्वतीवसंकुचितोऽङ्गुलासंख्येयभाग[2]मात्रक्षेत्रमसंख्यातप्रदेशात्मकं व्याप्नोति । विस्तृतस्तु बहून् बहुतरान्[3]वा यावत्केवलिसमुद्घातावस्थायां सर्वान् लोकाकाशप्रदेशान् व्याप्नोति । ततश्च सर्वजीवराशेरपेक्षया जघन्यत एकत्र क्षेत्रे[4] नभःप्रदेशेऽसंख्यातनिगोदांशोऽधितिष्ठति । कति सर्वजीवाः ? जघन्यपदे च कति जीवानां प्रदेशा अवगाढाः स्युः ? उत्कृष्टतोऽपि कति ? इति परमार्थतो राशित्रयस्य परस्परमल्पबहुत्वे प्रश्नः ॥ १ ॥ उत्तरमाह—

थोवा जहन्नयपए, जियप्पएसा जिया असंखगुणा । उक्कोसपयपएसा, तओ विसेसाहिया भणिया ॥ २ ॥

एकत्र नभःप्रदेशे जीवप्रदेशा जघन्यपदे सर्वजीवराशेरपेक्षया स्तोकाः, असंख्येयतमभागवर्तित्वात् । जघन्यपदे च जीवप्रदेशापेक्षया सर्वजीवानामसंख्यातगुणत्वात् । उत्कृष्टपदे तु एकस्मिन्नभःप्रदेशे जीवप्रदेशास्ततः सर्वजीवराशेरपेक्षया विशेषाधिका इति ॥ २ ॥ अथ जघन्यपदमुत्कृष्टपदं चोच्यते—

तत्थ पुण जहन्नपयं, लोयंते जत्थ फासणा तिदिसिं । छद्दिसिमुक्कोसपयं, समत्थगोलंमि नन्नत्थ ॥ ३ ॥

तत्र तयोर्जघन्येतरपदयोर्जघन्यपदं लोकान्ते निष्कुटकोणरूपे भवति 'जत्थ' इति यत्र गोलके स्पर्शना अपरापरगोलकारम्भकनिगोदराशिदेशैस्तिसृष्वेव दिक्षु भवति, शेषाणां दिशामलोकेनावृतत्वात्, सा च स्पर्शना खण्डगोलक एके भव-

---

१ 'के' इत्यपि । २ 'भाग' इति क्वापि नास्ति । ३ 'वा' इति क्वचिन्नास्ति । ४ 'क्षेत्रे' इति क्वापि नास्ति ॥

तीति भावः । 'छद्दिसिं' इति यत्र पुनर्गोलके षट्स्वपि दिक्षु अपरापरगोलकारम्भकनिगोदराशिदेशैः स्पर्शना भवति; तत्रोत्कृष्टपदं भवति; तच्च समस्तगोलके परिपूर्णगोलके भवतीत्यर्थः । नान्यत्र, खण्डगोलके न भवतीति भावः । संपूर्णगोलकश्च लोकमध्य एव स्यात्, न तु अलोकसमीप इति ॥ ३ ॥ अथ परवचनमाशङ्कमान आह—

उक्कोसमसंखगुणं, जहन्नयाओ पयं हवइ किंतु । नणु तिद्दिसिफुसणाओ, छद्दिसिफुसणा भवे दुगुणा ॥ ४ ॥

उत्कृष्टपदमसंख्यातगुणं जघन्यपदैकनभःप्रदेशावगाढजीवप्रदेशराश्यपेक्षया, किन्तु कथं तु भवति ? न भवतीत्यर्थः । कस्मादेवम् ? इत्याह—ननु निश्चितम्, अक्षमायां वा । ननुशब्दः, त्रिदिक्स्पर्शनायाः सकाशात् षड्दिक्स्पर्शना भवेद् द्विगुणा, त्रिकस्य द्विकेन गुणने षण्णामेव भावादिति ॥ ४ ॥ इह च काकुपाठाद्धेतुत्वं प्रतीयत इत्यतो द्विगुणमेवोत्कृष्टपदं स्यादसंख्यातगुणं च तदिष्यते, जघन्यपदैकनभःप्रदेशाश्रितजीवप्रदेशराश्यपेक्षयाऽसंख्यातगुणसर्वजीवेभ्यो विशेषाधिकजीवप्रदेशोपेतत्वात्तस्येति । इहोत्तरम्—

थोवा जहन्नयपए, निगोयमित्तावगाहणा फुसणा । फुसणाऽसंखगुणत्ता, उक्कोसपए असंखगुणा ॥ ५ ॥

एकस्मिन्नभःप्रदेशे जघन्यतो जीवप्रदेशाः स्तोकाः; कुतः ? इत्याह—'निगोयमित्तावगाहणा फुसणा' इति निगोदमात्रेऽङ्गुलासंख्येयभागरूपे क्षेत्रेऽवगाहना येषां ते निगोदमात्रक्षेत्रावगाहनाः, यावत्सु येष्वेव चाकाशप्रदेशेष्वेको निगोदोऽवगाढस्तावत्सु तेष्वेव चापरनभःप्रदेशस्पर्शपरिहारेण ये निगोदा अवगाढास्त एकावगाहना इत्यर्थः । तैरेव च यत्स्पर्श-

१ 'नणु तिदिसि फुसणाओ' इत्यपि क्वचित् एवमग्रेऽपि । २ 'राश्यपेक्षया' इति क्वापि ॥

नमवगाहनं जघन्यपदस्य तन्निगोदमात्रावगाहनस्पर्शनं तस्मात् खण्डगोलकनिष्पादकनिगोदैस्तस्याऽसंस्पर्शनादित्यर्थः ।
भूम्यासन्नापवरकमध्यकोणान्तिमप्रदेशसदृशो हि जघन्यपदाख्यः प्रदेशः, तं चालोकसंबन्धादेकावगाहना एव निगोदाः
स्पृशन्ति, न तु खण्डगोलकनिष्पादका निगोदाः; प्रदेशपरिवृद्धिहानिभ्यां तुल्यावगाहनानामपरनिगोदानां तत्रानुपलभ्य-
मानत्वात् । तत्र किल कल्पनया जघन्यपदं जीवशतं स्पृशति । परमार्थतस्त्वेकोऽपि निगोदोऽनन्तजीवाधिष्ठितो यत्र
चैको निगोदस्तत्रैकावगाहना असंख्येया निगोदा इति । तस्य च कल्पनाकल्पितस्य जीवशतस्य प्रत्येकं कल्पनयैव
प्रदेशलक्षं तत्रावगाढमिति । परमार्थतस्तु समस्तलोकाकाशप्रदेशराशितुल्यप्रदेश एकैकोऽपि जीवोऽसंख्येयान् प्रदेशानव-
गाहत इति । एवं च काल्पनिकप्रदेशलक्षगणने जघन्यपदे कोटीजीवप्रदेशानामवगाढेत्येवं स्तोकास्तत्र जीवप्रदेशा इति ।
अथोत्कृष्टपदजीवप्रदेशप्रमाणमुच्यते—'फुसणा असंखगुणत्ता' इति स्पर्शनाया उत्कृष्टपदे पूर्णगोलकनिष्पादकनिगोदैः
स्पर्शनाया यदसंख्यातगुणत्वं जघन्यपदापेक्षया तत्तथा तस्माद्धेतोरुत्कृष्टपदेऽसंख्यातगुणा जीवप्रदेशा जघन्यपदापेक्षया
भवन्ति । उत्कृष्टपदं हि संपूर्णगोलकनिगोदैरेकावगाहनैरसंख्येयैस्तथोत्कृष्टपदाविमोचनेन प्रथमनिगोदावगाहनापेक्षया एकै-
कप्रदेशश्रेणिपरिहारिभिः प्रत्येकमसंख्येयैरेव स्पृष्टम् । तच्च किल कल्पनया कोटिसहस्रेण जीवानां स्पृश्यते । तत्र च
प्रत्येकं जीवप्रदेशलक्षस्यावगाहनाज्जीवप्रदेशानां दशकोटिकोट्योऽवगाढाः स्युः । इत्येवं उत्कृष्टपदे तेऽसंख्येयगुणा भाव-
नीया इति ॥ ५ ॥ अथ गोलकप्ररूपणाय आह—

उक्कोसपयममुत्तुं, निगोयओगाहणाइसव्वत्तो । निप्फाइज्जइ गोलो, पएसपरिवुड्ढिहाणीहिं ॥ ६ ॥

उत्कृष्टपदं लोकमध्यवर्त्तिगोलकस्थितबहुजीवप्रदेशस्पृष्टनभःप्रदेशरूपं विवक्षितप्रदेशममुञ्चद्भिर्निगोदावगाहनायाः एकस्याः सर्वतः सर्वासु दिक्षु निगोदान्तराणि स्थापयद्भिर्निष्पाद्यते गोलः । कथं ? प्रदेशपरिवृद्धिहानिभ्यां कांश्चित्प्रदेशान् विवक्षितावगाहनाया आक्रमद्भिः कांश्चिद्विमुञ्चद्भिरित्यर्थः । अयमभिप्रायः—येषु विवक्षितेष्वङ्गुलासंख्येयभागवर्तिष्वसंख्यातेष्वाकाशप्रदेशेष्वेको निगोदोऽवगाहते, तेष्वेवान्येऽसंख्याता निगोदा अवगाहन्ते । तथा विवक्षितनिगोदावगाहनापेक्षयैवापरे निगोदाः कांश्चित् प्रदेशान् परिहृत्य कांश्चिच्च प्रदेशानभिव्याप्यापरनभःप्रदेशानपि व्याप्नुवन्तीत्यर्थः । एवमेकगोलकनिष्पत्तिः ॥ ६ ॥ स्थापना[1] चेयम् । गोलकान्तरकल्पनायाह—

तत्तो च्चिअ गोलाओ, उक्कोसपयं मुइत्तु जो अन्नो । होइ[2] निगोओ तंमिवि अन्नो निप्फजई गोलो ॥ ७ ॥

तमेवोक्तलक्षणं गोलकमाश्रित्यान्यो निष्पद्यते गोलः । कथम् ? उत्कृष्टपदं प्राक्तनगोलकसंबन्धि विमुच्य योऽन्यो भवति निगोदस्तस्मिन्नुत्कृष्टपदकल्पनेनेति । अयमाशयः—प्रागुत्कृष्टपदमाश्रित्य विवक्षितनिगोदावगाहनायां यानि यानि प्रदेशपरिवृद्धिहानिभ्यां निगोदान्तराणि स्थापितानि तेष्वेकतरमपि निगोदमाश्रित्य निगोदान्तरस्थापनेन गोलकान्तरं निष्पद्यत इति ॥ ७ ॥ तथा च सति यत्स्यात्तदाह—

एवं निगोयमित्ते, खित्ते गोलस्स होइ निप्फत्ती । एवं निप्फज्जंते, लोगे गोला असंखिज्जा ॥ ८ ॥

एवमुक्तक्रमेण प्रतिनिगोदं निगोदान्तरस्थापनारूपेण निगोदमात्रे क्षेत्रे विवक्षितविविक्तैकनिगोदावगाहनास्वरूप

---

१ स्थापना तु तद्विदः सकाशाज्ज्ञेया । २ 'हुति,' 'होंति' इत्यपि क्वचित् ॥

आकाशखण्डे गोलकस्य भवति निष्पत्तिः, विवक्षितनिगोदावगाहनातिरिक्तनिगोददेशानां गोलकान्तरानुप्रवेशात् । एवं च निष्पद्यन्ते लोके गोला असंख्येयाः, सकलस्यापि लोकाकाशस्य निगोदकदम्बकावरुद्धत्वात् । निगोदावगाहनायाश्चाङ्गुलासंख्येयभागरूपत्वात्, प्रतिनिगोदावगाहनं च गोलकनिष्पत्तेरिति ॥ ८ ॥ अथ किमिदमेव प्रतिगोलकं यदुत्कृष्टपदं तदेव ग्राह्यम् ? उतान्यत् ? इति अस्यामाशङ्कायामाह—

ववहारनएण इमं, उक्कोसपयावि इत्तिया चेव । जं पुण उक्कोसपयं, निच्छइयं होइ तं वुच्छं ॥ ९ ॥

व्यवहारनयेन सामान्येनेदमनन्तरव्यावर्णितस्वरूपमुत्कृष्टपदमुक्तं काका चेदमध्येयम् । अनुक्तस्यापि किंशब्दस्य गम्यमानत्वात् । ततश्च किमिदमुत्कृष्टपदं ग्राह्यम् ? अपि तु न ग्राह्यमेवेति तात्पर्यम् । कुतः ? 'उक्कोसपयावि इत्तिया चेव' इति न केवलं गोलका असंख्येयाः, उत्कृष्टपदान्यपि प्रतिपरिपूर्णगोलकस्पर्शनाप्ररूपितानि एतावन्त्येव असंख्येयान्येव भवन्ति । यस्मात्ततो न नियतमुत्कृष्टपदम्, किं च न स्यान्निष्कुटासन्नत्रिदिक्स्पर्शिखण्डगोलकान् विहाय शेषगोलकानां षड्दिक्स्पर्शिनां सर्वेषामपि समानगोलकान्तरैः समानस्पर्शनयुक्तत्वादिति भावः । यत्पुनरुत्कृष्टपदं नैश्चयिकं निश्चयनयसंमतं भवति सर्वोत्कर्षयोगात् यदिह ग्राह्यं तद्वक्ष्येऽनन्तरगाथया ॥ ९ ॥ तदेवाह—

बायरनिगोयविग्गहगइयाई जत्थ समहिया अन्ने । गोला हुज्ज सुबहुया, निच्छइयपयं तदुक्कोसं ॥१०॥

बादराश्च ते निगोदाश्च बादरनिगोदाः कन्दादयः, ते च सूक्ष्मबादरनिगोदसंबन्धिविग्रहगतिकाश्च आदिशब्दादविग्रहगतयोऽपि यत्रोत्कृष्टपदे समधिकाः सूक्ष्मनिगोदगोलकेभ्यः पूर्वोक्तस्वरूपेभ्य उत्कृष्टपदवर्तिभ्योऽधिका अन्ये निगोदसूक्ष्म-

गोलकेभ्योऽपरे गोलका भवेयुः सुबहवो नैश्चयिकपदं तदुत्कर्षम् । अयमभिप्रायः—यंत्र क्वापि सूक्ष्मा निगोदसंदोहनिष्पन्नाः परिपूर्णगोलकास्तत्र यदि बादरनिगोदा अप्यवगाहन्ते, तत्र च यदि सूक्ष्मनिगोदजीवा बादरनिगोदजीवाश्च सजातीयेषु विजातीयेषु वा बादरनिगोदान्तरेषूत्पित्सवोऽपरेऽपि पृथिवीकायादयो भवान्तरे संचरिष्णवो विग्रहगत्या ऋजुगत्या वा संचरमाणाः सूक्ष्मपृथिवीकायादयस्तु तत्रस्था वावगाहन्ते, तदा च निश्चयनयसंमतमुत्कृष्टपदमिति । बादरनिगोदा हि निराधारा न संभवन्ति, ततः पृथिव्यादिष्वेव स्वस्थानेषु स्वरूपतो भवन्ति न सूक्ष्मनिगोदवत्सर्वत्र, इत्यतो यत्र क्वचित्ते बादरनिगोदादयो भवन्ति तदुत्कृष्टपदं सात्त्विकमिति भावः ॥ १० ॥ एतदेवादर्शयन्नाह—

इहरा पडुच्च सुहुमे, बहुतुल्ला पायसो सगलगोला । तो बायराइगहणं, कीरइ उक्कोसयपयंमि ॥ ११ ॥

'इहरा' इति इतरथा बादरनिगोदाश्रयणं विना सूक्ष्मनिगोदान् प्रतीत्य बहुतुल्या निगोदसंख्यया समाना भवन्ति । प्रायोग्रहणं एकादिना न्यूनाधिकत्वे व्यभिचारपरिहारार्थम् । के एते ? इत्याह—सकलगोला लोकमध्यवर्तिनः संपूर्णगोला नतु लोकान्तवर्त्तिनः खण्डगोलाः, अतो न नियतं किञ्चिदुत्कृष्टपदं लभ्येत यत एवं ततो बादरनिगोदादिग्रहणं क्रियते । अयमाशयः—अङ्गुलासंख्येयभागमात्रमसंख्याताकाशप्रदेशपरिमाणं क्षेत्रमवगाह्यैकः सूक्ष्मनिगोदोऽवतिष्ठते, अन्येऽप्यसंख्याताः सूक्ष्मनिगोदास्तस्मिँस्तावति क्षेत्रे व्यवतिष्ठन्ते । तत्र सूक्ष्मैकनिगोदावगाहापेक्षया षट्स्वपि दिक्षु क्षेत्रप्रदेशपरिवृद्धिहानिभ्यां येऽपरेऽसंख्यातनिगोदात्मका असंख्येयगोलका यावतीं विवक्षितसूक्ष्मनिगोदभुवमवगाहन्ते, तत्रैव

१ 'यत्र' इति एकस्मिन्पुस्तके । २ इतः प्राक् 'विवक्षित–' इत्यधिकं क्वचित् ॥

च यदि बादरनिगोदेभ्यः सूक्ष्मेषु बादरेषु वा निगोदेषूत्पित्सवः, सूक्ष्मनिगोदेभ्यो बादरेषु सूक्ष्मेषु वा निगोदेषूत्पित्सवो विग्रहगत्या ऋजुगत्या वा संचरमाणाः सूक्ष्मपृथिवीकायादयश्च तत्रस्था वा भवान्तरे विग्रहगत्या ऋजुगत्या वा संचरमाणा विवक्षितनिगोदावगाहक्षेत्रमवगाहन्ते, तदुत्कृष्टपदं तात्त्विकमिति [1]भावः ॥ ११ ॥ अथ गोलकादीनां प्रमाणमाह—

गोला य असंखिज्जा, हुंति निओया असंखया गोले। इक्किक्को य निगोओ, अणंतजीवो मुणेयव्वो॥१२॥

गोला असंख्याता भवन्ति। सकलेऽपि लोकाकाशे तेषामवस्थानादेकैकस्मिंश्च गोले निगोदाः साधारणशरीरिणोऽसंख्याता भवन्ति। एकावगाहनानामसंख्यातानां निगोदानामेव गोलक इति व्यपदेशात्। एकैकस्मिंश्च निगोदेऽनन्ता जीवा ज्ञातव्याः। एतच्चानन्तत्वं सिद्धानन्तकादनन्तगुणितं ज्ञातव्यम्। शास्त्रान्तरेषु–'एगस्स निगोयस्स उ अणंतभागो उ सिद्धिगओ' इति भणनात् ॥ १२ ॥ अथ जीवप्रदेशपरिमाणप्ररूपणपूर्वकं निगोदादीनामवगाहनामानमभिधित्सुराह—

लोगस्स य जीवस्स य, हुंति पएसा असंखया तुल्ला। अंगुलअसंखभागो, निगोयजियगोलगोगाहो॥१३॥

लोकजीवयोः प्रत्येकमसंख्याताः प्रदेशा भवन्ति, ते च परस्परेण तुल्याः। यावन्तश्चतुर्दशरज्ज्वात्मकस्य समस्तलोकाकाशस्य प्रदेशास्तावन्त एकैजीवस्य निजप्रदेशा न न्यूनाधिकाः, केवलिसमुद्धातावस्थायां केवलिना निजप्रदेशैः समस्तलोकाकाशपूरणात्तुल्यतेत्यर्थः। एषां च संकोचविशेषादङ्गुलासंख्येयभागो निगोदस्य तज्जीवस्य गोलकस्य [2]चावगाहनेति ॥ १३ ॥ निगोदादिसमवगाहनतामेव समर्थयन्नाह—

१ 'भावः' इति न कचित्। २ 'एव' इति कचित् ॥

जंमि जिओ तं मेव निगोओ तो तम्मि चेव गोलोऽवि। निप्फज्जइ जं खित्ते, तो ते तुल्लावगाहणया॥१४॥

यस्मिन् क्षेत्रेऽङ्गुलासंख्येयभागरूपेऽसंख्यातनभःप्रदेशात्मके जीवोऽवगाहते, तस्मिन्नेव निगोदे निगोदमभिव्याप्य जीवस्यावस्थानात् 'तो' इति तदनन्तरं तस्मिन्नेव गोलोऽपि निष्पद्यते आस्ते; विवक्षितनिगोदावगाहनातोऽतिरिक्तशेषनिगोदावगाहना गोलकान्तरप्रवेशे न निगोदमात्रा गोलकावगाहनेति। अयमाशयः—येषु यावत्सु नभःप्रदेशेष्वेको निगोदोऽवगाढस्तेषु तावत्स्वेवापरेऽप्यसंख्येया निगोदाः सूक्ष्मपरिणामतयाऽवगाहन्ते। एकैकस्मिंश्च निगोदेऽनन्ता जीवाः सन्ति। एकैकश्च जीवो विवक्षितनिगोदप्रदेशानभिव्याप्य तिष्ठति। तेषां चैकावगाहनानामसंख्यातानां निगोदानां गोलक इति संज्ञा। तस्य गोलकस्यैकैकप्रदेशश्रेणिं मुञ्चन्तोऽपरापरप्रदेशश्रेणिं च व्याप्नुवन्तः षट्स्वपि दिक्षु येऽपरे प्रत्यवगाहनमसंख्येया निगोदास्तेषामपि यावानवगाहनाभागो विवक्षितगोलकस्यासीत्, तावान् स एव गोलक उद्धरितस्त्ववगाहनाभागो गोलकान्तरेषु प्रविशतीत्यायातमेकजीवस्य निगोदस्य गोलकस्य समानावगाहनेति॥ १४ ॥ अथ जीवाद्यवगाहनासमतासामर्थ्येन यदेकत्र प्रदेशे जीवप्रदेशमानं भवति, तद्विभणिषुस्तत्प्रस्तावनार्थं प्रश्नं कारयन्नाह—

उक्कोसपयपएसे, किमेगजीवप्पएसरासिस्स। हुज्जेगनिगोयस्स व, गोलस्स व किं समोगाढं॥ १५ ॥

उत्कर्षत एकस्मिन्नभःप्रदेश एकजीवप्रदेशराशेर्निगोदस्य गोलकस्य च किं किं समवगाढं भवेत्? अयं प्रश्नार्थः। लोकाकाशप्रदेशराशितुल्यनिजप्रदेश आत्मा यदा संकोच्य निजप्रदेशान्निगोदमात्रे क्षेत्रेऽवगाहते, तदैकैकस्मिन्नभःप्रदेशे कति जीवप्रदेशाः स्युरिति। एवं निगोदगोलकयोरपि प्रश्नार्थो ज्ञेयः॥ १५ ॥ तत्र जीवमाश्रित्योत्तरम्—

जीवस्स लोगमित्तस्स सुहुमओगाहणावगाढस्स । इक्किक्कंमि पएसे, हुंति पएसा असंखिज्जा ॥ १६ ॥

जीवस्य समस्तलोकाकाशप्रदेशसमूहसमाननिजप्रदेशस्य सूक्ष्मावगाहनयावगाढस्यैकैकनभःप्रदेशेऽसंख्याता जीवप्रदेशा भवन्ति । अयमर्थः—सूक्ष्मनामकर्मोदयेन जीवोऽङ्गुलासंख्येयभागरूपं निगोदमात्रं क्षेत्रमवगाहते, तच्चासंख्यातनभःप्रदेशात्मकं समग्रलोकेऽप्यसंख्येया नभःप्रदेशा असंख्यातस्यासंख्यातभेदत्वात् । तत एकस्मिन्निगोदावगाढनभःप्रदेशे एकजीवस्यासंख्येयाः स्वप्रदेशा इति । ते च किल कल्पनया कोटीशतसंख्यस्य जीवप्रदेशराशेः प्रदेशदशसहस्रीस्वरूपावगाहनया भागे हृते लक्षमाना भवन्तीति ॥ १६ ॥ अथ निगोदमाश्रित्याह—

लोगस्सहिए भागे, निगोयओगाहणाइ जं लद्धं । उक्कोसपएऽतिगयं, इत्तियमिक्किक्कजीवाओ ॥ १७ ॥

निगोदावगाहनया लोकस्य भागे हृते यल्लब्धमेतावदुत्कृष्टपदेऽतिगतमवगाढं निगोदसंबद्धादेकैकजीवात् । अयमर्थः—असंख्यातप्रदेशोऽपि लोकः किल प्रदेशकोटीशतमानः कल्प्यते, एकनिगोदावगाहना च प्रदेशदशसहस्रीमाना ततश्च कल्पितलोकप्रदेशराशेः कल्पितनिगोदावगाहनया भागे हृते लक्षा[2] लभ्यते, सा[3] चानन्तजीवात्मकस्य निगोदस्य संबन्धिन एकैकजीवस्य सत्का[4] उत्कर्षतः एकस्मिन्नभःप्रदेशेऽवगाढेति[5] ज्ञातव्यम्[6] । अनेन निगोदसत्कमुत्कृष्टपदे यदवगाढं तद्दर्शितम् ॥ १७ ॥ अथ गोलकसत्कं यत्तत्रावगाढं तद्दर्शयति—

एवं दव्वट्ठाए, सव्वेसिं इक्कगोलजीवाणं । उक्कोसपयमइगया, होंति पएसा असंखगुणा ॥ १८ ॥

१ 'ना भागे' इत्यपि । २ 'लक्षम्' । ३ 'तच्चा' । ४ 'सत्कम्' । ५ वगाढमिति । ६ ज्ञातव्या ॥

यथा निगोदजीवेभ्योऽसंख्येयगुणास्तत्प्रदेशा उत्कृष्टपदेऽतिगताः, एवं द्रव्यार्थतया न तु प्रदेशार्थतया 'सव्वेसिं' इति सर्वेभ्यः 'इक्कगोलजीवाणं' इति एकगोलगतजीवद्रव्येभ्यः सकाशादुत्कृष्टपदमतिगता भवन्ति प्रदेशा असंख्यातगुणाः। इह किलानन्तजीवोऽपि निगोदः कल्पनया लक्षजीवः। गोलकश्चासंख्याततनिगोदोऽपि कल्पनया लक्षनिगोदः, ततस्तस्य लक्षस्य लक्षगुणने कोटीसहस्रसंख्याः कल्पनया गोलके जीवा भवन्ति। तत्प्रदेशानां च लक्षं लक्षमुत्कृष्टपदेऽतिगतमतश्चैकगोलकसंख्याया लक्षगुणने कोटीकोटीदशकसंख्या एकत्र प्रदेशे कल्पनया जीवप्रदेशा भवन्ति। गोलजीवेभ्यः सकाशादेकत्र प्रदेशेऽसंख्येयगुणा जीवप्रदेशा भवन्तीत्युक्तम्॥ १८॥ अथ तत्र गुणकारराशेः परिमाणनिर्णयार्थमुच्यते—

तं पुण केवइएणं, गुणियमसंखिज्जयं भविज्जा हि। भण्णइ दव्वट्ठाए, जावइया सव्वगोलत्ति॥ १९॥

तत्पुनरनन्तरोक्तमुत्कृष्टपदातिगतजीवप्रदेशराशिसंबन्धि कियता किं परिमाणेनासंख्येयराशिना गुणितं सत् 'असंखिज्जयं' इति असंख्येयकमसंख्यातगुणनाद्द्वारायातं भवेत् स्यात्? इति भण्यते। अत्रोत्तरं—द्रव्यार्थतया न तु प्रदेशार्थतया यावन्तः सर्वगोलकाः सकललोकगोलकास्तावन्त एवेति गम्यम्। स चोत्कृष्टपदगतैकजीवप्रदेशराशिर्मन्तव्यः, सकलगोलानां तत्तुल्यत्वादिति॥ १९॥

किं कारणमोगाहणतुल्लत्ता जियनिगोयगोलाणं। गोला उक्कोसपएक्कजियपएसेहिँ तो तुल्ला॥ २०॥

'किं कारणं' इति कस्मात्कारणाद्यावन्तः सर्वगोलास्तावन्त एवोत्कृष्टपदगतैकजीवप्रदेशाः? इति प्रश्नः। अत्रोत्तरम्—अवगाहनातुल्यत्वात्। केषाम्? इत्याह—जीवनिगोदगोलानामवगाहनातुल्यत्वं चैषामङ्गुलासंख्येयभागमात्रावगाहित्वा-

दिति । यस्मादेवं 'तो' इति तस्माद्गोलाः सकललोकसंबन्धिन उत्कृष्टपदे ये एकस्य जीवस्य प्रदेशास्ते तथा तैरुत्कृष्टपदैकजीवप्रदेशैस्तुल्या भवन्ति ॥ २० ॥ एतस्यैव भावनार्थमुच्यते—

२० ॥

गोलेहिँ हिए लोगे, आगच्छइ जं तमेगजीवस्स । उक्कोसपयगयपए, सरासितुल्लं हवइ जह्मा ॥ २१ ॥

गोलैर्गोलावगाहनाप्रदेशैः कल्पनया दशसहस्रसंख्यैर्हृते विभक्ते हृतभाग इत्यर्थः । लोके लोकप्रदेशराशौ कल्पनयैककोटीशतप्रमाणे आगच्छति लभ्यते, यत्सर्वगोलकसंख्यास्थानं कल्पनया लक्षमित्यर्थः । तदेकजीवस्य संबन्धिना पूर्वोक्तप्रकारतः कल्पनया लक्षप्रमाणेनैवोत्कृष्टपदगतप्रदेशराशिना तुल्यं भवति । यस्मात्तस्माद्गोला उत्कृष्टपदैकजीवप्रदेशैस्तुल्या भवन्तीति प्रकृतमेवेति । एवं गोलकानामुत्कृष्टपदगतैकजीवप्रदेशानां च तुल्यत्वं समर्थितम् ॥ २१ ॥ पुनस्तदेव प्रकारान्तरेण समर्थयति—

अहवा लोगपएसे, इक्किक्के ठवय गोलमिक्किक्कं । एवं उक्कोसपएक्कजियपएसेसु मायंति ॥ २२ ॥

अथवा लोकस्यैव प्रदेशे एकैकस्मिन् स्थापय निधेहि । विवक्षितसमत्वबुभुत्सोर्गोलमेकैकम् । ततश्चैवमुक्तक्रमस्थापने उत्कृष्टपदे ये एकजीवप्रदेशास्ते तथा तेषु तत्परिमाणेष्वाकाशप्रदेशेष्वित्यर्थः, मान्ति गोला इति गम्यम् । यावन्त उत्कृष्टपदे एकजीवप्रदेशास्तावन्तो गोलका अपि भवन्तीत्यर्थः । ते च कल्पनया किल लक्षप्रमाणा उभयेऽपीति ॥२२॥ अथ सर्वजीवेभ्य उत्कृष्टपदजीवप्रदेशा विशेषाधिका इति विभणिषुस्तेषां सर्वजीवानां च तावत्समतामाह—

गोलो जीवो य समा, पएसओ जं च सवजीवावि । हुंति समोगाहणया, मज्झिमओगाहणं पप्प ॥ २३ ॥

गोलको जीवश्च समौ प्रदेशतोऽवगाहनाप्रदेशानाश्रित्य कल्पनया द्वयोरपि प्रदेशदशसहस्रावगाढत्वात् 'जं च' इति यस्माच्च सर्वजीवा अपि सूक्ष्मा भवन्ति समावगाहनकाः। मध्यमावगाहनामाश्रित्य कल्पनया हि जघन्यावगाहना पञ्च-प्रदेशसहस्राणि। उत्कृष्टा तु पञ्चदश द्वयोश्च मीलनेनार्द्धीकरणेन च दशसहस्राणि मध्यमा भवति ॥ २३ ॥

तेण फुडं चिय सिद्धं, एगपएसंमि जे जियपएसा। ते सव्वजीवतुल्ला, सुणसु पुणो जह विसेसहिया ॥२४॥

इह किलासद्भावस्थापनया कोटीशतसंख्यप्रदेशस्य जीवस्य प्रदेशदशसहस्र्यामवगाढस्य प्रतिप्रदेशं प्रदेशलक्षं भवति, तच्च पूर्वोक्तप्रकारतो निगोदवर्त्तिना जीवलक्षेण गुणितं कोटीसहस्रं भवति। पुनरपि च तदेकगोलवर्त्तिना निगोदलक्षेण गुणितं कोटीकोटीदशकप्रमाणं भवति, जीवप्रमाणमप्येतदेव। तथा हि—कोटीशतसंख्यप्रदेशे लोके दशसहस्रावगाहिनां गोलानां लक्षं भवति। प्रतिगोलकं च निगोदलक्षकल्पनान्निगोदाना कोटीसहस्रं भवति। प्रतिनिगोदं च जीवलक्षकल्प-नात्सर्वजीवानां कोटीकोटीदशकं भवति ॥ २४ ॥ अथ सर्वजीवेभ्य उत्कृष्टपदगतजीवप्रदेशा विशेषाधिका इति दर्श्यते—

जं संति केइ खंडा, गोला लोगंतवत्तिणो अन्ने। बायरविग्गहिएहिय उक्कोसपयं जमब्भहियं ॥ २५ ॥

यस्माद्विद्यन्ते केचित्खण्डा गोला लोकान्तवर्तिनः 'अन्ने' इति पूर्णगोलकेभ्योऽपरेऽतो जीवराशिः कल्पनया कोटीको-टीदशकरूप ऊनो भवति, पूर्णगोलकतायामेव तस्य यथोक्तस्य भावात्। ततश्च येन जीवराशिना खण्डगोलकाः पूर्णी-भूताः स सर्वजीवराशेरपनीयते, असद्भूतत्वात्तस्य। स च किल कल्पनया कोटीशतमानस्तत्र चापनीते सर्वजीवराशिः स्तोकतरो भवति। उत्कृष्टपदं तु यथोक्तप्रमाणमेवेति। तत्ततो विशेषाधिकं भवति। समता पुनः खण्डगोलानां पूर्णता-

विवक्षणादुक्तेति । तथा बादरविग्रहिकैश्च बादरनिगोदादिजीवप्रदेशैश्चोत्कृष्टपदं यद्यस्मात्सर्वजीवराशेरभ्यधिकं ततः सर्वजीवेभ्य उत्कृष्टपदजीवप्रदेशा विशेषाधिका भवन्ति । इयमत्र भावना—बादरविग्रहगतिकादीनामनन्तानां जीवानां सूक्ष्मजीवासंख्येयभागवर्त्तिनां कल्पनया कोटीप्रायसंख्यानां पूर्वोक्तसर्वजीवराशिप्रमाणे प्रक्षेपणेन समताप्राप्तावपि तस्य बादरादिजीवराशेः कोटीप्रायसंख्यस्य मध्यादुत्कर्षतोऽसंख्येयभागस्य कल्पनया शतसंख्यस्य विवक्षितसूक्ष्मगोलकावगाहनायामवगाहनात्, एकैकस्मिंश्च प्रदेशे प्रत्येकं जीवप्रदेशलक्षस्यावगाढत्वात्, लक्षस्य च शतगुणत्वेन कोटीप्रमाणत्वात्, तस्याश्चोत्कृष्टपदे प्रक्षेपात्, पूर्वोक्तमुत्कृष्टपदजीवप्रदेशमानं कोट्याधिकं भवति ॥ २५ ॥ यस्मादेवम्—

तह्मा सव्वेहिंतो, जीवेहिंतो फुडं गहेयव्वं । उक्कोसपयपएसा, हुंति विसेसाहिया नियमा ॥ २६ ॥

'तह्मा' इति ॥ २६ ॥ इदमेव प्रकारान्तरेण भाव्यते—

अहवा जेण बहुसमा, सुहुमा लोएऽवगाहणाए य । तेणिक्किक्कं जीवं, बुद्धीए विरल्लए लोए ॥ २७ ॥

यतो बहुसमाः प्रायेण जीवसंख्यया कल्पनयैकैकावगाहनायां जीवकोटीसहस्रस्यावस्थानात्खण्डगोलकैर्व्यभिचारपरिहारार्थं चेह बहुग्रहणम् । सूक्ष्माः सूक्ष्मनिगोदगोलकाः कल्पनया लक्षकल्पाः, लोके चतुर्दशरज्ज्वात्मके । तथावगाहनया च समाः कल्पनया दशसु दशसु प्रदेशसहस्रेष्वगाढत्वात्तस्मादेकप्रदेशावगाढजीवप्रदेशानां सर्वजीवानां च समतापरिज्ञानार्थमेकैकं जीवं बुद्ध्या 'विरलए' इति केवलिसमुद्घातगत्या विस्तारयेत् लोके । अयमत्र भावार्थः—यावन्तो गोलकस्यैकत्र प्रदेशे

१ 'जीवं बुध्या' इति क्वचिन्न दृश्यते ॥

जीवप्रदेशा भवन्ति कल्पनया कोटीकोटीदशकप्रमाणास्तावन्त एव विस्तारितेषु जीवेषु लोकस्यैकत्र प्रदेशे ते भवन्ति सर्वजीवा अप्येतत्समाना एवेति ॥ २७ ॥ अत एवाह—

एवंपि समा जीवा, एगपएसगयजियपएसेहिं । बायरबाहुल्ला पुण, हुंति पएसा विसेसहिया ॥ २८ ॥

एवमपि न केवलं 'गोलो जीवो य समा' इत्यादिना पूर्वोक्तन्यायेन समा जीवा एकप्रदेशगतैर्जीवप्रदेशैरिति । उत्तरार्द्धस्य तु भावना प्राग्वदवसेयेति ॥ २८ ॥ अथ पूर्वोक्तराशीनां निदर्शनान्यभिधित्सुः प्रस्तावयन्नाह—

तेसिं पुण रासीणं, निदरिसणमिणं भणामि पच्चक्खं । सुहगहणगाहणत्थं, ठवणारासिप्पमाणेहिं ॥ २९ ॥

गोलाण लक्खमिक्कं, गोले गोले निगोयलक्खं[१] तु । इक्किक्के य निगोए, जीवाणं लक्खमिक्किक्कं ॥ ३० ॥

कोडिसयमेगजीवप्पएसमाणं तमेव लोगस्स । गोलनिगोयजियाणं, दसउ सहस्सा समोगाहो ॥ ३१ ॥

जीवस्सिक्किक्कस्स य, दससाहस्सावगाहिणो लोए । इक्किक्कंमि पएसे, पएसलक्खं समोगाढं ॥ ३२ ॥

जीवसयस्स जहण्णे[२], पयम्मि कोडीजियप्पएसाणं । ओगाढा उक्कोसे, पयंमि वुच्छं पएसग्गं ॥ ३३ ॥

कोडिसहस्स जियाणं, कोडाकोडीजियप्पएसाणं[३] । उक्कोसे ओगाढा, सव्वजिया वित्तिया[४] चेव ॥ ३४ ॥

---

१ 'गोले गोले य लक्खमिक्कं तु' इत्यपि पाठः । २ 'जहन्नो' इत्यपि । ३ 'दसप्पएसाण' इत्यपि । ४ 'वत्तिया' इत्यपि ॥

'तेसिं' ॥ २९ ॥ 'गोलाण' ॥३०॥ 'कोडिसयं' ॥ ३१ ॥ 'जीवस्स' ॥३२॥ 'जीवसयस्स' ॥३३॥ 'कोडिसहस्स' ॥३४॥

कोडी उक्कोसपयम्मि बायरजियप्पएसपक्खेवो । सोहणयमित्तियं चिय, कायव्वं खंडगोलाणं ॥ ३५ ॥

उत्कृष्टपदे सूक्ष्मजीवप्रदेशराशेरुपरि कोटीप्रमाणो बादरजीवप्रदेशानां प्रक्षेपः कार्यः; शतकल्पत्वाद्विवक्षितसूक्ष्मगोलकाव-गाढबादरजीवानां तेषां च प्रत्येकं प्रदेशलक्षस्योत्कृष्टपदेऽवस्थितत्वात्, तन्मीलने च कोटीसद्भावादिति । तथा सर्वजीवरा-शेर्मध्यात् शोधनकमपनयनं 'इत्तियं चिय' इति एतावतामेव कोटीसंख्यानामेव कर्त्तव्यं; खण्डगोलानां खण्डगोलकपूर्ण-ताकरणे नियुक्तजीवानां तेषामसद्भाविकत्वादिति ॥ ३५ ॥

एएसिं जहा संभवमत्थोवणयं करिज्ज रासीणं । सब्भावओ अ जाणिज्ज ते अणंता असंखा वा ॥३६॥

॥ समाप्तेयं निगोदषट्त्रिंशिका ॥

इहार्थोपनयो यथास्थानं प्राग्दर्शित एव 'अणंता' इति । निगोदे जीवा यद्यपि लक्ष्यमानास्तथाप्यनन्ता एवं सर्वजीवा अपि । तथा निगोदादयो ये लक्ष्मानास्तेऽप्यसंख्येया अवसेयाः ॥ ३६ ॥ इति सूक्ष्मबादरनिगोदगोलकावगाहनाविचारः ॥

इति श्रीभगवत्येकादशशते दशमोद्देशके निगोदषट्त्रिंशिकावृत्तिः समाप्ता ॥

॥ इति सवृत्तिका निगोदषट्त्रिंशिका समाप्ता ॥